5.2

4183

॥ श्रीः ॥

विद्याधरकृता

एकावली

मल्लिनाथकृतेन तरलेन समन्विता

सम्पादकः

डा. पुल्लेल श्रीरामचन्द्रुडु

संस्कृत–विभागः,

उस्मानियाविश्वविद्यालयः, हैदराबाद–५००००७

१९८१

विद्याधरकृता एकावली
मल्लिनाथकृतेन तरलेन समञ्चिता ।

मूल्यम्– रु. ५०–००

प्राप्तिस्थानम्–

अध्यक्षः, संस्कृतविभागः,
उस्मानिया विश्वविद्यालयः,
हैदराबाद–५००००७.

मुद्रणस्थानम्–

सुधामुद्रणमन्दिरम्,
बसवनगुडि, बेंगलूरु–५६०००४.

EKAVALI

of VIDYADHARA

with the commentary TARALA

of Mallinatha.

Editor :

Dr. P. Sriramachadrudu.

Department of Sanskrit,
Osmania University,
Hyderabad-500007.

EKAVALI of Vidyadhara
with the commentary
TARALA of Mallinatha.

Price: Rs. 50-00

Copies can be had from:

Head, Dept. of Sanskrit,
Osmania University,
Hyderabad-500007.

Printed at:

Sudha Mudrana Mandiram,
Uttaradi Mutt Compound,
Basavanagudi,
Bangalore-560004.

FORWARD

We are glad to present to the scholars 'EKAVALI' of Vidyadhara, with 'TARALA' of Mallinatha. This book was excellently edited by Dr. K. P. Trivedi. The book unfortunately is not available now. So it was planned to publish Ekavali to make the text of a very important work on Sahityashastra, available to the readers. While preparing this edition, the Telugu edition of EKAVALI is also consulted.

We are greatful to the authorities of Osmania University especially to Prof. G. Ram Reddy, Vice Chanceller, Osmania University for kindly sanctioning Rs. 12,CCO/– and enabling the Department of Sanskrit, Osmania University, to undertake this work. This sincerely hoped that the Department of Sanskrit of Osmania University would receive encouragement from the scholars, as well as the University authorsty to undertake similar projects in future.

Hyderabad.

P. G. LALYE

(Head of the dapt. of Sanskrit, Osmania University)

General Editor

INTRODUCTION

Ekavali is one of the many works on Sanskrit poetics modelled on the Kavyagrakasa of Mammta, and strictly following the Dhvani siddhanta established by Anandavardhana. Like Kavyaprakfsa it consists of Karikas, Vrtti and Udaharanas and all of them are from the pen of the same author, Vidyadhara.

The date of Vidyadhara has been fixed by scholars with sufficient approximetion. The latest writer mentioned by Vidyadhara is Ruyyakka. . This gives us ons terminus to his date at the middle of 12th century. Vidyadhara's reference to Sr Harsa, the author of Naisadhiyacarita who lived in the middlei of the 12th century supports the above conclusions. But Vidyadhara's allusion to the poet Harihara who is said to have obtained amazing wealth from a king Arjuna, the ruler of Malava puts this terminus a little lower at the first quarter of 13th century. The Ekavali in its turn is quoted by Singabhupala whose date is fixed at 1330 A. D. who writes in Rasarnavasudhakara—"उत्कलाधिपतेः शृङ्गाररसाभिमानिनो नरसिंहदेवस्य चित्तमनुवर्तमानेन विद्याधरेण कविना बाढमभ्यन्तरीकृतोऽसि, एवं खलु समर्थितमेकावल्यामनेन"

The illustrative stanzas are composed by Vidyadhara to glorify the king Nrsimha or Narasimha, king of Kalinga or Utkala.* Evidently he was patronised by the king Narasimha, n whose court he must have lived In the list of kings of Orissa

---

*"Our earliest glimpses at Orissa disclose an unexplored maritime Kingdom stretching from the mouth of the Ganges to the mouth of the Krishna. It was a long narrow strip of coast every where shut out from the Indian Continent by a wide

given by Robert Sevell in his 'Sketch of the Dynasties of Southern India' (Appendix XVII pp 64 to 69) eight kings bearing the names of Narasimha are mentioned.

(1) Narsingh Deva B.C. 421-306.
(2) Narsinh Kesari A.D. 1013-1024.
(3) Languliya Narsinh A.D. 1237-1282.
(4) Kesari Narasinh A.D. 1282-1307.
(5) Pratab-Narsinh A.D. 1307-1327.
(6) Kail Narsinh A.D. 1329-1330.
(7) Narsinh Jana A.D. 1549-1550.
(8) Narsinh Deva A.D. 1628-1653.

---

* Continued......

terra incognita of mountains and forests. Under the name of Kalinga it appears in the list of countries so frequently reproduced in Sanskrit writings and generally in one stereotyped order, coming immediately after lower Bengal, as if adjoining it in the same way as the Lower Provinces of Bengal are invariably placed after the northern ones. It formed one of the five outlying kingdoms (Anga, Vanga, Suhma & Pundra) of ancient India with its capital situated about half way down the coast and still surviving in the present city of Kalingapatnam. We soon however become conscious of the territory being divided into two parts. The name Kalinga is applied more distinctively to the delta of the Godavari, while the delta of Mahanadi on the north gradually stands out as a separate country'' 'Orissa' by Sir W.W. Hunter, Vol. I. pp. 170-1.

"The northern kingdom that thus looms hazily forth on the horizon of history was known as Odra or Utkala. The orthodox insist that it means the Glorious Country. Lexicographers suggest that it may only be the Land of the Bird-Killers and an admirable student of the modern Aryan tongues interprets it as the Outlying Strip". 'Orissa' by Sir W. W. Hunter, Vol. I., p. 172. The outlying Strip is explained in a foot-note on p. 82 as meaning 'lying beyond the Gangetic valley' from Utkala = Katila = cut off. (Quoted from the Introduction of Trivedi)

Vidyadhara mentions as noted above, the poet Harihara and the king Arjuna who flourished in the beginning of the Thirteenth Century, Sriharsa who lived in the 12th century, Mammata who florished in the later part of the 11th century and the beginning of the 12th centuary. He quotes from Bilhana who is placed in the later part of the 11th centuary. Ekavali is quoted by Singabhupala of the fourteenth centuary. It is commented upon by Mallinatha of the later part of the 14th century. Vidyadhara describes his patron Narasimha as Hammira mana mardana (one who has crushed the Pride of Hammira) and this Hammira is identified as the hero of Hammira Mahakavya of Nayachandra suri who is said to have begun his reign in 1283 A. D. On the strength of the above evidance K. P. Trivedi states — "These considerations make it clear that Vidyadhara must have flourished in the reign of either of two remainig Narasimhas, Kesari Narasinha (1281–1307) or Pratab Narsinha (1307–1327) of Mr. Sewell or Narsinha II of inscriptions and that the Ekavali was composed in the beginning of the 14th centuary".

R. G. Bhandarkar declars (in the note appended to the introductions of Trivedi) that "Narsinha II (i.e. Kesary Narasinha 1282–1307) was the Narasimha of the Ekavali is rendered highly probable, or I might say, certain, by the fact that in the inscriptions of Narasinha IV he is in one place called 'कविप्रिय' or favorite of poets and in another 'कविकुमुदचन्द्र' "the moon that made the night lilies in shape of poets expand". This description applies to the hero of the Ekavali, both because he was chosen for his panegyric by Vidyadhara and because he must have patronised him and others like him".

Besides Ekavali, another work of erotic nature, Kelirahasya has been ascribad to Vidyadhara. This work begins with the following verse:

येनाकारि प्रसभमचिरादर्धनारीश्वरत्वं
दुग्धेनापि त्रिपुरजयिनो ज्योतिषा चाक्षुषेण ।
इन्दोर्मित्रं स जयति मुदा वामवामप्रचारो
देव: श्रीमान् भवरसभुजां दैवतं चितजन्मा ।।

It is divided into eighteen paricchedas. It is belived to be a compendium of a larger work Ratirahasya on the subject by Kokkoka.

Ekavali is a simple work on Alankara Sastra dealing with all the important topics connected with that sastra and at the same time avoiding unnecessary long discussions. In this work Vidyadhara's own verses, evlogising his patron, are given as examples and in this aspect it resembles the Pratapa-rudriyasobhusnam, the Nanjarajayasobhuswna, the Raghu-nathabhupaliya and the Alankara Manjusa. This work is divided into eight chapters or Unmesas.

In the first chapter, after explaining how vedas, puranas and Kavyas differ in guidlng the people on good path being Prabhusammita, Maitrisammita and Kantasammita, Vidyadhara refers to the Kavyaprayojanas and the Kavyahetu on the lines of Kavyaprakasa. Closely following Anandavardhana, he refutes the views of those who do not accept Dhvani and establishes its importance in a Kavya. He also refutes the theory of Vamana who had declared Riti as the soul of poetry.

In the second chapter, he deals with the three Sabdavrittis Abhidha, laksana and Vyanjana. Along with the two varites of laksana Jahatsvartha and Ajahatsvartha a third varities Jahadajahatsvartha also is accepted on the lines of the Vedantins.

In the third chapter he explains the varieties of Dhvani closely following Anandavardhana and Mammata. In the fourth chapter Vidyadhara explains and illustrates the eight varities of Gunibhutavyangya: १) अगूढ २) अपराङ्ग ३) वाच्य सिद्ध्यङ्ग ४) अस्फुटव्यङ्ग्य ५) सन्दिग्धप्राधान्य ६) तुल्यप्राधान्य ७) काक्वाक्षिप्त ८) असुन्दर

Though he explains these varieties closely following Mammata, he does not enter, like Mammata, into the discussion on such topics like अभिहितान्वयवाद and अन्विताभिधानवाद etc., While dealing with the gunas in the fifth chapter, Vidyadhara closely follows Mammata 1) Accepts only three gunas Madhurya, Ojas and Prasada 2) always being associated with poetic sentiment 3) by Samavayasambandha 4) Necessarily heightening its beauty. He maintains clear distinction between gunas and alankaras. He also tries to explain away the other Gunas as being the negations of Dosas or being included under the accepted ones. He is silent about the Arthagunas. He accepts three Ritis Vaidarbhi, Gaudi and Panvacali and following Bhoja, feels that the other varities like आवन्तिका, लाटि and मागधी can be included under the above mentioned three varieties.

In the sixth chapter, Vidyadhara deals with the Dosas. Though an ardent follower of Mammata he is very brief in dealing with the Dosas. He does not refer to the Dosas of Rasa at all. Mammata explains 16 padadosas, 13 vakyadosas, 7 padamdosas, 21 dosas which are associated with only Vakyas (Vakyamatragata) and 23 Dosas of Artha. He also mentions about 10 dosas connected with Rasa. Vidyadhara deals with only six Dosas (with their subdivisions) i.e. १) अविमृष्टविधेयांश–समासगत २) अविमृष्टविधेयांश–वाक्यगत ३) प्रक्रम-भङ्ग ४) अवाच्यवचन ५) वाच्यावचन ६) पौनरुक्त्यं

Like Mammata, he also discusses incidentally about the appropriate use of यच्छब्द and तच्छब्द in a sentence. In the seventh chapter he deals with 5 Sabdalankaras with their subdivisions, following Mammata in some cases (like Yamaka).

In the last chapter he deals with the Arthalankaras. In the treatment of Arthalankaras Vidyadhara mostly followes Ruyyaka whose classification is considered by the acclaimed authors on poetics to be logical, reasonable and perfect Like Ruyyaka Vidyadhara classifies all the Alankaras under seven different suitable heads, viz:

1) सादृश्यगर्भ	bases on similarity.
2) विरोधगर्भ	based on opposition.
3) शृङ्खलागर्भ	based on like succession.
4) तर्कन्यायमूल	based on logical reasoning.
5) वाक्यन्यायमूल	based on syntactical reasoning.
6) लोकन्यायमूल	based on well-known sayings.
7) गूढार्थप्रतीतिमूल	based on apprehension of deep sense.

१) सादृश्यगर्भालङ्काराः—

१) उपमा	७) सन्देह
२) उपमेयोपमा	८) भ्रान्तिमत्
३) अनन्वय	९) उल्लेख
४) स्मरण	१०) अपह्नुति
५) रूपक	११) उत्प्रेक्षा
६) परिणाम	१२) अतिशयोक्ति

१३) तुल्ययोगिता
१४) दीपक
१५) प्रतिवस्तूपमा
१६) दृष्टान्त
१७) निदर्शना
१८) व्यतिरेक
१९) सहोक्ति
२०) विनोक्ति
२१) समासोक्ति
२२) परिकर
२३) परिकराङ्कुर
२४) श्लेष
२५) अप्रस्तुतप्रशंसा
२६) अर्थान्तरन्यास
२७) पर्यायोक्त
२८) व्याजस्तुति
२९) आक्षेप

२) विरोधगर्भालङ्काराः—

३०) विरोध
३१) विभावना
३२) विशेषोक्ति
३३) अतिशयोक्ति
३४) असङ्गति
३५) विषम
३६) सम
३७) विचित्र
३८) अधिक
३९) अन्योन्य
४०) विशेष
४१) व्याघात

३) शृङ्खलाबन्धमूलालङ्काराः—

४२) कारणमाला
४३) एकावली
४४) मालादीपक
४५) सार

४) तर्कन्यायमूलालङ्काराः—

४६) काव्यलिङ्ग
४७) अनुमान

५) वाक्यन्यायमूलालङ्कारः—

४८) यथासङ्ख्य

४९) पर्याय

५०) परिवृत्ति

५१) परिसङ्ख्या

५२) अर्थापत्ति

५३) विकल्प

५४) समुच्चय

५५) तत्कर

५६) समाधि

६) लोकन्यायमूलालङ्काराः —

५७) प्रत्यनीक

५८) प्रतीप

५९) मीलित

६०) सामान्य

६१) तद्गुण

६२) अतद्गुण

६३) उत्तर

६४) प्रश्नोत्तरिका

७) गूढार्थप्रतीतिमूलकालङ्काराः—

६५) सूक्ष्म

६६) व्याजोक्ति

६७) वक्रोक्ति

६८) स्वभावोक्ति

६९) भाविक

७०) उदात्त

७१) संसृष्टि

७२) सङ्कर

Thus he deals with 72 Alankaras mainly following Ruyyaka.

As the foregoing account indicates Vidyadhara has very little of his own to present to the students of Alankarasastra. What all he did was to collect views of different authors of important works like Dhvanyaloka, Kavyaprakasa and Alankarasarvasva and present them in a systematic manner for the benefit of the new entrants into the field of Alankara sastra.

It is no wonder, therefore, this work has been practically for gotten within a short time of its appearence as is indicated by the statement of Mallinatha who claims that his commentary will resurrect this great work from the course of obilvian.

"एकावली गुणवतीयमलंक्रियापि यद्वैशसादजनि कोशगृहेषु सुप्ता ।
तेनोज्ज्वलेन तरलेन समेत्य धन्यैः कण्ठेषु चाद्य हृदयेषु च धार्यतां सा ॥"

But as can be seem from the result, even Mallinatha's Tarala has failed in bringing this Ekavali to the necks and chests of the sahrdayas, because they were naturally attracted by more perfect and comprehensive works like Prataparudrayasobhusana and Sahityadarpana etc.,

TARALA :—Tarala (central gem) is the commentary on Ekavali (one stringed necklace) by Kolacala Mallinatha the well-known commentrator of the five Mahakavyas and the Bhatti kavya. It is a very valuable commentary written in simple language free from unnecessary discussions which are generally found in other commentaries and so it is very much useful to the students.

Following are the commentaries and works attributed to Mallinatha :—

१) रघुवंशटीका– सञ्जीविनी
२) कुमारसम्भवटीका– सञ्जीविनी
३) मेघसन्देशटीका– सञ्जीविनी
४) किरातार्जुनीयटीका– घण्टापथः
५) शिशुपालवधटीका– सर्वङ्कषा
६) नैषधीयचरितटीका– जीवातुः
७) भट्टिकाव्यटीका– सर्वपथीना
८) एकावलीटीका– तरलः
९) प्रशस्तपादभाष्यटीका– निष्कण्टिका (भाष्यनिकरः इति नामान्तरम्)
१०) तार्किकरक्षाटीका– निष्कण्टिका
११) तन्त्रवार्तिकटीका– सिद्धाञ्जनम्
१२) स्वरमञ्जरीटीका– परिमलः
१३) न्यासटीका– न्यासोद्योतः
१४) काव्यादर्शटीका– वैमल्यविधायिनी
१५) नलोदयटीका – तरलः
१६) वैश्यवंशसुधाकरः
१७) रघुवीरचरितम्
१८) उदारकाव्यम्
१९) भक्तिरहस्यम्
२०) नक्षत्रपाताध्यायः

Mallinathas Identification :

We come across about ten persons with the same name Mallinatha. 1) There is reference to one Mallinatha in the Bhoja Prabandha of Ballalasena of 13th century. He can not be identified with our Mallinatha of 14th century. 2) A commentrator on Naisadhiyacharita, Narahari, of about 1222 A.D. who lived in Tribhuvanagiri in Andhradesa states t hat he is the son of Mallinatha who also must be a ifferent dperson. 3) One scholar who claims himself to be a son of Mallinatha seems to have copied Kumarasambhava and its commentary in A.D. 1603. As Mallinatha's son must have flourished in the 15th century, this Malilnatha is evidently a later person of the same name. 4) Another Mallinatha of about 1722 A.D. was the author of a treatise on Ayurveda called Pathyapathyanirut pana. 5) The Jain scholar bearing the same name, Mallinatha also must be a different person because our Mallinatha is a follower of Vedic religion as is evident from his works. 6) Aufrects' ctatalogus catalogorum contains the name of a som of Adityavarma and father of Tribhuvanadeva, the author of Prakratavyakaranavrtti and this Mallinatha might be a Ksatriya as can be inferred by the names of his father and son. 7) Narahari, the author of Balacittanuranjani a commentary on Kavyaprakasa who was born in the year 1242 A.D. is known as the son of Mallinatha. But this Mallinatha was a native of Tribhuvanagirigrama in Caddapah district, Andhra Desa and his son was Narasimhabhatta. The name of his another son was Narayana and he belongs to Vatsagotra as per the details given by Durgaprasada Sastri in his introduction to Magha. From the date and other particulars, it is quite evident that he is different from our Mallinatha. 8) According to pandit Vamanacharya of Deccan College, Mallinatha was native of a village Gajendragada in the district of Dharvad, but no proof has been shown supporting this ascertain excepting that some families in that village claim descent from Mallinatha.

9) There is a commentary named 'Amarapadaparijata' on Amarakosa which has been wrongly ascribed to Mallinaths by Aufrect. It is clearly mentioned in the introductory verses that he belongs to Bollapainni family of Srivatsa gotra, his father's name being Nrsimhasuri–

"व्याचक्षेऽमरसिंहनामकमहे श्रीवत्सगोत्रोद्भवो

बोल्लापिन्नि नृसिंहसूरितनयः श्रीमल्लिनाथो मुदा"

Thus there are ten Mallinathas known in the history of Sanskrit literature all of whom are different from our Mallinatha.

Though we are able to know from some of the colophones of the works of Mallinatha that he was a great scholar of Vyakarana, Mimamsa and Nyaya "पदवाक्यप्रमाणपारावारपारीण" with a title "महोपाध्याय" nothing can be gathered about his family or ancestors, from his works. But help can be derived in this regard, to some extent, from what is written by one Narayana Pandita, (who belongs to the Ninth generation from Mallinatha) in his commentary on Campuramayana, and by the sons of Mallinatha Kumaraswami sompapithin and Girinatha in their commentaries on Prataparudrayasobhusana and Svaramanojnamanjari. Narayana pandita writes at the beginning of his commentary as quoted by Sri Veturi Prabhakara sastri in his work 'Migadatarakalu'–

"कोलचल्मान्वयाब्धीन्दुर्मल्लिनाथो महायशाः । शतावधानविख्यातो वीररुद्राभिवर्षितः ॥ मल्लिनाथात्मजः श्रीमान् कपर्दी मन्त्रकोविदः । अखिलश्रौतकल्पस्य कारिकावृत्तिमातनोत् ॥ कपर्दितनयो धीमान् मल्लिनाथोऽग्रजः स्मृतः । द्वितीयस्तनयः श्रीमान् पेद्दिभट्टो महोदयः ॥ महोपाध्याय आख्यातः सर्वदेशेषु सर्वतः । मातुलेयकृतौ दिव्ये सर्वज्ञेनाभिवर्षितः ॥ गणाधिपप्रसादेन प्रोचे मन्त्रवरान् बहून् । नैषधज्योतिषादीनां व्याख्याताभूज्जगद्गुरुः ॥ पेद्दिभट्टसुतः श्रीमान् कुमारस्वामिसंज्ञकः । प्रतापरुद्रीयाख्यानव्याख्यात, विद्वदग्रिमः ॥ तनयास्तस्य चत्वारो महादेवस्तदग्रजः ।......

According to what is written here, during Prataparudra's time there was a great scholar and Satavadhani Mallinatha of Kolacerla family. He had a son Kapardi, well versed in vedic lore. He had two sons Mallinatha (our Mallinatha) and Peddibhatta. Kumaraswamin was the son of Peddibhatta and he had four sons the eldest of them being Mahadeva. His son was Sambhu his son Bhaskara, his son Nagesvarayajvan. Narayan was the son of the second Nagesvarayajvan.

कोलचल्म मल्लिनाथ । (शतावधानी)

|

कपर्दी

|

मल्लिनाथः ॥ — पेद्दिभट्टः

|

कुमारस्वामी

|

महादेवः

|

शम्भुः

|

भास्करः

|

नागेश्वरयज्वा ।

|

कोण्डुभट्टः

|

नागेश्वरयज्वा ॥

|

नारायणपण्डितः

Kumarasvami somapithin mentions the names of only his father Mallinatha and brother Peddayarya :-

''तस्य श्रीमल्लिनाथस्य तनयोऽजनि तादृशः ॥
कोलचल पेद्दयार्यः प्रमाणपदवाक्यपारदृश्वा यः ।
व्याख्यातनिखिलशास्त्रः प्रबन्धकर्ता च सर्वविद्यासु ॥
तस्यानुजन्मा तदनुग्रहात्तविद्योऽनवद्यो विनयावनम्रः ।
स्वामी विपश्चिद्भितनोति टीकां प्रतापरुद्रीयरहस्यभेत्रीम् ॥

Mallinatha
|
Peddayarya — Kumarasvamin

According to what is written by Girinatha the lineage can be shown as below :-

Mallinatha I
|
Kapardi
|
Mallinatha II
|
Peddibhatta — Kumarasvamin — Girina-eht

As can be seen from the above lists there is confusion about the names of the persons and their identification. According to Narayana pandita Kapardi had two sons Mallinatha (elder) and Peddibhatta and the latter was a great scholar and the author of many works and he had a son Kumarasvamin who was the author of the commentary on Prataparudrayasobhusana. This is conflied with what is mentioned by Kumarasvamin and Girinatha. According to them, Mallinatha does not seem to have any brother. He himself was a great scholar and the author of many works and had three sons Peddibhatta, Kumarasvamin and Girinatha author of the com mentary, 'Parimala' on 'Svaramanojnamanjari'. Of course

Kumarasvamin mentions only about his elder brother, because he wanted to tell us that he was his guru also. In order to solve these conflicting views one has to relie upon the statements of Mallinatha's sons rather than on those of a person belonging to the ninth generation who must have been misled by the many stories about Mallinatha and Peddibhatta current in his time.

There is a great confusion regarding the connection between Mallinatha and Peddibhatta and their identification on account of many stories woven around the life of Mallinatha. According to one story Mallinatha was a dullard during his young age till he acquired scholarship at a rather very later age of 35 through the grace of a guru at Varanasi and sho he was given (during his boyhood) a nick name Peddarra (a fool which was changed as peddibhatta by adding an honorfic titile Bhatta, after he became well versed in all the Sastras. This makes Mallinatha identical with Peddibhatta. According to another story, Mallinatha had a younger brother called Peddibhatta who was a great scholar and who wrote many works and attributed them to his elder brother on account of his great respect for him. This story is perhaps based on an attempt to explain the reason for some of the works of Mallinatha being authored on Peddibhatta in some manuscripts. Narahari must have, evidently, been coufused by this story and mentioned this in the introductory slokas. We have to give credence to what is said by Mallinatha's own sons rather than to the own which is sald by a person who is seperated by eigh generations. It is, therefore quite possible that Mallinatha had another name Peddibhatta, whatever might be the cause of its origin, and his eldest son also was Peddibhatta or Peddayarya. Thus one need out accept another theory, that Peddayarya was writing books and ascribing them to his father. At the best it may be said that Peddayarya, competent like his father as he was, was assisting Mallinatha in writing Some of the works.

Mallinatha has been described as being the native of different places by different scholars, Mallinatha's surname is 'Kolacala' which is spelt in various ways–Kolacala, Kolacela Kolacelama, Kolacelama, Kolacelma, Kolacalma, Kolacarla, Ko!acela, Kolacalama etc., The surnames generally being the village names, it is now established, on the strength of other evidence also, that Mallinatha was a native of the village Kolacelama near Pattamceruvu of Medak District, Andhra Prapesh. It explains the connection of the member's of his family with the Kakatiyas of Orugallu (now Warangal) and the kings of Racakonda. (Mallinatha I, the grandfather of our Mallinatha received the honour of Kanakabhisheka from Pratarudra and according to an inscription Peddibhatta, the son of Mallinatha received the gift of land from Anapota Reddy, father of Sarvajna Singabhupala)

Mallinatha's time can be fixed in fairly narrow limits. Mallinatha quotes from the works of writers his immediate predecessors and contemporaries. Bhandarkar was of the opinion that Mallinatha flourished before 14th century, because he did not quote from the Medinikosa which was written at about 1400 A. D. But it is to be mentioned here, though Medinikosa was not quoted in the earlier commentaries, it was quoted in the commentaries of Sisupalavadha and Naisadhiyacarita after it came to the notice of Mallinatha.

There was despute about the status of Vaisya and Vyaparins mentioned in the lists of Kancipuram for settling which Praudhadevaraya II (1426 A.D.) invited Mallinatha to his court. Mallinatha gave his decision in his work Vaisyavamassudhakara. On the strength of this work Dr. Raghavan assigned Mallinatha to about 1430 AD K.P. Trivedi also assigns him to the 14th century Mallinatha quotes passages from Prataparudrayasobhusana about 200 times. . In Tarala he quotes passages from Rasarnavasudhakara of Sarvajnasingabhupala of Racakonda which was written about 1370 A.D. Kumaragiri's Vasantarajiya must have been written between 1386–1402 from which Mallinatha has lived a full life of 84 years he can be assigned to the period between 1340–1445 A.D.

Tarala on Ekavali is written in simple language and lucid style with the main purpose of expounding the original text. We find three types of commentaries on Sastric works. Somy commentariesare writ ten just to explain text, some for advrersle criticising the original texts and some to add new points while meeting all the possible objections of the opponents. Many of the standard commentaries belong to the third category. We come across a few commentaries belonglng to the second category like the commentary Gurumarmaprakasa of Nagesha On Rasagangadhara and the one written dy Ruyaka on Vyakt! viveka where the commentatore try, at every step, to challenge the views expressed in the orginal tests. Commentaries like the Balomanorama of Vasudevadiksita on Siddhantaumudi belong to the first category where the commentator seldom has any thi ng new to add to the original text his main occupation being to lexplain the meaning of original text and Tarala of Mallinatha belongs to this category. When the outhor of the original text itsulf has nothing new of his own it is futile to search for something special from the commentator. Vidyahdhara, the author of Ekavaly has borrowed every thing from his predecessors like Andndavardhana, Abhinavagupta, Mammata and Ruyyaka, taking some passages from them verbatim and adopting, in some places, with slight adaptations. Mallinatha is content with simply explaining the original text without adding anything of special significance. But is explaining the original text is the main critaria of a good commentary, it can be undoubtedly said that this has been achieved by Mallinatha in ample measure, because Ekavali with Tarala may be said to be one of the best works useful for inetiating a student into sanskrit poetics.

Dr. P. Sri Ramachandrudu

Reader in Sanskrit &
Director, Sanskrit Academy,
Osmanir University.

Hyderabad,
12 DEC 1981

Books consulted :

1. Ekavali with Tarala : Edited by K. P. Trivedi. Bombay Govt. services No. 63 1903
2: Hfstory of Sanskrit poetics : P. V. Kane.
3. Sanskrit poetics : S. K. De
4' M.Phil dissertion of my student Mrs.P.H.Belsare (unpublished)
5. Mallinathasuri Jivitamu-racanalu (in Telugu) by Sri K.B. Ramanujacheryulu and Sri Gumm Sankara Rah

॥ श्रीः ॥

श्रीविद्याधरकृता

एकावली

श्रीमल्लिनाथकृततरलाख्यटीकया समेता

प्रथमोन्मेषः

मूलम्— प्रालेयाचलकन्यकाकुचतटीपत्रावलीशिल्पिनः
प्रेङ्खद्भालविलोचनानलशिखानिष्पीतचेतोभुवः ।
देवस्येन्दुविभूषणस्य सु(रु)[1]चिरं पादारविन्दद्वयं
युष्मान् पातु सुरासुरेश्वरशिरोरत्नांशुकिञ्जल्कितम् ॥ १ ॥

तरलः टीकारत्नम्—

अग्रे कृत्वा प्रियसहचरीमन्तिकं सम्प्रयान्तीं
व्रीडाभारादवनतमुखीमम्बिकामादरेण ।
लोलापाङ्गं प्रणयमधुरं लोचनान्तेन पश्य-
न्नन्तस्तुष्यन्नवतु भगवानम्बिकावल्लभो नः ॥ ॥ १ ॥

अध्यारूढः कपर्दं पितुरमरधुनीं हेलया गाहमानः
कर्षन् हर्षातिरेकात् कनककमलिनीषण्डमुद्दण्डवृत्त्या ।
अन्तर्मग्नः कराग्रं फणिपतिशिरसि स्वैरमाधाय तोयं
मुञ्चन् सिञ्चन्नधस्तात् प्रमथपतिशि(शून् भा)शुर्भाति[2] बालो गणेशः ॥ २ ॥

---

१) 'सुचिरम्' इति व्याख्यासम्मतः पाठः, परन्तु रुचिरमिति पाठो युक्त इति प्रतिभाति ।

२) अमरधुन्याः अन्तः निमज्य केवलं करं कपर्दोपरि स्थितस्य फणिपतेः शिरसि निधाय तद्द्वारा अधःस्थितेषु स्वमित्रेषु केषांचित् प्रमथनायकानां पुत्रेषु जलं विकिरन् गणेशो भातीति भावः ।

स्वीयैर्नित्यं गुणपरिमलैर्मोदयन्ती दिगन्ता-
नत्युद्दण्डैरमृतकिरणैरैन्दवी लेखिकेव ।
सालङ्कारा सुललितपदा साधुवृत्ता सभावा
माता नित्यं मम भगवती भारती सन्निधत्ताम् ॥ ३ ॥

वाणीं काणभुजीमजीगणदवासासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥ ४ ॥

मल्लिनाथकविः सोऽयमेकावल्यामलङ्कृतौ ।
टीकारत्नं निबध्नाति तरलं नाम नामतः ॥ ५ ॥

एकावली गुणवतीयमलंक्रियाऽपि[1]
यद्वैशसा[2]दजनि कोशगृहेषु गुप्ता ।
तेनो(ज्ज्व)ह्वलेन तरलेन समेत्य धन्यैः
कण्ठेषु चाद्य हृदयेषु च धार्यतां सा ॥ ६ ॥

शास्त्रारम्भे शिष्टाचारं प्रमाणयन् प्रारिप्सितस्याविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलकामनया विशिष्टेष्टदेवताप्रसादमाशास्ते प्रालेयेत्यादिना श्लोकेन । वैशिष्ट्यञ्चेह देवताया वेदैकवेद्यत्वात् । इष्टत्वं चेष्टार्थवितरणताच्छील्यात् । तच्चोभयं भगवतः परमेश्वरस्य सर्वोगास्यत्वं प्रतिपादयता सुरासुरेत्यादिविशेषणेन सूच्यते । अन्यथा सर्वोगास्यत्वभङ्गात् । तेन जगत्स्थापकत्वमस्य ध्वनितम् । प्रालेयेत्यादिविशेषणेनास्य देव्या सह सम्भोगशृङ्गारं प्रतिपादयता जगज्जनकत्वं प्रेङ्खदित्यादिना तन्मूलभूतकामोपसंहारकत्वं प्रतिपा-

१) अलंक्रिया – अलङ्कारग्रन्थः प्रतिपाद्यप्रतिपादकयोः अभेदः ।
२) यद्वैशसात् – यदभावात् हेतोरित्यर्थः ।

दयता जगत्संहर्तृत्वं च द्योत्यत इति देवतायाः सर्वोत्कृष्टता ध्वनिः । कामित्वकामहरत्वयोरेकदैकत्र विरोधस्यावभासमानस्य भगवतोऽत्यद्भुतमहिमतया परिहृतत्वेन विरोधाभासोऽलङ्कारः प्रथमार्धे । 'आभासत्वे विरोधस्य विरोधाभासता मता' इति तल्लक्षणात् । स च ध्वन्यते न तु वाच्यत इति वक्ष्यति । द्वितीयार्धे तु रत्नांशुकिञ्जल्कितं पादारविन्दद्वयमिति समस्तवस्तुविषयकं सावयवरूपकं वाच्यमेव । अन्यत् स्वयमेव दर्शयिष्यति । प्रलयादागतं प्रालेयं हिमम् । 'तुषारस्तुहिनं हिमम् । प्रालेयं मिहिका' इत्यमरः 'तत आगतम्' इत्यण् प्रत्यये 'केकयमित्रयुप्रलयानां यादेरियः' इतीयादेशे गुण आदिवृद्धिः । प्रालेयाचलकन्यका पार्वती तस्याः कुचतटीपत्रावलीनां शिल्पिनो निर्मातुः । एतेनास्य नित्यकामुकत्वमुक्तम् । प्रेङ्खन्त्या दोलायमानया भालविलोचनानलस्य शिखया ज्वालया निष्पीतचेतो भुवो निर्दग्धकामस्य । एतेन नित्यवैराग्यमस्योक्तम् । विरोधस्तु निरस्त एव । सुचिरमिति सर्वदेत्यर्थः । सुशब्दसामर्थ्यात् । रत्नांशुभिः किञ्जल्कितं सञ्जातकिञ्जल्कम् । 'तदस्य सञ्जातं तारकादिभ्य इतच्' । ईदृक् देवस्य पादारविन्दद्वयं युष्मान् सुचिरं पात्विति सम्बन्धः पादावेवारविन्द इति रूपकम्; रत्नांशूनां किञ्जल्कत्वेन रूपणाल्लिङ्गात् । सुगममन्यत् ।

ननु किमिदम् — ग्रन्थादौ सर्वेऽपि ग्रन्थकर्तारः प्रस्तुतमुपेक्षाप्रस्तुतं नमस्कारादिकमाचरन्ति । तदनुपपन्नम् । 'वाजपेयस्तिष्ठतु, शरद्वर्ण्यताम्' इतिवदसाङ्गत्यादित्यभिप्रेत्य प्रत्यवतिष्ठते, नमस्कारात्मकमित्यादिना नमस्काराचरणप्रवृत्त्यभावप्रसङ्गादित्यन्तेन सन्दर्भेण—

मू०— ननु नमस्कारात्मकं यत्कर्म तत् किं शास्त्रस्याङ्गमिति प्रथमत एव क्रियते प्रधानमिति वा । अङ्गतयाऽङ्गीक्रियमाणमपि सन्निपत्योपकारकत्वेनेदमभिमतमारादुपकारकत्वेन वा । नादिमः पक्षः । द्वाराभावात् । शास्त्रप्रतिबन्धकदुरितोच्छेद एव द्वारमिति चेन्न ।

उच्छेद्यस्य सन्देहास्पदत्वेनोच्छेदकानुष्ठानाभावप्रसङ्गात् । नापरः । अलौकिकस्य नमस्कारस्य लौकिकशास्त्रकर्माङ्गतानुपपत्तेर्ग्राहकग्रहणाभावात् ।

व्या० — असाङ्गत्यमभिव्यङ्क्तुं तावद्विकल्पयति— **नमस्कारात्मकं इति** । नमस्कारग्रहणमाशीर्वस्तुनिर्देशयोरप्युपलक्षणम् । तथा चायमर्थः— यदेतच्छास्त्रादावनुष्ठीयमानमाशीर्नमस्क्रियावस्तुनिर्देशानामन्यतमात्मकं मङ्गलकर्म तत् किं प्रयाजादिवत् प्रागनुष्ठेयं शास्त्रस्याङ्गमुत शरद्वसन्तादिनियतकालानुष्ठेयवाजपेयज्योतिष्टोमादिवत् तत्कालनियतं पुरुषार्थसाधनं किञ्चित् प्रधानं कर्मेति तत्राद्यं द्वेधा विकल्पयति— **अङ्गतरेति** । द्विविधान्यङ्गानि— कानिचित् सन्निपत्योपकारकाणि यथा करण (?) शरीरनिवर्तनद्वारा साक्षादुपकारकाणि द्रव्यदेवतादीनि । कानिचिदारादुपकारकाणि— यथा फलोपकारीणि प्रयाजादीनि । तत्रैतन्मङ्गलाचरणं शास्त्रस्य करण (?) शरीरनिर्वर्तनाङ्गं द्रव्यदेवतादिवत् यद्वा फलोपकार्यङ्गं प्रयाजादिवदित्यर्थः । सन्निपत्य— सन्निकृष्य अव्यवधानत इति यावत् । आरात्— दूराद्, व्यवधानत इति यावत् । तत्राद्यं दूषयति— **नादिम इति** । तत्र हेतुमाह— **द्वाराभावादिति** । उपकारो हि द्वारम् । स चात्र करणशरीरनिर्वर्तनमन्यो वा नाद्यः । शास्त्रशरीरस्य शब्दार्थैकनिर्वर्त्यत्वात् । न द्वितीयः । अन्यस्यानुपलम्भादित्यर्थः । द्वारं आशङ्कते— **शास्त्रप्रतिबन्धकेति** । तदुच्छेदमन्तरेण शास्त्रशरीरस्यानिर्वृत्तेरिति भावः । परिहरति— **नेति** । कुत इत्यत आह—**उच्छेद्यस्येति** । प्रतिबन्धकदुरितानां कार्यैकसमधिगम्यतया इदानीं तदनिश्चये तदुच्छेदार्थे नमस्कारप्रवृत्तिरेव न सङ्गच्छत इति मूले कुठार इत्यर्थः । एवं सन्निपत्योपकारकपक्षं दूषयित्वा आरादुकारकपक्षं दूषयति— **नापर इति** । का तत्रानुपपत्तिरित्यत्राह— **अलौकिकस्येति** । विधिप्राप्तस्येत्यर्थः । शास्त्रनिर्माणं तु रागतः प्राप्तं न विधिप्राप्तमित्याशयेन विशिनष्टि— **लौकिकेति** । लौकिकालौकिकयोरङ्गाङ्गि-

भावाभावे हेतुमाह– **ग्राहकेति** । गृह्णाति स्वशेषत्वेन स्वीकरोति स्वसन्निधिपठितमिति ग्राहकं प्रकरणम् । प्रधानवाक्यमङ्गापेक्षमित्यर्थः । यथा समिदादिवाक्यसापेक्षं दर्शपूर्णमासवाक्यम् । तदुक्तम्– 'प्रधानवाक्यमङ्गोक्त्याकाङ्क्षं प्रकरणं मतम्' इति । तेन ग्रहणं– स्वीकारः, तदभावात् । अङ्गाङ्गिभावप्रयोजकस्य प्रकरणपाठस्य प्रकरणासम्भवेनासम्भवादित्यर्थः । न च लौकिकस्य शास्त्रनिर्माणकर्मणः किञ्चित् प्रकरणं नामास्ति । तस्मादनङ्गस्य नमस्कारस्यानङ्गिनं शास्त्रारम्भं प्रति नारादुपकारकत्वप्रत्याशापीत्यर्थः ॥

अव०— एवमङ्गपक्षं प्रतिक्षिप्य प्रधानपक्षं प्रतिक्षेप्तुमुपादत्ते– **अथ प्रधानमिति** ।

मू०– अथ प्रधानं तर्हि नित्यमिदं नैमित्तिकं काम्यं वा । नाद्यः 'अहरहः सन्ध्यामुपासीत' इत्यादिवदस्य नित्यत्वे प्रमाणाभावात् । अस्तु वा तथापि सन्ध्यावन्दनादेरिवास्यापि ग्रन्थारम्भे करणीयत्वानुपपत्तेः । न द्वितीयः । 'उपरागे स्नायात्' इतिवन्नमस्कारं प्रति ग्रन्थस्य निमित्तत्वे नासङ्कीर्तनात् । समाचारबलादेवमुन्नीयत इति चेन्न । नैमित्तिकं कर्म समाचारबलादन्यदुन्नेयं किमपि नास्तीति दृष्टान्ताभावात् । न तृतीयः । पुत्रादिकामनावत् अधिकारिविशेषणाभावेन ग्रन्थारम्भे नमस्कारकरणानुपपत्तेः । प्रतिबन्धकोच्छेदकामनैवाधिकारिविशेषणमस्त्विति चेन्न प्रतिबन्धकसन्देहे त्वधिकारिसन्देह इति नमस्काराचरणप्रवृत्त्यभावप्रसङ्गात् । अत्रोच्यते, काम्यमेवेदं कर्म । ग्रन्थसमाप्तिकामनैवाधिकारिविशेषणम् तत्र न काचिदनुपपत्तिरिति नीतिनेत्राचार्याः ।

व्या०– तदेतद्दूषयितुं त्रेधा विकल्पयति– **नित्यमित्यादिना** । कल्पान्तरन्तु खपुष्पकल्पत्वादनाशङ्कनीयमेवेति भावः । तत्राद्यं दूषयति– **नाद्य इति** । कुत इत्यत आह **अहरहरित्यादिना** । आदिशब्देन 'यावज्जीवमग्निहोत्रं

जुहोति ' इत्यादि सङ्ग्रहः । अहरहरित्यादि वीप्सा । यावज्जीवादि-श्रुतिर्हि नित्यत्वे प्रमाणम् तस्याभावादित्यर्थः । ननु यन्निमित्तफलसम्बन्धान्तरेण विहितं तन्नित्यम् । नमस्कारादौ च तयोरभावादस्तु नित्यत्वमित्याशङ्क्याभ्यु-पेत्यवादेन परिहरति – **अस्तु वेति** । नित्यत्वे च शास्त्रारम्भेऽनुष्ठेयं न स्यात्, सन्ध्यावन्दनादिवदेव । अनुष्ठीयते च नियमेन शास्त्रारम्भे । तस्मान्न नित्य-मित्यर्थः । नैमित्तिकपक्षं दूषयति– **न द्वितीय इति** । कुत इत्याशङ्क्य किमत्र शास्त्रारम्भ एव निमित्तमन्यद्वेति द्वेधा विकल्प्याद्यं दूषयति – **उपराग इति** । यथोपरागस्य स्नानं प्रति निमित्तत्वमुक्तं तथा नमस्कारं प्रति शास्त्रारम्भस्य निमित्तत्वप्रतिपादकवचनाभावादित्यर्थः । ननु शास्त्रारम्भं निमित्तीकृत्यानुष्ठान-दर्शनात् तन्निमित्तकत्वं समाचारादेवोन्नीयत इति शङ्कते–**समाचारबलादिति** । सत्यमाचारोन्नेयस्य च नैमित्तिकान्तरस्य सद्भावे तद् दृष्टान्तबलादेवमुन्नेष्यामः । तदेव नास्तीत्यप्रामाणिकीयं कल्पनेति परिहरति– **नेति** । न दृष्टान्ताभावा-दित्यन्वयः । दृष्टान्ताभावे हेतुमाह– **नैमित्तिकमिति** । किमप्याचार-बलादुन्नेयं नैमित्तिकमन्यन्नास्तीति हेतोर्दृष्टान्ताभावः । तदभावान्नमस्कारस्यापि नाचारान्नैमित्तिकत्वमुन्नेतुं शक्यत इत्यर्थः । किञ्च शास्त्रारम्भस्य निमित्तत्वे ' निमित्तानन्तरं नैमित्तिकम् ' इति न्यायेन जातेष्ट्यामिव निमित्तानन्तर्येण नम-स्कारस्य शास्त्रारम्भोत्तरकालमनुष्ठानापत्तौ प्रागनुष्ठानानुपपत्तिः । नापि द्वितीयः । अन्यनिमित्तकस्य शास्त्रारम्भेऽनुष्ठानासंभवादिति । किंच किं तन्निमित्तं प्रसि-द्धमप्रसिद्धं वा ? नाद्यः । अनुपलम्भात् । न द्वितीयः । अतिप्रसङ्गात् । तस्मान्न नैमित्तिकत्वं युज्यते । नापि काम्यत्वमित्याह– **न तृतीय इति** । कुत इत्याशङ्क्य किं ज्योतिष्टोमादिवत् श्रुतफलसम्बन्धात् काम्यत्वं, रात्रिसत्रवदार्थ-वादिकफलसम्बन्धाद्वा, विश्वजिन्न्यायेन सर्वसाधारणस्वर्गफलसम्बन्धाद्वा, नम-स्कार्यदेवतामहिमपर्यालोचनया स्वेच्छाप्राप्तफलसम्बन्धाद्वा, सामर्थ्यप्राप्तयत्किञ्चित् फलसम्बन्धाद्वा । नाद्यः । असंभवात् । यत्र विधिरेव मृग्यस्तत्र का फलश्रुति-शङ्का ? अत एव न द्वितीयः । असति विधावर्थवादस्यासति ग्रामे सीमावि-

वादंवदनवकाशे का प्रत्याशा तदुपगम्ये फले ? न तृतीयः । स्वर्गार्थस्य कर्मणो ग्रन्थारम्भेऽनुष्ठानानुपपत्तेः । अत एव तुरीय इत्याह– **पुत्रादीति** । पुत्रादिफलार्थस्य नमस्कारस्य शास्त्रारम्भे अनुष्ठानासम्भव इत्यर्थः अयमाशयः – कर्मणि तादर्थ्यबुद्धिरधिकारः । सोऽस्यास्तीत्यधिकारी । सचार्थात् समर्थो विद्वान् शास्त्रेणापर्युदस्तश्चेत्येवं विशेषणकस्यात्रार्थित्वं नामानुष्ठेयकर्मसाध्यफलकामना । फलञ्चात्र श्रुतमार्थवादिकं साधारणं वा न सम्भवतीत्युक्तम् । किंतु नमस्कार्यदेवताया निरङ्कुशशक्तिकतया यो यत् कामयते पुत्रादिकमन्यद्वा तत्सर्वं फलमिति पक्षोऽवशिष्टः । सोऽपि शास्त्रारम्भेऽनुष्ठानासम्भवदूषणग्रासान्नावतिष्ठत इति पञ्चमपक्षमाशङ्कते – **प्रतिबन्धकोच्छेदेति** । सर्वैर्नियमेन शास्त्रारम्भे नमस्कारकरणान्यथानुपपत्या तत्प्रतिबन्धकोच्छेद एव फलमिति सामर्थ्यकल्पितफलसम्बन्धात् काम्यत्वसिद्धिरित्यर्थः । परिहरति– **नेति** । कुत इत्याह– **प्रतिबन्धकेति** । प्रतिबन्धकादृष्टस्य कार्यैकसमधिगम्यतया सम्प्रति सन्दिग्धत्वात्तदुच्छेदकानुष्ठाने पाक्षिकवैफल्यशङ्काकलिते प्रवृत्तिरेव न स्यादित्यर्थः । **अधिकारिसन्देह इति** । अधिकारिविशेषणभूतायाः प्रतिबन्धोच्छेदकामनाया उच्छेद्यसन्देहे सन्देहात् तद्विशिष्टोऽधिकार्यपि सन्दिग्ध इत्यर्थः । एवं पूर्वपक्षे प्राप्ते सिद्धान्तं प्रतिजानीते– **अत्रोच्यत इति** । किमत्रोच्यत इत्याकाङ्क्षायां काम्यत्वमित्याह – **काम्यमेवेति** । एवकारो नित्यनैमित्तिकपक्षव्युदासार्थः । तथाच तत्तत्पक्षोक्तदोषोद्घोषणमप्यङ्गीकारपराहतत्वादरण्यरुदितमेवेति भावः । काम्यत्वे किमत्राधिकारिविशेषणमित्याकाङ्क्षायां प्रतिबन्धकोच्छेदकामनैवेत्याह – **ग्रन्थसमाप्तिकामनैवेति** । एवकारोऽवशिष्टविकल्पचतुष्टयनिरासार्थः । तथाच तत्प्रपञ्चनमङ्गीकारपराहतेर्वृथागर्जनमिति भावः । नन्वत्राप्यधिकारिसन्देहादप्रवृत्तिरित्युक्तं तत्राह– **तत्रेति** । नीतिनेत्राचार्योक्तः परिहारोऽत्र ग्राह्यः । विस्तरभयान्नास्माभिः प्रपञ्चित इति भावः ।

इदमत्रानुसन्धेयम्– लोके चोरव्याघ्रादिसन्देहेऽपि संभावनामात्रेण तन्निवारणकारणसामग्रिसंपादनदर्शनादिहापि प्रतिबन्धकसन्देहेऽपि संभावनयैव

तदुच्छेदकामनाया अविरोधादधिकारिविशेषणसिद्धौ तदुच्छेदार्थप्रवृत्तिरुपपद्यत एवेति न पाक्षिकवैफल्यशङ्कापि, सर्वप्रायश्चित्तप्रवृत्तिवत् । अत एवोक्तमाचार्यैः "तत्सन्देहेऽपि तदुपादानस्य न्याय्यत्वात्; अन्यथानुपस्थितपरिपन्थिभिः पार्थिवैर्द्विरदयूथपतयो नाद्रियेरन् इति"। न च शाबरशाङ्करभाष्यादावकृतेऽपि नमस्कारे निर्विघ्नसमाप्तिसम्प्रदायाविच्छेददर्शनात् किरणावलीकादम्बर्यादौ कृतेऽप्यसमाप्तिदर्शनाच्चानश्वासः कार्यः । "विशुद्धज्ञाननेत्राय त्रिवेदीदिव्यचक्षुषे । श्रेयः प्राप्तिनिमित्ताय नमः सोमार्धधारिणे" इत्यादिभट्टवादप्रभृतिसमाचारदर्शनात् शबरशङ्करादिभिरपि कृत एव नमस्कारः किंतु ग्रन्थे न लिखितः, लेखनस्यातन्त्रत्वात्, इति कार्यादवसेयम् । अथापि तेषां विघ्नयनादर इति साहसिकानां प्रलापः । क्वचिदसमाप्तिस्तु क्रियावैगुण्यात् । अवैगुण्येप्युच्छेद्यप्राबल्यादविरोधः । तस्या एव प्रचितायास्तदुच्छेदकत्वसम्भवात् । अप्रचितानां कुठाराधारापातानां सारदारुच्छेदासामर्थ्येऽपि तेषामेव प्रचितानां तच्छिदासामर्थ्यदर्शनात् । न चेदं निर्मूलमनुष्ठानम् होलकादिवदाचारमूलत्वात् । "आचाराच्च स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम्" इति सन्तोष्टव्यमित्यलं प्रसक्तानुप्रसक्त्या ।

मू०— अयं च ग्रन्थकारः स्वयं भगवतश्चन्द्रचूडामणेः प्रणामेन कलयन्नपि कृतार्थमतामात्मनो व्याख्यातृश्रोतॄणामपि निर्विघ्नव्याख्यानश्रवणसम्पत्समासादनं(न)समुचिताशीः प्रदर्शनद्वारा परमेश्वरस्य सांमुख्यं दर्शयन्नाह—युष्मानिति । व्याख्यातृश्रोतॄन् । एषामेवात्र सम्बोधनयोग्यत्वात् सम्बोधनप्रधानत्वाच्च युष्मदर्थस्य । अभिलषितफलवितरणप्रवणत्वमत्र त्राणमभिमतम् । एतस्य च प्रत्यूहशमनेनैव सिद्धिः । तच्चाभिमतदेवतानमस्कारजन्मना परमपुण्येन भवति ।

व्या०— नन्वेवमप्यस्य ग्रन्थकारस्य स्वयं नमस्काराकरणादकृतार्थस्य युष्मान् पात्विति पररित्राणाशंसनमसङ्गतमित्यत आह— **अयं चेति** ।

कलयन्नपि प्राप्नुवन्नपीत्यर्थः। निर्विघ्नव्याख्यानश्रवणमेव संपत्तस्याः समासादनं प्राप्तिः; तत्समुचितत्वं चाशिषस्तद्विषयत्वं तत्समर्थत्वं वा। आशीरिच्छा तस्याः प्रकाशनं वाचा निवेदनं। सांमुख्यम्—आभिमुख्यम्, अनुग्रहप्रावण्यमिति यावत् एतदेव त्राणं चेति वक्ष्यति। तच्च स्वग्रंथसंप्रदायाविच्छेदलाभात्मकमिति तदाशंसनं संगतमेवेत्यर्थः। ननु तथापि स्वग्रन्थव्याख्यातृश्रोतॄन् पात्विति प्रयोज्यम्, न तु युष्मानि(ति इ)त्याशङ्क्य त एव युष्मच्छब्देन विवक्षिता इत्याह— **व्याख्यातृश्रोतॄनिति** । ननु कथमेषामप्रकृतानां युष्मच्छब्देन परामर्श इत्याशङ्क्याह— **एषामेवेति** । व्याख्यानश्रवणसिद्ध्याशंसाया व्याख्यातृश्रोतॄणामेवाप्रकृतानामपि सम्बोधनसामर्थ्यमित्यर्थः। नन्वाम्रान् पृष्टः कोविदारानाचष्टे भवान्। यदेतेषां कथं युष्मदर्थतेत्यनुयोगे सम्बोधनयोग्यत्वमुच्यत इत्याह—**सम्बोधनप्रधानत्वाद्युष्मदर्थस्येति**। संबोधनमाभिमुख्यकरणं, तदेव युष्मच्छब्दार्थ इति युक्तस्तेनैषां परामर्श इत्यर्थः। ननु पातेस्त्राणार्थत्वात् त्राणस्य च भयहेत्वपादानकत्वात् भयहेतूनां चेहानुपलम्भात् असंभावितं त्राणं किमाशास्यते? किं त्वेषां यदभिमतं तद्वितरणमेवाशास्यतामित्याशङ्क्याह— **अभिलषितेति** । तदभावभीरूणां तद्वितरणमेव त्राणमिति भावः। ननु देवताप्रणामस्य प्रतिबन्धकोच्छेदः फलमित्युक्तं प्राक्। सम्प्रति सम्प्रदायाविच्छेदः फलत्वेनोच्यत इति पूर्वापरविरोध इत्याशङ्क्य नेत्याह— **एतस्य चेति**। एतस्याभिमतलाभस्य प्रत्यूहशान्ति नान्तरीयकत्वात् तत्फलत्वोक्तिरविरुद्धेति भावः। ननु नमस्कारकर्मणः क्षणविध्वंसिनः कथं कालान्तरभावि फलसाधकत्वम्? तत्राह— **तच्चेति**। क्षणिकत्वेऽपि तज्जन्यापूर्वस्य श्रुतार्थापत्तिगम्यस्य फलभोगविनाश्यस्य फलजनकत्वमिति न काचिदनुपपत्तिरित्यर्थः। तस्मादस्माकमपि देवतानमस्कारस्यावश्यकर्तव्यस्यैव कृतत्वान्न(न्ना)प्रस्तुताचरणं दोष इति भावः।

मू०— किंचात्र कामिनोऽपि कामरिपोरिति विरोधो ध्वन्यते। तेन लोकोत्तरं चरितमस्य ज्ञातुं न शक्यत इति वस्तु। तेन चाद्भुतरूपेण मध्यनिवेशितेन शृङ्गाररौद्रयोर्नैरन्तर्यकृतविशेष(विरोध)परिहारः।

देव्यां देवस्य रतेरुपनिबन्धनात् संभोगात्मा शृङ्गारः । देवताविषया रति रितिभावश्च । तथाविधभक्तिश्रद्धाभरबन्धुरान्तःकरणतयैव नमस्कृतेः कृतत्वात् । अन्यथोपहासादावपि नमस्कारः संभवति । यथा—

बिन्दुद्वन्द्वतरङ्गिताग्रसरणिः कर्ता शिरोबिन्दुकं
कर्मेति क्रमशिक्षितान्वयकला ये केऽपि तेभ्योञ्जलिः ।
ये तु ग्रन्थसहस्रशाणकषणत्रुटचत्कलङ्कैर्गिरा—
मुल्लेखैः कवयन्ति बिल्हणकविस्तेष्वेव संनह्यति ।

व्या०— इत्थं नमस्कारस्य कर्तव्यतां प्रतिपाद्य संप्रति श्लोकतात्पर्यं विविनक्ति— **किंचात्रेत्यादिना पाणिनिप्रमुखै** रित्यतः प्राक्तनसंदर्भेण । विरोधो ध्वन्यते व्यज्यते इत्यर्थः । विरोधस्वरूपमाह— **कामिनोऽपि कामरिपोरिति** । कामिन इति शृङ्गारोपलक्षणं, कामरिपोरिति रौद्रोपलक्षणम् । तथा च प्रालेयेत्यादि विशेषणप्रतिपादिताभ्यां पत्रावलीनिर्माणकामदहनाभ्यां शृङ्गाररौद्रयोरेकदैकत्रावस्थानकृतो विरोधो ध्वन्यत इत्यर्थः । ननु तेजस्तिमिरयोरिव कथमनयोरेकत्रावस्थानमित्याशङ्क्य देवस्यालौकिकमहिमत्वादुपपद्यत इत्याशयेनाह— **तेन लोकोत्तरमिति** । वस्तु ध्वन्यत इत्यनुषङ्गः । ततः किमत आह— **तेन चेति** । **अद्भुतरूपेणेति** । लौकिकपुरुषेष्वसम्भावितत्वादिति भावः । मध्यनिवेशितेन, मध्ये स्थापितेन । शृङ्गाररौद्रापेक्षया चास्य माध्यस्थ्यम् । नैरन्तर्यमेकत्रानयोर्यौगपद्यम् । अयमत्र समाधिः— लोके कयोश्चित् कलहायमानयोरेकः कोऽपि समर्थो माध्यस्थ्यमवलम्ब्य विरोधं समाधत्ते । एवमस्य महिमाप्यलौकिको माध्यस्थ्यमाश्रित्य शृङ्गाररौद्रयोरपि विरोधं शमयति । विरोधनिवर्तनादेवास्य माध्यस्थ्यव्यपदेशः । अलौकिकमहिमत्वादत्र न किञ्चिदसम्भावितमस्तीति पिण्डितार्थः । तेन विरोधाभासालङ्कारोऽपि ध्वन्यत इति सिद्धम् । ननु शृङ्गाररौद्रयोरविरोध इत्युक्तम्; कश्चात्र शृङ्गारो विवक्षितः, सम्भोगो विप्रलम्भो वेत्यपेक्षायामाह— **देव्यामिति** ।

सम्भोगात्मकत्वे हेतुमाह– **रतेरुपनिबन्धनादिति** । अत्र रतिशब्देन पत्रावली–निर्माणादिक्रीडाभिधीयते, न तु रत्याख्यः स्थायीभावः । तस्य विप्रलम्भेऽपि संभवात् । अथ न केवलं रौद्रशृङ्गारयोर्ध्वननाद्रस-ध्वनिरेव किंतु कवेर्देवतादि-विषयाया रतेरपि ध्वननाद्भाव ध्वनिश्चेत्याह– **देवताविषयेति** । रतिरिह कवीनां राजदेवताचार्यविषयेष्वभीप्सितवस्तुष्विव विषयसौन्दर्यजन्मा कश्चिद्गिरतिविशेषः । **भावश्चेति** । ध्वन्यत इति शेषः । रतिसद्भावे विप्रतिपन्नं प्रति प्रमाणमाह– **तथाविधेति** । भक्तिः पूज्यदेवतादौ पित्रादि-ष्विव प्रेमातिशयः । श्रद्धा तत्रैव विश्वासः । तत्र भक्तेस्तथाविधत्वं पूर्वोक्तरति रूपत्वम् । कृतत्वात्– कृतत्वानुमानादित्यर्थः । प्रयोगस्तु– विमता नमस्कृतिः पूर्वोक्तरतिरूपभक्तिश्रद्धातिशयपूर्विका कृता; विहितक्रियात्वात्, सन्ध्यावन्द-नवत् इति । श्रद्धाग्रहणं दृष्टान्तार्थम्, रतेरेवात्र सिषाधयिषितत्वात् । साध्यान-ङ्गीकारे बाधकं तर्कमाह– **अन्यथेति** । अतत्पूर्वकत्वे त्वौपहासिकनमस्कार-वदनुपकारकत्वादफलमनुष्ठानं भवेत्, विपरीतफलं वा स्यात् । उक्तञ्च– "ध्रुवं कर्तुःश्रद्धाविधुरमभिचाराय हि मखाः" इति । औपहासिकनमस्कारमुदाहरति– **यथेति** । बिन्दुद्वन्द्वम्– विसर्गः । वृक्षस्तिष्ठतीत्यादौ सविसर्गस्य कर्तृत्वदर्शनात्, जलं पिबतीत्यादौ शिरोबिन्दुकस्य कर्मत्वदर्शनाच्च सर्वत्र तथात्वभ्रमः । तथा च 'पयः पिबति,' 'मुखं शोभते' इत्यादौ वयसः कर्तृत्वं मुखस्य कर्मत्वं च स्यादित्यर्थः । इति अनेन क्रमेण शिक्षितः उपाध्यायैरुपदिष्टो योऽन्वयः पदसंसर्गः पदार्थसंसर्गो वा स एव कला विद्या येषां ते तथोक्ताः, अव्युत्पन्ना इत्यर्थः । तेभ्योञ्जलिर्नमस्कार इत्यर्थः । ग्रंथसहस्राण्येव शाणास्तेषु कषणेन त्रुटयत्कलङ्कैर्भ्रश्यद्दोषैः, बहुग्रन्थाभ्यासविशुद्धैरित्यर्थः । व्युत्पन्ना एव मे लक्ष्यं। नाव्युत्पन्ना इति श्लोकतात्पर्यम् । तेभ्योऽञ्जलिरित्यव्युत्पन्ननमस्कार उपहासार्थः - परमार्थतस्तेषामनमस्कार्यत्वादिति ।

मू०— परमेश्वरः पुनरिह न परमभिमतदैवतमपि तु समुचित-मपि भवति । निखिलभुवननिर्माणकर्मठस्य भगवतः श्रीकण्ठस्य

ग्रन्थनिर्माणावसरे नमस्कर्तुमुचितत्वात् । किं चात्र वाक्यार्थीभूतत्वाद्विश्रान्तिधामत्वेन प्राधान्यमुपेयुषो भावध्वनेर्वस्त्वलङ्काररसध्वनिभिः सहास्त्येवोपरकारकभावेन संकर इति त्रिविधोऽपि सूचित एव ध्वनिः ।

व्या० – इह न केवलमिन्दुभूषणस्येष्टत्वविशिष्टत्वाभ्यामेवोपास्यत्वमपि त्वौचित्यादपीत्याह– **परमेश्वरः पुनरिति** । औचित्ये हेतुमाह– **निखिलेति** । निर्माणशक्तिकामस्य तादृक्शक्तिमद्देवताया एव नमस्कर्तुमुचितत्वादित्यर्थः कर्मणि घटकः समर्थः कर्मठः । 'कर्मशूरस्तु कर्मठः' इत्यमरः । "कर्मणि घटोऽठच्" इत्यठच्प्रत्ययः । 'नस्तद्धिते' इति टिलोपः । अथेह पूर्वोक्तभावादिध्वनीनामुपपत्तिपूर्वकमुपस्कार्योपस्कारकभावेन अङ्गाङ्गिभावसंकरमाह । किं चात्रेत्यादिना सूचित एवेत्यन्तेन । अत्र भावः पूर्वोक्तो रत्याख्यः । वस्त्वलंकाररसाश्च पूर्वोक्ता एव देवताया अलौकिकमहिमत्वं, विरोधाभासः शृङ्गाररौद्रौ च तेषां ध्वनिभिः सह भावध्वनेरस्त्येव सङ्कर इति सम्बन्धः । अङ्गाङ्गिभावलक्षण इति शेषः । तत्र हेतुमाह – **उपस्कार्येति** । तत्र भावध्वनेरुपस्कार्यत्वादङ्गित्वमन्येषां तूपस्कारकत्वादङ्गत्वमिति विवेकः । तत्र भावध्वनेरुपस्कार्यत्वे हेतुमाह– **प्राधान्यमुपेयुष इति** । प्राधान्ये कारणमाह– **विश्रान्तिधामत्वेनेति** । पर्यवसानभूमित्वेनेत्यर्थः । तत्रापि हेतुमाह– **वाक्यार्थीभूतत्वादिति** ।

मू० – पाणिनिप्रमुखैस्तैस्तैः सर्वशास्त्रविशारदैः ।
इह तावद् द्विधा शास्त्रमभ्यधीयत तत्र च ॥ ३ ॥

शब्दप्रधानं वेदाख्यं प्रभुसंमितमुच्यते ।
ईषत्पाठान्यथापाठे प्रत्यवायस्य दर्शनात् ॥ ४ ॥

व्या० – इति श्लोकं व्याख्याय संप्रति प्रेक्षावतां प्ररोचनार्थं स्वग्रन्थप्रतिपाद्यमर्थं प्रतिज्ञातुमादौ तदुपयोगितयोपदेशत्रैविध्यं तावदाह **पाणिनीत्यादि**

श्लोकचतुष्टयेन । शासनाच्छास्त्रमुपदेशः, कर्तव्याकर्तव्यबोधकं पौरुषेयमपौरुषेयं वा वाक्यम् तदुक्तम्—

" प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते " ॥ इति ।

तच्छास्त्रं त्रिधा प्रभुसंमितं मित्रसंमितं कान्तासंमितं चेति । किमेषां लक्षणमित्यपेक्षायामेकैकशो निरूपयति— **तत्र चेति** । तत्र त्रयाणां मध्ये यद्वेदाख्यं शास्त्रं तत् प्रभुसंमितं राजतुल्यमित्यर्थः । एतदेवोपपादयन्नस्य लक्षणमाह— **शब्दप्रधानमिति** । यत्र शब्दप्रधानं शास्त्रं तत् प्रभुसंमितमित्यर्थः । यथा प्रभुर्वाङ्मात्रेण पुरुषं प्रवर्तयति निवर्तयति विपक्षे दण्डयति चैवं वेदोऽपि विधिशब्देनैव पुंसां प्रवृत्तिनिवृत्तिहेतुविपक्षे प्रत्यवायं चापादयति । शब्दप्रधानमित्यनेनार्थस्य प्राधान्यमात्रनिषेधः । स्वरूपनिषेधे तून्मत्तप्रलपितवद् प्रवर्तकत्वापातात् । शब्दश्चात्र विधिप्रत्ययोपलक्षितं वाक्यम् । तस्य प्राधान्यं प्रवर्तकत्वम् ।

ननु पुरुषप्रवृत्तिरूपां भावनां विदधानः प्रत्यय एव प्रवर्तकः; तस्य प्रेरणार्थे विधानात्, तत् कथं वाक्यं प्रवर्तकमिति चेत् अहो पेलव(पल्लव)-ग्राहिपाण्डित्यमायुष्मतो येन प्रत्ययः प्रवर्तक इत्याकलयता स च विशिष्ट इति नाकलितम् । तदाकलने वाक्यमेव प्रवर्तकमित्यपि किं नाकलयेः ? तथाहि— नहि भावयेदित्युक्ते कश्चित् प्रवर्तते; किं दिवदमनेनेवं भावयेदिति । तथा सत्यंशत्रयविशिष्टभावनाभिधायी प्रत्ययः प्रवर्तक इति वाक्यमेव प्रवर्तकमित्युक्तं भवति । तदुक्तमाचार्यैः कारिकायाम्—

" किमाद्यपेक्षितैः पूर्णः समर्थः प्रत्ययो विधौ ।
तेन प्रवर्तकं वाक्यं शास्त्रेऽस्मिन् चोदनेष्यते " ॥ इति ।

तत्सुष्ठूक्तं वाक्यमेव प्रवर्तकमिति । तत्र परमेवेदं शब्दप्रधानमिति । शब्द-प्राधान्ये हेतुमाह— **ईषदिति**[१] । पठ्यते इति पाठो वेदः । तस्यान्यथापाठेऽन्य-थोच्चारणेऽपि यतो दुरितमन्यथानुष्ठानेऽननुष्ठाने वा प्रत्यवाय इति किमु वक्त-व्यम् ? अध्ययनविधेः फलवदर्थावबोधपर्यवसितत्वादिति । तस्माच्छब्दप्रधानं ततः प्रभुसंमितं वेदाख्यं शास्त्रमित्यर्थः ।

मू०— इतिहासादिकं शास्त्रं मित्रसंमितमुच्यते ।
अस्यार्थवादरूपत्वात् कथ्यतेऽर्थप्रधानता ॥ ५ ॥

व्या०— अथ मित्रसंमितमाह— **इतिहासेति** । तस्य लक्षणं सोपपत्तिकमाह— **अस्येति** । अर्थप्रधानं शास्त्रं मित्रसंमितमित्यर्थः । अत्रार्थो वाक्यार्थो न पदार्थस्तस्याप्रवर्तकत्वात् । प्राधान्यं च प्रवर्तकत्वमेव । अर्थप्राधान्ये हेतु-माह— **अर्थवादरूपत्वादिति** । इतिहासादयो न वेदवदेवं कुर्यादिति विधि-बलेन पुरुषं प्रवर्तयन्ति; किंतु पूर्वपुरुषचरितवर्णनामुखेन सुहृदिव युक्तिभिरनु-नीय प्रवर्तयन्तीत्यर्थप्राधान्यमित्यर्थः ।

मू०— ध्वनिप्रधानं काव्यं तु कान्तासंमितमीरितम् ।
शब्दार्थौ गुणतां नीत्वा व्यञ्जनप्रवणं यतः ॥ ६ ॥

व्या०—अथ कान्तासंमितं तल्लक्षणं चाह- **ध्वनीति** । ध्वनिप्रधानं शास्त्रं कान्तासंमितमिति लक्षणम् । तच्च काव्यमित्यर्थः । ध्वनिलक्षणं तु वक्ष्यते । प्राधान्यं तु प्रवर्तकत्वमेव । तस्य कांतासंमितत्वमुपपादयति— **शब्दार्थाविति** । शब्दार्थाविह वाच्यवाचकौ लक्ष्यलक्ष्यकौ च । तयोर्गुणकत्वमुपसर्जनत्वम् । तच्च ध्वनिजननमात्रोपक्षीणत्वात् । व्यञ्जनप्रवणं ध्वनिप्रधानम् तदयमर्थः—

---

१) ईषदित्यस्य अन्यथापाठशब्देनान्वयः ।

यथा कान्ता कटाक्षवीक्षणमन्दहासमधुरभाषणादिभिः पुरुषं रञ्जयन्ती व्यञ्जनव्यापारेणैव सर्वं कारयति एवं काव्यकलापि शब्दार्थोभयशक्तिमूलया व्यञ्जनवृत्त्या सहृदयहृदयाल्हादिकया चमत्कुर्वती रामादिवद्वर्तितव्यम्, न रावणादिवदिति ध्वनयन्ती सरसतामापाद्य पुंसः कर्तव्ये प्रवर्तयति, निवर्तयति चाकर्तव्यादिति कान्तासंमितमिदं शास्त्रमिति ।

मू०— एष विद्याधरस्तेषु कान्तासंमितलक्षणम् ।
करोमि नरसिंहस्य त्रातु श्लोकानुदाहरन् ॥ ७ ॥

व्या०— इत्यमुपदेशत्रयं विविच्य तत्र तृतीयनिरुपणं स्वग्रंथकृत्यमिति प्रतिजानीते— **एष इति** । एष विद्याधरो विद्याधराख्यः, अहमिति शेषः । करोमीत्युत्तमपुरुषप्रयोगात् । 'स्थानिन्यपि' इति वचनात्प्रयोगः । **तेष्विति** । तेषु शास्त्रेषु । तन्मध्ये इत्यर्थः । कान्तासंमितलक्षणम्, काव्यलक्षणमित्यर्थः । एतेन काव्यलक्षणं विषयः, तज्ज्ञानं प्रयोजनम्, तयोः साध्यसाधनभावः संबंधः । तज्जिज्ञासूरधिकारीति स्वग्रन्थस्यानुबन्धचतुष्टयं सूचितम् । पुण्यश्लोकचरितनिबंधनात् प्रबन्धप्रतिष्ठां मत्वाह— **नरसिंहस्येति** ।

मू०— अन्तरेण नरसिंहभूपतिं
नेतरोऽस्ति मम वाङ्मयोचितः ।
चन्द्रचूडमपहाय जाह्नवी
धारि वोढुमपरः क ईश्वरः ॥ ८ ॥

व्या०— ननु रघुरामादीन् पुरातनान् पुरुषधौरेयानुपेक्ष्य किमित्याधुनिकं पुरुषमधिकरोषि— इत्याशङ्क्याह— **अन्तरेणेति** । पुरातनत्वमप्रयोजकम् । गुणनिधित्वप्रयोजकगरिमादिना तु नरसिंहो रामादीनतिशेत इति भावः। अत्रेश्वर

नरसिंहयोर्निरपेक्षे वाक्यद्वये बिम्बप्रतिबिम्बभावेन वाङ्मयजाह्नवीवारि(वहन) रूपसमानधर्मनिर्देशात् दृष्टान्तालङ्कारः ।

मू०— विश्वोल्लङ्घनजाङ्घिकीं वितनुते कीर्तिं विधत्ते श्रियं
हेलाधिक्कृतयक्षराजविभवां चिन्ताकरं हन्त्यघम् ।
दुग्धे स्वादुतरान् रसान् वितरति स्फारं कलाकौशलं
काव्यं निर्वृतिमावहत्यपि परिस्पंदापहं चेतसः ॥ ९ ॥

व्या०— ननु "काव्यालापांश्च वर्जयेत्" इति काव्यालाप एव निषिद्ध इति कुतः काव्यनिर्माणावकाशः ? कुतस्तरां तल्लक्षणप्रणयनप्रसक्तिः ? कुतस्तमां च नरसिंहचाटूदाहरणवार्तेत्याशङ्क्याह— विश्वोल्लङ्घनेति । जङ्घया चरतीति जाङ्घिकी; जङ्घाला, शीघ्रगामिनीति यावत् । "जङ्घालोऽतिजवस्तुल्यौ जङ्घाकारिकजाङ्घिकौ" इत्यमरः 'चरति' इति ठक् । "टिड्ढाणञ्" इत्यादिना ङी । विश्वव्यापिनीत्यर्थः । चिन्ताकरमधिजनकमघं पापं हन्ति पुण्यश्लोक गुणवर्णनादित्यर्थः । रसान्, शृङ्गारादीन् । चेतसः पारिस्पन्दानपहन्तीति पारिस्पन्दापहम्; विक्षेपहरमित्यर्थः । 'अन्येष्वपि दृश्यते' इत्यपिशब्दात् डप्रत्ययः । अत्र सर्वत्र कवेर्यथायोगं सहृदयानां चेति शेषः । पूर्वैश्चायमर्थः प्रतिपादितः —

परिवड्ढइ विण्णाणं संभाविज्जइ जसो विसप्पन्ति गुणा ।
सुव्वइ सुपुरुसचरिअं किं तं जेण ण हरन्ति कव्वालावा ।

"काव्यं यशसेऽर्थकृते—" इत्यादि च । तदेवमनेकश्रेयस्साधनतया काव्यं न हेयम् । निषेधो मुद्राराक्षसाद्यसत्काव्यविषतया व्यवस्थापनीयः । अन्यथा रामायणादीनामपि हेयत्वप्रसङ्गादिति भावः ।

मू०— कवयत इति कविः। तस्य कर्म काव्यम्। तच्चार्था-द्वर्णनात्मकम्। यदुक्तं मदनेन –

शाणोत्कीर्णमिवोज्ज्वलद्युति पदं बन्धोऽर्धनारीश्वर-

श्लाघालङ्घनजाङ्घिको दिवि लतोद्भिन्नेव चार्थोद्गतिः।

किञ्चित्पीडितचन्द्रमण्डलगलत्पीयूषहृद्यो रसः

तत् किञ्चित् कविकर्म मर्म न पुनर्वाग्डिण्डिमाडम्बरः ॥ १० ॥

व्या०— एवं कान्तासंमितोपदेशस्य स्वरूपं प्रामाण्यं च निरूप्य संप्रति तत्र काव्यशब्दस्य प्रवृत्तिनिमित्तं सूचयन्निर्वचनमाह—**कवयत इत्यदिना**। कवयते वर्णयतीति कविः, कवयिता 'कव वर्णने' इति धातोरौणादिक इकार-प्रत्ययः, तस्य कर्म काव्यमिति ब्राह्मणादित्वात् ष्यञ्प्रत्ययः। ननु कविकर्मणः काव्यत्वे तत्पर्यटनादीनामपि काव्यत्वप्रसङ्ग इत्याशङ्क्याह— **तच्चेति**। तच्च कर्म अर्थात्, सामर्थ्यात्, काव्यशब्दस्य वर्णनार्थशब्दप्रकृतिकत्वलक्षणाद्वर्णनात्मक-मेव लभ्यत इति नातिव्याप्तिरित्यर्थः। एतेन वर्णनात्मा सन्दर्भविशेषः काव्यमिति लक्षणं; तदेव प्रवृत्तिनिमित्तं च काव्यशब्दस्येत्युक्तं भवति। अत्र च संमतिमाह— **यदुक्तमिति**। "शाणस्तु निकषः कषः" इत्यमरः। तत्रो-त्कीर्णमुत्तेजितम्। उज्ज्वलद्युति, शाणोल्लीढमणिकल्पमित्यर्थः। बन्धः पदसंघटना। अर्धेन नारी, साचासावीश्वरश्च तस्य श्लाघा संघटनासौभाग्यं, तल्लङ्घने जाङ्घिकः शीघ्रगामी; अर्धनारीसंघटनवदविषम इत्यर्थः। 'चरति' इति ठक्। दिव्युद्भिन्ना विद्युल्लता। अर्थोद्गतिरर्थस्फुरणम्। किञ्चित् पीडितं ईषत् पीडितम्, अन्यथा विरसं भवेदिति भावः। हृदयस्य प्रियो हृद्यः। 'हृदयस्य प्रियः' इति यत्प्रत्ययः। यत्रैते गुणास्तदेव किंचिद् किमपि लोकोत्तरं कविकर्म काव्यं, मर्म रहस्यम्, अन्यथा कर्णकोलाहल इत्यर्थः।

2

मू०— कृत्वा काव्यमवाप विश्वमहितां कीर्तिं कविग्रामणीः
श्रीहर्षः श्रियमद्भुतां हरिहरो लेभेऽर्जुनक्ष्माभुजः ।
मृत्योस्त्रासमपाचकार मलयक्ष्मामण्डलाखण्डल-
स्तत् किञ्चिन्न विलोक्यते न किल यत् काव्यात्
समुन्मीलति ॥ ११ ॥

व्या०— अथ विश्वोल्लङ्घनेति श्लोके यत् काव्यस्यानेकश्रेयस्करत्वमुक्तं तत् दृष्टान्तैर्व्यनक्ति— **कृत्वेति** । किं बहुना ? चतुर्वर्गचिन्तामणिरियं कविता नाम । तस्मात् काव्यं कर्तव्यं व्याख्यातव्यं चेति भावः ।

मू०— प्रतिभा बहुशास्त्रदर्शिता
बहुधा काव्यविदां च शिक्षया ।
मुहुरभ्यसनं मनीषिभिः
कथितं कारणमस्य सम्भवे ॥ १२ ॥

शब्दार्थगुणालङ्काराः प्रतिभान्त्यनयेति प्रतिभाशक्तिः, यया विना काव्यं कर्तुमेव न क्षमते कविः, कुर्वन् वा हास्यास्पदं भवति । अकवितैव वरं कुकवितायाः । कुकविता हि कामानपेतमनस्कं मरणम् । बहुशास्त्रदर्शिता व्युत्पत्तिः । सर्वपथीनाः खलु कवयो भवन्ति । प्रतिभायाः प्रागुपादानं व्युत्पत्त्यपेक्षया प्राधान्यद्योतनाय, व्युत्पत्तिमान्द्याविर्भूतदोषापाकरणाय प्रभविष्णुत्वात् प्रतिभायाः । काव्यं कर्तुं विदन्ति विन्दत इति काव्यविदः कवयः सहृदयाश्च वेत्ति विन्दत्योरावृत्त्या ग्रहणात् परिस्फुरतः प्रकृतिश्लेषस्य महिम्नाभिधीयन्ते । तेषां हि शिक्षया काव्यकरणविचारयोरविच्छेदेन परिशीलनमभ्यासः । अनवरतमभ्यस्यतामेव कवीनां वाक्यानि पाकमासादयन्ति । पाकस्तु

रसोचितशब्दार्थनिबन्धनम् । श्रवणसुधास्यन्दिनी पदव्युत्पत्तिः पाक इत्यन्ये । पदानां परिवृत्तिवैमुख्यं पाक इत्यपरे ।

व्या० — तदेवं ग्रन्थारम्भं समर्थ्य संप्रति न सर्वसुलभं काव्यनिर्माणं, किंतु केषांचिदेव सुकृतिनामियं विद्येति दर्शयितुं तदुत्पत्तिसामग्रीमाह— **प्रतिभेति** । श्लोकं स्वयमेव व्याचष्टे— **शब्दार्थेत्यादि** । प्रतिभान्ति स्फुरन्तीत्यर्थः । प्रतिभेति । 'आतश्चोपसर्गे' इत्यङ्प्रत्ययः । 'अकर्तरि च कारके संज्ञायाम्' इति करणार्थता । 'शक्तिः कवित्वबीजरूपः संस्कारविशेषः' इति काव्यप्रकाशः । तत्सद्भावे किं प्रमाणमित्याशङ्क्य कार्यलिङ्गानुमानमाह— **यया विनेति** । सर्वा काव्यक्रिया शक्तिविशेषपूर्विका, क्रियात्वात्, स्फोटादिवत् । शक्त्यभावे कार्यमेव न स्यात्, अनग्नावस्फोटवत्, इति प्रमाणतर्काभ्यां शक्तिसिद्धिरित्यर्थः । अथापि शक्त्यनङ्गीकारे दोषमाह— **कुर्वन् वेति** । कुकाव्यकरणादिति भावः । नन्वभावात् भावोऽतिरिच्यत इति न्यायात् कुकाव्यकरणमपि श्रेय इत्याशङ्क्याह— **अकवितैवेति** । कुत इत्यत आह— **कुकविता हीति** । कामानपेतमनस्कं मरणम्, जीवन्मरणमित्यर्थः । कुजीवनादजीवनमिव कुकवित्वादकवित्वमेव वरम् । त्वदुक्तन्यायस्तु गुणविषय इत्याशयः । तस्मात् सिद्धम् प्रतिभापि कारणम्, अन्यथा सर्वोऽपि कवयेदिति । बहुशास्त्रदर्शितेत्यस्य व्याख्यानं व्युत्पत्तिरिति । संगतिग्रह इत्यर्थः । शास्त्रग्रहणं लोकस्याप्युपलक्षणम् । त्रैगुण्योद्भवस्य लोकचरितस्यैवातिविचित्रस्य नानारसस्य प्रायेणात्र वर्ण्यत्वात् । तथाच लोकव्यवहार-वेद-वेदाङ्गेतिहास-पुराणकलादि सकलविद्याकौशलमप्यत्र कारणमित्यर्थः । तत्रोपपत्तिमाह— **सर्वपथीना इति** । सर्वान् पथः पूर्वोक्तलोकवेदादिमार्गान् व्याप्नुवन्तीति सर्वपथीनाः, सर्ववेदिन इत्यर्थः । अन्यथा काव्यनिर्माणस्य दुष्करत्वादिति भावः । तत्सर्वादेः पथ्यङ्गकर्म पत्र पात्रं व्याप्नोति" इति खप्रत्ययः । श्लोके प्रतिभायाः व्युत्पत्तेः प्रागुपादाने कारणमाह— **प्रतिभाया इति** । प्राधान्ये हेतुमाह— **व्युत्पत्ति-**

मान्येति । न ह्यव्युत्पत्तिदोषं प्रतिभैवाप्रतिभादोषं व्युत्पत्तिस्तिरोधातुं प्रभवति । अतः प्रतिभायाः प्रागुपादानं युक्तमित्यर्थः । बहुधा बहुशास्त्र-दर्शितेत्यन्वयः । बहूनां शास्त्राणां बहुधा बहुशो दर्शनं व्युत्पत्तिरित्यर्थः । अथाभ्यासाख्यकारणनिरूपणाय व्याचष्टे— **काव्यविदामित्यादि** । काव्यविदः कवयः सहृदयाश्चाभिधीयन्ते इति सम्बन्धः । ननु कथं काव्यविच्छब्दस्यै-कस्योभयार्थत्वमित्याशङ्कायां यथैतत्तथा व्युत्पादयति— **काव्यं कर्तुं विदन्ति विन्दत इति काव्यविद् इति** । अत्रायं विवेकः— काव्यं कर्तुं विदन्ति जानन्तीति व्युत्पत्त्या काव्यविदः कवय उच्यन्ते । “विद् ज्ञाने” इति धातोः क्विप् । अथ काव्यं विन्दते विचारयन्तीति व्युत्पत्त्या तु काव्यविदः काव्यपरीक्षकाः सहृदयाः कथ्यन्ते । “विद् विचारणे” इति धातोः क्विप् । ननु तथाप्येकोच्चारणे कथमेकस्यानेकार्थाभिधायकत्वम्? तत्राह— **परिस्फुरत इति** । काव्यविदामित्यत्र क्विपोः कर्तृवाचिनोरुभयत्रैकार्थत्वात् प्रकृतेर्विच्छद्वयस्य ज्ञानविचारयोः श्लिष्टत्वादयं प्रकृतिश्लेषः । तस्य **महिम्नेति** । इहार्थद्वयस्यापि प्राकरणिकत्वेनैकत्र नियन्तुमशक्यत्वादेकोच्चारणेऽप्युभयत्राभिधाया निरङ्कुशत्वा-दित्यर्थः । ननु श्लेशस्य किमत्र परिस्फोटकमत आह— वेत्ति विन्दत्योरिति । ‘विद् ज्ञाने’ ‘विद् विचारणे’ इत्यनयोर्धात्वोर्विंदविदेति द्विरावृत्त्या ग्रहणे एकएवायमर्थद्वयेप्यावर्तत इत्येकत्वानुसन्धानाच्छिलष्टता स्फुरत्येवेत्यर्थः । ननु भिन्नार्थाविमौ धातू भिन्नावेवेति कथमयं श्लेषः? यत्रैकस्यानेकार्थत्वं तत्रैव श्लेषव्यवहारादिति चेत्— सत्यम्; सादृश्यादेकत्वाध्यासाददोष इत्य-लंकारसर्वस्वकारः । एवं काव्यविदामित्यत्र प्रातिपदिकार्थं व्याख्याय विभक्त्या योजयन्नभ्यसनशब्दार्थमाह— **तेषामिति** । काव्यविदामित्यर्थः । कर्तरि षष्ठीयम् । शिक्षया एवं कुर्यादेवं विचारयेदित्युपदेशेन तथैव काव्यस्य करणं विचारणं च परिशीलनं तदेवाभ्यसनमित्यर्थः । अभ्यासस्य प्रयोजनमाह— **अनवरतमिति** । पाकशब्दार्थमाह— **पाकस्त्विति** । रसाः शृङ्गारादयः ।

तेषां मृदूद्धतादिभेदभिन्नत्वादुचितशब्दार्थगुम्फनात्तद्व्यञ्जनसमर्था सती सा पदवृत्तिः कर्णामृतवर्षिणी भवति । अतो रसास्वादोचितशब्दनिष्पत्तिः पाकः; स चाभ्याससाध्य इति सफलोऽभ्यास इत्यर्थः । अयं च पाकः कालिदासादि प्रबन्धेषु प्रसिद्ध एव । मतान्तरमाह— **पदानामिति** । परिवृत्तिवैमुख्यं विनिमयासहिष्णुत्वम् । एतदेव मैत्री शय्येति चाख्यायते । यथाऽस्मदीयश्लोके चन्द्रोदय वर्णने—

निशाकरकरस्पर्शान्निशया निर्वृतात्मना ।
अमी स्तम्भादयो भावा व्यज्यन्ते रज्यमानया ॥

अत्र निशादिपदस्थाने क्षपादिपदान्तरप्रक्षेपे पदानां परस्परमैत्रीभङ्गः । तदेवं शक्तिव्युत्पत्त्यभ्यासा मिलिताः काव्योत्पत्तौ कारणं, न त्वेकैकमिति प्रतिभेत्यादि श्लोकार्थः ।

मू०— शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभिधायि ध्वनि-
श्चार्वाकैरिव कैश्चिदस्य न पुनः सत्तापि सम्भाव्यते ।
कर्तुं लक्षणमक्षमैरयमनिर्वाच्यः परैरुच्यते
भाक्तोऽन्यैः समुदीर्यतेऽस्य हि ततो ब्रूमः स्वरूपं वयम् ॥१३॥

शब्दार्थवपुस्तावत् काव्यम् । वपुषि च केनाप्यात्मना भवितव्यम् । आत्मा च ध्वनिरेव । तस्य चाभावं मन्यमाना लोकायतिका इव केचन नास्ति ध्वनिरित्याचक्षते । अपरे तु वाग्गोचरतामवतारयितुमयं न शक्यत इति ब्रुवते । अन्ये तु भाक्तमेनं भाषन्ते । तदेवमुपस्थितासु तिसृषु विमतिषु समयमपेक्षमाणस्य शब्दस्यार्थबोधकत्वमिति न विचारितरमणीया वाच्याद्व्यतिरिच्यमानता प्रतीयमानस्येति मन्वानानभाववादिनः प्रति प्रथमं वदामः ।

व्या०— अथेह ध्वनिनिरूपणं प्रथमोन्मेषार्थः । न चासंदिग्धमप्रयोजनं च निरूपणमर्हतीति संदेहबीजं प्रयोजनं च दर्शयन् ध्वनिनिरूपणं प्रतिजानीते— **शब्दार्थाविति** । अस्य काव्यस्य । तत्र वपुषि । अस्य ध्वनेः सत्तापि न संभाव्यते अप्रामाणिकत्वान्नाङ्गीक्रियत इत्यर्थः । **लक्षणमिति** । गुणालङ्कारव्यावर्तकं धर्ममित्यर्थः । अनिर्वाच्यः सहृदयहृदयैकसंवेद्यो न तु निर्वक्तुं शक्यः । भाक्तः औपचारिकः । ततो विप्रतिपत्तिसद्भावात् । अस्य ध्वनेः स्वरूपं वयं सिद्धान्तिनो ब्रूमः । तदयमर्थः— शब्दार्थशरीरं काव्यम् ; तत्र ध्वनिरात्मेति सिद्धान्तः । तत्र त्रेधा पूर्वपक्षः । तत्र ध्वनिरेव नास्तीति प्रथमः । अस्त्यनिर्वाच्य इति द्वितीयः । निर्वाच्यो भाक्त इति तृतीयः । एतत्पक्षत्रयनिरासेन ध्वनिकारसिद्धान्तावलम्भात् ध्वनिरूपस्वरूपं प्रमाणलक्षणाभ्यां निरूपयाम इति । नन्वेतावता किमत्र प्रयोजनमुक्तम् ? किं वा सन्देहकारणम् ? इत्याशङ्क्य यथैवं तथा श्लोकं व्याचष्टे— **शब्दार्थेति** । ततः किम् ? अत आह— **वपुषि चेति** । अन्यथास्य निरात्मकत्वे वक्ष्यमाणगुणालङ्कारजातमशेषमपि शवशरीरमण्डनमापद्येतेति भावः । तर्ह्यात्मैव निरूप्यताम् ; किं ध्वनिसाधनेन ? इत्यत आह— **आत्मा च ध्वनिरेवेति** । अतः काव्यकान्ताशरीरस्य जीवितसिद्धिरेव ध्वनिसाधनस्य प्रयोजनमिति प्रथमपादार्थः । द्वितीयतृतीयाभ्यां तु सन्देहकारणं, वादिविप्रतिपत्तिः, प्रतिपाद्यत इति व्याचष्टे— **तस्य चेत्यादिना** । एवं त्रिधा वादिविप्रतिपत्तिमुपन्यस्य तत्राद्यपक्षप्रतिक्षेपमुपक्षिप्य पक्षानुवादपूर्वकं प्रतिजानीते— **तदेवमित्यादिना वदाम** इत्यन्तेन । विमतिषु विप्रतिपत्तिष्वित्यर्थः । अभाववादिनां मतमनुवदति— **समयमिति** । समयः संकेतः । इतिशब्दो हेत्वर्थे । समयमपेक्ष्यैव शब्दस्य बोधकत्वात् तमन्तरेण न कश्चिदर्थः प्रतीयते । यस्तु प्रतीयते समासोक्तिपर्यायोक्त्यादौ सोऽपि यथासंभवं जहत्याजहत्या वा कयाचिल्लक्षणया प्रतीयमानो वाच्योपस्कारकः सन् न वाच्याद् व्यतिरिच्यत इत्यभाव एव ध्वनेरिति भामहप्रभृतयो मन्यन्ते । तदेतदनूद्य तावन्निरस्यति ।

मू०— ननु ध्वनिर्नास्तीति प्रतिज्ञाविरोधः। ध्वनिरित्यनेन विधिः, नास्तीत्यनेन च निषेधः, तयोश्च परस्परविरुद्धयोरेकस्मिन् धर्मिणि तिमिरातपयोरिव सहानवस्थानदुःस्थयोरेव निवारितत्वात्। न चात्र विरोधपरिहारप्रयोजकयोर्देशकालयोरन्यतरस्याप्युपादानमस्ति, येन विरोधः समाधीयेत। किं च प्रतीतः प्रतिषिध्यते ध्वनिरप्रतीतो वा? आद्येऽपि क्वचिन्नास्ति, क्वचिदपि नास्तीति वा? प्रथमे सिद्धसाधनम्। अस्माभिरपि ध्वनेः काचित्कनिषेधप्रतियोगित्वस्याभ्युपगतत्वात्। न द्वितीयः। प्रतीतस्य सार्वत्रिकनिषेधप्रतियोगित्वे व्याघातात्। अप्रतीतश्चेन्न, प्रतियोगिप्रतीतेः प्रतिषेधं प्रति कारणत्वात्।

व्या०— नन्विति। ध्वनिर्नास्तीति ध्वनिं पक्षीकृत्य तस्य नास्तिताप्रतिज्ञाने प्रतिज्ञाव्याघात इत्यर्थः। व्याघातमाविष्करोति— ध्वनिरिति। स एवास्ति नास्ति चेति व्याघात इत्यर्थः। नन्वेकस्मिन्नपि धर्मिणि घटादौ देशभेदात् कालभेदाद्वा भावाभावौ व्यवस्थितावुपलभ्येते; तद्वदिहाप्यविरोध इत्याशङ्क्याह— न चात्रेति। नास्ति न संभवति। ध्वनेः क्वापि कदाप्यनङ्गीकारादिति भावः। तदुपादाननिषेधस्य प्रसक्तिमाह— येनेति। येन देशकालोपादानेनेत्यर्थः। विरोधसमाधानार्थं प्रसक्तस्यायं निषेध इत्यर्थः। अथापि निषेधे दोषान्तरं प्रस्तौति— किं चेति। तत्र प्रतीतिपक्षं द्वेधा विकल्पयति— आद्येऽपीति। किं काचित्को निषेधः सार्वत्रिको वेत्यर्थः। काचित्कपक्षं दूषयति— प्रथम इति। सिद्धसाधनत्वे हेतुमाह— अस्माभिरपीति। ध्वनिवादिनामपि प्रायेण चित्राधमादौ ध्वन्यभावाभ्युपगमादित्यर्थः। सार्वत्रिकपक्षं दूषयति— न द्वितीय इति। कुत इत्यत आह— प्रतीतस्येति। यत्र प्रतीयते तत्रापि निषेधे प्रतीतिविरोधः; अनिषेधे निषेधस्य सार्वत्रिकत्वभङ्ग इत्यर्थः। अप्रतीतनिषेधपक्षमाशङ्कते— अप्रतीतश्चेदिति। प्रतिषिध्यत इत्यनुवर्तते। परिहरति— नेति। कुत इत्यत आह— प्रतियोगीति। अबुद्ध्यारूढस्य निषेद्धुमशक्यत्वात् शक्यत्वे वा अकारणककार्योदयप्रसङ्ग इत्यर्थः।

मू०— अथ लब्धसत्ताक एव ध्वनिस्तथापि यदि न करोति काव्यस्य कामनीयकं तर्हि किमनेनाजागलस्तनायमनेन ? उत स्वित् करोति तर्हि गुणालङ्कारान्तर्भूत एव । तथाविधस्य च नामान्तरकरणे नैपुणं कियन्नाम? अत्रानुमानमपि—ध्वनिर्गुणालङ्कारेभ्यो न व्यतिरिच्यते, चारुताहेतुत्वात्, यदेभ्यो व्यतिरिच्यते न तच्चारुता हेतुः, अविमृष्ट-विधेयांशादिदोषवत्। चारुताहेतुश्च ध्वनिः । ततो न व्यतिरिच्यते तेभ्य इति । ननु गुणालङ्कारव्यतिरिक्ता अपि रीतयो वृत्तयो यथा चारुताहेतवस्तथैव ध्वनिरपि भवतीति चेदुच्यते तन्न विचारानुगुणम् । गुणातिक्रमेणोपजातमहिमानः कथमपि न भवन्ति रीतयः । वृत्तय-स्तावदलङ्कारान्तर्भूता एव; परुषमधुरमध्यमार्थनिरूपणाय दीप्तमसृण-मध्यमवर्णारब्धानां तासामनुप्रासजातिरूपतयाभ्युपगमात् । जातिस्तु जातिमतो नातिरिच्यते । तस्मादभिधाव्यापारवैचित्र्यानन्त्याच्चारुत्व-विधायिनः सम्भवतोऽपि सामान्यलक्षणेनैव परिगृहीतत्वाच्चिरन्तनैः पृथक्त्वेनाप्रदर्शितस्य गुणालङ्कारयोरन्यतरस्य कस्यचिद् ध्वनिरिति पारिभाषिकं नामान्तरं विधाय यदेतन्निरतिशयतर्कताटङ्कितशेमुषीकत्व-मात्मनस्ताण्डवयितुमुद्युञ्जते भवन्तस्तत्र को वेद किं निमित्तमिति चेदुच्यते तत्र किमत्रापि न ब्रूमः ।

व्या०— तदेवमभाववादे प्रत्याख्याते रुद्रटमतावलम्बनेनान्तर्भाव-वादी लब्धावकाशः प्रत्यवतिष्ठते— अथेति । अस्त्येव ध्वनिरित्यर्थः । तर्हि निर्विवादोपरम इत्याशङ्क्य ध्वनेश्चारुताहेतुत्वहेतुना गुणालङ्कारान्तर्भावं साध-यिष्यन् हेतोरन्यतरासिद्धिं तावत् परिहर्तुमाह— तथापीति । सद्भावे अपीत्यर्थः । गुणालङ्कारान्तर्भूत एव विशेषः कुत इत्याशङ्क्य, किं ध्वनेः काव्यचारुताहेतुत्वमङ्गीक्रियते न वा । नेति पक्षे बाधकमाह— यदीति । यदि चारुताहेतुर्न स्यात् वृथा स्यादिति तर्कः । अथ वैयर्थ्यभीत्या चारुताहेतुत्व-

मङ्गीक्रियते तर्हि सिद्धं नः समीहितमित्याह– **उतस्विदिति** । तर्हि पार्थक्य-वाचो युक्तिः परिहासहेतुरित्याह– **तथाविधस्येति** । गुणाद्यन्तर्भूतस्येत्यर्थः । नैपुणं वैदुष्यम् । कियन्नाम न किंचिदित्यर्थः । एवं चारुताहेतुत्वहेतोरन्यतरासिद्धिं परिहृत्य पञ्चावयवप्रयोगारूढं करोति– **अत्रेत्यादिना**, चारुताहेतुत्वात् काव्यशोभाकरत्वादित्यर्थः । यश्चारुताहेतुः स तेभ्यो न व्यतिरिच्यते, यथोपमादिः, इत्यन्वयोदाहरणस्य स्फुटत्वात् व्यतिरेकोदाहरणमेवाह– **यदेभ्य इति** । ' वपुर्विरूपाक्षमलक्ष्यजन्मता ' इत्यत्र विधेयं जन्मनोऽलक्ष्यत्वं समासे गुणीभूतत्वान्न परामृश्यत इति अविमृष्टविधेयांशदोषः, तद्वदित्यर्थः । उपनयमाह– **चारुताहेतुश्चेति** । निगमनमाह– **तत इति** । वैदर्भ्यादिरीतिषु कैशिक्यादिवृत्तिषु च गुणालङ्कारव्यतिरिक्तासूक्तहेतोर्व्यभिचारं शङ्कते– **नन्विति** । प्रकृते योजयति– **तथैवेति** । रीत्यादिवत् ध्वनिरपि गुणालङ्कारातिरिक्त एव चारुताहेतुर्भवतीत्यर्थः । इति चेदुच्यते इत्युच्यते चेदित्यन्वयः । परिहरति– **तन्न विचारानुगुणमिति** । न युक्तिसहमित्यर्थः । कुत इत्याशङ्क्य न हि पक्षे पक्षतुल्ये वा व्यभिचारः, आसामपि तत्रैवान्तर्भावादित्यभिप्रेत्य रीतीनां तावद्गुणेष्वन्तर्भावमाह– **गुणेति** । गुणाः श्लेषप्रसादादयः । रीतयो: वैदर्भ्यादयः । ताश्च गुणविशेषविशिष्टपदरचनात्मिकास्ततः प्राप्ताप्राप्तविवेकेन गुणानामेव रीतिव्यवहारहेतुत्वात् गुणात्मिका एव रीतयो न ततोऽतिरिक्तस्वरूपा इति न तासु हेतोर्व्यभिचार इत्यर्थः। वृत्तीनां त्वलंकारेष्वन्तर्भावमाह– **वृत्तय इति** । कास्ता वृत्तयः? केषु वाऽलङ्कारेष्वन्तर्भूताः कथं वा, इत्याकाङ्क्षायां रसोचितवर्णसन्दर्भात्मिका वृत्तयः; अत एव तासामनुप्रासनामनि शब्दालङ्कारेऽन्तर्भाव इत्याह– **परुषेति** । अत्रार्था रसाः, तत्र रौद्रबीभत्सौ परुषौ, शृङ्गारकरुणौ मधुरौ, अन्ये मध्यमाः, यद्यपि तेष्वपीषत्परुषौ बीभत्सभयानकावीषन्मधुरा हास्याद्भुतशान्ता इति भेदोऽस्ति तथापि शुद्धभेदवैलक्षण्यमात्रविवक्षया सर्वेषां मध्यमत्वोक्तिः । तेषां निरूपणाय प्रतिपादनायेत्यर्थः । दीप्ताः परुषाः,

मसृणाः मधुराः, मध्यमास्तु पूर्ववत् । तैर्वर्णैरारब्धानामित्यनेन रसोचितवर्ण-सन्दर्भो वृत्तिरिति सामान्यलक्षणमुक्तम् । तद्विशेषाः कैशिक्यादयः । तथाहि-अतिसुकुमारार्थसन्दर्भा कौशिकी । अतिप्रौढार्थसन्दर्भा त्वारभटी । ईषन्मृद्वर्थस-न्दर्भा भारती। इषत्प्रौढार्थसन्दर्भा सात्वती। ताश्च वर्णावृत्तिनियतात्मकतयाऽनुप्रा-सभेदा एवेत्याह- **अभ्युपगमादिति** । अर्थापेक्षत्वेऽपि वर्णावृत्तिप्राधान्याच्छ-ब्दालङ्कारतास्याभिरङ्गीक्रियत इत्यर्थः । यद्यासामनुप्रासजातिरूपता तर्ह्यलंकार-निष्ठजातिरूपत्वं नालंकारत्वमिति कुतोऽलङ्कारान्तर्भाव इत्याशङ्क्याह- **जातिस्त्विति** । जातिव्यक्त्योस्तादात्म्यादिति भावः। तदेवं हेतोरव्यभिचारात् ध्वनेर्गुणालङ्कारान्तर्भावः सिद्ध इति सोपहासमुपसंहरति - तस्मादित्यादिना इति चेदुच्यत इत्यन्तेन । **कस्यचिदिति** । अर्थस्य प्रतीयमानस्येति शेषः । पारिभाषिकं जात्यादिप्रवृत्तिनिमित्तशून्यं डित्थादिवत् केवलसाङ्केतिकमित्यर्थः । ननु पारिभाषिकत्वे को हेतुः ? तत्राह- **गुणालंकारयोरन्यतरस्येति** । तयोरन्तर्भूतस्य इत्यर्थः । तथाचोपमादिवदलङ्कारत्वावांतरजातिमतः पारिभाषिक-संज्ञाकरणमज्ञानकारणकमेवेति भावः । तदन्तर्भावे हेतुमाह- **चिरन्तनैरिति** । भामहादिभिरित्यर्थः । तेषामपृथक्करणे हेतुमाह - **सामान्येति** । सामान्यलक्षणमाह- **चारुत्वविधायिन** इति । नन्वभिधायाः प्रकृतार्थे नियन्त्रणाल्लक्षणायाश्च मुख्यार्थबाधमन्तरेणाप्रवृत्तेर्व्यञ्जनाव्यापारे च भवताम-कारुण्याद् गत्यन्तरस्य चासंभवादनाघातसत्ताकस्य ध्वनेरन्तर्भावाभिदानमभित्ति-कचित्ररचनाप्रायमित्याशङ्क्याह- **संभवतोऽपीति** । ननु संभव एव कुत इत्युक्तम् , तत्राह- **अभिधेति** । इह तावदर्थान्तरप्रतीतेर्दुरवहनवत्वाद्व्यापा-रमन्तरेणाप्रतीतेर्व्यापारान्तरकल्पनायां गौरवाद्धर्मिकल्पनातोवरं धर्मकल्पनेति न्यायादभिधाया एव तात्पर्यान्तरकल्पनं वरमित्यभिप्रायः, ताटङ्कः कर्णभूषणम् । तर्केण तारङ्किता सञ्जाततारङ्का, तर्कालङ्कृतेत्यर्थः शेमुषी प्रज्ञा येषां तेषां भावस्तत्त्वं तार्किकत्वमित्यर्थः । ताण्डवयितुं ताण्डववत् कर्तुं, नर्तयितुं, प्रकटयितुमिति

यावत् । ताण्डवशब्दात् मत्वन्तात् 'तत्करोति' इति णिचि तुमुन् प्रत्ययः, णाविष्ठवद्भावात् विण्मतोर्लुक् इति मतुपो लुक् । तत्रेति । तत्रोद्योगे किं निमित्तं को वेदेत्यन्वयः । मूढचेष्टितानामचिन्त्यहेतुकत्वादितिभावः । इति चेदुच्यते उच्यते चेदित्यन्वयः । अथ पृथग्भाववादी साहंकारं प्रतिजानीते– तत् किमिति । अत्रापि वक्तुं शक्यत एवेति भावः ।

मू०—गुणेषु तावन्न ध्वनेरन्तर्भावः; रसधर्मत्वात्तेषाम् । न हि धर्मे धर्मिणोऽन्तर्भावः । नाप्यलङ्कारेषु । वाच्यमात्र-विश्रान्तेषु श्लेषादिषु व्यभिचारात् । ननु यत्र अलंकारेषु न ध्वनेः प्रतीतिस्तत्र मा भूदन्तर्भावः ; यत्र तु समासो-क्त्यादिषु स्फुटैव प्रतीतिः प्रतीयमानस्य तत्र तदन्तर्भावो न भङ्गुर इति यत् पुनरलङ्कारकोटिनिविष्टत्वं वस्तुध्वनेरुद्भावयन् भामहादयस्तदपि विचारविधुरम् । व्यङ्ग्यस्य प्राधान्ये ध्वनिः, उपसर्जनत्वे पुनः प्रसिद्धाः समासोक्त्यादयोऽलङ्काराः; ततस्तेषु कथङ्कारमन्तर्भावोऽस्य भवतु ?

व्या०—तत्र रसवस्त्वलङ्कारात्मना त्रिविधस्यापि ध्वनेर्गुणान्तर्भावं तावन्निरस्यति– **गुणेष्विति** । गुणा(न)न्तर्भावे हेतुमाह– **रसेति** । ततः किमत आह– **न हीति** । आत्मन शौर्यादय इव काव्यात्मनि रसे माधु-र्यादयो गुणाः समवायवृत्त्या वर्तन्ते इति गुणोन्मेषे वक्ष्यति । अतो रसधर्मेषु गुणेषु धर्मिणो रसध्वनेर्नान्तर्भावः संभवति । संभवेवात्मनोऽपि शौर्या-दिष्वन्तर्भावप्रसङ्गः इत्यर्थः । एवं गुणानां रसधर्मत्वादेव न तेषु वस्त्व-लंकारध्वन्योरप्यन्तर्भावः । अन्तर्भावे वा घटस्य पटधर्मेष्वन्तर्भाव इत्यनु सन्धेयम् । अथालङ्कारेष्वन्तर्भावं वाटयति– **नाप्यलङ्कारेष्विति** । अन्तर्भाव इत्यनुवर्तते । ननु समासोक्त्यादौ वस्तुध्वनेः दीपकरूपकादा-वलंकारध्वनेः, रसवदादौ च रसध्वनेश्चान्तर्भावात् त्रिविधोऽप्यलङ्कारा-

न्तर्भूत एवेति कथमनन्तर्भाव इत्याशङ्क्य श्लेषादिषु तावद्वाच्यमात्रविश्रा-न्तत्वेन ध्वनिगन्धस्यैवाभावात् नान्तर्भाववार्तापीत्याह – **वाच्यमात्रेति** । व्यभिचारोद्भवादित्यर्थः । आदिग्रहणाच्चित्रादिसंग्रहः । श्लेषेऽपि श्लिष्टयो-रौपम्यं गम्यते यद्यपि तथापि तस्याद्यभेदद्वयस्य वैवक्षिकत्वेनासत्त्वात्तृतीय-भेदस्यैतन्मतेऽनङ्गीकारादङ्गीकुर्वतां च प्रतिभामात्रेण वाच्यतयैव स्थितत्वादभा-वोक्तिः । ननु यत्र नास्ति तत्र मा भूत् , यत्र त्वस्ति वस्तु व्यङ्ग्यं समा-सोक्त्यादौ तत्रान्तर्भाव इति भामहाद्युक्तमुद्भावयति– नन्वित्यादिना भामहादय इत्यन्तेन । न भङ्गुर इति यत् पुनरुद्भावयन्नित्येकवाक्यतयान्वयः । सत्य-मप्रधानदशायां तत्र व्यङ्ग्यस्य वाच्योपस्कारकत्वेनालङ्कारत्वमुक्तम् ; प्राधान्यद-शायान्तु न्यग्भावितवाच्यस्य वाच्यकक्षातिलङ्घिनस्तस्य ध्वनित्वमास्थितस्य स्वय-मलङ्कार्यस्य काव्यात्मनः कुतोऽलङ्कारत्वमिति परिहरति– **तदपीति** । कुत इत्यत आह– **व्यङ्ग्यस्येति** । ध्वनेः स्वतो नालङ्कारान्तर्भावः; अन्तर्भवतश्च न ध्वनित्वमप्राधान्यादित्यवधेयमिति भावः ।

मू०— यदेभिरेव रूपकदीपकतुल्ययोगितादिष्वलङ्कारेषु पुनरुपमालङ्कारः प्रतीयमानो वाच्यस्योपस्कुरुत इत्यलङ्कारध्वने-रप्यलङ्कारत्वं शङ्कितं तदपि न विचारसहिष्णु । तत्रापि गुणीभूतव्यंग्यतयैवोपमायाः स्थितत्वात् । रसवत् - प्रेय - उर्जस्वित् - समाहिताभिधानेष्वलङ्कारेष्वपि रसभावरसाभासभावा-भासभावप्रशमानामङ्गत्वमेव । किं चैवमन्तर्भावाभिधानं न सङ्ग-च्छते । रसादीनामात्मत्वे(न) प्रतिपन्नानामलङ्कारत्वशङ्काया अपि दूरनिरस्तत्वात् ।

व्या०— मास्तु वस्तुध्वनेरन्तर्भावः; अलङ्कारध्वनिस्त्वलङ्कार एवेति तैरेवोक्तम्; तदपि दूषयितुमुद्घाटयति - **यदेभिरेवेति** । भामहादिभिरेवेत्यर्थः ।

अन्तर्भावे हेतुमाह– वाच्यस्योपस्कुरुत इति । इतिशब्दो हेत्वर्थे । वाच्यालंकार-स्योपस्कारकत्वादित्यर्थः । 'कृञः प्रतियत्ने' इति कर्मणि शेषे षष्ठी । दूषयति-**तदपि नेति** । कुत इत्याशङ्क्य तत्रापि पूर्वोक्तामेव युक्तिमवतारयति– **तत्रापीति** । तत्रापि रूपकादावप्यप्राधान्यदशायामेवालङ्कारत्वं प्राधान्यदशायां त्वलङ्कार्यत्वमेवेति नान्तर्भाव इत्यर्थः। ननु रसवदाद्यलङ्कारेषु रसादिध्वनेरन्तर्भावः सिद्ध इत्याशङ्क्याह– **रसवदिति** । रसो गुणीभूतो रसवानलङ्कारः । भावस्तु गुणीभूतः प्रेयान् । एवं रसाभासो भावाभास ऊर्जस्वी । भावप्रशमः समा-हित इति । अङ्गत्वमुपसर्जनत्वम् । ततः किमित्यत आह– **रसादीनामिति** । अत्रापि रसादीनामङ्गत्वादेवालङ्कारत्वं, प्राधान्यदशायां तु तेषामपि ध्वनित्वा-दलङ्कार्यत्वमेव । तदुक्तमलङ्कारसर्वस्वसंजीवन्याम् - 'रसादेरलङ्कारत्वं सनातनं न भवति, प्राधान्यदशायामलङ्कार्यत्वात्' इति ।

मू०—किं च ध्वनिर्गुणालङ्कारेभ्यो न व्यतिरिच्यते, चारुत्वहे-तुत्वादिति यद् भवद्भिरभ्यधायि तदपि दुरभिधानम् । ध्वनेर्ध्वन्यात्मतया चारुत्वहेतुत्वादिति हेतोः सिद्धिपद्धत्यनध्यासात्[1] । एवं त्रिविधस्यापि ध्वनेरलङ्कारत्वं तावत् प्रत्यादिष्टम् ।

व्या०—पूर्ववाद्युपन्यस्तमनुमानं चानूद्यासिद्ध्या दूषयति– **किंचेत्या-दिना** । चारुताहेतोरसिद्धत्वे हेतुमाह– **ध्वनेर्ध्वन्यात्मतयेति** । ध्वनित्वा-देवेत्यर्थः । अयमाशयः ध्वनिरात्मा काव्यस्येत्युक्तम् । आत्माचालंकार्य एवेत्य-विवादम् । तथाच ध्वनित्वस्यालंकार्यत्वाविनाभावात्तस्य चालंकारत्वविरोधित्वात् तन्निवृत्तौ तद्व्याप्यस्य चारुताहेतुत्वस्यापि निवृत्तिरिति व्यापकविरुद्धोपलब्धे-रसिद्धो हेतुरित्यर्थः । अन्तर्भावाभावमुपसंहरति– **एवमिति** ।

---

१) असिद्धत्वादित्यर्थः ।

मू०—यत् पुनरनुमानतो नातिरिच्यते ध्वनिरित्याचष्ट महिमभट्टः तदपि पलालायमानम् । अनुमानस्य चाङ्गं व्याप्तिः । अनया विनानुमानमपि । कथंकारमात्मानमासादयितुमीशिष्यते ? अथ क एवमाह नास्ति व्याप्तिरिति ? तर्हि तामेव व्याप्तिमनुमानवादिनो वदनादवतरन्तीमाकर्णयितुमुत्कण्ठाभारमन्थरा नः श्रवणसीमानः । साध्यसामान्येन साधनसामान्यस्याविनाभावो हि व्याप्तिः । प्रकृते ध्वनिः साध्यसामान्यम् ; शब्दार्थौ च साधनसामान्यम् । तत्र च ध्वनेरनुपलब्धिर्वा शब्दार्थयोस्तादात्म्यं वा तदुत्पत्तिर्वा साधिका । न तावदनुपलब्धिः साध्यं बोधयतीति शक्यतेऽभिधातुम् ; अभावरूपसाध्यैकसाधनाय प्रगल्भमानत्वात्तस्याः यथाऽत्र न कुम्भः, उपलम्भयोग्यस्य तस्यानुपलब्धेरिति । प्रकृतेत्वन्यतरासिद्धो हेतुः । न हि वयं ध्वन्यु(न्यनु)पलम्भेन ध्वन्यभावं साधयामः; ध्वन्युपलम्भेन ध्वनेरेवास्माभिः साध्यमानत्वात् । नापि शब्दार्थयोरनुपलम्भेन । न हि कुम्भानुपलम्भः स्तम्भाभावं साधयितुमीष्टे । नापि तादात्म्यम् । तादात्म्यं हि - अयं वृक्षः, शिंशपात्वात् , या या शिंशपा स स वृक्षः, यथा सम्प्रतिपन्नः, शिंशपा चेयम् , तस्माद्वृक्ष इतिवद्भविष्यति । साध्यसाधनयोस्तादात्म्येन व्यवस्थितयोरेव गम्यगमकभावदर्शनात् ।

व्या०—वाच्यवाचकयोः प्रतीयमानं प्रति लिङ्गत्वात् व्यञ्जनस्यानुमानान्तर्भाव इति व्यक्तिविवेककारः । तन्मतं दूषयितुमनुभाषते— **यत् पुनरिति** । दूषयति— **तदपीति** । पलालायमानं पलालप्रायम् , निस्सारमित्यर्थः । निष्फलो धान्यतृणकाण्डः पलालम् । 'पलालोऽस्त्री स निष्फलः' इत्यमरः । कुत इत्याशङ्क्य व्याप्त्यभावादित्यभिप्रेत्याह— **अनुमानस्येति** । परोऽप्यभिमन्यमान आक्षिपति— **अथ क इति** । अस्ति चेदुच्यताम् , शुश्रूषामहे वयमित्याह सिद्धान्ती— **तर्हीति** । सिद्धान्त्यत्र व्याप्तिलक्षणपूर्वकं पराभिमते

व्याप्यव्यापके विविनक्ति– **साध्यसामान्येति** । एवं पराभिमतव्याप्यव्यापके विविच्य तयोर्व्याप्तिप्रयोजकाभावात् व्याप्यव्यापकभावमभिव्यङ्क्तुं शास्त्र-सिद्धानि प्रयोजनानि तावद्विकल्पयति– **तत्र चेति** । अनुपलब्धिस्तादात्म्यं तदुत्पत्तिश्चेति त्रीणि हि प्रयोजकानि । तत्र यत्राभावयोर्गम्यगमकभावः, यथा ज्ञानाभावज्ञेयाभावयोस्तत्रानुपलब्धिः प्रयोजिका । यत्र धर्मिणोः, यथा वृक्ष-त्वशिंशपात्वयोः, तत्र तादात्म्यम् । यत्र कार्यकारणयोः, यथा धूमाग्न्योः, तत्र तदुत्पत्तिः । तत्रानुपलब्धेश्च साध्यानुपलब्धिश्चेति द्वैविध्ये चातुर्विध्यम-भिप्रेत्याह– **ध्वनेरिति** । तदेवं चतुर्धा विकल्प्याद्यं दूषयति– **न तावदिति** । अनुपलब्धिः साध्यानुपलब्धिः; साध्यं च ध्वनिः । तस्यास्तद्बोधकत्वे हेतु-माह– **अभावरूपेति** । साध्यानुपलब्धिः साध्याभावं बोधयति न तु साध्यम् ; योग्यानुपलब्धेरभावैकविषयत्वादित्यर्थः, अत्र दृष्टान्तमाह– **यथात्रेति** । यद्यनुपलब्धेः प्रमाणान्तरत्वं प्रमाणसहकारित्वं चेति द्वयी गति-स्तथापि विप्रतिपन्नं प्रति लिङ्गतया बोधकत्वे सर्वसंप्रतिपत्तेरविरोधः । तर्हि वयमप्यभावमेव ध्वनेः साधयाम इति पूर्वापरविस्मारिणः शङ्कां परिहरति– **प्रकृते त्विति** । प्रकृते तथाचेदन्यतरासिद्धो हेतुरित्यर्थः । कुत इत्याशङ्क्या-स्माभिरनङ्गीकारादित्याह– **न हीति** । अनुपलब्धिविरुद्धायामुपलब्धौ जाग्रत्यां कुतोऽनुपलब्धेर्जीवितमित्यसिद्धो हेतुरित्यर्थः । अथ साधनानुपलब्धिपक्षं प्रतिक्षिपति– **नापीति** । साध्यसिद्धिरिति शेषः । तत्रापि किं ध्वनिः साध्यं तदभावो वा ? नाद्यः; अनुपलब्धेरभावमात्रगोचरत्वात् ; धूमानुपलब्धेः धूम-ध्वजसिद्धिप्रसङ्गाच्चेति । न द्वितीय इत्याह– **न हि कुम्भेति** । अत्र तादात्म्यपक्षं प्रत्याचष्टे– **नापि तादात्म्यमिति** । कुत इत्याशङ्क्य प्रसिद्धं तावत्तादात्म्यानुमानमुदाहरति– **तादात्म्यं हीति** । इतिवद् भविष्यतीत्यन्वयः। यदि शब्दस्यार्थस्य वा ध्वनिना तादात्म्यं भविष्यत्येवं भविष्यतीत्यर्थः । कोऽयं नियम इत्याशङ्क्य तथा दर्शनादित्याह– **साध्यसाधनयोरिति** ।

मू०—यद्यपि यो यो वृक्षः स स शिंशपेति नास्ति व्याप्तिः, चन्दनचम्पकादौ व्यभिचारात्, तथापि -- वृक्षोऽयम्, शिंशपात्वात्, या या शिंशपा स स वृक्षः, इत्यस्त्येव व्याप्तिः। यद्यपि वृक्षाः शिंशपात्वं व्यभिचरन्तो व्यलोक्यन्त तथापि शिंशपा वृक्षत्वं व्यभिचरन्ती न व्यलोक्यतेति वृक्षं गमयति, तथा प्रकृते न घटते। न हि शब्दोऽर्थो वा गमकत्वेन योऽभ्युपगम्यते तस्य प्रतीयमानेन साध्येन सह गम्यगमकभावस्तादात्म्येन व्यवस्थितः। प्रत्युत शब्दार्थन्यक्कारेणैव तस्य प्रवर्तमानत्वात्। तर्हि चरमा तदुत्पत्तिरेव परिशिष्यते। सापि विचार्यमाणा न प्रतिष्ठामधिष्ठास्यति। यतस्तदुत्पत्तेरिदमुदाहरणम् -- वह्निमानयं प्रदेशः, धूमवत्त्वात्, इति। धूमो हि वह्नेः आत्मज इति कृत्वात्मनो जनकमेनमनुमापयितुमीष्टे। न च प्रस्तुते शब्दार्थयोरनुमानवादिना लिङ्गत्वेनाङ्गीकृतयोः प्रतीयमानाज्जायमानत्वमनुमतम्। आत्मजन्मनः प्राक्काले स्वसामग्रीसंनिधानादेव तयोः आविर्भावदर्शनात्।

व्या०—ननु तत्रापि वृक्षत्वस्य शिंशपात्वेन व्याप्तिर्नास्तीत्याशङ्क्य माभूत्, शिंशपात्वस्य तु वृक्षत्वे नास्तीत्याह-- **यद्यपि यो य इति**। उभयत्र दर्शनादर्शने एव प्रमाणमित्याह-- **यद्यपि वृक्षा इति**। प्रकृते तु नैवमित्याह -- **तथा प्रकृत इति**। अघटमानतामेव प्रकटयति - **न हीति**। यथा शिंशपात्वं वृक्षतादात्म्येन वृक्षत्वं गमयति न तथा शब्दोऽर्थो वा साधनाभिमतः साध्याभिमतं प्रतीयमानं तत्तादात्म्येन गमयति; व्यङ्ग्यव्यञ्जकयोः तादात्म्येऽतिप्रसङ्गात्। अनात्म्ये लिङ्गमाह-- **प्रत्युतेति**। तादात्म्यवैपरीत्येनेत्यर्थः। वैपरीत्यमेवाह- **शब्दार्थन्यक्कारेणेति**। स्वप्रत्यायनमात्रोपक्षीणतया शब्दार्थावुपसर्जनीकृत्य तस्य प्रतीयमानस्य प्राधान्येन स्फुरणादित्यर्थः। एवं पक्षान्तरप्रतिक्षेपेण तदुत्पत्तिपक्षं परिशिनष्टि-- **तर्हीति**। तां च पराचष्टे—

सा चेति । अप्रतिष्ठाकारणमाह-- यत इति । आत्मजत्वं कार्यत्वम् । ननु तथास्तु प्रकृतेऽपीत्याशङ्क्याह-- न च प्रस्तुत इति । आत्मजन्मनः प्राचि-काले - स्वोत्पत्तेः प्रागित्यर्थः । न हि ततः प्रागुत्पन्नस्य तत्कार्यत्वं घटत इति भावः । तदेवं शब्दार्थयोर्ध्वनेश्च व्याप्तिप्रयोजकयोः तादात्म्यतदुत्पत्त्योरस-म्भवेन व्याप्त्यभावान्नानुमानपक्षः प्रतिष्ठां लभत इति स्थितम् । ननु दर्शनान्त-रेऽन्तरेणापि तादात्म्यतदुत्पत्ती केवलमन्वयव्यतिरेकाभ्यामेव व्याप्त्यवधारणम् , कृत्तिकोदयरोहिण्यासक्तिवदिति चेन्न । यत्र शब्दार्थौ तत्र ध्वनिः, यत्र ध्वनिर्न न तत्र शब्दार्थौ इति व्याप्त्यभावात् । अव्यङ्ग्ये व्यभिचारादिति । तस्मात् सिद्धं न शब्दार्थयोः प्रतीयमानं प्रति लिङ्गत्वमिति ।

सू०—अथ अभिहितानामेव पदार्थानामन्वय इति मन्वानान् प्रतीयमानं प्रति विवदमानानभिहितान्वयवादिनो नैयायिकान् वदामः । नन्वानन्त्याद्व्यभिचाराच्च विशेषाश्लेषाय न प्रभवति संकेत इति सामान्यरूपाः पदार्थाः संकेतविषयाः । तत्र सङ्केतः पदेष्वेव । संके-तितानि च पदानि पदार्थानभिदधति । अभिहितानां च पदार्थानां तेषामाकाङ्क्षा संनिधियोग्यतावशादन्योन्यमन्वये जातेऽननुभूतपूर्वः कोऽप्यभूतपूर्वः पदानभिधेयो विशिष्टरूपो वाक्यार्थः परिस्फुरति । विशिष्टे च वाक्यार्थे नास्ति पदानां सङ्केत इति । यत्र स्वस्वपदार्थमा-त्राभिधानाय जागरूकव्यापाराण्यपि पदानि स्वैः स्वैः पदार्थैरारब्धमपि न वाक्यार्थमभिधातुमीशते तत्रार्थान्तरभूतो ध्वनिरभिधामवगाहिष्यतइति का नाम वः प्रत्याशा ?

व्या०—नन्वभिधेयातिरिक्तं प्रतीयमानमेव नास्ति । यदप्यस्ति तदभिधेयमेवेति मीमांसकाः । तत्रापि केचिदभिहितान्वयवादिनः केचिद-न्विताभिधानवादिनः । तत्र तावदाद्यान् समादध्य इत्याह— अथेति ।

नैयायिकान् न्यायवेदिनो मीमांसकानित्यर्थः । तत्रापि भाट्टान् प्राभाकरान्वेत्याकाङ्क्षायां तावद् भाट्टानाह- **अभिहितान्वयवादिन इति** । ननु तेषां कुत्र विवादस्तत्राह- **प्रतीयमानं प्रतीति** । ध्वनिं प्रतीत्यर्थः । नन्वलं न्यायविदामग्रे वृथा वल्गनैरित्याशङ्क्य, किं तैरर्थान्तरस्य प्रतीतिरेवापह्नूयते अभिधेयत्वं तस्याप्यास्थीयते इति द्विधा विकल्प्य – नाद्यः, सकलसहृदयहृदयसंवादिनस्तस्य दुरपह्नवत्वात् । द्वितीये तु किं वाक्याभिधेयत्वं पदाभिधेयत्वं वा ; नाद्यः, लक्षणावादिनां तेषामपसिद्धान्तापातात् । द्वितीये तु स्वरूपनिरूपणपूर्वकमाह – नन्वित्यादिना का नाम वः प्रत्याशेत्यन्तेन । तत्र पदानां संकेतविषयं तावद्विविनक्ति- **सामान्यरूपा इति** । आकृत्यधिकरणन्यायादित्यर्थः । ननु व्यक्तिष्वेव संकेतः किं न स्यात् तत्राह- **विशेषेति** । विशेषाः व्यक्तयः । आश्लेषः क्रोडीकारः । न प्रभवति न शक्नोति । संकेतः संकेतग्रहः । हेत्वर्थ इति शब्दः । अशक्तौ हेतुद्वयमाह – **आनन्त्याद् व्यभिचाराच्चेति** । व्यक्तिसंकेतपक्षे तासां वैलक्षण्यात् प्रतिपिण्डं संकेतग्रहप्रसङ्गः; स चाशक्यः; त्रैकाल्यवर्तिनां तेषामानन्त्यात् । वैलक्षण्यादेव गोपिण्डान्तरवदगोपिण्डेष्वपि गोशब्दप्रवृत्तिप्रसङ्गश्च । तस्मादानन्त्यव्यभिचाराभ्यां व्यक्तिसंकेतानुपपत्तेः सामान्येष्वेव संकेतः । व्यक्तयस्त्वाक्षेपलभ्या इत्यर्थः । कुत्रेषां संकेत इत्याकाङ्क्षायां वर्णानामनर्थकत्वात्, वाक्यवाक्यार्थयोः अनियतत्वाच्च परिशेषात् पदेष्वेव संकेत इत्याह- **तत्रेति** । संकेतफलमाह – **संकेतितानि चेति** । अस्यायमर्थ इति सङ्केतितानि, गृहीतसङ्गतिकानीत्यर्थः । ततः किमत आह-- **अभिहितानां चेति** । अर्थैकत्वादिति न्यायादिति भावः । तमन्तरेणापरिपूरणमाकाङ्क्षा । संनिधिरव्यवधानेनोच्चारणम् । योग्यतासामर्थ्यम्, प्रमाणबाधविरह इति यावत् । अन्वयः संसर्गः । अननुभूतपूर्वः प्रमाणान्तरागोचरः । अभूतपूर्वः प्रागसिद्धः । **कोऽपीति** । पदार्थसंसर्गरूप इत्यर्थः । सोऽपि पदार्थ एवेत्याशङ्क्याह- **पदानभिधेय इति** । तत्र हेतुमाह.

विशिष्टरूप इति। अनेकपदार्थानुरक्तरूपः स्फुरतीत्यर्थः । यदाहुर्भट्टपादाः-- 'पदार्थैरनुरक्तोऽसौ वाक्यार्थः संप्रतीयते' इति । एतदेवास्य वैशिष्ट्यम्, अविशिष्टस्तु पदार्थ इति भावः । विशिष्टस्यापदार्थत्वे हेतुमाह-- **विशिष्टे चेति** । इति शब्दो हेत्वर्थे । असंकेतितार्थबोधकत्वे वा सर्वं पदं सर्वस्यार्थस्य बोधकं स्यात् । वाक्यार्थस्तु न संकेतापेक्ष इति भावः । तर्हि वाक्यार्थे किं कारणमिति चेत्, पदार्था एवेति ब्रूमः । तथाहि - ज्योतिष्टोमादिवाक्यस्थैः पदैः स्वाभिधेयसामान्यापर्यवसानादाकाङ्क्षासंनिधियोग्यताबललब्धैकवाक्यताव्यवस्थापितकारणत्वादिशक्तियुक्ता नियतव्यक्तीराक्षिपद्भिः स्वार्थाभिधानद्वारा तत्सम्बन्धितयेतरपदार्था लक्ष्यन्ते । तत्र तत्र दीर्घदीर्घतमवाक्येषु पूर्वपूर्वपदविस्मरणेऽपि वाक्यार्थसंवेदनदर्शनात् अनुसन्धीयमानैः पदार्थैरेव वाक्यन्यक्कारेण स्वर्गयागादिसाध्यसाधनसम्बन्धरूपो वाक्यार्थोऽनेकपदार्थानुरक्तः प्रतिपाद्यत इति तद्भूताधिकरणसिद्धान्तसिद्धोऽर्थः । यथाहुः - "तस्मात् पदैरभिहितैः पदार्थैर्लक्षणया वाक्यार्थः प्रतिपाद्यते" इति । तदेतत् - 'पदार्थानामन्वये जाते वाक्यार्थः परिस्फुरति' इत्यनेन सूचितम् । अस्तु; प्रकृते किमायातम् ? तत्राह-- **यत्रेति** । संनिकृष्टवाक्यार्थाभिधानासमर्थानां पदानां विप्रकृष्टध्वन्यभिधानं कैमुत्यन्यायनिरस्तमित्यर्थः । वाक्यार्थस्य संनिकृष्टत्वे हेतुमाह-- **स्वैः स्वैः पदार्थैरारब्ध इति** । तत्संसर्गरूपत्वात् तदारब्धत्वव्यपदेशः । ध्वनेर्विप्रकृष्टत्वे हेतुमाह-- **अर्थान्तरभूत इति** ।

मू०— "आरोह जयायकुञ्जरम्" इत्यादिवाक्यप्रयोक्तारं प्रत्यक्षीकरोति प्रथमम् । चरममनेनास्माद्वाक्यादयमर्थोऽधिगत इति तदभिमुखानुसरणरूपया चेष्टयाऽनुमिनोति – इयं प्रवृत्तिरर्थावधारणपूर्विका, प्रवृत्तित्वात्, सम्प्रतिपन्नप्रवृत्तिवत् इति । यद्यमुमर्थमस्माद्वाक्यान्नाज्ञासीत् तर्हि कथं तदभिमुखं चेष्टत इत्यर्थापत्त्या पुनरखण्डस्य वाक्यार्थस्य तादृशमेव वाक्यं वाचकमिति तयोर्वाक्यवाक्यार्थयोर्वाच्यवाचकभावलक्षणसम्बन्धमवधारयति । ततस्तत्र व्युत्पत्तिमासादयति

बालः । अनन्तरं 'अवरोह कुञ्जरात्' 'जातस्ते जयः' इत्यादिप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमवगच्छतीत्यन्वयव्यतिरेकाभ्यां प्रवृत्तिनिमित्तस्य वाक्यस्यैव प्रयोगयोग्यता यस्मात्तस्मात्तद्वाक्यान्तर्वर्तिनामेव पदानामितरेतरमाकाङ्क्षासंनिधियोग्यतावशादन्वितैः पदार्थैरन्वयं गतानामेव संकेतविषयत्वमिति विशेषणविशेष्यभावापन्नः कृत्युद्देशविशिष्टः पदार्थसार्थ एव वाक्यार्थः । अन्वितानामेव पदार्थानां विशिष्टत्वम्; इत्यभिदधानैरन्विताभिधानवादिभिरिहाप्यभिधानं विधेयम् । यत्र संकेतनिकेतनीकृतविशिष्टरूपवाक्यार्थाभिधायिनो वाक्यस्य स्ववाच्यानतिरिक्तासंकेतिताविशेषभूतपदार्थाभिधानेऽपि न सामर्थ्यं तत्रार्थान्तरभूतः प्रतीयमानः कथमिवावतरिष्यति वचनीयताम् ?

व्या०—तदेवमभिहितान्वयवादिनः समाधायान्विताभिधानवादिनः समाधत्ते— आरोह जयाय कुञ्जरमित्यादिना स्वीकारवैयर्थ्यापत्तेरित्यन्तेन सन्दर्भेण । प्रथमं तावत् तन्मते व्युत्पत्तिप्रकारमाह— आरोहेति । प्रयोक्तारम् आरोहेत्येतद्वाक्यप्रयोक्तारमुत्तमवृद्धमित्यर्थः । प्रत्यक्षीकरोति यथायोगं श्रोत्रेण चक्षुषा चेत्यर्थः । बाल इत्यागामी सर्वत्र कर्ता । बालोऽत्र व्युत्पित्सुः । ततः किमत आह— चरममिति । प्रत्यक्षीकरणानन्तरमित्यर्थः । अनेन मध्यमवृद्धेन । अस्माद्वाक्यात् आरोहेति वाक्यात् । अयमर्थः कुञ्जरारोहणरूपः । इत्यनुमिनोतीत्यन्वयः । अनुमापकं लिङ्गमाह— तदभिमुखेति । कुञ्जराभिमुखगमनरूपयेत्यर्थः । अत्र प्रयोगं दर्शयति— इयं प्रवृत्तिरिति । कुञ्जरारोहणचेष्टेत्यर्थः । अर्थावधारणेति । एतद्वाक्यार्थज्ञानपूर्विका । प्रवृत्तित्वात् एतद्वाक्यश्रवणानन्तरप्रवृत्तित्वात् । या यद्वाक्यश्रवणानन्तरा सा तदर्थज्ञानपूर्विका, यथा गवानयनादिवाक्यश्रवणानन्तरा मदीया प्रवृत्तिरिति सामान्यतो व्याप्तिः । न यदेवं न तदेवम्, यथा घटादिप्रवृत्तिरिति व्यतिरेकी वा । अन्यथा यथाश्रुतमात्रहेतुत्वाभ्युपगमे सिद्धसाधनत्वादिदोषप्रसङ्गा-

दिति । ततः किम् ? अत आह— **यद्यमुमर्थमिति** । आरोहेति वाक्याय-मित्यर्थः । अर्थापत्त्या सम्बन्धमवधारयतीत्यन्वयः । अर्थापत्त्या, अन्यथानुपपत्तिरूपयेत्यर्थः । अखण्डस्य निर्विभागस्यैकस्येत्यर्थः । तादृशमखण्डमेवेत्यर्थः । एतेन त्रिप्रमाणकं सम्बन्धावधारणमित्युक्तं भवति । यथाहुः श्लोकद्वयम् :—

'शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति ।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥
अन्यथानुपपत्त्या च बुद्ध्वा शक्तिं द्वयाश्रिताम् ।
अर्थापत्त्यैव बुध्येत सम्बन्धं त्रिप्रमाणकम् ॥ इति ॥

पदवद्वाक्यमपि वाचकमेवेति गुरूणां मतम् । यथाहुस्तद्विदः :—

वाक्येनैव हि वाक्यार्थः साक्षादेवाभिधीयते ।
उपलक्षणतश्चास्य सम्बन्धग्रहसम्भवः ॥
वाक्यं गोपदयुक्तं यत् तत् सास्नादिसमन्वितम् ।
वाक्यार्थं वदतीत्येवं व्युत्पत्तिः सुकरैव हि ॥

फलितमाह— **ततस्तत्रेति** । तदेवं प्रवृत्तिवाक्ये व्युत्पत्तिप्रकारमभिधाय निवृत्तिवाक्येप्यतिदिशति— **अनन्तरमिति** । आदिशब्दात् 'गां आनय' 'गां बधान' इत्यादि वाक्यसंग्रहः । अत एव तस्य तस्येति वीप्सा च । **शब्दस्येति** । वाक्यस्येत्यर्थः । आरोहेत्यादिप्रवृत्तिवाक्यवत् अवरोहेत्यादिनिवृत्तिवाक्येऽपि श्रवणानन्तरमेव निवृत्तिरूपमध्यमवृद्धचेष्टायाः तदर्थावधारणपूर्वकत्वानुमानद्वारा वाच्यवाचकभावं प्रतिपद्यते बाल इत्यर्थः । एवं वाक्यव्युत्पत्तिप्रकारमुक्त्वा पदव्युत्पत्तिप्रकारमाह— **इत्यन्वयव्यतिरेकाभ्यामित्यादि** । पदानां संकेतविषयत्वमित्यन्वयः । अभिहितान्वयपक्षाद् भेदमाह—**अन्वितैरिति** । अन्वये हेतुमाह— **आकाङ्क्षेति** । ननु संकेतकाले मुक्तकानामाकाङ्क्षादयः कुत इत्याशङ्क्याह— **वाक्यान्तर्वर्तिनामेवेति** । तत्रापि हेतुमाह— **वाक्यस्यैवेति** । एवकारः केवल पदव्यावृत्त्यर्थः । यस्माद्वाक्यमेव प्रयोगार्हं न पदं तस्मादित्यर्थः । वाक्यस्यैव प्रयोगयोग्यत्वे हेतुमाह— **प्रवृत्तिनिमित्तस्येति** । तस्यैव तन्निमित्तत्वे

प्रमाणमाह– **अन्वयव्यतिरेकाभ्यामिति** । तदेव दर्शयति– इतीति । इति पूर्वोदाहृतारोहणादिप्रवृत्तिनिवृत्तिषु वाक्यस्यैवान्वयव्यतिरेकाभ्यां निमित्तत्वदर्शनात् तदन्तर्वर्तिनामेव पदानामाकाङ्क्षादिवशादन्विताभिधायिनामेव संकेतविषयत्वमित्यर्थः । अत एव वाक्यार्थोऽपि कार्यान्वितपदार्थसार्थ एवेत्याह – **इतीति** । इति हेतोः पदार्थसार्थ एव वाक्यार्थ इत्यन्वयः । कथं समप्रधानानां मिथोऽन्वयस्तत्राह– **विशेषणविशेष्यभावापन्न इति** । किमत्र विशेषणं किं वा विशेष्यं तत्राह– **कृत्युद्देशविशिष्ट इति** । कृतिः प्रयत्नः । उद्दिश्यत इत्युद्देशो विषयः । कृतेरुद्देशः कृत्युद्देशः; कृतिविषयः, कृतिसाध्यं कार्यमिति यावत् । तद्विशिष्टस्तदन्वितस्तदुपरक्त इत्यर्थः । शाब्दश्चायं विशेषणभावः कार्यस्येति न प्राधान्यभङ्गः पुरुषवृत्तिविषयत्वेन तस्यैव वास्तवप्राधान्यादिति । ननु पदार्थाः कार्यान्विताः न तु तद्विशिष्टाः, इत्याशङ्क्याह – **अन्वितानामेवेति** । तदन्वितत्वमेव तद्विशिष्टत्वमित्यर्थः । अस्तु, प्रस्तुते किमायातमत आह– **इत्यभिदधानैरिति** । नन्वभिहिता एव पदार्थाः । अर्थान्तरं च वाक्यस्यैवाभिधेयं वदाम इत्याशङ्क्य विशिष्टार्थाभिधायिनो वाक्यस्य स्वार्थसंनिकृष्टपदार्थाभिधानेऽप्यसमर्थस्य कुतो विप्रकृष्टार्थान्तराभिधानशङ्कापीति परिहरति– यत्रेत्यादिना वचनीयतामित्यन्तेन । वाक्यार्थस्य वाक्याभिधेयत्वे हेतुमाह– **संकेतनिकेतनीकृतेति** । संकेतनिकेतनीकृतः संकेतविषयीकृतः, संकेतित इति यावत्; स चासौ विशिष्टरूपवाक्यार्थश्च तदभिधायिन इत्यर्थः । वाक्यस्य पदार्थाभिधाने प्रसक्तिमाह-- **स्ववाच्यानतिरिक्तेति** । तर्हि पदार्थवाक्यार्थयोर्भेदव्यवहारः कथमत आह-- **अविशेषभूतेति** । अविशिष्टः पदार्थः, स एव विशिष्टो वाक्यार्थ इति स्वरूपेणाभिन्नोऽपि विशिष्टाकारेण भिन्न इत्यविरोधः । तर्हि किमिति पदार्थो वाक्येन नाभिधीयत इत्याशङ्क्याह-- **असंकेतितेति** विशिष्ट एव वाक्यस्य सङ्केतो नाविशिष्टः । अविशिष्टश्च पदार्थ इति न तस्याभिधायकं वाक्यमित्यर्थः । एतदुक्तं भवति - संकेताभावमात्रेण परमार्थतः स्वाभिन्नपदार्थाभिधानासमर्थस्य वाक्यस्य

कुतोऽत्यन्तभिन्नासंकेतितार्थान्तराभिधानसामर्थ्यमिति ।

सू०—यदि पुनः सोऽयमिषोरिव दीर्घदीर्घो व्यापार इति मन्वानाः शब्दश्रवणसमनन्तरं यावतोऽर्थस्य प्रतिभानं तावत्यभिधैव व्यापारः प्रगल्भते इत्यभिदधति, इत्थमपि वृथा विकत्थनम् । "संप्रत्यभिषिषेणयिषति वः कुपित एष नरसिंहनरपतिः । किञ्च विमुञ्चत कान्दिशीकतामनुप्रविशतमाम् ; इति च कथयत्ययम्" इत्यादावखिलभूपालगतत्वेनोल्लसतां त्रासश्वासादीनामपि वाच्यत्वप्रसङ्गात् ।

व्या०—अथ प्रतीयमानस्य प्रकारान्तरेण वाच्याभिधेयत्वमाशङ्कते यदि पुनरिति । तदपि सोपहासं परिहरति– इत्थमपीति । अत्रातिप्रसङ्गदोषमाह– सम्प्रतीत्यादि । अभिषिषेणयिषति अभिषेणयितुमिच्छति; सेनयाभियातुमिच्छतीत्यर्थः । "यत्सेनयाभिगमनमरौ तदभिषेणम्" इत्यमरः । अभिपूर्वात् सेनाशब्दात् "सत्यापपाश--" इति सनि लट् । "उपसर्गात् सुनोति" इत्यनुवृत्तौ 'स्थादिष्वभ्यासेन चाभ्यासस्य' इति धात्वभ्याससकारयोः षत्वम् । "आदेशप्रत्यययोः" इति सनः षत्वम् । कान्दिशीको भयद्रुतः । त्रासादीनामपीति । असंकेतितानामपीति शेषः । अन्यथा दीर्घव्यापारवादिनामिष्टापत्तेरिति ।

सू०—अपि च यदि न व्यापारान्तरमभिधातः स्वीक्रियते तर्हि कृतं लक्षणया । दीर्घदीर्घाभिधाव्यापारेणैव लक्ष्यस्याप्यर्थस्य प्रतीत्या तस्याः स्वीकारवैयर्थ्यापत्तेः । अपि च नास्ति यदि व्यङ्ग्यव्यञ्जकभाव इत्युच्यते तर्हि च्युत संस्कृतिप्रमुखाणां दोषाणां नित्यत्वं श्रुतिकटुप्रभृतीनां त्वनित्यत्वमिति विभागकरणस्य कैमर्थ्यं प्रसज्यते ।

व्या०—किंच किमभिधातो व्यापारान्तरमेव नेष्यते व्यञ्जनव्यापार एव वेति द्विधा विकल्प्याद्ये लक्षणापि दत्तजलाञ्जलिः स्यादित्याह- अपि चेति

द्वितीये दूषणमाह-- अपि च नास्तीति । च्युतसंस्कृति, 'चलते' 'कम्पति' इत्यादौ शब्दशास्त्रविरुद्धं पदम् । नित्यत्वम् . सर्वदा दोषत्वम्, असाधुत्वस्य नित्यत्वानपायात् । एतच्चानुकरणादन्यत्र । तदुक्तं काव्यप्रकाशे - "अनुकरणे तु सर्वेषां दोषाणामप्यदुष्टतैव" इति । तथा माघकाव्ये 'व्रजसि क तात वजसि" इति बालभाषितानुकरणे नीरेफः प्रयोगः । श्रुतिकटुपरुषाक्षरं पदं, तस्यानित्यदोषत्वम् ; कदाचिद्गुणत्वात् । अत एव "रौद्रादौ रसे व्यङ्ग्ये कटुत्वं गुणः" इति काव्यप्रकाशकारः । एतदुक्तं भवति - यदि व्यञ्जनाव्यापारो नेष्यते - शृङ्गारादिव्यञ्जने कटुत्वं दोषः, रौद्रादिव्यञ्जने कटुत्वं गुणः; च्युतसंस्कारादिकं तु सर्वत्र दोष इति व्यञ्जनैकाश्रयो विभागो न स्यात् । निराश्रय कल्पनापत्तेः रसश्च व्यङ्ग्य एव, न वाच्य इति वक्ष्यते । कैमर्थ्यं वैयर्थ्यमित्यर्थः ।

मू० —अपि च यदि प्रतीयमानोऽर्थो नाभविष्यत् तर्हि काव्यान्तर्निविष्टस्यासभ्यस्मृतिहेतोः पदार्थान्तरान्वयविरहिणः पदस्य हेयत्वं न समपत्स्यत ।

व्या०—अत्रैव तर्कान्तरमाह-- अपि चेति । **असभ्यस्मृतिहेतोरिति ।** अमङ्गलव्रीडाजुगुप्साव्यञ्जकतया त्रिविधस्याप्यश्लीलस्येत्यर्थः । यथा—

"अभिप्रेतपदावासः कदा नः सम्भविष्यति ।
नीच(चं)साधनमेतेषां परोत्सर्गैकजीविनाम् ॥ इति ।

अश्लीलमपि किंचित् कदाचिदुपादेयं स्यात् - "स्वस्था भवन्तु कुरुराजसुताः सभृत्याः" इत्यादौ अमाङ्गल्यादिव्यञ्जकं स्वस्थादिपदम् । तद्व्युदासार्थं विशिनष्टि - पदार्थान्तरान्वयविरहिण इति । पद्यते गम्यतेऽनेनेति पदम्, प्रकरणम् । तथाच प्राकरणिकार्थान्वयविरहिण इत्यर्थः । अयमर्थः - इह वेणीसंहारफलस्य कौरववधस्य काव्यार्थत्वात् तदन्वयेन स्वस्थपदवाच्यनिराकुलत्वातिरिक्तकौरवस्वर्गगमनामाङ्गल्यव्यञ्जकवत् स्वस्थपदं नायकाभ्युदयपरमेवेति युक्तमस्योपादेयत्वम् । एवं व्रीडाजुगुप्सयोरप्युदाहार्यम् । तर्कस्तु - यदि

एवं न व्यञ्जकं स्यादसभ्यार्थकमपि न स्यात्; तद्व्य(दव्य)ञ्जकमित्यहेयं स्यात्। न चेष्टापत्तिः, दोषत्वोक्तिविरोधात्, इति। एवं ध्वनिस्वरूपे विप्रतिपद्यमानं प्रति तर्कचतुष्टयमुक्तम्। अस्यानुग्राह्यं प्रमाणमुन्मेषान्ते वक्ष्यति।

मू०—अपि च यदि विद्यमानेऽपि विरुद्धधर्माध्यासे कारणभेदे वाच्यव्यङ्ग्ययोर्भेदो नाभ्युपेयते तर्हि क्वचिदपि न भवितव्यं भेदेन। तत्र वाच्यव्यङ्ग्ययोः स्वरूपभेदो यथा—

दिङ्मातङ्गाः कनकशिखरी सप्तयः सप्तसप्तेः
चिन्तारत्नं दिविचरतरुः श्रीनृसिंहक्षितीन्द्र।
अद्याप्येतत्सकलमकृथा नाऽभिसादित्यपार्थ-
स्तेनायं ते वितरणकलाकौशलेनावलेपः॥

अत्र निन्दा वाच्या; प्रतीयमाना च स्तुतिः। तयोश्च स्वरूपत एव भिन्नत्वम्। वाच्यप्रतीत्यनन्तरभाविनी व्यङ्ग्यप्रतीतिरिति कालभेदादप्यनयोर्भेदः।

व्या०—अथ भेदे विप्रतिपद्यमानं प्रत्याह-- अपि चेति। वाच्यव्यङ्ग्ये मिथो भिन्ने; विरुद्धधर्मयोगित्वात्; यदेवं तदेवम्; यथा घटपटादि इति प्रयोगं मनसि निधाय साध्यानङ्गीकारेऽतिप्रसङ्गं तर्कमाह-- यदि विद्यमानेपीति। घटपटादिभेदानामपि तदेकसाध्यत्वात् तस्यैकत्राप्रयोजकत्वे सर्वत्रापि तथात्वादिति। अथ हेत्वसिद्धिपरिहाराय विरुद्धधर्माध्यासं साधनान्तरोपन्यासव्याजेन प्रपञ्चयति तत्रेत्यादिना। स्वरूपभेदो यथेति। स्वरूपभेदाद्भेदो यथेत्यर्थः। दिङ्मातङ्गा इति। अत्र दिङ्मातङ्गादिकमप्रयच्छतस्ते वितरणं कियदिति निन्दया ततोऽन्यत् सर्वं दत्तमेवेति स्तुतिप्रतीतेर्व्याजस्तुतिभेदः। अत्र वाच्यव्यङ्ग्ये विविनक्ति-- अत्र निन्देति। ततः किमत आह-- तयोश्चेति। स्वरूपत एव परस्परविरुद्धस्तुतिनिन्दात्मकत्वादेव भिन्नत्वमित्यर्थः।

अतो वाच्यव्यङ्ग्यात्मनापि भेद इति शेषः । परदोषोद्घाटनं निन्दा । तद्गुणानुवादः स्तुतिः । अथ प्रतीतिपौर्वापर्यादप्यनयोर्भेद इत्याह-- वाच्येति ।

मू०—आश्रयभेदाद्भेदो यथा– शब्दमात्रमाश्रयो वाच्यस्य; शब्दैकदेशतदर्थवर्णसंघटनाश्च प्रतीयमानस्य । शब्दार्थशास्त्रज्ञानमात्रं कारणं वाच्यस्य प्रकरणादिसध्रीचीनप्रतिभातिशयसनाथं च तत् प्रतीयमानस्येत्यनयोः कारणभेदादपि भेदः । बुधबोद्धविदग्धादिभिः पदैर्व्यपदिश्यते वाच्यज्ञः, सहृदयविदग्धप्रतिभावद्वादिभिस्त(स्तु प्र)त्प्रतीयमानज्ञ इति । वाच्यस्यावबोधः प्रतीतिमात्रमभिधीयते, प्रतीयमानस्य तु चमत्कार इति । वाच्यस्य सम्बन्धमभिधामभिदधति, प्रतीयमानस्य पुनः परामर्शमिति कार्यभेदादप्यनयोर्भेदः ।

व्या०—आश्रयभेदादित्यादि । इह प्रतिपाद्यप्रतिपत्तेः प्रतिपादकायत्तत्वात् प्रतिपादकमुपचारादाश्रयशब्देनोच्यते । तत्र वाच्यप्रतिपत्तेः सङ्केतश्चास्य शब्देनैवेति शब्दमात्रमाश्रयो वाच्यस्येत्युक्तम् । व्यङ्ग्यस्य तु सङ्केतानपेक्षितया केवलप्रकरणादिवशाद्यथायोगं शब्दार्थाद्याश्रयत्वं दर्शनबलादध्यवसीयत इत्यर्थः । तत्र 'क्रियेत चेत्' इत्यादिवक्ष्यमाणोदाहरणे शब्दाश्रयं, 'कस्स व ण होइ' इत्यत्रार्थाश्रयं च व्यक्तीकरिष्यामः । वर्णायत्तं तु मधुरोद्धतादिवर्णगोचरं वर्णोद्धत[1] मधुरोद्धतादिरसव्यङ्ग्यम् । एवं संघटनाश्रयमपि मधुरोद्धतादिरचनागोचरं मधुरोद्धतादिरसव्यङ्ग्यमेवेति द्रष्टव्यम् । कारणभेदादप्यनयोर्भेद इत्याह-- शब्देति । शब्दशास्त्रं व्याकरणम् । ततोऽन्यत् सर्वमर्थशास्त्रम् । तदिति - शब्दार्थशास्त्रज्ञानमित्यर्थः । अथ कार्याभेदाच्च भेदं प्रपञ्चयन् प्रतिपत्तृसमाख्यातृरूपकार्यभेदात्तावद्भेदमाह-- बुधेत्यादि । प्रतिपत्तिसमाख्यारूपकार्यभेदाच्च भेद इत्याह-- वाच्यस्यावबोध इत्यादि । स्वप्रतिपादकसम्बन्धसमाख्यारूपकार्यभेदाच्च भेद इत्याह-- वाच्यस्य सम्बन्धमभि-

१) वर्णोद्धतेत्येतत् अनावश्यकमिति प्रतिभाति ।

घामित्यादि । परामर्शमभिदधतीत्यनुषङ्गेणान्वयः । कार्यभेदाद्भेदं निगमयति- इति कार्यभेदादपीति ।

मू०—विषयभेदेन भेदो यथा--

कस्स व ण होइ रोसो दट्ठूण पिआए सव्वणं अहरं ।
सभमरपदुमग्घायिणि वारिअवामे सहसु एण्हि ॥

कस्स व = कस्य वा अनीर्ष्यालोरपि, वारिअवामे = मद्वचनानङ्गीकारिणि, सहस्वेदानीमुपालम्भपरामिति भावः । अत्र काचित् स्वैरिणी केनचिदुपपत्तिना खण्डिताधरा तदुपपत्तिसन्निधिं निश्चितवति प्रियतमे तमनवलोकयमानयेव कयापि विदग्धया सख्या तदपराधप्रच्छादनायेदमभिधीयते । इह सहस्वेदानीमिति वाच्यं स्वैरिणीविषयम् । अनपराधत्वमस्या इति व्यङ्ग्यं पुनः प्रियतमविषयम् । सहस्वेत्यपि च तद्विषयम् । वल्लभेन सुतरामुप(पा)लभ्यमानामस्यां न तद्व्यलीकशङ्केति पुनरविनयगोपनेन प्रत्यायनं प्रातिवेशिकविषयम् । प्रियाया इति पदोपादानात् सौभाग्यातिशयप्रतिपादनं तदविनयोपा(प)लम्भसम्भूतप्रमोदसपत्नीविषयम् । अत एव सहस्वेति प्रियतमविषयश्च । प्रकटापराधप्रच्छादनेन स्ववैदग्ध्यप्रकाशनं तटस्थविदग्धजनविषयम् । उपलक्ष्यमाणोपभोगचिह्ना पुनरियं न त्वया कर्तव्येति प्रच्छन्नकामुकविषयम् । इत्थं मयैवापह्नुतन्न भवतीभिरित्यपरसखीविषयमित्यनयोर्विषयभेदाद्भेदः ।

व्या०—विषयभेदेनेति - उद्देश्यभेदेनेत्यर्थः । कस्स वेत्यादि ।

कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।
सभ्रमरपद्माघ्रायिणि वारितवामे सहस्वेदानीम् ॥

अर्थाश्रयव्यङ्ग्यस्येदमुदाहरणं द्रष्टव्यम् । अत्र भर्तुः रोषो भवतीति वक्तव्ये

कस्येति सामान्यनिर्देशस्याभिप्रायमाह-- **अनीर्ष्यालोरपीति**। ईर्ष्यालोः किमु वक्तव्यमिति भावः। अत्र प्रसिद्धपदार्थमाह - वारीति। **मद्वचनेति**। सभ्रमरं पद्मं मा गृहाणेति वचनमित्यर्थः। सहेः सकर्मकत्वाद्विवक्षितकर्मकारकं दर्शयति- **उपालम्भेति**। अथ वाच्यव्यङ्ग्ययोर्विषयविभागं कर्तुं प्रकरणं तावदाह-- **अत्र काचिदिति**। तदघरखण्डनमनवलोकमानयेव - ततः प्रागजानानयेवेत्यर्थः[१]। अत्र वाच्यस्य विषयमाह-- **इहेति**। स्वैरिणीमुद्दिश्येदमुच्यत इत्यर्थः। सर्वत्र चात्र विषयशब्द उद्देश्यपरः। अथेह व्यङ्ग्यं तद्विषयं च प्रपञ्चयति-- **अनपराधत्वमित्यादिना**। **सहस्वेत्यपि च तद्विषयमिति**। उपालम्भं सहस्वेति वाच्यान्निरपराधेयमनुपालभ्येति व्यज्यते। तच्च प्रियतमविषयमित्यर्थः। **तद्व्यलीकशङ्कितेति**। तदपराधोत्प्रेक्षकोऽयमिति हेतोरित्यर्थः। तत्प्रत्यायनं, तस्य प्रियस्य विश्वासोत्पादनमित्यर्थः। सौभाग्यं भर्तुर्वाल्लभ्यम्। विषयभेदाद्भेदं निगमयति-- **इत्यनयोरिति**। अत्रानपराधत्वादिप्रतीतेः केवलार्थशक्तिमूलत्वादर्थाश्रयमेवेदं व्यङ्ग्यमिति द्रष्टव्यम्।

मू०—येऽपि सहृदयसंवेद्यमनाख्येयमेव ध्वनिमाख्यातवन्तस्तेऽपि न परीक्ष्यवादिनः। सामान्यतो विशेषश्चास्माभिः ध्वनिलक्षणस्य प्रदर्शितत्वात्। तथापि यदि तस्यानाख्येयत्वं तदा सर्वेष्वपि वस्तुषु तदतिप्रसज्यमानमनिवार्यं स्यात्। अथानयातिशयोक्त्या लोकोत्तरत्वमस्य निरूप्य तदा सिद्धं नः समीहितम्।

व्या०—तदेवमियता प्रबन्धेन ध्वनिरेव नास्तीति प्रथमपूर्वपक्षं प्रतिक्षिप्येदानीमस्त्यनिर्वाच्य इति द्वितीयपक्षं प्रत्याचष्टे-- **येऽपीति**। सहृदयाः - विदग्धाः। तेषामप्यनुभवैकसमधिगम्यो न तु केनापि लक्षणतो निर्वक्तुं शक्यत इति वादिनोऽपि न विमृश्यवादिन इत्यर्थः। कुत इत्यत

१ 'तमनवलोकमानयेव' इति पाठः। तं - प्रियतमं, अपश्यन्त्येवेत्यर्थः। व्याख्यातृदत्तः अर्थः अनुपपन्न इति प्रतिभाति।

आह - सामान्यत इति। स्वरूपसिद्धौ लक्षणस्यापि सिद्धप्रायत्वात्। प्रदर्शितत्वादिति सिद्धत्वोक्तिः। वस्तुतस्त्वनन्तरोन्मेषे भविष्यतीति भावः। तथाप्यनिर्वाच्यत्वे विश्वस्यापि तथात्वमित्यतिप्रसङ्गबाधकमाह— तथापीति। अथानिर्वाच्यत्वाभिधानं ध्वनेः प्रशंसापरं न वास्तवं तर्हि न कश्चिदावयोर्विवाद इत्याह— अथेति। अतिशयोक्त्या - असम्बन्धे सम्बन्धरूपयेत्यर्थः। अनिर्वाच्यत्वासम्बन्धेऽपि तत्सम्बन्धोक्तिः।

मू०—अथ भक्तेरुपचारादागतोऽयमिति ये भाक्तमभिदधते ते एवं प्रष्टव्याः। भक्तिर्व्यक्तिश्चेति न तत्त्वान्तरमिति यद्यभिसन्धिः तदा भक्तिव्यक्त्योः किं तादात्म्यमुत भक्तिर्व्यक्तेर्लक्षणमुपलक्षणं वा? न प्रथमः पक्षः। उभयोरप्यनयोः परस्परविरुद्धानां धर्माणामुपलम्भसंभवात्। तथाहि - मुख्यार्थबाधाद्यनुसन्धानप्रवृत्तत्वं भक्तेः। वक्तृबोद्धव्यादिवैशिष्ट्यानुसन्धानप्रवृत्तत्वं तु व्यक्तेः। तत् कुतस्तयोस्तादात्म्यशङ्काकलङ्कावतारः? किं च भेदसिद्धयेऽनुमानमप्यस्ति-भक्तीव्यक्ती मिथो भिन्ने; भिन्नधर्मयोगित्वात्; यद् भिन्नधर्मयोगि तन्मिथो भिन्नम्; यथा घटपटादि।

व्या०—अथ भाक्तो ध्वनिरिति तृतीयां विप्रतिपत्तिं विघटयितुं भाक्तपदनिरुक्तिपूर्वकं विघटयति— **अथ भक्तेरिति।** उपचारात् आरोपादित्यर्थः। यथाहुः - 'भिन्नत्वेन प्रतीयमानयोरैक्यारोपणमुपचारः, यथा- गौर्वाहीकः' इति। न तत्त्वान्तरम्, नार्थान्तरमित्यर्थः। तदेतद्दूषयितुं विकल्पयति- **तदेति।** किमिदं व्यक्तेर्भक्त्यभिन्नत्वं नाम तत्तादात्म्यं विवक्षितं, तल्लक्षणत्वमात्रं वा, तदुपलक्षितत्वमात्रं वेति विकल्पार्थः। तत्र तादात्म्यं नाम तदेकात्मत्वम्। असाधारणो धर्मो लक्षणम्; यथा गन्धः पृथिव्याः। कादाचित्कं व्यावर्तकमुपलक्षणम्; यथा काकादिकं गृहादेरिति। तत्र तादात्म्यपक्षं दूषयति— **न प्रथम इति।** तत्र हेतुमाह— **परस्परेति।** तमेव व्यनक्ति— **तथाहीति।**

'सिंहो देवदत्तः' इत्यत्र देवदत्ते सिंहत्वासम्भवात् बाधानुसन्धानम् । आदि-शब्दात् सादृश्यादिसंग्रहः । वक्तृबोद्धव्यादीत्यादिशब्दात् काक्वादिसंग्रहः । एतदुत्तरोन्मेषे व्यक्तीकरिष्यते । अत्र प्रयोगमप्याह-- **किं चेति** । अत्र विरुद्धधर्मयोगस्योक्तत्वान्नासिद्धिशङ्का । तथापि भेदानङ्गीकारे घटपटादिभेदोऽपि विलीयेतेति तर्क इति भावः ।

मू०—न द्वितीयः – वक्ष्यमाणदूषणग्रस्तत्वात् । तथाहि लक्षणस्य केवलव्यतिरेकित्वादेवं किलानुमानरचना-व्यक्तिरितरेभ्यो भिद्यते; भक्तिमत्त्वात् ; यत् पुनरितरेभ्यो न भिद्यते न तद् भक्तिमत् , यथाभिधादि । तथाच सत्यभिधैकमूले ध्वनौ भक्तेरभावात् भागासिद्धो हेतुः । व्यक्तेरितरेभ्यो भिन्नत्वे साध्येऽस्य हेतोरितराभिन्ने विवेचकत्वमात्रं लक्षयति कुशलादौ रूढेऽपि[१] क्वचिद्-गतत्वाद्विरुद्धत्वमपि । अनेन हि विवेचकत्वादिमात्रं लक्ष्यते, न तु किंचिद् व्यज्यते ।

व्या०—लक्षणपक्षं दूषयति– **न द्वितीय** इति । तदेव दूषणं वक्तुमाह– **तथाहि लक्षणस्येत्यादि** । असाधारणधर्मत्वादव्यतिरेकयेव लक्षणमित्युक्तत्वादिति भावः । प्रयोगमाह– **व्यक्तिरिति** । व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमित्यभिप्रेत्याह– **इतरेभ्यो भिद्यत** इति । इतरशब्देन पक्षातिरिक्तपरिग्रहः । अन्वयाभावाद्व्यतिरेकमाह– **यत् पुनरिति** । तदेतद्भागासिद्ध्या दूषयति– **तथा च सतीति** । द्विविधो हि ध्वनिः– अभिधामूले, लक्षणामूलश्चेति उभयमिह पक्षः । तत्राद्ये भक्त्यभावाद्भागासिद्धो हेतुरित्यर्थः । दूषणान्तरमाह– **व्यक्तेरिति** । कुशलादौ साध्याभावं वक्तुं साध्यं तावदाह– **इतरेभ्यो भिन्नत्वे साध्य** इति । **अस्य हेतोरिति** । भक्तिमत्त्वहेतोरित्यर्थः । **इतराभिन्न** इति । इतरभेदरूपसाध्यविरहिणीत्यर्थः ।

---

१ विवेचकत्वमात्रं इत्यादिः– विवेचकत्वमात्रलक्षके "कुशलः" इत्यादौ रूढपदे इत्यर्थः ।

तत्र हेतुमाह-- विवेचकत्वमात्रं लक्षयतीति। कर्मणि कुशल इत्यादौ दर्भग्रहणरूपावयवार्थसंभवान्निरूढलक्षणया विवेचकत्वमात्रपरे व्यञ्जकत्वासम्भवा-व्यञ्जकेतरभेदरूपसाध्यविरहो युज्यत इत्यर्थः। गतत्वात् भक्तिमत्त्वहेतोस्तत्र-स्थितत्वादित्यर्थः। विरुद्धत्वमिति। पक्षविपक्षयोरेव वर्तमानत्वादित्यर्थः।

मू०— न तृतीयः विवक्षितान्यपरवाच्ये ध्वनौ भक्त्युपलक्षित-त्वाभावादुपलक्षणत्वाभ्युपगमेऽपि भक्तिव्यक्त्योरभिन्नत्वासम्भवाच्च। उपलक्षणेन विनाप्युपलक्षणीयस्य सिद्धेश्च। एतेन यत्र(त्) कुन्तकेन भक्तावन्तर्भावितो ध्वनिस्तदपि प्रत्याख्यातम्।

व्या०—अथोपलक्षणपक्षं प्रतिक्षिपति-- **न तृतीय इति**। तत्र हेतु-माह-- **विवक्षितेति**। विवक्षितान्यपरवाच्यध्वनेरभिधामूलत्वेन भक्तेरेवाभावात् तदुपलक्षितत्वाभावेन तदुपलक्षितत्वरूपमप्यभिन्नत्वं न संभवतीत्यर्थः। किं च यत्रास्ति भक्तिरविवक्षितवाच्यध्वनौ तत्रापि किं भक्तेः कादाचित्क(त्व)मुच्यते नो वा। नोचेन्नोपलक्षणत्वसिद्धिः। कादाचित्कतया भेदहेतुरुपलक्षणमिति लक्षणात्। उच्यते चेद्बाधः। लक्षणामूलध्वनौ भक्तेरनपायात्। तथापि तदु-क्तमभ्युपेत्य दूषणमाह-- **उपलक्षणेनेति**। तद्विनाभाविनस्तदभिन्नत्वं विरुद्धमिति भावः। अथ मतान्तरमतिदेशेन निरस्यति- **एतेनेति**। भाक्तपक्षनिरासेनेत्यर्थः।

मू०—यत्तु गुणविशिष्टपदरचनात्मिकायाः रीतेः काव्यात्मत्व-ममानि वामनेन तदपि न साधु। माधुर्यादिगुणानतिक्रमणात् तस्याः। किं चानुमानमपि ध्वनिसाधने लब्धप्रसरमेव। तथाहि --

क्रियेत चेत्साधुविभक्तिचिन्ता
व्यक्तिस्तदा सा प्रथमाभिधेया।
या स्वौजसां साधयितुं विलासै-
स्तावत् क्षमानामपदं बहु स्यात्॥

इत्येतद्वाक्यमेतद्वाक्यवाच्यातिरिक्तार्थप्रकाशकम् ; वाक्यत्वात् ; यद्य-द्वाक्यं तत्तद्वाच्यातिरिक्तार्थप्रकाशकम्; यथा कालिदासादिकाव्यम्; वाक्यं चेदम्; तस्मादेतद्वाक्यवाच्यातिरिक्तार्थप्रकाशकम् । पर्यायवाक्ये अनैकान्तिकत्वमितिचेन्न -- तस्यापि पक्षकोटिनिक्षिप्तत्वात् । तस्मादस्ति ध्वनिः । अयं च वस्त्वलंकाररसादिरूपतया भवन्न त्रैविध्यमतिवर्तते-- वस्तुध्वनिः, अलंकारध्वनिः, रसादिध्वनिश्चेति ।

इति श्रीमहामाहेश्वरस्य कवेर्विद्याधरस्य कृतौ
एकावलीनाम्न्यलंकारशास्त्रे ध्वनिव्यवस्थापनं नाम
प्रथम उन्मेषः ।

व्या०—ननु सिध्यतु नाम ध्वनिः; तथापि कथं काव्यात्मता-सिद्धिरस्य ? यदन्यैरन्य एवात्माभ्यधायीत्याशङ्क्य तन्मतं दूषयितुमनुभाषते-- **यत्तु गुणेति** । "रीतिरात्मा काव्यस्य" इति सूत्रादिति भावः तद्दूषयति-तदपि न साम्प्रतमिति । तत्र हेतुमाह-- **माधुर्यादीति** । गुणविशिष्टायाः पदरचनाया आत्मत्वे केवलाया अनात्मत्वात् प्राप्ताप्राप्तविवेकेन गुणानामे-वात्मत्वे स्ववचनविरोधः सूत्रकारस्य । "काव्यशोभायाः कर्तारो गुणाः" इत्युपस्कारकत्वेनोक्तानामुपस्कार्यत्वविरोधात् । उपस्कार्यश्चात्मेति भावः । "यदि पुनः सोऽयमिषोरिव" इत्यादिना ध्वानिसाधनायप्रयुक्ततर्कचतुष्टयस्या-नुग्राहयं प्रमाणं संप्रति कण्टकशोधनान्निरङ्कुशं प्रवर्तत इत्याह— किं चानुमा-नमपीति । तत्र पक्षं निर्दिशति-- क्रियेत्यादिना एतद्वाक्यमित्यन्तेन । साध्यं-निर्दिशति-- **एतद्वाक्येति** । अत्र-- साधुविभक्तिचिन्ता सुजनविभागविचारः क्रियेत चेत् तदा सा नलाभिधाना व्यक्तिमूर्तिः प्रथमाभिधेया प्रथमं परिगणनीया या व्यक्तिः स्वौजसा स्वतेजसा विलासैर्व्याप्तिभिस्तावद् बहु प्रभूतं, अनामं अनम्रं, पदं परराष्ट्रं, साधयितुं स्वायत्तीकर्तुम्, क्षमेति वाच्यार्थः । साधु सम्यक्, विभक्तिचिन्ता विभक्तिविचारः क्रियेत चेत्, तदा सा प्रथमा व्यक्तिः

विभक्तिः अभिधेया विचार्या । या स्वौजसां सु औजस् इत्येतेषां, प्रत्ययानाम् विन्यासैः प्रयोगैः, तावत् बहु अनेकं, नामपदं सुबन्तं पदं वृक्षेत्यादिकं साधयितुं निष्पादयितुं, क्षमेत्यर्थान्तरम् । तत्प्रकाशकत्वं पक्षे सामान्यतो वाच्यातिरिक्तार्थप्रकाशकत्वांशः । साध्यविपर्ययोपस्थापकप्रमाणाभावान्न बाधः । नापि सिद्धसाध्यता; परेषां विप्रतिपत्तेः । अविप्रतिपत्तौ वा सिद्धं नः समीहितम् । दृष्टान्तेऽपि स्ववाच्यार्थप्रकाशनेनैवैतद्वाच्यातिरिक्तार्थप्रकाशकत्वात् न साध्यवैकल्यम् । विमतं न स्ववाच्यातिरिक्तार्थप्रकाशकम्; वाच्यमात्रोपक्षीणशक्तिकत्वात्; ज्योतिष्टोमादिवाक्यवत्; इति बाधः प्रतिपक्षो वेति चेन्न पुंवाक्यत्वादिति हेतोर्विवक्षितत्वात् । तर्ह्यनैकान्तिकत्वमिति शङ्कते - पर्यायेति समानार्थं वाक्यं पर्यायवाक्यम् । तत्र तदव्यतिरिक्तार्थप्रतीतिर्नास्तीति शङ्कितुराशयः । परिहरति -- **तस्यापीति** । तत्समानार्थस्य तत्तुल्यशक्तिकत्वात्, तत्राप्यर्थान्तरप्रकाशनाविरोधान्न पक्ष एव व्यभिचार इति भावः । परमप्रकृतमुपसंहरति-- **तस्मादिति** । अथैनं विभजते-- **अयं चेति** । तिस्रो विधा दर्शयति - वस्तुध्वनिरित्यादि । इति शब्दः प्रकारे ।

इति श्रीपदवाक्यप्रमाणपारावरपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायामेकावलीव्याख्यायां तरलाख्यायां ध्वनिव्यवस्थापनं नाम प्रथम उन्मेषः ।

अथ द्वितीय उन्मेषः

मू०— शब्दार्थयोरेव काव्यत्वम्; अतस्तयोरेव स्वरूपं निरूपयन्नाह—

य: संकेतितमर्थं साक्षाद् ब्रूते स वाचकः शब्दः ।
संकेतितश्चतुर्धा जात्यादिर्जातिरेव वा भवति ॥१॥

साक्षात् अव्यवधानेन । जात्यादिः, जातिगुणक्रियाद्रव्यरूपः । यद्यप्यर्थक्रियाकारितया व्यक्तेरेव प्रवृत्तिनिवृत्तियोग्यता तथापि व्यक्तीनामानन्त्याद् व्यभिचाराच्च प्रतिव्यक्ति न शक्यते संकेतः कर्तुमिति जातिरेव विषयः संकेतस्य ।

व्या० ननु ध्वनिनिरूपणानन्तरं शब्दार्थनिरूपणस्य का गतिरित्याशंक्य संगमयन्नाह-- शब्दार्थयोरेवेति । ध्वनेः काव्यात्मत्वात् तन्निरूपणानन्तरं तच्छरीरभूतशब्दार्थनिरूपणं संगतमेवेत्यर्थः । यदाहुः—

"शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम्" इति ।

इह त्रिविधः शब्दः -- वाचको, लक्षको, व्यञ्जकश्च । अर्थोऽपि त्रिविधः-- वाच्यो, लक्ष्यो, व्यङ्ग्यश्च । तथा तद्वृत्तयोऽपि अभिधालक्षणाव्यञ्जनाख्यास्तिस्र इति विभागं सिद्धवत् कृत्वेतरयोस्तन्मूलकत्वात् वाच्यवाचकौ तावल्लक्षयति-- य इत्यादि । तत्राप्यर्थज्ञानस्य शब्दज्ञानपूर्वकत्वात्, पूर्वं शब्दनिरूपणम् । संकेतितं गृहीतसम्बन्धमित्यर्थः । सम्बन्धश्च वाच्यवाचकयोः शक्तिरेव । सा चोभयवर्तिन्येकैव वाच्यनिष्ठा, वाच्यशक्तिः, वाचकनिष्ठा वाचकशक्तिः इति चोभयथा व्यपदिश्यते । यथाहुः कारिकायामाचार्याः--

"शक्तिरेव हि सम्बन्धो भेदश्चास्या न विद्यते" इति । ब्रूते-प्रतिपादयतीत्यर्थः । अन्यथा शब्देऽभिवदनासंभवाल्लक्षणमसंभवि स्यात् ।

"साक्षात् प्रत्यक्षतुल्ययोः" इति प्रत्यक्षाद्यर्थत्वेऽसांगत्यादसंभवमाशंक्य स्वयमेवान्यथा व्याचष्टे-- **साक्षादव्यवधानेनेति** । मुख्यवृत्त्येत्यर्थः । तेन लक्षणादिव्यावृत्तिरित्यर्थः । "तेन संकेतितार्थप्रतिपादकः शब्दो वाचकः", "साक्षादर्थप्रतिपादकः शब्दो वाचकः" इति लक्षणद्वयम् । अन्यथा संकेतितसाक्षात्पदयोरेकेनैव लक्षणादिव्युदासेऽन्यतरवैयर्थ्यादिति । अन्विताभिधानवादे लक्ष्यार्थेऽपि संकेत इष्यत तन्निरासार्थं 'साक्षात्' पदमिति पक्षेऽपि तावतैव लक्षणादेरपि व्युदासात् 'संकेतितं' पदवैयर्थ्यं तदवस्थमेवेति लक्षणद्वयपक्षमेव रोचयन्ते तद्विदः । 'शब्द' शब्देनोभयत्र चेष्टाव्युदासः । संकेतार्थावधारणं विना तद्वाचकस्वरूपस्यानवधारणात् तद्विभागः कृतः संग्रहे- 'संकेतितश्चतुर्धा' इत्यादिना । तत्र संकेतितशब्दो व्याख्यातः । आदिशब्दार्थमाह-- **जात्यादिर्जातिगुणक्रियाद्रव्यरूप** इति । 'गौः, शुक्लः, चलति, डित्थः' इति चोदाहर्तव्यम् ।

नन्वर्थक्रियाकारितया पुरुषप्रवृत्तियोग्यां व्यक्तिमुपेक्ष्यान्यत्र किमिति संकेतः क्रियते इति शङ्कामनूद्य निराचष्टे- **यद्यपीत्यादि** । व्यक्तिसंकेतपक्षे किं सर्वासु व्यक्तिषु संकेतः कतिपयासु वेति विकल्प्याद्ये दूषणमाह– **आनन्त्यादिति** । द्वितीयेऽप्याह **व्यभिचारादिति** । कतिपयसंकेते असंकेतिते गवि गोव्यवहारो न स्यात्; स्याच्चेदसंकेतितत्वाविशेषादश्वादावपि स्यादिति व्यभिचार इत्यर्थः । किं च व्यक्तिसंकेते सर्वत्र व्यक्तिरित्येव व्यवहारः स्यान्न तु जातिर्गुणः- क्रिया, द्रव्यमिति विभाग इति दूषणान्तरसमुच्चायकश्चकारः । **प्रतिव्यक्तीति** । कतिपयासु वेति शेषः । इति शब्दो हेत्वर्थे । जातिरेव विषयः संकेतस्येत्यत्र जात्यादिर्जातिरेव वा विषय इति पठनीयम् । संग्रहे द्वयोरपि व्यक्तिपक्षप्रतिभटतयोक्त्योरेकस्यैवावतारणायोगादिति व्यक्तिपक्षायोगाद्धेतोः जात्यादिः संकेतस्य विषयः; यद्वा जातिरेव विषय इत्यर्थः । तत्र जात्यादिर्विषय इति वैयाकरणाः । यथाह भगवान् भाष्यकारः–

"गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः" इति । तथा गवादिशब्दानां जातौ संकेतः । शुक्लादीनां गुणे । पाकादीनां क्रियायाम् । डित्थादीनां द्रव्ये । गुणादयोऽपि जातिवदेकरूपा एव मणिमुकुरादिषु मुखमिवाश्रयभेदादभिन्नतयोपलभ्यन्त इति युक्तमेषां संकेतविषयत्वमिति भावः । हिमकरकमौक्तिकादिषु प्रत्याश्रयं प्रत्यक्षसिद्धतया दुरपह्नवभेदानां गुणादीनामनुवृत्तनिमित्तमन्तरेण संकेतविषयत्वे व्यक्तिपक्षोक्तदोषापत्तिरित्यरुच्या मीमांसकमतमवलम्बते— जातिरेवेति । गवादिशब्दानां गोत्वादिजातिर्विषयः । शुक्लादिशब्दानां शुक्लत्वादिजातिः । पचत्यादीनां पाकत्वादिः । डित्थादौ च वैशेषिकमतेन प्रत्यहं परिमाणभेदतः शरीरभेदकल्पनायां डित्थादावपि जातिरेव विषय इति भावः ।

मू०—मुख्यं तमर्थमाहुः साक्षाद्यत्रास्य संकेतः ।
व्यापारोऽपि च मुख्योऽभिधीयतेऽस्याभिधारूपः ॥२॥

व्या०—"मुख्यार्थानुपपत्तौ" इत्यादिवक्ष्यमाणलक्षणालक्षणोपयोगितया पूर्वोक्तस्य वाच्यार्थस्यैव मुख्यव्यपदेशमाह— मुख्यमित्यादि । संकेतितार्थ एव मुख्यार्थ इत्यर्थः । "संयोगादिभिरभिधा" इत्याद्यभिधाव्यवहारोपयोगितया अभिधां च लक्षयति— व्यापारोऽपि चेत्यादिना । संकेतितार्थगोचरः शब्दव्यापारोऽभिधा । स एव च मुख्य इत्याख्यायत इत्यर्थः । एषा च योगपूर्विका रूढिपूर्विका चेति द्विविधा । यथाश्वकर्णादयो, निर्मन्थ्यः, पतितं पङ्कजादयश्चेति । एतत्प्रसिद्धत्वान्नोक्तम् । इत्यभिधा ।

मू०—अनुवाद्यानामर्थानां विधेयार्थपरत्वं तात्पर्यमिति व्यापारान्तरं परैरभ्युपगतम् यथा--

"उमां स पश्यनृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः"

इत्यत्र दर्शनस्य चक्षुकरणकत्वाव्यभिचारात् तदुपादानं तद्विशेषणार्थम्; तदेव चात्र विधेयम्; तत्परत्वमेव तात्पर्यम् ।

व्या० – अथ मुख्यप्रस्तावात् तत्प्रायं तात्पर्याख्यं व्यापारान्तरमाह- **अनुवाद्यानामित्यादि** । ससाध्यकं पुनर्वचनमनुवादः । अर्थः प्रयोजनम् । तच्चात्राप्राप्तस्यार्थस्य प्राप्तसम्बन्धितया विधानमिति तादर्थ्यम् । प्राप्तानुवादस्य तदेव तात्पर्यम् । यथा-'दध्ना जुहोति' इत्यत्र वाक्यान्तरप्राप्तहोमानुवादस्य होमे दधिसम्बन्धविधानार्थत्वम् ; तदेव तात्पर्यम् । तर्हि संग्रहे किमिति नोक्तम्? तत्राह– **परैरभ्युपगतमिति** । सर्वसंप्रतिपन्नमित्यर्थः । अत एवोक्तं कैश्चित् 'तात्पर्यो(र्यार्थोपि)ऽपि व्यङ्ग्यार्थ एव' इति । स्वयंत्वभ्युपगमसिद्धान्तन्यायाद-नुमन्य इति न पृथगुक्तं संग्रहे । उदाहरति– **यथा उमामित्यादि** । तत्रा-नुवाद्यविधेये विविनक्ति इत्यत्रेति । तदुपादानं = तदनुवादः । अनुवाद्यस्य चक्षुषः प्रमाणान्तरप्राप्तिमाह– **चक्षुःकरणत्वेति** । यद्दर्शनं तच्चक्षुषैवेति व्याप्त्या व्याप्तमित्यर्थः । अनुवादस्य प्रयोजनमाह– **तद्विशेषणार्थमिति** । ऋजुनेत्यार्जवविशेषणार्थमित्यर्थः । ननु विधानार्थमनुवादो न विशेषणार्थम् ; तत्राह– **तदेवेति** । तद्विशेषणमार्जवमेवात्र विधेयम् ; विशेष्यस्य चक्षुषः प्राप्तत्वात् । यथा–"लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इत्यत्र लोहितो-ष्णीषत्वमिति भावः । अस्तु; तात्पर्ये किमायातम् ? तत्राह **तत्परत्वमेवेति** । तत्परत्वं तत्पर्यवसितत्वम् ; तदेव तात्पर्यमित्यर्थः । एतदुक्तं भवति– पदार्थ-ज्ञानानन्तरं तेषामाकाङ्क्षादिवशादन्वये पदार्थातिरिक्तो वाक्यार्थरूपो विशेषात्मा तात्पर्यार्थो यद्बलात् समुल्लसति तत् तात्पर्याख्यं व्यापारान्तरमस्त्येव । अत एव "पदार्थावगमसमनन्तरभाविनी समन्वयशक्तिस्तात्पर्यम्" इत्यलङ्कारसर्वस्व-सञ्जीविनीकारोऽपि । एतेन तात्पर्यार्थस्य क्वचिद्व्यञ्जकत्वमपीष्टमित्यवसेयम् । अत एव तात्पर्यं निरूप्योक्तं काव्यप्रकाशे– "सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्व-मपीष्यते" इति । इति तात्पर्यम् ।

मू०—संयोगादिभिरभिधा शृङ्खलिता यत्र कुंठतामेति ।
अर्थान्तरावगमने व्यञ्जनमेव क्षमं तत्र ॥ ३ ॥

यदाह तत्रभवान् भर्तृहरिः--

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ इति ।

तत्र संयोगेन यथा - 'शङ्खचक्रधरो हरिः' इत्युक्ते कृष्ण एवाभिधा नियम्यते । विप्रयोगेण यथा- 'विना रामं सीता दण्डकारण्यमाविशत्' इति दाशरथौ । साहचर्येण यथा- 'रामलक्ष्मणौ' इति तत्रैव । विरोधेन यथा 'रामार्जुनगतिस्तयोः' इति भार्गवकार्तवीर्ययोः । अर्थेन यथा 'सर्वं जानाति देवः' इति युष्मदर्थे । लिङ्गेन यथा - 'कुपितो मकरध्वजः' इति कुसुमायुधे । शब्दान्तरसान्निध्येन यथा 'देवस्य श्रृङ्गारिणः' इति तत्रैव । सामर्थ्येन यथा- 'मधुना मत्तः कोकिलः' इति वसन्ते । औचित्येन यथा - 'पातु वो दयितामुखम्' इति सांमुख्ये । देशेन राजधानी प्रमुखेन यथा - 'भात्यत्र परमेश्वरः' इति राजनि । कालेन यथा - 'चित्रभानुर्विभाति' इति दिवा दिवाकरे नक्तं तु वह्नौ । व्यक्तिः स्त्रीपुंनपुंसकरूपा । तथा यथा - 'मित्रं दृश्यताम्' इति वयस्ये । 'मित्रो दृश्यताम्' इति मयूखमालिनि । स्वरस्तु वेद एव, न काव्येऽर्थविशेषावगमाय । आदिशब्दादभिनयादिपरिग्रहः । तत्राभिनयेन यथा-

'ईदृक्कुचित्ता सदा वेश्या प्रतार्यैवं कृताविटैः ।
सिद्धे कार्ये पुनस्तस्यै दत्तमेतन्न काञ्चनम्' ॥

अपदेशेन यथा-

'इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्' ।

निर्देशेन यथा-

'भर्तृदारिके । दिष्टचा वर्धसे; यदत्रैव कोऽपि कस्या अपि वर्तते' इति मामङ्गलिविलासेन(आ)ख्यातवत्यः' ।

व्या०—तदेवमभिधां निरूप्य तन्मूलं व्यञ्जनं निरूपयति— **संयोगादिभिरिति** । संयोगादयः वक्ष्यमाणाः पदार्थनिश्चयहेतवः । शृङ्खलिता प्रकृतार्थे नियन्त्रिता । एवकारो व्यापारान्तर व्यावृत्त्यर्थः ! तच्चोदाहरणे व्यक्तीकरिष्यते । संयोगादीनामभिधा नियामकत्वे वृद्धसंमतिमाह— **यदाहेति** । संयोगः संश्लेषः, विप्रयोगो विश्लेषः । अर्थः प्रयोजनम् । लिङ्गं चिह्नम् । व्यक्तिः स्त्रीपुंनपुंसकम् । स्वर उदात्तादिः । **विना राममिति** । दाशरथिसंयोगिन्या सीतया विप्रयोगोऽपि तेनैव न्याय्य इति रामशब्दस्य विप्रयोगाद्दाशरथिपरत्वनिश्चय इत्यर्थः । **कुपित इति** । कोपचिह्नस्याचेतने ध्वजभेदे[1] असंभवादिति भावः । **स्वरस्तु वेद इति** । इन्द्रशत्रुरित्यत्र पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थनिश्चयः । द्वादशाहीनस्येत्यत्र द्वादशशब्दस्य संख्यास्वरेण द्वन्द्वार्थनिश्चयः । अहीनशब्दस्य मध्योदात्तत्वेनाहर्गणार्थत्वनिश्चय इत्यादि । तदेतत् सम्यक् प्रपञ्चितमस्माभिः **स्वरमञ्जरीपरिमलटीकायाम्** । अभिनयोऽर्थव्यञ्जिका चेष्टा । तमुदाहरति— **ईदृक्चित्तेति** । अत्रैवंकृतेति प्रकारविशेषसंदेहे करतलप्रमार्जनचेष्टया निःस्वीकरणरूपोऽर्थो गम्यते । अभिनयादीत्यादिशब्देनापदेशनिर्देशयोर्ग्रहणमित्याशयेनाह— **अपदेशेनेति** । **उपदेशेनेत्यर्थः** । इत इति सर्वनामपरामृष्टार्थसंदेहे नेत इति कथनं निश्चय इति । निर्देशः अङ्गुल्यादिना प्रदर्शनम् । **कोऽपीति** । किंशब्दः परामृष्टार्थसंदेहे । माधवस्य मालतीसखीनामङ्गुलीनिर्देशेन स्वयमेवेति निश्चयः ।

मू०—इत्थं संयोगादिभिरभिधायां नियमितायां यदनेकार्थस्य शब्दस्यार्थान्तरमपि यत्र क्वचन प्रतीतिगोचरीभवति तत्र व्यञ्जनाव्यापार एव प्रगल्भते । यथा—

आच्छादितायतदिगम्बरमुच्चकैर्गा-
माक्रम्य संस्थितमुदग्रविशालशृङ्गम् ।

---

१ 'समुद्रे' इति वक्तुं युक्तम् ।

मूर्ध्निस्फुरत्तुहिनदीधितिकोटिमेन-
मुद्वीक्ष्य को भुवि न विस्मयते नगेशम् ॥

अत्र तावन्न श्लेषः; केवलप्राकरणिकगतत्वेन केवलाप्राकरणिकगतत्वेन च तस्य भावात् । नाभिधा प्राकरणिक नियमितायाः तस्या अप्राकरणिकाभिधाने सामर्थ्याभावात् न तात्पर्यम्; सिद्धानां साध्यार्थपरत्वं तात्पर्यमुच्यते । तदुपात्त एव संभवति; यथा- 'उमां स पश्यनृजुनैव चक्षुषा' इत्यत्र चक्षुषः प्रमाणान्तरत एव सिद्धे दर्शनकरणत्वे विशेषणार्थमुपादानम् । नापि लक्षणा; (दिगम्बर)गवादिपदानां मुख्यार्थबाधादिविरहात् । इत्यभिधातात्पर्यलक्षणारूपव्यापारत्रितयातिवर्तीध्वननद्योतनव्यञ्जनप्रत्यायनावगमनादिव्यपदेशनिरूपित - श्चतुर्थो व्यापारो दुरपह्नव एव । ततश्च शब्दशक्तिमूलानुरणनरूपाव्यङ्ग्याभिधानस्य ध्वनेर्महिम्ना नगेशं नगेशमिवेत्यलोपमालंकारः प्रतीयते ।

व्या०—एवं संयोगादिपदार्थं व्याख्याय वाक्यार्थमाह- इत्थमिति उदाहरति- आच्छादितेति । अत्र परिशेषप्रमाणेन व्यञ्जनं साधयति- अत्र तावदित्यादिना दुरपह्नव एवेत्यन्तेन । प्रसक्तं तावत् प्रतिषेधति- न श्लेश इति । स्वमते केवलप्रकृतयोः केवलाप्रकृतयोर्वा श्लेषो न तु प्रकृताप्रकृतयोरित्यलंकारोन्मेषे वक्ष्यति । अतो न श्लेषावकाश इत्यर्थः । तदुपात्त एव संभवतीति । तत् तात्पर्यं उपात्ते विशेषणविधानार्थमनूदित एव संभवति नान्यत्र । न चात्र किंचिद्विधातुं कस्यचिदनुवादः संभवतीति भावः । प्रसक्तं प्रतिषिध्यान्यत् परिशिनष्टि- इत्यभिधेति । अत्रायं प्रयोगः- विमतमर्थान्तरमभिधादित्रितयातिरिक्तगोचरः; तदभावेऽपि प्रतीयमानार्थत्वात्; यदुक्तसाध्यं न भवति तदुक्तसाधनं च न भवति; यथा अभिधेयादि; इति व्यतिरेकी । न च विशेषणासिद्धो हेतुः । अभिधाद्यभावस्य साधितत्वात् इति । नन्वजागलस्त-

नापिमानस्य सिद्धौ किं फलम् ? अत आह— ततश्चेति । वाच्यव्यङ्ग्ययोर्नगेशयोरौपम्यमिह व्यङ्ग्यम्; तदेव फलमित्यर्थः ।

इत्यभिधामूलव्यङ्ग्यम् ।

मू०—शब्दोऽयं लाक्षणिको व्यापारो लक्षणा भवेद्यस्य ।
एतल्लक्षणमस्याः सामान्यं कथ्यते पूर्वम् ॥
मुख्यार्थानुपपत्तौ तद्योगे रूढितोऽथवापि फलात् ।
अन्योऽर्थो यदि लक्ष्यो भवति तदा लक्षणाभिमता ॥

व्या०— एवं वाच्यवाचकतद्वृत्तीर्निरूप्य संप्रतितन्मूलतया लक्ष्यलक्षकतद्वृत्तीर्निरूपयन्नर्थज्ञानस्य शब्दज्ञानपूर्वकत्वात् पूर्वं शब्दं निरूपयति— शब्दोऽयमिति । लक्षणयार्थप्रतिपादकः शब्दो लाक्षणिक इति लक्षणार्थः । लक्षणयेति वाचकादिव्यावृत्तिः । ननु केयं लक्षणा नाम, यद्योगाच्छब्दस्य लाक्षणिकतेत्याकाङ्क्षायां सामान्यलक्षणं तावत् प्रतिजानीते— एतदिति ।

लक्षणमाह— मुख्यार्थेत्यादि । मुख्यार्थानुपपत्तिः वाच्यबाधः । तद्योगः मुख्यार्थाविनाभावः । रूढितः फलतो वेति विभागोक्तिः । रूढिः प्रसिद्धिः । फलं प्रयोजनम् । अन्योर्थः मुख्यार्थाविनाभूतः तटादिर्लक्ष्यः प्रतिपाद्यः ।

मू०—मुख्यस्यार्थस्य बाधः तेन सम्बन्धः, प्रसिद्धिः, प्रयोजनं वा लक्षणायामुपयुज्यते । ततश्च मुख्यार्थस्य बाधे, तेनैव सम्बन्धे मुख्येनार्थेनामुख्यार्थो यल्लक्ष्यते स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा । तत्र 'कुशल' इत्यादौ रूढितो लक्षणा । 'गङ्गायां घोषः' इत्यादौ तु प्रयोजनात् ।

व्या०—तदेतदभिव्यंक्तुं व्याचष्टे— मुख्यस्येत्यादि । सम्बन्धानुपपत्ती प्रसिद्धिप्रयोजनयोरन्यतरच्च लक्षणाप्रयोजकानीत्यर्थः । अथ लक्षणमार्गं

निष्कृष्य व्याचष्टे— **ततश्चेति** । लक्ष्यत इति यत् स शब्दव्यापारो लक्षणेत्यन्वयः । यच्छब्देन लक्ष्यत इत्यत्र गुणीभूतप्रकृत्यर्थोपलक्षणं प्रतिपादनापरपर्यायं यत् तत् परामृश्यते । स इति तच्छब्दे नापि तदेवोच्यते । ततश्च यल्लक्षणं । प्रतिपादनं सा लक्षणेत्यर्थः । स इति विधेयलिङ्गम् । मुख्यार्थबाधे तत्सम्बन्धिन्यारोपितः शब्दव्यापारो लक्षणेति निष्कर्षः । ननु किं शब्दो लक्षकोऽर्थो वा ? नाद्यः; शब्दस्य स्वार्थप्रकाशनमात्रेणोपरतव्यापारस्य पुनर्व्यापारान्तरायोगात् । न द्वितीयः – अर्थस्य लक्षकत्वे शब्दव्यापारो लक्षणेति कथम् ? न च संग्रहे कश्चिन्निश्चय इत्याशङ्क्यार्थस्यैव लक्षकत्वं संग्रहे विवक्षितमित्याशयेनाह— **मुख्येनार्थेनेति** । तर्हि शब्दव्यापार इति कथम् ? तत्राह— **आरोपित इति** । वाच्यधर्मस्य वाचके समारोपात् तथा व्यपदेश इति भावः । नन्वर्थस्यैव लक्षकत्वे कथमजहत्स्वार्थायाः स्वार्थांशे वृत्तिविरोधाभावः ? केवलसमुदायभेदेन लक्ष्यलक्षकभेदसद्भावादिति संक्षेपः । आरोपितत्वे हेतुमाह— **सान्तरार्थनिष्ठ इति** । व्यवहितार्थगोचर इत्यर्थः । शब्दस्य स्वार्थ एव मुख्यव्यापारो न व्यवहितेऽर्थान्तरे; व्यवहितार्थविषयश्चायमिति युक्तमारोपितत्वमिति भावः । ननु संग्रहे 'रूढितोऽथवापि फलात्' इति किमर्थम् ? यतोऽस्य लक्षणान्तः पातित्वे त्वेकैकस्य व्यभिचारात्, समुदायस्यासंभवात्, व्यावर्त्याभावेन वैयर्थ्याच्च, इत्याशङ्क्य तद्विभागपरमित्यभिप्रेत्य तदुदाहरति— **तत्रेत्यादि** । 'कर्मणि कुशलः' इत्यादौ कुशोपादानरूपावयवार्थासंभवाद्विवेकिनि रूढितो लक्षणा । अन्यत्र घोषगतपवित्रत्वादिज्ञानफलकत्वात् फलतो लक्षणेत्यर्थः ।

इह रूढितो लक्षणैकविधैव । फलतो तु प्रथमं शुद्धा सारोपा साध्यवसाना चेति त्रिधा । तत्राद्या जहदजहदादिभेदेन त्रेधा । इतरे तु प्रत्येकं गौणी शुद्धा चेति द्विविधे इत्येवं फलतो लक्षणा सप्तविधेति विभागं सिद्धवत्कृत्य क्रमेण तासां सप्तानामपि लक्षणोदाहरणे दर्शयन्नादौ जहत्स्वार्थां लक्षयति— **शब्द इत्यादि** ।

मू०—शब्दोऽर्पयति परार्थे यद्यात्मानं तदा जहत्स्वार्था ।

त्वत्खड्गधारापयसि प्रवीराः
पतन्ति ये संयति संमुखीनाः ।
वसन्ति ते वीर नृसिंह देव
दुरासदायां सुरदीर्घिकायाम् ॥

अत्र सुरदीर्घिकाशब्दस्य मुख्येऽर्थे स्रोतसि रिपुनगराधिकरणता न संभवतीति सुरदीर्घिकाशब्दो मुख्यार्थे स्रोतोरुपे बाधितस्तमर्थं हित्वा तदधिकरणतासिद्ध्यर्थमात्मानमतिशयितशैत्यपावनत्वादिद्योतनाय परिसराय समर्पयति तेनेयं जहत्स्वार्था समाख्याता । इयमेवाप्रस्तुतप्रशंसादेरलंकारस्य बीजम् । इयं तु लक्षणलक्षणेति परैरभिधीयते ॥

व्या०—शब्दो गङ्गादिशब्दः परार्थं परस्य तटादेर्घोषाद्यधिकरणत्वादिसिद्ध्यर्थमात्मानमर्पयति स्वार्थं हित्वा तटाद्यर्थे प्रवर्तयति तदा स्वार्थत्यागाज्जहत्स्वार्थेत्यन्वर्थसंज्ञेत्यर्थः । उदाहरति— त्वत्खड्गधारेत्यादि । संमुखस्य दर्शनमेषु ते संमुखीना अभिमुखा इत्यर्थः । "यथामुखसंमुखस्य दर्शने खः" इति खप्रत्ययः । ये त्वया रणेऽभिमुखा हतास्तेषां शाश्वतिकः स्वर्गवास इति तात्पर्यार्थः । लक्ष्ये लक्षणं पातयति— अत्रेत्यादि । मुख्यार्थे बाधकमाह — रिपुनगरेति । जहत्स्वार्थतां व्यनक्ति— तमर्थं हित्वेति । प्रयोजनमाह— शैत्येति । परिसरशब्देन तटवाचिना लक्ष्यार्थस्य मुख्यार्थेन स्रोतसाविनाभावः सूचितः । अथास्याः स्वशास्त्रोपयोगमाह— इयमेवेति । सामान्यविशेष कार्यकारणस्वरूपाणामन्यतमस्याप्रस्तुतस्य कथनात् तेषामेवान्यतमस्य प्रतियोगिनः प्रस्तुतस्य गम्यत्वेऽप्रस्तुतप्रशंसा । तत्राप्रस्तुतस्याप्रस्तुतत्वादेव कथनमनुपपन्नं सत् स्वार्थत्यागेन प्रस्तुतमाक्षिपतीति युक्तमस्या जहल्लक्षणामूलत्वमिति भावः । आदिशब्दादनन्वयादिसंग्रहः । ननु काव्यप्रकाशकारेणेयं लक्षणलक्षणेत्युक्तं न जहत्स्वार्थेत्याशङ्क्याह— इयं त्विति । अस्या एव नामान्तरकरणान्न

विरोध इति भावः। परार्थे स्वसमर्पणं स्वत्यागो लक्षणं तेनोपलक्षिता लक्षणा लक्षणलक्षणा ॥

मू०—सा विपरीता यस्यां लक्षयति पदं स्ववाच्यविपरीतम् ॥६॥

"किमिव नापकृतमनेन"। अत्रोपकारिणं प्रत्यपकृतमिति वचनं बाधितं सदुपकृतमिति लक्षयति। इयमेव व्याजस्तुतेर्बीजम् ॥

व्या०—अस्या एव विधान्तरं लक्षयति— **सेति**। स्वार्थत्यागेन तद्विरुद्धार्थलक्षणा विपरीतलक्षणा साप्यन्या जहत्स्वार्थेत्यर्थः। उदाहरति— **किमिवेति**। अत्रापि लक्षणं योजयति— **अत्रोपकारिणमिति**। उपकारिणि व्याजस्तुत्या प्रयुक्तोऽपकृतशब्दः स्वार्थत्यागेन तद्विपरीतमुपकारमेव लक्षयतीत्यर्थः। अस्या अपि स्वशास्त्रोपयोगमाह— **इयमेवेति**। यत्र वाच्यया निन्दया स्तुतिः स्तुत्या वा निन्दा गम्यते साव्याजस्तुतिः। तत्र विपरीतार्थप्रतीतिः विरुद्धलक्षणामूलेति भावः ॥

मू०—सिद्धिं निजक्रियायाः कर्तुं यस्यां परस्य शब्देन।
आक्षेपः क्रियतेऽसावजहत्स्वार्था समाख्याता ॥६॥
काव्यालंकारमीमांसातर्कव्याकरणागमाः।
प्रविशन्ति तवास्थानीं नरसिंह नरेश्वर ॥

अत्र स्वार्थमजहत एव काव्यादयः स्वप्रवेशरूपक्रियासिद्धये तत्संबन्धिनो विदुषो लक्षयन्ति माहात्म्यद्योतनं तु प्रयोजनम्। इयमेव समासोक्त्यादेर्बीजम्। इयं पुनरुपादानलक्षणेति मतान्तरे गीयते ॥

व्या०—अजहत्स्वार्थां लक्षयति— **सिद्धमिति**। यत्र शब्देन स्वार्थगतक्रियासिद्धये स्वार्थापरित्यागेनैव तद्विशिष्टमर्थान्तरं लक्ष्यते यथा कुन्ताः प्रविशन्तीत्यत्र कुन्तप्रवेशाय तद्वन्तः पुरुषा असावजहत्स्वार्था लक्षणेत्यर्थः। उदाहरति— **काव्येति**। अत्रापि लक्ष्ये लक्षणं संभावयति— **अत्र स्वार्थमित्यादि**। नन्वत्र स्वार्थापरित्यागे स्वार्थंशेऽभिधा अंशान्तरे लक्षणा

चेत्येकस्यैव शब्दस्यैकदा वृत्तिद्वयापत्तिः। नैष दोषः। अत्रापि स्वार्थं हित्वैव तद्विशिष्टार्थान्तरलक्षणात्। किं त्वभिधातः प्राग्वदवाच्यस्यैव लक्ष्यत्वेन तस्यापि स्वीकारादजहत्स्वार्थेति व्यपदेशः। गंगायां घोष इत्यादौ तु तदपि नास्ति (इति) सा जहत्स्वार्थेति भेद इति संतोष्टव्यम्। तदेवोत्सूचयति-तत्संबन्धिनो विदुषो लक्षयन्तीति। तेन स्वार्थेन संबन्धिनस्तद्विशिष्टानित्यर्थः इयमेव समासोक्त्यादेर्बीजमिति। प्रस्तुतविशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः। यथा 'उदारकीर्तेरुदयं दयावतः'। इत्यत्र निर्बाधरक्षितत्वोप-स्कृतत्वदोहनादिविशेषणमहिम्ना मेदिन्यां गोत्वप्रतीतिः। तत्र दोहनक्रिया-सिद्ध्यर्थं मेदिन्यां स्वरूपानुपमर्देन गोत्वाक्षेपादजहल्लक्षणामूलत्वमिति भावः – इयं पुनरुपादानलक्षणेति। उपादानं स्वार्थापरित्यागस्तेन उपलक्षिता लक्षणोपादानलक्षणेत्यर्थः॥

मू०—अंशेनैकेन पुनर्जहाति न जहाति चान्येन।
शब्दः स्वार्थं यदि जहदजहत्स्वार्था समाख्याता॥८॥

यत्कर्णतालप्रभवैः समीरैः
प्रतापदीपाः शमिता रिपूणाम्।
सोऽयं तव न्यक्कृतादिकरीन्द्र-
लीलायितो वीर करेणुराजः॥

अत्र यद्देशकालविशिष्टत्वं वारणेन्द्रस्य पूर्वमासीत्तद्देशकालविशिष्टत्वमधुना नास्तीति सोऽयमित्यत्र तत्रांशे जहाति स्वार्थमिदन्तांशे तु न जहातीति जहदजहत्स्वार्थेयम्॥

व्या०—इह जहत्स्वार्थाऽजहत्स्वार्था चेति द्विधैव शुद्धेति काव्यप्रकाशकारः। तदुक्तम्।

'स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा'॥ इति।

तदन्यथाकरणाय तृतीयामाह– **अंशेनेति** । उदाहरति– **यत्कर्णतालेति** । लक्ष्ये लक्षणं योजयति– **यद्देशेत्यादि इदन्तांशे तु न जहातीति** । एतद्देश-कालवैशिष्ट्यस्य संभवादिति भावः । अयमाशयः । किमिह लक्षणैव नास्तीति विवक्षया द्विधैवेत्युक्तं परैरुत सत्यपि तत्रैवान्तर्भूतेति विवक्षया वा । नाद्यः । विचारासहत्वात् । तथा हि यावता शब्देन यावानर्थः प्रतीयते तावानेव तस्य स्वार्थो न न्यूनो नाधिकश्च । प्रतीयते च सोऽयं वारणेन्द्र इति पदत्रयेणापाततस्तावत्तत्तेदन्ताविशिष्टं वस्त्विति तावानस्यार्थः । अत्र तत्तांशबाधे न्यूनोऽयमस्यार्थः कथमनेनाभिधीयते तथापि प्रतीयत इत्यकामेनापि तत्तोपलक्षितमिदन्ताविशिष्टं वस्तु लक्ष्यत इत्याश्रयणीयमेवेति कथमत्र नास्ति लक्षणा । नापि द्वितीयः । न तावदियं जहत्स्वार्था । एकांशमात्रहान्या गङ्गायां घोष इतिवत् परार्थं स्वसमर्पणात्रावत् । नाप्यजहत्स्वार्था । कुन्ताः प्रविशन्तीतिवत् स्वसिद्धये परानाक्षेपात् । किं तु स्वार्थस्यैवांशभेदेन हानाहानाभ्यामुभयवैलक्षण्यादन्यैवेति सुष्ठूक्तं **शुद्धा त्रिविधेति** । वेदान्तिन-श्चैतामेवोपजीव्य महावाक्यार्थं वर्णयन्ति । किं तु सोऽयं देवदत्त इत्यत्र तत्तांशवदिदन्तांशस्यापि त्यागेन स्वरूपमात्रापरित्यागेन चोपलक्षितं स्वरूपमात्रं लक्ष्यत इत्युक्त्वा तद्दृष्टान्तेन महावाक्येऽपि तत्त्वंपदार्थगतविशेषत्यागेन स्वरूप(पा)त्यागेन चोपलक्षितमेकमखण्डं वस्तु जहदजहल्लक्षणया प्रतिपाद्यत इत्येतावान् विशेष इत्यलं प्रसक्तानुप्रसक्त्या । अत्रायं लक्षणासङ्क्षेपः ।

'स्वार्थत्यागे समानेऽपि सह तेनान्यलक्षणा ।
यत्रेयमजहत्स्वार्था जहत्स्वार्था तु तं विना ॥
स्वार्थैकांशत्यागादंशान्तरमेव लक्ष्यते यत्र ।
सा जहदजहत्स्वार्था तत्त्वमसीत्यादि विषयदृश्येयम् ॥ इति ॥

एवं त्रिविधापि शुद्धोक्ता ॥

मू०—विषयी विषयश्च यदा सारोपा स्यात्तदा द्विविधा ।
आरोप्यमाणारोपविषयौ यदानपह्नुतस्वरूपौ सामानाधिकरण्येन

निर्दिश्येते तदा सारोपा । इयं च द्विविधा गौणी शुद्धा चेति । तत्र गौणीगुणाध्यारोपरूपात् सादृश्यात् प्रवर्त्तते ।

व्या०—अथ सारोपलक्षणाया लक्षणं विभागं चाह– **विषयीत्यादि** विषयादिपदार्थान् विभजन्नेव लक्षणं व्याचष्टे– **आरोप्यमाणेत्यादि** । एतेन साध्यवसानातो भेद उक्तः । संग्रहे सारोपा द्विधेत्युक्तं किं तद्द्वैविध्यं तत्राह–**इयं चेति** । तत्र गौणी गुणतः सादृश्यनिमित्ता । यथाग्निर्माणवक इति । शुद्धा सादृश्येतरकार्यकारणभावादिसंबन्धनिमित्ता । यथा आयुर्घृतं इत्यादिकेति भावः । एतेन लक्षणायाः पृथग्भूता गौणी वृत्तिरिति तान्त्रिकसमयः परास्त इति वेदितव्यम् । वक्ष्यमाणरीत्या लक्षणान्तर्भावादिति । तत्र गौण्याः प्रवृत्तिनिमित्तमाह– **तत्र गौणीति** । गुणतः सादृश्यमस्याः प्रवृत्तिनिमित्तमित्यर्थः । यथाहुराचार्याः ।

‘अग्नित्वलक्षितादर्थाद्यत्पैङ्गल्यादि गम्यते ।
तेन माणवके बुद्धिः सादृश्यादुपजायते ॥ इति ।

सादृश्यनिमित्ता लक्षितलक्षणेयं न तु मुख्यार्थाविनाभावमूलेत्यर्थः ।

मू०—यथा
वीरश्रीस्वरसाभिसाररजनीनिर्माणकर्मान्तिक-
च्छायाकन्दलितान्धकारकलिकातापिच्छिताशाश्वलः ।
जीयादुत्कलभूमिपाल भवतः खड्गो रणप्राङ्गणे
शत्रुक्षोणिमृताममर्त्यनगरीयात्रासु कार्त्तान्तिकः ॥

अत्र रिपुविषयसुरपुरप्रस्थानोपदेशकारित्वादयो मौहूर्त्तिकगुणा लक्ष्यमाणा अपि प्रवृत्तिनिमित्ततां भजन्ते । ताद्रूप्यप्रतीतिः प्रयोजनम् ।

व्या०—गौणीमुदाहरति– **वीरश्रीत्यादि** । इह वीरश्रीरभिसारिका तस्याः स्वरसाभिसारः स्वेच्छाभिसरणं तदर्थं रजनीनिर्माणे कर्मान्तिकया

स्पृष्ट्या (स्पृष्ट्या) छायया स्वभासा कन्दलिताभिरुत्पादिताभिरन्धकारकलिका-भिस्तापिच्छितास्तापिच्छवन्तस्तमालवन्तः कृताः श्यामलिता इत्यर्थः । तापि-च्छशब्दात् "तत्करोति" इति ण्यन्तात् कर्मणि क्तः । णाविष्ठवद्भावे "विन्मतोर्लुक्" इति मतुपो लुक् । ते आशाञ्चलादिगन्ता येन स तथोक्तः । कार्त्तान्तिको मौहूर्त्तिकः । इह कार्त्तान्तिकः खड्ग इत्युदाहरणम् । तत्र गौणीं व्युत्पादयति— अत्रेत्यादि । कार्तान्तिकशब्देन लक्ष्यमाणतद्गुणयोगनिमित्ता खड्गे लक्षणा गौणलक्षणा । यथाहुः ।

'अभिधेयाविनाभूते प्रतीतिर्लक्षणेष्यते ।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता' ॥ इति

सा च विषयनिगरणाभावात् सारोपेत्यर्थः । गुणाः स्वपरार्थसाधारण्येन लक्षणीयाः । अन्यथा स्वार्थगतानामर्थान्तरप्रवृत्तिनिमित्तत्वे वैयधिकरण्यदोषः । परार्थगतानां स्वार्थासंबन्धानां लक्ष्यत्वानुपपत्तिः । साधारण्ये तु नैतद्दोषावकाशः इत्याहुः— तद्रूप्येति । तेनारोप्यमाणरूपेण रूपवत्तदुपरक्तत्वमिति यावत् न तु तादात्म्यम् । विषयनिगरणविरहिण्यारोपे तदसंभवात् ।

मू०—शुद्धा पुनरुपचारवती । सादृश्येतरकार्यकारणत्वादि-संबन्धान्तरकारिणी वा । यथा

मदक्षीवक्षोणीपतिपरिषदायोधनमही-
जयाङ्कश्रीशङ्कावहगुणकिणश्रेणिललितः ।
भुवो भारं वोढुं भुजगपतिभोगप्रतिभट-
स्त्रिलोकीकल्याणं जयति तव दोरुत्कलपते ॥

अत्र कल्याणहेतुत्वात् कल्याणम् । अत्रापि ताद्रूप्यप्रतीतिः प्रयोजनम् । इयमेव रूपकादेर्बीजम् ।

व्या०—शुद्धसारोपां लक्षयति— शुद्धेति । अतत्त्वस्य तत्त्वेन व्यपदेश उपचारः । तद्वती । तद्वत्ता च सादृश्येतरसंबन्धान्तरनिमित्ता न तु

सादृश्यनिमित्ता । अन्यथा गौण्यामतिव्याप्तेरित्यभिप्रेत्याह– **सादृश्येतरेति ।** आदिग्रहणाद्वक्ष्यमाणतादात्म्यादिसंग्रहः । सादृश्येतरसम्बन्धविशेषनिमित्ता शुद्धसारोपा यथा । आयुर्घृतमित्यादिकमित्यर्थः । स्वयमुदाहरति– **मदेत्यादि ।** क्षीबो मत्तः । क्षीवृ मद इति धातोर्निष्ठायाम् "अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः" इतीटोऽभावतलोपयोर्निपातनात् साधुः । जयाङ्का जयचिह्ना श्रीर्जयश्रीरित्यर्थः । इह कल्याणं दोरित्युदाहरणम् । तत्र कल्याणहेतौ दोष्णि कल्याणशब्दस्य प्रवृत्तिनिमित्तं कार्यकारणभावसम्बन्ध इत्याह– **अत्र कल्याणेति ।** ताद्रूप्यं ताद्रूपरक्तत्वमित्युक्तम् । स्वशास्त्रोपयोगमाह– **इयमेवेति ।** इयं द्विविधापि सारोपलक्षणेत्यर्थः । मुखं चन्द्रः नेत्रानंदश्चन्द्र इति चोभयमूलत्वेनापि रूपकस्योत्थानादिति ।

मू०—उपचारश्च कार्यकारणभावादेर्निमित्तस्य पाञ्चविध्यात् पञ्चधा भवति । कार्यकारणभावे प्रागेवोदाहृतम् । तादर्थ्ये यथा । इन्द्रार्था स्थूणा इन्द्रः । स्वस्वामिभावलक्षणसम्बन्धे यथा । राजकीयः पुरुषो राजा । अवयवावयविभावे यथा । अग्रहस्त इत्यत्राग्रमात्रेऽवयवे हस्तः । तात्कर्म्ये यथा । अतक्षा तक्षा ।

व्या०—कार्यकारणभावादीत्यादिशब्दग्राह्याणि सम्बन्धान्तराणि दर्शयंस्तन्निमित्तमुपचारं पञ्चधा भिनत्ति– **उपचारश्चेत्यादि ।** उपचारश्चातत्त्वस्य तत्त्वेन व्यपदेश इत्युक्तम् । **प्रागेवोदाहृतमिति ।** कल्याणं दोरित्यत्रेत्यर्थः । अत्रैतद्भुजपालितानां मङ्गलमस्तीति व्यङ्ग्यम् । एवमुत्तरत्रापि क्रमादिष्टार्थप्रदत्वानुलङ्घनीयत्वसामर्थ्यातिशयकौशलविशेषा व्यङ्ग्या इति द्रष्टव्यम् । तत्र हस्तसमानसारताद्योतनाय हस्ताग्र एव लक्षणया हस्तशब्दप्रयोगादग्रं चासौ हस्तश्चेति समानाधिकरणसमासश्च । अत एव "हस्ताग्रा अग्रहस्ता अग्रद्वयोर्गुणगुणिनोर्भेदात्" इति वामनः ।

मू०—विषयिनिगीर्णे विषये साध्यवसाना द्विधा ख्याता ॥९॥
द्विधा गौणी शुद्धा चेति । तत्राद्या यथा:– "अयं पारिजात" इत्यत्र वितरणचणत्वादयः पारिजातस्य गुणा वीरनरसिंहे लक्ष्यमाणा अपि प्रवृत्तिनिमित्ततां भजन्ते । प्रयोजनं च सर्वथैवाभिन्नत्वप्रतीतिः । अन्त्या यथा:– 'अयमानन्दः' इत्यत्रानन्दहेतुत्वादानन्दः । इयमेवे-तिशयोक्तेर्बीजम् ।

व्या०— अथ साध्यवसानाया लक्षणमाह– विषयीति । यत्र विषयिणारोप्यमाणेनाग्न्यादिना विषयस्यारोपणाधिष्ठानस्य माणवकादेर्निगरण-मत्यन्तापलापः क्रियते यथा घृतमाणवकयोः 'इदमायुः' 'अयमग्निः' इत्यादि सा लक्षणा साध्यवसानलक्षणेत्यर्थः । विभजति– द्विधेत्यादि । अत्रापि पूर्ववत् सादृश्यनिमित्ता गौणी सम्बन्धान्तरनिमित्ता च । यथा– 'अयमग्निः' 'इदमायुः' । इति चेत्यनुसन्धेयम् । सर्वथैवाभिन्नत्वप्रतीतिरिति । 'अयं पारिजातः' इत्यत्र इदं शब्दो न राजाख्यविषयपरामर्शी; तदा सारोपत्व-प्रसङ्गात् । किन्तु तद्गतेदन्ता मात्रं परामृशन् विषयिणमारोप्यमाणं पारिजातमेव पुरोवर्त्यभेदाध्यवसायेनेदन्तया विशिनष्टि । तद्विशिष्टविषयी पारिजातो भिन्नविषयितया तादात्म्येन प्रतीयते । तदिह लक्षणायाः प्रयोजनमित्यर्थः । एवमयमानन्द इत्यत्राप्यूहनीयम् । केवलमिह सादृश्या-दध्यवसानं, तत्र तु सम्बन्धान्तरादिति भेदः । अत्रापि स्वशास्त्रोपयोगमाह– इयमेवेति । "अध्यवसितप्राधान्ये त्वतिशयोक्तिः" इति तल्लक्षणादिति भावः । इयमुभयरूपापि साध्यवसानलक्षणेत्यर्थः ।

मू०—इत्यस्याभिर्भिदाः सप्त लक्षणायाः प्रदर्शिताः ।
संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया ॥ १० ॥

अस्याः संकलनेऽन्योन्यमष्टाविंशतिरीरिताः ।
पञ्चत्रिंशत् समाख्याताः शुद्धभेदैः समं पुनः ॥११॥
स्वैः प्रभेदैरलंकारैर्ध्वनिभेदैश्च संगता ।
वितन्वती चमत्कारं संख्यामत्सरिणी मता ॥१२॥

व्या०—उपसंहरति– इत्यस्माभिरिति । यदुक्तं काव्यप्रकाशे 'लक्षणा तेन षड्विधा' इति तत् प्रतिक्षिपति– सप्तेति । जहत्स्वार्था, अजहत्स्वार्था, जहदजहत्स्वार्था, गौणसाध्यवसाना, शुद्धसाध्यवसाना चेत्येवं सप्त भेदाः फलतो लक्षणायाः प्रदर्शिता इत्यर्थः । अस्मद्ग्रहणं विशेषदर्शित्वाभिमानसूचनार्थम् । विशेषश्चास्माभिर्व्याख्यातः प्राक् । अत्र 'गङ्गायां घोषः' 'कुन्ताः प्रविशन्ति' 'सोऽयं देवदत्तः' इति च जहदादयस्तिस्रः । 'आयुर्घृतम्' 'आयुरेवेदम्' इति च सारोपसाध्यवसाने द्वे चेत्येवं पञ्च शुद्धाः । 'अग्निर्माणवकः' 'अयमग्निः' इति च द्वे गौण्यौ । तयोर्गुणयोगादेव शुद्धाभ्यः पञ्चभ्यो भेदः । शुद्धत्वं तासामगौणत्वमेव । आरोपाध्यवसानाभ्यामेव गौण्योरन्योन्यभेदः । सारोपसाध्यवसानशुद्धयोश्च ताभ्यामेवान्योन्यभेदः । जहदादिशुद्धाभ्यस्तु कार्यकारणभावादिसम्बन्धनिबन्धनोपचाराद्भेद इति न कुत्रापि संकरशङ्काकलङ्कावकाशः ।

संकरेणेत्यादि । सप्तानामेकैकस्याश्चातुर्विध्यादष्टाविंशति भेदा भवन्तीत्यर्थः । संकलनं मेलनम् । शुद्धभेदैरसंकलितभेदैरित्यर्थः । अष्टाविंशतेः सप्ताधिक्यात् पञ्चत्रिंशद्भेदाः स्युरित्यर्थः । स्वैः प्रभेदैः, लक्षणाभेदैरित्यर्थः । संख्यामत्सरिणी असंख्येयेत्यर्थः ।

मू०—अङ्गाङ्गिभावेन, संशयेन, एकैकलक्षकानुप्रवेशेन च भवन् संकरो न त्रिरूपतामतिवर्तते । क्रमेण यथा–

आक्रम्य स्मरवैरिशेखरसरित्पूरैकसिंहासनं
राजानं नरसिंहपार्थिव तथाऽहंकारभारोद्धुरः ।
त्वत्कीर्तिप्रसरो हसत्ययमसौ शक्रस्य दन्तावलं
व्यालेन्द्रं मुसलायुधं किमपरं देव्याश्च पञ्चाननम् ॥

अत्राहंकारभारोत्सुरस्त्वत्कीर्तिप्रसरो यतस्तत एव हसतीत्यनयोः सजातीययोरङ्गाङ्गिभावेन संकरः ।

व्या०—यदुक्तं 'संकरेण त्रिरूपेण' इति तद्विभजते— अङ्गाङ्गिभावेनेति । आक्रम्येत्यादि । राजानं चन्द्रं नृपं च । 'राजा प्रभौ नृपे चन्द्रे' इति विश्वः । दन्तावलो दन्ती । 'दन्तशिखात्संज्ञायाम्' इति मत्वर्थीयो वलच्-प्रत्ययः । 'वले' इति दीर्घः । व्यालेन्द्रो भुजगेन्द्रः शेष इत्यर्थः । देव्याः चण्डिकायाः पञ्चाननं वाहनसिंहमित्यर्थः । यः किल सिंहासनारूढो राज-विजयी सोऽहंकरोति । अहंकारग्रस्तश्च परान् हसतीति भावः । अत्र का लक्षणा, कथं चाङ्गाङ्गिभावः ? इत्याकाङ्क्षायामाह — अत्राहंकारेति । अहंकारस्य हासहेतुत्वेन तच्छेषतया तदङ्गमित्यर्थः । अहंकारहासप्रसरयो-रचेतनकीर्तिप्रसरेऽसंभवात् अहंकारशब्देन तद्धेतुः कीर्तिगतधावल्यविशेषो लक्ष्यते । हासशब्देन तद्धेतुः सादृश्यं लक्ष्यत इत्यनयोरुक्तरीत्याङ्गाङ्गिभावेन संकर इति भावः ।

मू०—एष चिन्तामणिः किं नु किन्वयं कल्पपादपः ।
किं वासौ कामधेनुर्वा न चेत्त्यागः किमीदृशः ॥

अत्र यद्येष इति विशेष्यं तदा सारोपेयम् । आहोस्विद्विशेषणं तदा साध्यवसानेत्यन्यतरानवधारणात् संदेहेनायं संकरः ॥

राकातारकराजमण्डलमहः पाण्डित्यवैतण्डिकी
कीर्तिस्ते विदधाति यद्यपि जगत्त्रयेतं समन्तादपि ।
चित्रं वीर नृसिंह देव तदपि प्रत्यर्थिनामानना-
न्यालिङ्गन्ति रुचं शिखावलशिखारिञ्छोलितापिञ्छयोः ॥

व्या०—संदेहसंकरमुदाहरति– एष इत्यादि । अत्रापि का लक्षणा कथं च संदेह इत्याकाङ्क्षायामाह– अत्र यद् इति । इह चिन्तामणिरित्यादौ निरतिशयवितरणगुणयोगात् सादृश्यनिमित्ता गौणी लक्षणेति तावदविवादम् । तत्रैष इत्यादिसर्वनाम्नामिदन्ताविशिष्टराजरूपविशेष्यनिष्ठत्वे विषयनिगरणाभावादग्निर्माणवक इतिवत् सारोपा स्यात् । इदन्तामात्रनिष्ठत्वे तु विषयनिगरणादयमग्निरितिवत् साध्यवसाना स्यात् । अत्रान्यतरनिश्चायकाभावेनेयमियं वेत्येकस्मिन् संदेहज्ञानविषयतया संकीर्यमाणत्वात् संदेहसंकर इत्यर्थः ॥

तृतीयमुदाहरति– राकेत्यादि । 'नक्षत्रं तारकं तारकेति चाभिधानात् तारकशब्दस्य नपुंसकप्रयोगः । इह पाण्डित्यशब्देन औचित्याद्धवल्यातिशयो लक्ष्यते तस्य वैतण्डिकी खण्डनेत्यर्थः । स्वपक्षस्थापनाहीना परपक्षखण्डनवती कथा वितण्डा; तां वेदेति वैतण्डिकी । 'तदधीते तद्वेद' इति ठक् । शिखास्यास्तीति शिखावलः; शिखी, केकीत्यर्थः । "दन्तशिखात् संज्ञायाम्" इति वलच् । तस्य शिखा चूडा, सैव रिञ्छोलिः, तापिच्छः, तमालः तयोः रुचमालिङ्गन्ति, मलिनीभवन्तीत्यर्थः ।

मू०—अत्र वैतण्डिकत्वेन कीर्तेरारोपात् सारोपा तावत्पाण्डित्यस्य शुभ्रत्वक्रोडीकारेण प्रवृत्तत्वात् साध्यवसाना च । समासे सत्येकपदवद्भावादिति(ह)सहासनोपवेशिन्योरनयोरेकलक्षणानुप्रवेशेन संकरः ।

व्या०—अत्र सारोपसाध्यवसानलक्षणयोरेकलक्षकानुप्रवेशेन संकरं दर्शयति– **अत्रेति** । तत्र सारोपां दर्शयति– **वैतण्डिकत्वेनेति** । कीर्तिः वैतण्डिकीति विषयनिगरणं विना कीर्तौ वैतण्डिकत्वारोपात् सारोपेयं लक्षणा गौणीत्यर्थः । साध्यवसानां च लक्षयति– **पाण्डित्यस्येति** । शुभ्रत्वस्य विषयभूतस्य क्रोडीकारो गर्भीकारो निगरणमिति यावत् । तेन तत्र पाण्डित्याध्यवसानात् साध्यवसानलक्षणेत्यर्थः । तथापि कथमनयोर्भिन्नपदस्थयोः संकरः ? इत्याशङ्क्याह– **समासे सतीति** । इह 'समर्थः पदविधिः' इति समर्थयोः पदयोः समासः । सामर्थ्यं च द्विविधं– व्यपेक्षालक्षणं एकार्थीभावलक्षणं च । तत्राद्यं वाक्यविषयम् । द्वितीयं च समासगोचरम् । तथाच 'पाण्डित्यवैतण्डिकी' इति समासे पाण्डित्यवैतण्डिकपदयोरेकार्थीभावलक्षणसामर्थ्यात् क्षीरनीरवदेकलोलीभावेनैकपद्ये तत्रैकत्र समासपदे द्वयोः समावेशादेकलक्षकानुप्रवेशलक्षणः संकर इत्यर्थः । नन्वेकपदानुप्रवेशेऽपि समासावयवगतयोः कथमेकलक्षकानुप्रवेशः ? तत्राह– **एकपदवद्भावादिति** । एकलक्षकवद्भावादित्यर्थः । अन्यथा समासस्य मुख्यैकपदत्वे वतिपत्ययानुपपत्तेः । संप्रति तु वस्तुतोभिन्नयोरपि समासपदक्रोडीकारतिरोहितभेदयोरेकलक्षकवद्भावाद्वतिप्रत्ययोपपत्तिः । अत्रानुकूलं दृष्टांतमाह– **सहासनोपवेशिन्योरिति** । यथैकस्मिन्नासने सहोपविष्टयोः प्रदेशभेदेऽपि प्रदेशभेदात् समानदेशत्वव्यपदेशस्तद्वद्भिन्नावयववर्तिन्योरप्यवयवैक्यादेकलक्षकानुप्रवेशव्यपदेशो न विरुद्ध इत्यर्थः ॥

मू०—संसृष्टिर्यथा–

द्विर्भावः पुष्पकेतोर्विबुधविटपिनः पौनरुक्त्यं विकल्प-
श्चिन्तारत्नस्य वीप्सा तपनतनुभुवो वासवस्य द्विरुक्तिः ।
द्वैतं देवस्य दैत्याधिपमथनकलाकेलिकारस्य कुर्व-
न्नानन्दं कोविदानां जगति विजयते भूपतिः श्रीनृसिंहः ॥

इयं सजातीयगौणसारोपाणां संसृष्टिः ।

व्या०—संसृष्टिमुदाहरति— द्विर्भाव इत्यादि । द्विः प्रयोगो द्विर्वचनमिति पक्षे तस्यैव रूपान्तरं द्विर्भावः । एवं पौनरुक्त्यादिशब्दा अपि तत्पर्यायाः । इह मदनमन्दारादिगुणयोगेन द्विर्भावादिशब्दानां विषयनिगरणं विना नृसिंहे प्रयोगात् सादृश्यनिमित्ता गौणसारोपा लक्षणाः सर्वा इति सजातीयसंसृष्टिरित्याचष्टे— इयं सजातीयेति ।

मू०—सजातीयशुद्धसारोपाणां यथा—

आयुर्दानमहोत्सवस्य विनतक्षोणीभृतां मूर्तिमान्
विश्वासो नयनोत्सवो मृगदृशां कीर्तेः प्रकाशः परः ।
आनन्दः कलिकाकृतिः सुमनसां वीरश्रियो जीवितं
धर्मस्यैव महोदयो विजयते वीरः कलिङ्गेश्वरः ॥

एवमन्यासामपि लक्षणानां संकरसंसृष्टी द्रष्टव्ये । सर्वत्र चात्र प्रयोजनं व्यङ्ग्यमेव ।

व्या०—शुद्धसारोपाणां संसृष्टिमुदाहरति— आयुरित्यादि । अत्रायुरादिशब्दानां तद्धेतौ राज्ञि विषयनिगरणं विना सादृश्येतरकार्यकारणभावसम्बन्धनिमित्तप्रवृत्तत्वात् शुद्धसारोपाणां सजातीयानामेव संसृष्टिरिति द्रष्टव्यम् । ननु निष्प्रयोजनलक्षणाभावात् सर्वत्र प्रयोजनं वाच्यमित्यपेक्षायामाह— सर्वत्र चेति । पावनत्वादिज्ञानं प्रयोजनम् ; तच्च व्यञ्जनव्यापारैकसाध्यमिति भावः ।

मू०—ननु सप्रयोजनमेव लक्ष्यकमस्त्विति चेन्न— ज्ञानविषयाद्भिन्नत्वेन फलस्याभ्युपगमात् । विषयो हि नीलादिः । फलं तु प्राकट्यमिष्यते । अतो न विशिष्टे लक्षणा । किं तु लक्षिते तटादौ शैत्यपावनत्वादयो विशेषाः स्फुरन्ति ।

व्या०— तर्हि पावनत्वादिधर्मविशिष्टमेव तटं लक्ष्यताम्; किमन्तर्गडुना व्यञ्जनाख्येन व्यापारान्तरेण कल्पनागौरवकलङ्कितेन? इति शङ्कते— नन्विति। एवकारो भिन्नक्रमः। प्रयोजनं लक्ष्यमेवास्त्वित्यन्वयार्थौ। परिहरति नेति। कुत इत्यत आह— ज्ञानेति। सर्वत्र ज्ञानस्यान्यो विषयः अन्यत् फलमित्यविवादमित्यर्थः। कुत्रेदं दृष्टम्? तत्राह— विषयो हीति। नीलादिः घटादिरित्यर्थः। प्राकट्यं ज्ञातता। सा च ज्ञानजन्या ज्ञानानुमापिका विषयनिष्ठा; यत्प्रसादात् 'ज्ञातो घटः' इति विशिष्टव्यवहारो जायत इति ज्ञाततावादिनः। ततः किम्? अत आह— अत इति। फलस्य विषयातिरेकदर्शनादित्यर्थः। विशिष्ट इति। फलविशिष्ट इत्यर्थः। 'गङ्गायां घोषः' इत्यादौ पावनत्वादिकं न विषयज्ञानगोचरः; फलत्वात्; प्राकट्यवत्। अन्यथा प्राकट्यस्यापि नीलविज्ञानगोचरत्वप्रसङ्गः। प्रयोजनस्यापि लक्ष्यत्वे तत्रापि प्रयोजनान्तरापेक्षायामनवस्था स्यादिति च तर्क इत्यर्थः। कथं तर्हि फलज्ञानम्? अत्र आह— किं त्विति। स्फुरन्ति व्यञ्जनवृत्त्या भासन्ते इत्यर्थः। इति लक्षणा।

मू० **शब्दं व्यञ्जकमाहुर्व्यापारो व्यञ्जनं भवेद्यस्य।**
व्यञ्जनव्यापारवान् शब्दो व्यञ्जकः। अत्र चार्थस्यापि सहकारित्वम्।
वाच्यो लक्ष्यो व्यङ्ग्यस्तेषामर्थो यथाक्रमं वेद्यः ॥१३॥
तेषाम्— वाचकलक्षकव्यञ्जकानाम्।

व्या०—अथ क्रमप्राप्तं व्यञ्जकं लक्षयति— शब्दमिति। व्यञ्जनावृत्त्यार्थबोधकः शब्दो व्यञ्जक इति व्याचष्टे— व्यञ्जनव्यापारवानिति। ननु शब्दार्थव्यतिरेकादर्शनादर्थस्यैव व्यञ्जकत्वमित्याशङ्क्याह— अत्रेति। शब्दशक्तिमूले ध्वनौ शब्दस्यैव प्राधान्यम्, अर्थस्य सहकारित्वमात्रमित्यर्थः। एवं शब्दान् निरूप्यार्थान्निरूपयति— वाच्य इति। ननु प्रकृतस्य व्यञ्जक-

स्यैकवचनोपात्तत्वादन्यस्य चाप्रकृतत्वात् कथं तेषामिति बहुवचनोपपत्तिरित्याशङ्क्य वाचकादीनां त्रयाणामपीह प्रकृतत्वात् वाच्यादिप्रतियोगित्वेन बुद्ध्यारोहाच्च वाचकादिविवक्षया बहुवचनमिति व्याचष्टे– **तेषामिति** ।

सू०—काव्यप्रकाशकारेण पुनरेषामर्थानामपि व्यञ्जकत्वमुक्तम् । यथा–

"वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः ॥
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा" ॥

व्या०—एवं शब्दस्य व्यञ्जकत्वमुक्त्वार्थस्यापि मतान्तरव्याजेनाह– **काव्यप्रकाशकारेणेति** । तदीयं वाक्यमुदाहरति– **वक्रीत्यादि** । वक्ता वक्तृविशेषः । बोद्धव्यो बोधयितव्यः प्रतिपाद्यो जन इत्यर्थः । अन्तर्नीतणिजर्थः प्रायेणायं बुधिधातुः । यथा "एकश्रुतिदूरात् संबुद्धौ" इत्यत्र संबुद्धिशब्दे । काकुः स्वरविकारः । वाक्यं वाक्यविशेषः । वाच्यं वाच्यार्थविशेषः । अन्यसंनिधिर्जनान्तरसंनिकर्षः । प्रस्तावः प्रकरणम् । देशो विविक्तादिः । तथा कालश्च । आदिशब्दादभिनयादिसंग्रहः । एतैः सहकारिभिर्वैशिष्ट्यात् सहकारादर्थस्यापि व्यञ्जकत्वमस्त्येवेत्यर्थः । किं च शब्दशक्तिमूले ध्वनौ अर्थस्येवार्थशक्तिमूलेऽपि शब्दस्य सहकारित्वमित्यपि द्रष्टव्यम् ।

यथा–

तथा गतायां परिहासपूर्वं
सख्यां सखी वेत्रवती बभाषे ।
आर्ये व्रजामोऽन्यत इत्यथैनां
वधूरसूयाकुटिलं ददर्श ॥

इत्यत्रान्यतोगमनप्रश्नकुटिलदर्शनरूपाभ्यामर्थाभ्यां क्रमात् सुनन्दाया इन्दुमती-चित्तज्ञानमिन्दुमत्याश्च तदीयस्वमर्मोद्घाटनाभिप्रायज्ञानं च वक्तृबोद्धव्यकाकु-प्रस्तावे(वैः) व्यज्यते । एवमन्यदप्युदाहार्यम् ।

मू०— व्यङ्ग्यं तु द्वेधा । गूढमगूढं च । तत्राद्यं यथा ।

क्रीडासौधं कलानां शरणगतरिपुक्ष्मापविश्रम्भपात्रं
जायेत त्वां नृसिंह क्षितिप कथयितुं को न कण्डूलजिह्वः ।
स्वान्तःसंतोषगौरीपतिविधुतशिरश्चन्द्रिकाचुम्बितोर्मि-
स्फारस्रःसिन्धुबन्धुः सुरयुवतिगुणैर्गीयते यस्य कीर्तिः ॥

अत्र कण्डूलत्वं स्वार्थतिरस्कारेण स्तवनाभिलाषं लक्षयत् तत्पारवश्ये विश्राम्यति ॥

द्वितीयं यथा ।

भग्नद्वारा लुलितपरिघाश्चूर्णिताट्टाः प्रनष्ट-
स्तम्भा दूरीकृतवलभयः प्रोषितालेख्यलीलाः ।
तास्ताः क्रीडाशिखरिपतनान्मोटिताक्रीडभागा-
स्त्वद्विक्रान्तिं रिपुवसतयः श्रीनृसिंह ब्रुवन्ति ॥

अत्र ब्रुवन्तीति यद्यपि व्यङ्ग्यमस्ति तथापि कविपरम्पराप्रयुज्यमान-तयातिप्रसिद्धत्वाद्वाच्यायमानमित्यगूढम् ॥

इति श्रीमतो महामाहेश्वरस्य कवेर्विद्याधरस्य
कृतावेकावलीनाम्न्यलङ्कारशास्त्रे शब्दार्थनिरूपणं नाम
द्वितीय उन्मेषः

व्या०—ग्रन्थकारस्तु विस्तरभयात् **काव्यप्रकाश** एव प्रपञ्चितमित्युपेक्ष्य व्यङ्ग्यं विभजते— **व्यङ्ग्यं त्विति।** यन्निधिवद्गुप्तं विदग्धैकवेद्यमुद्घाटितं सच्चमत्करोति तद्गूढम्। यद्वाच्यायमानतया बहिष्ठमिव धनं झटिति स्फुरति तदगूढमिति विवेकः— **क्रिडेत्यादि।** विश्रम्भपात्रं विश्वासस्थानमित्यर्थः। स्वःसिन्धुबन्धुः स्वर्नदीकल्पेत्यर्थः। अत्र गूढव्यङ्ग्यं विविनक्ति— **अत्रेति।** तत्पारवश्ये स्तुतिपारवश्ये इत्यर्थः। तेन च कवीनां स्तुत्या राजगोचरारतिर्व्यज्यत इति भावः। अत्र लक्ष्यलक्षकयोस्तुष्णाकण्डूलत्वयोरनवरतजिह्वाव्यापारहेतुत्वसादृश्यनिमित्तत्वान्निर्गीर्णविषयत्वाच्च गौणसाध्यवसानलक्षणेयमित्यवसेयम्॥ भग्नेत्याद्यगूढव्यङ्ग्योदाहरणेऽपि तद्व्यनक्ति- **अत्र ब्रुवन्तीति।** अत्र ब्रूधात्वर्थस्य वचनस्याचेतनासु रिपुवसतिष्वसंभवात् तत्कार्यज्ञापनमात्रं लक्ष्यते; तेन च रिपुसमूलोन्मूलनं व्यज्यमानमपि सकलकविपरम्पराक्षुण्णतया वाच्यप्रायमित्यगूढत्वमस्येत्यर्थः। इयं च स्वार्थ[1]बाधेन वचनस्य परार्थत्वादिति न्यायेन स्वार्थाविनाभूतज्ञापनलक्षणा जहत्स्वार्था। एतेन गूढागूढव्यङ्ग्यतया पूर्वोक्तफलतो लक्षणाभेदानां सप्तानामपि प्रत्येकं द्वैविध्ये चतुर्दशविधत्वामित्यनुसन्धेयम्॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणमहोपाध्यायकोलाचल मल्लिनाथसूरिविरचितायामेकावलीव्याख्यायां तरलाख्यायां शब्दार्थनिरूपणं नाम

द्वितीय उन्मेषः

---

१ स्वार्थत्यागात् 'परार्थं स्वसमर्पणम्' इति न्यायेन- इति पुस्तिकान्तरेषु दृष्टः पाठः युक्तः।

अथ तृतीय उन्मेषः

मू०— अथ ध्वनिभेदा उच्यन्ते।

ध्वनिरविवक्षितवाच्यो भवति द्वेधात्र लक्षणामूलः ।

व्या०—ननु प्रथमोन्मेषे ध्वनिनिरूपणात् तदनन्तरमेव तद्भेदनिरूपणे कर्त्तव्ये किमिति संग्रहे संप्रति क्रियत इत्याशङ्क्य संगमयन्नवतारयति— अथेति। शब्दार्थनिरूपणानन्तरमित्यर्थः। तथा च शब्दार्थशक्तिमूलत्वेन तज्ज्ञा(नस्य ना) नान्तरीयकज्ञानतया तदनन्तरमेव ध्वनिभेदनिरूपणं संगतमिति भावः। तर्हि काव्यशरीरभूतशब्दार्थनिरुपणानन्तरं तद्धर्माणां गुणदोषालंकाराणामवसरस्तत्राह ध्वनिभेदा उच्यन्त इति। सत्यम्। सात्मकस्यैव शरीरस्यालंकार्यत्वादात्मनि ध्वनावपि धर्मिणि साकल्येन ज्ञाते पश्चात्तदुभयधर्मगुणादिजिज्ञासावकाश इति भावः। इह तावद्ध्वनिर्लक्षणामूलोऽभिधामूलश्चेति प्रथमं द्विविधः। तत्राद्यो अविवक्षितवाच्य इत्युच्यते। द्वितीयस्तु विवक्षितान्यपरवाच्य इति। तत्राद्यस्य विभागं लक्षणं चाह— ध्वनिरिति। यो लक्षणामूलो ध्वनिः सोऽविवक्षितवाच्य इत्यर्थः।

मू०—लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सत्यविवक्षितमप्रधानीकृतं वाच्यं यत्र स तथा। येन चाविवक्षितेन सता वाच्येनाविवक्षितवाच्य इति ध्वनिमाचक्षते। तदर्थान्तरसंक्रमितात्यन्ततिरस्कृतत्वाभ्यां द्विधा भवद्वाच्यमविवक्षितवाच्याभिधानध्वनिमपि द्वैविध्ये स्थापयत्यर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति। तत्र योऽर्थ उपपद्यमानोऽप्यनुपयोगाद्बाधितोऽर्थान्तरे परिणमति सोऽर्थान्तरसंक्रमितः; तादृशो वाच्यो यत्र सोऽर्थान्तरसंक्रमित वाच्य उच्यते। व्यञ्जनव्यापार-

सहकारिप्रभावो णिचा द्योत्यते । अयं च पदवाक्यप्रकाश्यत्वेन भवन् न द्वैविध्यं परिहरति । क्रमेण यथा–

श्रीरमणः श्रीरमणः सुधांशुमौलिः सुधांशुमौलिरसौ ।
नरसिंहो नरसिंहः प्रभवति जगतामपि त्रितये ॥

अत्र द्वितीयं श्रीरमणादिपदं तद्गुणमात्रशालित्वेन परिणमत् तद्गुण-साकल्यं व्यनक्ति ।

व्या०—विशेषलक्षणस्य सामान्यलक्षणापेक्षत्वात् तत्पूर्वकं व्याचष्टे–**लक्षणामूलेति** । गूढव्यङ्ग्यप्रधानं ध्वनिरिति ध्वनेः सामान्यलक्षणम् । तत्र गूढेत्यगूढव्यङ्ग्यव्युदासः । प्रधानमिति गुणीभूतव्यङ्ग्यनिरासः । लक्षणामूलो ध्वनिरविवक्षितवाच्यध्वनिरिति विशेषलक्षणम् । लक्षणामूल इति अभिधामूल-ध्वनिव्युदासः । ध्वनिरिति लक्ष्यार्थव्युदासः । संज्ञां व्युत्पादयति–**अविवक्षितमिति** । **तथेति** । तथोक्त इत्यर्थः । द्विधेति विभागवचनभागं विवृणोति । **येनेत्यादि** । भेदद्वयस्य संज्ञाद्वयं निष्कृष्याह– **अर्थान्तर-संक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति** । तत्राद्यं व्युत्पादयति– **तत्र योऽर्थ इति** । **अनुपयोगादिति** । न तु प्रमाणविरोधादित्यर्थः । ननु संक्रमितेत्यत्र प्रयोजको णिजर्थः क इत्यत्राह– **व्यञ्जनेति** । इहार्थान्तरसंक्रमस्य व्यङ्ग्यैकप्रयोजनत्वाद्व्यञ्जनाव्यापार एव तत्प्रयोजको णिजर्थ इत्यर्थः । तं च द्वेधा विभजते– **अयं चेति** । **अत्र द्वितीयमिति** । प्रथमेनैव स्वार्थस्योक्ते-र्द्वितीयं पदमनुपयोगाद्बाधितवाच्यमित्यर्थः । **तद्गुणेति** । तच्छब्दनिष्ठया षष्ठ्या लक्ष्यलक्षकयोः समवायसम्बन्धः सूचितः । परिणमत् संक्रामत् लक्षयदित्यर्थः ।

सू०—एषा ते कथयामि सांप्रतमहं तिष्ठन्त्विमीमन्त्रिणः
सर्वे यत् प्रतिभाति तत् कुरु रुचिं(चिरं) बुद्ध्या विमृश्य स्वयम् ।

इत्युक्तः प्रियया रिपुक्षितिपतिस्त्वत्सैत्रयात्रोत्सवे-
स्तैमित्थं कलयन् नृसिंहनृपते ! तूष्णीमभूदानतः ॥

अत्र कथनादिकमुपदेशरूपतया परिणमदवश्यकर्तव्यतां व्यनक्ति ।

व्या० —वाक्यगतमर्थान्तरसंक्रमितवाच्यमुदाहरति– एषा त इत्यादि । रुचिमिति । रुचिं इच्छाम् । बुद्ध्या विमृश्येति । विमर्शपूर्विकया रुच्या कर्तव्यं न रुचिमात्रेणेत्यर्थः । अत्र कथनादिकमित्यादि । कथनमात्रं परप्रवृत्त्यनुपयोगित्वाद् बाधितं तत्सामान्यविशेषभावसंबन्धेन कथनविशेष-रूपोपदेशलक्षणया परप्रवर्तकं सत् कथितस्यावश्यकर्तव्यतां व्यञ्जयतीत्यर्थः । आदिशब्दाद् बुध्यादिसंग्रहः । बुद्धिमात्रस्य विमर्शानुपयोगात् तद्विशेष-भूतप्रमापकबुद्धिलक्षणया विमर्शस्यानपनोद्यत्वं व्यनक्तीत्याद्यूह्यम् ।

मू० —यः पुनरनुपपद्यमानतयैव बाधितोऽर्थान्तरप्रतिपत्तिं कृत्वा पलायित इव सोत्यन्ततिरस्कृतवाच्यः । असावपि पूर्ववद्द्विविधः । क्रमेण यथा–

जायेत त्वां नृसिंह क्षितिप कवयितुं को न कण्डूलजिह्वः ।
अत्र कण्डूलत्वं स्वार्थतिरस्कारेण स्तवनाभिलाषं लक्षयत् तत्पारवश्ये विश्राम्यति ।

व्या० —अत्यन्ततिरस्कृतवाच्यं व्युत्पादयति– यः पुनरित्यादि । पूर्ववदिति । पदवाक्यप्रकाशकत्वेनेत्यर्थः । जायेतेत्यादि व्याख्यातं प्राक् ।

मू० —बाणैः पञ्जरिता गजाः कति कति क्षुण्णा रथा मुद्गरै-
र्जीवग्राहमरातयः कति हयैः सार्धं गृहीतास्त्वया ।

मुक्ताः प्राञ्जलयः कतीति निभृतामर्षस्मिताः स्वप्रियान्
संग्रामापसृतान् नृसिंहनृपते पृच्छन्ति वैरिस्त्रियाः ॥

अत्र नरसिंहनरेश्वरात् समरभुवि परिभुवि परिभवं प्राप्य निवृत्तवतः परिपन्थिनः पार्थिवान् प्रति प्रथमप्रार्थिताभिक्रमनिवर्तनस्यावरोधजनस्येयमुक्तिः ।

व्या०— वाक्यगतमुदाहरति— बाणैरित्यादि । पञ्जरिताः पञ्जरीकृताः । जीवान् प्राणतो गृहीत्वा जीवग्राहं जीविताः । 'समूलाकृतजीवेषु हन् कृञ्ग्रहः' इति णमुल्प्रत्ययः । कषादित्वादनुप्रयोगश्च । अमर्षप्रयुक्तं स्मितममर्षस्मितम् । न तु संतोषप्रयुक्तमित्यर्थः । तन्निभृतं स्थिरं यासां ताः तथोक्ताः । अत्र पलायितागतान् पार्थिवान् प्रति परगजपञ्जरीकरणादिप्रश्नवाक्येनात्यन्तस्वार्थबाधात् तद्विरुद्धनिजगजाद्यपच्छेदलक्षणायाः स्वोपदेशावधीरणफलमनुभूतमिति मर्मोद्घाटनं व्यज्यते । तदेतदभिव्यंक्तुं विषयं विविनक्ति— **अत्र नरसिंहेति** । अभिक्रमः अभियानं । ततो निवर्तनं निवृत्तिः । प्रथममेव प्रार्थितं येन तस्येत्यर्थः ।

मू०—अभिधामूलोऽपि तथा विवक्षितान्यपरवाच्य इत्युक्तः । विवक्षितमन्यपरं व्यङ्ग्यनिष्ठं वाच्यं यत्र स विवक्षितान्यपरवाच्यो ध्वनिः । तथेति ग्रहणादयमपि द्विधा— असंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति । क्रमस्यासंलक्ष्यत्वे तु न विप्रतिपत्तिः । न खलु विभावानुभाव व्यभिचारिण एव रसः; अपि तु तेभ्यः एव रस इति सतोऽपि क्रमस्योत्पलदलशतव्यतिभेदवद्विभावादिप्रतीतावाशुभावित्वेनासंलक्ष्यमाणत्वादसंलक्ष्यक्रमव्यङ्ग्य इत्यन्वर्थतामप्यसावा-

श्रयति । अस्य रस-भाव-रसाभास-भावाभास-भावशान्ति-भावोदय-भावसंधि-भावशबलत्वरूपतयाऽष्ट प्रकाराः । तेष्वेकोऽपि यत्र प्राधान्यमवलम्बते तत्रालंकार्य एव । यत्र पुनरप्राधान्यं तत्र रसवदादिरलंकारः ।

व्या०— तदेवं लक्षणामूलाविवक्षितवाच्यध्वनिं चतुर्विधं चाभिधायाधुनाभिधामूलविवक्षितान्यपरवाच्यध्वनिं प्रपञ्चयितुं तत्सामान्यलक्षणं तावदाह— **अभिधामूलोऽपीति** । योऽभिधामूलो ध्वनिः स विवक्षितान्यपरवाच्य इत्यर्थः । संज्ञां व्युत्पादयति— **विवक्षितमिति** । लक्षणामूलवद्बाधाभावाद्विवक्षितत्वम् । व्यङ्ग्योपसर्जनत्वं व्यङ्ग्यनिष्ठत्वम् । तथाशब्दार्थमाह— **तथेति ग्रहणादिति** । नन्वसंलक्ष्यक्रमेत्यसङ्गतम् । क्रमः सन्नेव न संलक्ष्यते नास्त्येव वेति संदेहादित्याह— **क्रमस्यासंलक्ष्यत्वे तु न विप्रतिपत्तिरिति** । कुत इत्याशङ्क्य किमिह रसस्य विभावादेरभेदात् क्रमाभावो भेदेऽपि क्रमावेदकप्रमाणाभावाद्वेति द्विधा विकल्प्याद्यं निराचष्टे—**न खल्विति** । विभावादिरेव रस इति न कस्यापि दर्शनमित्यर्थः । तथाहि— विभावैरुत्पादितोऽनुभावैः प्रत्यायितः संचारिभिरुपचितो रामादिगतो रसः । तदभेदभावनया नटेऽप्रतीयत इत्युत्पत्तिवादिनो भट्टलोल्लटादयः । रामाद्यभेदभावितेन(भाविते) नटे तत्प्रकाशितैरेव विभावादिभिरनुमितः स्थायी सामाजिकैश्चर्व्यमाणो रस इत्यनुमितिवादी श्रीशङ्कुकः । काव्यनाटकशब्दव्यापारसहकृतेन साधारणीकृतेन विभावादिकेन भावकव्यापारेण नटादिगतत्वपरिहारेण साधारणतयाऽनुसंधीयमानः स्थायी सत्वोद्रेकप्रकाशानन्दसंविन्मयेन भोगापरनाम्ना भावनाख्यव्यापारेण भुज्यत इति भुक्तिवादी भट्टनायकः । लोकप्रसिद्धैः कार्यकारणसहकारिभिरेव काव्ये गुणालङ्कारमहिम्ना, नाटके चतुर्विधाभिनयमहिम्ना चालौकिकविभावादिशब्दव्यपदेश्यैः साधारण्येनानुसन्धीयमानैः स्वगत

एव सामाजिकानां स्वानुभवजनितवासनात्मकतया स्थितो रत्यादिकः स्थायी विभावादिभिरास्वाद्यतां गमितश्चिदात्मानन्दमयो रसो व्यज्यत इति व्यक्तिवादिनोऽभिनवगुप्तादयः ।

द्वितीयं परिहरति— अपितिति । उक्तरीत्या दर्शनचतुष्टयेऽपि तेभ्यो रस उत्पद्यतेऽनुमीयते, भुज्यते, व्यज्यते वा न तु त एव रस इति भेदः सर्ववादिसंप्रतिपन्नः । अन्यथोत्पाद्योत्पादकभावाद्यभिधानायोगात् । स च पूर्वापरी भाव नियत इति क्रमसिद्धेस्तदावेदकप्रमाणाभाव-विकल्पो गर्भस्रावेण गत इति भावः । तत्तद्दर्शनोचितक्रियाध्याहार-सिद्धये क्रियापदस्याप्रयोगः । तर्हि किमिति न संलक्ष्यतेऽसौ तत्राह— इति सतोऽपीति । इति प्रमाणत्वत्त्वाद्धेतोरित्यर्थः । अथैनं विभजते— अस्येति । नन्वेषां रसवदाद्यलंकारत्वं वक्ष्यते । ध्वनि-त्वेऽलङ्कार्यत्वं चेति विरोध इत्याशङ्क्याह— यत्रेति । अन्यथात्वन्यथा-त्वमित्याह— यत्र पुनरिति । प्राधान्याप्राधान्याभ्यामुभयं व्यवस्थाप्य-मित्यर्थः ।

मू०—तत्र रसस्वरूपमेव प्रथमं निरूप्यते— विभावैर्ललना-दिभिरालम्बनकारणैरङ्कुरितः, सितकरकोकिलालापमलयानिलकेलि-काननादिभिरुद्दीपनकारणैः कन्दलितोऽनुभावैर्नयनान्तावलोकस्मितभुज-वल्लीवेल्लनादिभिः प्रतीतिपद्धतिमध्यारोपितो, व्यभिचारिभिश्चिन्ता-दिभिः पल्लवितः, कदाचिदपि नानुभूतोऽभिधया, न कर्णातिथी कृतस्तात्पर्येण, न लक्षीकृतो लक्षणया, न स्वविषयं प्रापितः प्रत्यक्षेण, नात्मनः सीमानमानीतोऽनुमानेन, अपरिशीलितसरणिः स्मरणेन, नाक्रान्तः कार्यतया, न ज्ञातो ज्ञाप्यतया- विगलित-

वेद्यान्तरत्वेन परिमितावनधीती, ध्वननाभिधानाभिनवव्यापारपरिरम्भ-निर्भरतयानुकार्यानुकर्तृगतत्वपरिहारेण सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको भाव एव विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः चर्व्यमाणतैकप्राणः समुल्लसन् ब्रह्मास्वाद सब्रह्मचारी लोकोत्तरचमत्कारकारी शृङ्गारादिको रसोभिधीयते ।

व्या०—तर्हि कोऽयं रस इति जिज्ञासायामाह— **तत्रेति** । इह रसस्योत्पत्त्यनुमितिभुक्ति(व्यक्ति)पक्षाश्चत्वार इत्युक्तमस्माभिः । तत्र व्यक्तिपक्षं सिद्धान्तयन्नाह— **विभावैरित्यादिना रसोऽभिधीयते** इत्यन्तेन । आलम्बनकारणैः समवायिकारणैरित्यर्थः । अङ्कुरितः प्रादुर्भावितः । कन्दलितः प्रवर्धितः । पल्लवितः परां काष्ठां प्रापितः । अनुभावानां च रसकार्यतया तत्प्रत्यायनद्वारा पोषकत्वमभिप्रेत्योक्तं प्रतीतिपद्धतिमारोपित इति । एतेन विभावादिभिः स्वपरोदासीनसम्बन्धपरिहारेण साधारणतयानुसंधीयमानः सामाजिकानां मनस्यभिव्यक्त इत्युक्तमित्यनुसंधेयम् । तस्य व्यङ्ग्यत्वसिद्धये व्यापारान्तरविषयत्वं विशेषणमुखेन निराचष्टे— **कदापीत्यादिना** । नानुभूत इत्यादौ सर्वत्र तद्विषयीकृत इत्यर्थो द्रष्टव्यः । तृतीयान्ताश्च ताः सर्वाः कर्त्रर्था द्रष्टव्याः । विभावाद्यन्वयव्यतिरेकानुविधानात् कार्यो रस इत्याशङ्क्याह— **नाक्रान्तः कार्यतयेति** । कार्यत्वे घटादिवत् विभावादिनिमित्तनाशेऽपि रसानुवृत्तिप्रसङ्ग इति भावः । न चास्यालौकिकस्य स्वप्रकाशानन्दात्मकस्य लौकिकप्रमाणगम्यत्वमित्याह— **न ज्ञात इति** । तस्य निरतिशयानन्दात्मकत्वं सूचयति— **विगलितेति** । विगलितानि वेद्यान्तराणि यस्मिन् तस्य भावस्तत्त्वं

तेनोपलक्षितः । निरतिशयानन्दात्मकतया विजातीयविषयस्फुरणपरिहारेण स्वयमेवाद्वितीयभावेनाभासमान इत्यर्थः । तस्य ब्रह्मस्वरूपाभेदं सूचयति —**परिमिताविति**। अनधीति अपरिचिती, अपरिमित इति यावत् । अधीतमनेनाधीति । 'इष्टादिभ्यः' इतीनिप्रत्ययः । क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इति सप्तमी । ननु प्रत्यक्षादि-प्रमाणाविषयत्वे कथमस्यावभास इत्यत आह— **ध्वननेति** । ध्वनना-भिधानो व्यञ्जनाख्यो योऽभिनवोऽपूर्वो व्यापारस्तस्य परिरम्भो विषय-भावस्तस्य निर्भरतया दार्ढ्येनाव्यभिचारेणेत्यर्थः । समुल्लसन्निति व्यव-हितेनान्वयः । अलौकिकेन व्यञ्जनाव्यापारेण प्रतीयमान इत्यर्थः । भट्टलोल्लटादिमतं निरस्यति— **अनुकार्यानुकर्तृगतत्वपरिहारेणेति** । अनुकार्यस्य रामादेरतीतत्वात् , अनुकर्तुर्नटस्याभिनवसभारञ्जनधनार्जनाद्य-भिनिविष्टमनस्कतया रसास्वादासंभवात् । संभवे वा तस्यापि सामा-जिकत्वमेवेति भावः । तर्हि किमाश्रयोऽसावत आह— **सामाजिकाना-मिति** । किं तेषूत्पद्यते ? नेत्याह **वासनात्मतयेति** । तेषां स्वयं रत्याद्यनुभवेन या वासना संस्कारः तदात्मकतया स्थित इत्यर्थः । स्थायी रत्यादिको भाव एव शृङ्गारादिको रसोऽभिधीयत इत्यन्वयः । स्थाय्येव विभावादिभिः स्वादुतामानीतो रस इत्युच्यत इत्यन्वयः । तर्हि विभावादीनां रसव्यतिरिक्तत्वे पृथगवभासः किमिति नास्तीत्यत आह— **पानकरसन्यायेनेति** । यथा पानकरसास्वादेन नानारसोऽपि न पृथग् विभाव्यते किं तु सर्वोऽपि पानकरस इत्येव गृह्यते तद्वदत्रापि सर्वोऽपि रस इत्येवाभिमन्यत इत्यर्थः । तस्यालौकिक-त्वमाह— चर्व्यमाणतैकप्राण इति । अनुभवैकजीवित इत्यर्थः ।

ननु सर्वं सुखमीदृगेव, ज्ञातैकरसत्वात् , एतावता कथम-लौकिकत्वमित्याशङ्कयाह— **ब्रह्मास्वादसब्रह्मचारीति** । ब्रह्मास्वादकल्प

इत्यर्थः । यथा योगिनां नित्य सिद्धोऽपि ब्रह्मानन्दो धारावाहिनि ध्यानसन्ताने स्वयं प्रकाशते, न प्रागूर्ध्वं च तथा रसोऽपि नित्य-सिद्धात्मनन्दसन्दोहात्मा काव्यार्थानुसन्धानचतुरचेतसां व्यञ्जनाव्यापारसह-कृतान्तःकरणवृत्तिनिरस्तावरणतया विगलितवेद्यान्तरः स्वयमेव भासते । न चैवं लौकिकं सुखमिति कथं नालौकिकभावः ? किं च ब्रह्मानन्द एवायमन्यत्र योगगम्यः । अत्र तु विभावाद्यनुसंधानगम्य इतीयान् भेदः । किं च लोकोत्तरचमत्कारकारितया सकलसहृदय-हृदय संवेदनसाक्षिकेयं रसप्रतीतिः न केनापि दुरपह्नवेत्यभिप्रायेणाह **लोकोत्तर चमत्कारीति** ।

मू० अयं च स्वप्नेऽपि परिहरति वाच्यताम् । तथाहि वाच्यो भवन्नयं स्वशब्देनोच्यतां शृङ्गारादिशब्देन वा ? इदमुभयमपि न संभवास्पदम् । रसादिशब्दाप्रयोगेपि विभावा-दिप्रतिपादनद्वारैव तस्य प्रतीतिपथपथिकत्वात् । रसादिशब्द-प्रयोगेऽपि विभावाद्यप्रयोगे तस्य प्रतीतिपथानधिरोहाचेत्यन्वयव्यति-रेकाभ्यां विभावाद्यभिधानद्वारैव प्रतीतिपद्धतिमध्यास्त इति प्रतीय-मानतामेवार्हति ।

व्या—अत्र यदुक्तं अभिधातात्पर्यादिविषयत्वं रसस्य नास्तीति तदेकैकमेवोपपादयन्ननभिधेयत्वं तावदुपपादयति— **अयं चेति** । स्व वाचकः शब्दः स्वशब्दः, रसशब्दः, शृङ्गारादिशब्दस्तद्विशेषवाचकः । तेन सामान्यशब्देन विशेषशब्देन वेत्यर्थः । काव्यार्थानुसन्धानवतां तावदन्तरेणापि[1] रसप्रतीतेः तद्विरहिणां तु सहस्रशः तच्छब्दाभ्यासेऽपि रसाप्रतीतेः न तज्जन्येयं रस प्रतीतिरिति परिहरति **इदमुभयमपीति** ।

१ 'तदन्तरेणापि' इति युक्तः पाठः । रसादिशब्दं विनापीत्यर्थः ।

यद्यपि घटादिशब्दैस्तदर्थवद्रस शृङ्गारादिशब्दैरपि संगतिग्रहणशालिनां परोक्षा रसप्रतीति रस्त्येव, किं तु काव्यार्थानुसंधानसमनन्तरभाविनी ब्रह्मानन्दसहोदरी येयमानन्दप्रकाशरूपा प्रतीतिस्तस्या एवायमभिधा-तात्पर्यादिविषयतानिषेध इत्यविरोधः ।

मू०—उत यदि तात्पर्यगोचरतामवतरति रस इति भवन्मनसि निविशते तदपि न विचार चारु । रसस्याभिधेयत्वानधिकरण-त्वात्; अभिहिते च तात्पर्यस्य प्रगल्भनात् । विधेयानुवाद्य-समभिव्याहारेण विधेयार्थमनुवाद्यमुपादीयते । अप्राप्तं तु विधेयम् । यथा— 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यत्र ऋत्विक्प्रचरणे प्रमाणान्तरतः प्राप्ते लोहितोष्णीषत्वमप्राप्तं विधेयम् । एवमन्यत्रापि यावदप्राप्तमभिहितं च तावति शब्दस्यार्थे तात्पर्यं नाम व्यापारः प्रगल्भते । न पुनः प्रतीतिमात्रे । यदि प्रतीतिमात्रेऽपि तात्पर्यं प्रभविष्णु-तामासादयति तदा 'पूर्वो धावति' इत्यादावपराद्यर्थेऽपि तात्पर्यं पर्यवस्येत् । अपरोऽपि धावतु वा न वा; न तत्र तात्पर्यम् ।

अथ यदि लक्षणीयो रसः, तदपि न क्षोदक्षमम् । मुख्यार्थबाधादिरहितैरेव विभावादिभिरस्याभिव्यज्यमानत्वात् ।

व्या०—तात्पर्यव्यापारविषयत्वं निरस्यति— **उत यदीति** । कुत इत्यत आह— **रसस्येति** । अनुपदमेवानभिधेयत्वस्योक्तत्वादिति भावः । ततः किमित्याशङ्क्य तात्पर्यविषयं सोदाहरणमाह —**विधेये-**

त्यादि । विधेयार्थमिति । 'भूतं भव्यायोपदिश्यते' इति न्यायादिति भावः । उक्तमन्यत्राप्यतिदिशति– एवमन्यत्रापीति । यथा 'दध्ना जुहोति' इत्यत्र दध्नः करणत्वमात्रं, 'रक्तं पटं वय' इत्यत्र द्रव्यगुणक्रियामाणामेकं, द्वयं,त्रयं वा यावदप्राप्तमदग्धदहन-न्यायेन तावन्मात्रविधौ तात्पर्यमित्यर्थः । रसस्तु व्यञ्जितो न त्वभिहित इति न तात्पर्यगोचर- इत्याशयेनाह– न पुनः प्रतीति-मात्र इति । विपक्षे बाधकमाह– यदि प्रतीतिमात्रेऽपीति । इष्टापत्तिं परिहरति– अपरोपीति । लक्ष्यत्वं निराचष्टे– अथेत्यादि ।

मू०—प्रत्यक्षप्रमाणग्राह्यो रस इति चेत्– तर्हि प्रत्यक्षेण गृह्यमाणो रसः किं निर्विकल्पेन गृह्यते सविकल्पेन वा ? न तावन्निर्विकल्पकज्ञानगोचरः । विभावाद्यनुसन्धानेनैवास्य सत्ता-साधनसमर्थत्वात् । अशेषविशेषणरहितवस्तुमात्रपरिच्छेदरूपं हि निर्विकल्पकम् । तर्हि सविकल्पकज्ञानविषय इति चेन्न । निर्विकल्पकस्यानन्तरमुपजायमानत्वात्सविकल्पकस्य । यदि च कारणाभावेऽपि कार्यस्य जन्म तदा कारणानुसन्धानप्रयासः क्वचिदपि नानुभूयेत ।

व्या—तर्ह्यपरोक्षावभासित्वात् प्रत्यक्षो रस इति शङ्कते– प्रत्यक्षेति । तदपि विकल्प्य दूषयतिः– तर्हीति विभावाद्यनु-सन्धानेनैवेति । विशिष्टार्थानुसन्धानलब्धस्वरूपस्य विशिष्टानन्दात्मनो रसस्य स्वरूपमात्रावगाहिनिर्विकल्पकविषयत्वायोगादित्यर्थः । द्वितीयमा-शङ्कते– तर्हीति । यत्र निर्विकल्पकं नास्ति न तत्र तत्कार्यस्य

सन्निकर्षस्योत्थानमिति कुतस्तद्विषयत्वप्रत्याशेत्याह— नेत्यादि । कारणं विनापि कार्योत्पादे, लोके कुलालादीनां कारणकलापसम्पादन-प्रवृत्तिर्नस्यादिति तर्कमाह— यदि चेति । अपरोक्षावभासित्वं तु रसस्य लोकोत्तरानन्दानुभूतिस्वभावस्य नित्यापरोक्षचिदानन्दब्रह्मस्वरूपा-भिन्नस्यालौकिकव्यञ्जनापास्तसमस्तावरणस्य स्वयंप्रकाशतानिबन्धनमित्यनुसंधेयम् ।

मू०— ननु सीतादिसंयोगवियोगजनितसुखदुःखवशंवद-रामादिभावनटनपटुनटप्रकटिततद्भावविलोकनाविर्भूततत्तत्स्वगतभावा-नुचिन्तनानुमितया तया रामादिस्थयात्मानं सामाजिकः सुखाकरोति दुःखाकरोति वेत्यनुमेयोऽस्तु रस इति चेत्— तदपि न । लोकप्रसिद्धव्याप्तताप्रयोजकीभूतकारणत्वादि-परिहारेण स्थायिनं प्रति विभावादीनां प्रत्यायकत्वमात्रेण लिङ्गत्वासिद्धेः रसंप्रति विभावादेः कारणत्वादि निवर्तमानं स्वव्याप्तां लिङ्गतामादायैव निवर्तते । लोके तु कारणकार्यसहकारीण्ये-वाभिधीयन्ते न विभावानुभावव्यभिचारिणः ।

व्या०—अनुमेयत्वपक्षमाशङ्कते— ननु सीतादीत्यादि । सुखदुःखवशंवदः— तत्परवश इत्यर्थः । "प्रियवशे वदः खच्" इति खचि मुमागमः । आविर्भूतं यदनुभूतं तत्तत्स्वगतभावानुचिन्तनं पूर्वं स्वयमनुभूतनानाभावस्मरणं तदनुमितया, तद्दृष्टान्तेनानुमितयेत्यर्थः । 'सुखाकरोति' दुःखाकरोति च, सुखं दुःखं चानुभावयतीत्यर्थः । 'सुखप्रियादानुलोम्ये' 'दुःखात् प्रातिलोम्ये' इति च डाच्प्रत्ययः । रामः पराकाष्ठागतसुखदुःखपरवशो भवितुमर्हति, तादृग्विभावादिकारण-योगित्वात्, य एवं स एवम्, यथाहम्, इति रामस्य रसवत्ता-

मनुयाय तेनानुमीयमानेनापि लोकोत्तरस्वादुस्वभावतया स्वाद्यमानेन सामाजिकः स्वयं सुखायते इत्यनुमेयवादी मन्यते । अथमं पक्षं पराचष्टे — **तदपि नेति** । कुत इत्याशङ्क्य किं विभावादीनां कार्यकारणादिरूपेण लिङ्गत्वमुत विभावादिरूपेणेति द्वेधा विकल्प्याद्यं दूषयति— **लोक प्रसिद्धेति** । प्रत्यायकत्वमात्रेण व्यञ्जकत्वमात्रेणव्यञ्जकावमात्रेणेत्यर्थः । मात्रशब्दः कारणत्वव्यावृत्त्यर्थः । तथाहि— 'कार्यं कारणसंयोगि समवायिविरोधि वा' इति शास्त्रे कार्यादीनां लिङ्गत्वमुक्तम् । यथा धूमाद्धूमध्वजानुमानं, नभस्वद्रुमनान्नभोनभस्वत्संगमानुमानमित्यादि । विभावादीनां तु व्यञ्जकत्वाभिमतानां लोकप्रसिद्धकारणत्वादि व्यावृत्त्या तद्व्याप्यलिङ्गत्वादिव्यावृत्तेर्न रसानुमापकत्वमित्यर्थः । द्वितीयं दूषयति— **लोकेत्विति** । लोके विभावादीनामप्रसिद्धत्वान्न तद्रूपेण लिङ्गत्वम्; असिद्धिप्रसङ्गादित्यर्थः । एतेन शास्त्रे कार्यादिग्रहणमुपलक्षणत् अन्वयव्यतिरेकावेव व्याप्तेः प्रयोजकौ । तेनाकारणत्वेऽप्यन्वयव्यतिरेकाभ्यामेवैषां रसलिङ्गत्वमित्यपि निरस्तम् । लोकतोऽप्रसिद्धानामन्वयव्यतिरेकयोरपि दुर्ग्रहत्वादिति । किं चातिसुन्दरस्यापि वस्तुनोऽन्यगतस्यानुमीयमानस्यात्यन्तपरोक्षत्वादास्वादनापरोक्षावभासित्वलोकोत्तरचमत्कारकारित्वादिकल्पनापि साहसमेवेति प्रामाणिकानां परिहरणीय एवायमनुमेयपक्ष इति तात्पर्यम् ।

मू०—स्मरणगोचरत्वमपि रसस्य कथमस्तु ? वस्तुविषयस्तावदात्मन्यनुभवपूर्व(दात्मन्यनुभवः पूर्व) पूर्वमिन्द्रियसंनिकर्षादिना जन्यते । जनितेन संस्कार आधीयते । आहितेन च तेन कालान्तरे स्मृतिरुत्पद्यते । संस्काराधानद्वारा स्मृतिं प्रत्यनुभवस्य कारणत्वम् । अनुभवस्तु वस्तुतो रसे नास्ति । विभावादिगतस्य रसगतत्वेनोपचर्यमाणत्वात् । किं च रसस्यानु-

भूयमानत्वाभ्युपगमे व्यङ्ग्यत्वविरोधः । तस्मादनुभवाभावे स्मृतेरप्यभाव इति स्मृतिविषयो न रसः; किं तु व्यङ्ग्य एव ।

व्या०—स्मृतिपक्षं प्रतिक्षिपति । स्मरणेति । कथमस्तु न कथंचिदप्यस्त्वित्यर्थः । कुत इत्याशङ्क्य अनुभवाभावादिति प्रक्रिया-पूर्वकमाह । वस्त्वित्यादि । इंद्रियसंनिकर्षादीत्यादिशब्देन शब्द-लिङ्गादिसंग्रहः । अस्त्वनुभवसम्भवात् स्मृतिः रसोप्यनुभूयत इति स्मृतिगोचरीभविष्यतीति आशङ्क्याह:— अनुभवस्त्विति । तथा व्यपदेशस्त्वौपचारिक इत्याह:— विभावादिगतस्येति । मुख्यत्वेऽनिष्टमाह किञ्चेति । समीचीनोऽसमीचीनो वा इन्द्रियलिङ्गादिसमुत्थः प्रत्ययोऽनु-भावः । तत्संस्कारमात्रसमुत्थस्तु स्मृतिः । तदुभयविलक्षणं तु व्यञ्जनमिति भावः ।

सू०—यत् पुनरिहाकार्यत्वमुक्तं रसस्य तन्नटगतविभा-वाद्यनुत्पाद्यत्वमभिसन्धाय । यदपि रसस्याज्ञाप्यत्वाभिधानं तदपि रामस्य रतेरतीतत्वात् सन्निहितदेशवर्तमानकालेन्द्रियसन्निकर्षाद्य-ज्ञाप्यत्वाभिप्रायेण ॥

व्या०—यत् प्राक् प्रतिज्ञातं नाक्रान्तः कार्यतयेति तद् विवृणोति । यत् पुनरिति । विभावैरुत्पादितोऽनुभावैर्ज्ञापितः सञ्चारिभिरुपचितो रामादिगतः स्थायी ताद्रूप्यभावनया नटे प्रतीयत इति केचित् । तन्निषेधाभिप्रायं तदित्यर्थः । नटगतविभावादीति । कारणविशेषाभिधानं तु परेषां प्रक्रियाभिधानमात्रपरं न त्वन्योत्पाद्यत्वा

भ्यनुज्ञानपरमुत्पत्तेरेवानङ्गीकारात् । तदङ्गीकारे घटादिवन्निमित्तनिवृत्तावपि रसानुवृत्तिप्रसङ्गः कार्यद्रव्ये तथा नियमादित्युक्तम् । रस उत्पद्यत इति प्रायिकव्यपदेशस्त्वास्वादनाधर्मस्यास्वाद्येऽप्युपचारात् ।

अत एव चर्वणा निष्पत्त्या तस्य निष्पत्तिरुपचर्यत इति काव्यप्रकाशकारः । ननु रसस्य विभावादिव्यङ्ग्यत्वं नाम तज्ज्ञाप्यत्वमेवेति कथमज्ञाप्यत्वं प्रतिज्ञातं प्रागित्याशङ्क्य तदपि विवृणोति । यदपीति । तदप्यलौकिकत्वाद्रसस्य लौकिकप्रत्यक्षादिज्ञाप्यत्वप्रतिषेधाभिप्रायं न तु ज्ञाप्यत्वमात्रनिषेधपरं तेनालौकिकव्यञ्जनगम्यत्वाविरोधः । आदिशब्दाच्छब्दलिङ्गादि संग्रहः । रामस्य रतेरतीतत्वादिति । अनैन्द्रियकत्वमात्रे दृष्टान्तार्थमुक्तम् । अतीतरतिवद्वर्त्तमानापि नेन्द्रियादिज्ञाप्येति व्याख्येयम् । अन्यथा यथाश्रुतार्थस्वीकारे वर्तमानस्येन्द्रियादिज्ञाप्यत्वाभ्यनुज्ञाने पूर्वोत्तरसकलसन्दर्भविरोधोऽस्तीतरतेः शब्दलिङ्गज्ञाप्यत्वबाधश्च । तस्माद्रसस्याज्ञाप्यत्वाभिधानं लौकिकप्रमाणमात्राभिप्रायमित्येव व्याख्यानमुचितम् । एवं विभावादे रसस्य च अलौकिक एवायं हेतुहेतुमद्भावः सिद्ध इति ॥

मू०—अतः कारकत्वज्ञापकत्वव्यावृत्तो विभावादिश्चर्वणोपयोगित्वमात्रेण हेतुरलौकिको भवन्नलौकिकत्वमेव रसस्याभिव्यनक्ति । यदुक्तम् । :–

'यो लौकिकोऽप्यतिजनः कारकसिद्धोऽप्यकार्यभूतश्च ।
सविकल्पोऽप्यविकल्पः रसः केनोपमीयेत' ॥

व्या०—फलितमाह अत इति । उक्तरीत्या रसस्याकार्यत्वादज्ञाप्यत्वाच्चेत्यर्थः । उत्पत्तिज्ञप्त्योरहेतोर्विभावादेः कुत्र हेतुत्वं तत्राह । चर्वणेति । मात्रशब्दः कारकत्वज्ञापकत्वव्यावृत्त्यर्थः । विभावादिगतव्यञ्जनव्यापारारव्यालौकिकमहासहृयलब्धबलान्तःकरणवृत्तिविशेष निरस्तसमस्तावरणस्यात्मानन्दसागरस्यैव रसव्यपदेशस्य लोकोत्तरचमत्कारिणः सकललौकिकप्रमाणनिरपेक्षः स्वयंप्रकाशात्मा विगलितवेद्यान्तरस्फुरणविशेषश्चर्वणं स्वादनमिति चाख्यायते । उक्तरीत्या तन्मात्रोपयोगाद्धेतुत्वम् । एतदैवेषां व्यञ्जकत्वं व्यङ्ग्यत्वं च रसस्येति सर्वमलौकिकमेवेत्यर्थः । अलौकिकत्वे सम्मतिमाह । य इत्यादि । लोकविदितत्वाल्लौकिकः । 'तत्रविदितः' इत्यस्मिन्नर्थे लोकसर्वलोकाभ्यां ठञ् । लोकोत्तरसहृदयैकसंवेद्यत्वात् अलौकिकश्चेत्याह— अतिजन इति । विभावादिशब्दव्यपदेश्य कारणसाध्यत्वात् कारकसिद्धस्तैरपि व्यज्यते न तूत्पाद्यते- इत्यकार्यभूतश्च विभावादिविशेषणविशिष्टरूपत्वात् सविकल्पः । तथापि स्वसंवेदनत्वादविल्पो विकल्पाविषयश्चेत्यप्रतिमोऽयमित्यर्थः ।।छ।।

मू०— ननु-

'तत् प्रेक्ष्यं पश्यतां श्राव्यं सम्यग् भावयतां हृदि ।
अलौकिकसुखास्वादो रस इत्यभिधीयते' ।।

ततश्च करुणादीनां दुःखरूपत्वात् कथङ्कारमुपपद्यते रसत्वमितिचेन्न । विगलितवेद्यान्तरत्वमानन्दस्य रूपम् । तद्यदि विभावानुभावव्यभिचारियथोचितोपनिबन्धमहिम्ना काव्यश्रवणसमय-

मेव समुल्लसति तर्हि करुणादावपि कुतस्त्यं दुःख-संवेदतम् ॥

व्या०—करुणादीनां दुःखात्मकानां आनन्दैकरसत्वं कथमिति शङ्कते । नन्विति । कथङ्कारं कथमित्यर्थः । 'अन्यथैवं कथमित्यंसु सिद्धाप्रयोगश्चेत्' इत्यनर्थकादेव करोतेः कथं पूर्वाण्णमूल् प्रत्ययः । परिहरति । नेति । कुत इत्यत आह । विगलितेति । काव्यनिबद्धविभावादिव्यञ्जकमहिम्ना लोकोत्तरेण भावक-व्यापारेण सर्वोऽपि स्थायी तदानीमानन्दात्मकतयैव समुल्लसति । अन्यथा कथं सामाजिकानां करुणाद्यभिनयेऽपि महान्तमानन्दमन्वभूवमिति पश्चादानन्दात्मकताप्रतिसन्धानं भूयोऽपि तत्र प्रवृत्तिश्चेति भावः ॥

मू०—स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः ।
विकासविस्तरक्षोभविक्षेपैः स चतुर्विधः ॥

विकासः कुसुमस्येव पादपस्येव विस्तरः ।
क्षोभोब्धेरिव विक्षेपो मारुतस्येव चेतसः ॥

तत्र विकासोपाधिकः शृङ्गारः । विस्तरो[1]पाधिको वीरः । क्षोभोपाधिको रौद्रः । विक्षेपोपाधिको बीभत्सः । उपाधिर्भूमिकाश्रय इति यावत् । हास्याद्भुतकरुणभयानकेष्वपि विकासादिरेवोपाधिरित्येभिः सहमित्रता शृङ्गारादीनां न तु

---

१. व्याख्यानुसारेण 'विस्तारो' इति पाठः इति प्रतिभाति ।

कार्यकारणभावः । तेषां प्रत्येकं विभावादिकारणभेदस्य दृष्टत्वात् ॥छ्छ॥

व्या०—तदेवं रसस्वरूपं निरूप्य तत्स्वरूपं निष्कृष्य दर्शयति। स्वाद इति । स्वाद्यत इति स्वादो रसः यतो रसशब्दं निब्रुवतेः रसतेः स्वादनार्थत्वात् रस्यन्त एते रसा इति । काव्यार्थः काव्यस्य वाच्यार्थो विभावादिः तस्य सम्भेदाद्व्यञ्जकत्वेन सम्बन्धा-दात्मैवानन्दः तस्य समुद्भवः समुद्भूतिराविर्भावः काव्यार्थानुसन्धान-सम्भव आत्मानन्दरसो यः स स्वादापरनामा रस इत्यर्थः । तस्य शृङ्गारादिभेदाश्रयणेन विकासाद्युपाधिकं चातुर्विध्यमाह । विकासे-त्यादि । इह शब्दविषये विस्तारशब्दश्चिन्त्यः । शृङ्गादिचतुष्ट-योक्तं चातुर्विध्यं हास्यचतुष्टयेऽतिदर्शयन्नेषां द्वयानामपि यथासंख्यं द्वयोर्द्वयोरेकोपाधिनिबन्धना मिथो मित्रतेत्याह । हास्येत्यादि । कार्यकारणनिबन्धनैषां मैत्रीति केचित् । तान् निरस्यति । नत्विति । कार्यकारणभावस्यैवाभावात् क्वचिद्भावेऽप्यननुगमान्न तन्निबन्धन-नेत्यर्थः । ॥छ॥

मू०—ननु तदा अष्टावेव रसा भवितुमर्हन्ति न तु नवमः । ततः कोऽयमभिनवो नाम शान्त इति चेन्न । मुनिनास्य विभावाद्यप्रतिपादनात् लक्षणाकरणाच्च । अनादि कालप्रवाहायातस्य रागद्वेषादेरत्यन्तमुच्छेत्तुमशक्यत्वाच्च । अपरे पुनरेवमिह विवदन्ते । यथा तथास्तु नाम शान्तो रसः । सर्वथा नाटकादावभिनयात्मनि स्थायित्वमस्य निषिध्यतेऽस्माभिस्तस्य

सकलव्यापारोपरमरूपस्याभिनयायोगात् एतच्च विचार-विकलम् । अमङ्गलरूपस्यापि निर्वेदस्य शान्तरसस्थायित्वप्रकाशनायैव मुनिना व्यभिचारिषु प्रथमं निर्दिष्टत्वात् ।

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायीभावाः प्रकीर्तिताः ॥

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥

व्रीडा चपलता हर्ष आवेगो जडता तथा ॥
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥

सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावा समाख्यातास्तु नामतः" ॥

इति स्थायिव्यभिचारिमध्येऽस्य पठनादुभयरूपत्वमस्याभिमतमिति मुनेराशयस्य लक्ष्यमाणत्वाच्च । तस्मात् अस्ति शान्तो रसः । अतश्च नवैव रसा इति न सम्मतम् ॥

व्या०—नन्वेवं द्वन्द्वकरणादष्टौ रसा इति शान्तो नवमो न स्यादिति शङ्कते । ननु तदेति । शान्तो नामेत्यन्वयः ।

अत्रैकदेशी परिहरति । नेति । नास्ति शान्त इत्यर्थः । तत्रोपपत्तिमाह मुनिनेति । रागद्वेषानुच्छेदे शान्तस्थायिनो निर्वेदस्याभावात् कुतः शान्त इत्यर्थः । सत्त्वेऽपि शान्तस्य तत्स्थायिनो निर्वेदस्य नाट्यानुपयोगित्वात् इह स्थायित्वेनास्य निषिध्यत इत्येकदेश्यन्तरमतमाह । अपरे पुनरिति । अस्येति । निर्वेदस्येत्यर्थः । उभयमप्यपष्ठु; मुनिनाप्यस्य स्थायित्वसूचनादिति परिहरति । एतच्चेति । कण्ठतोऽनुक्तिस्तु सूत्रकाराणां भूषणमेव । यथा कणादश्च शब्देन गुरुत्वादिगुणसप्तकं समुच्चिकायेति भावः । प्रथमनिर्देशमभिव्यक्तुं सूत्रं पठति । रतिरित्यादि । सूत्रतात्पर्यं व्यनक्ति । स्थायीति । अयं भावः । सञ्चारिप्रायपाठमात्रेण सञ्चारित्व सिद्धावपि अमङ्गलतया प्राथम्यानर्हस्यापि निर्वेदस्य प्राथम्यकरणं स्थायिसान्निध्यात् स्थायित्वसिध्यर्थमेवेति कण्ठोक्तिं विनापि स्थायित्वसिद्धिरित्यर्थः । उपसंहरति । तस्मादिति ॥छ॥

मू० - राजा तु शृङ्गारमेकमेव शृङ्गारप्रकाशे रसमुररीचकार ।

यथाः—वीराद्भुतादिषु च येह रसप्रसिद्धिः
सिद्धा कुतोऽपि वटयक्षवदाविभाति ।
लोके गतानुगतिकत्ववशादुपेता-
मेतां निवर्तयितुमेष परिश्रमो नः ॥

शृङ्गारवीरकरुणाद्भुतहास्यरौद्र-
बीभत्सवत्सलभयानकशान्तनाम्नः ।

आम्नासिषुर्दश रसान् सुधियो वयं तु
शृङ्गारमेव रसनाद्रसमामनामः'' ॥

रसानां लक्षणानि क्रमेण यथा । :–

स्त्रीपुंसमाल्यादिविभावा स्तम्भस्वेदाद्यनुभावा जुगुप्सालस्यौग्र्य-वर्ज्यव्यभिचारिका रतिः सम्भोगविप्रलम्भात्मा शृङ्गारः ।

विकृतवेषादिविभावो नयन विकासाशुपाताद्यनुभावो लज्जादि सहकारी हासो हास्यः ।

पितृविपत्तिप्रभृतिविभावो दैवोपालम्भाश्रुप्रभृत्यनुभावो दैन्या-दिसहकारी शोकः करुणः ।

असुहृद्दर्शनादिविभावः स्वेदनिर्भर्त्सनाद्यनुभावोऽमर्षादिव्यभि-चारी क्रोधो रौद्रः ।

प्रतिमल्लविलोकनादिविभावो रोमाञ्चकृपाणकम्पनाद्यनुभावो हर्षादिभिर्व्यभिचारिभिरुपचित उत्साहो वीरः ।

प्रतिभटदर्शनादिविभावं कम्पकातराक्षिविलोकताद्यनुभावं दैन्या-दिव्यभिचारि भयं भयानकः ।

पूतिपरासुदर्शनादिविभावा नासापिधानवैवर्ण्याद्यनुभावा मोहा-दिव्यभिचारिणी जुगुप्सा बीभत्सः ।

विचित्रदर्शनादिविभावः स्तम्भस्फारनेत्रविलोकनाद्यनुभावो वितर्कादिव्यभिचारी विस्मयोऽद्भुतः ।

भवभङ्गुरताविभावनादिविभावः पुलकनयननिस्तरङ्गताद्यनुभावो धृत्यादिव्यभिचारी निर्वेदः शान्तः ।

अत्र कामस्य सकलजीवलोकानन्दकन्दलनक्षमतया सर्वान् प्रतिहृद्यतेति तन्मूलः पूर्वं निर्दिष्टः शृङ्गारः । तदनुगामितया हास्यः । ततो निरपेक्षभावत्वात् तद्विपरीतः करुणः । ततः तन्निमित्तमर्थप्रधानो रौद्रः । अथ कामार्थयोर्धर्ममूलत्वाद्धर्मप्रधानो वीरः । तस्य भीताभयप्रदानसारत्वाद्वीरानन्तरं भयानकः । तद्विभावसाधारण्यसम्भवाच्च तद्धेतुस्ततो बीभत्स इति । यद्वीरेणाक्षिप्तं वीरस्य पर्यन्तेऽद्भुतः फलमिति तदुपादानम् । ततस्त्रिवर्गात्मकप्रवृत्तिधर्मविपरीतनिवृत्तिधर्मात्मकोऽपवर्गफलः शान्तः ॥

व्या०—भोजराजमतमाह । राजात्विति । तदपि भरतादिशास्त्रविरोधादतिदुर्बलतयैवोपेक्षैव प्रतिक्षेप इति मत्वा रसानां विशेषलक्षणान्याह । रसनामित्यादि । निगदव्याख्यानमेतत् । अथ रसानां क्रमनियामिकाः सङ्गतीराह । अत्र कामस्येत्यादि । इदमपिनिगदव्याख्यानमेव ॥

मू०—चाटुषु प्रभुविषयस्य रत्याख्यस्य कविभावस्य प्राधान्यं भविष्यतीति रसादिध्वनेः प्राधान्यप्रकाशनाय परकीयाण्येवास्माभिः पद्यान्यत्र क्रमेणोदाह्रियन्ते । तत्र रसो यथा ।–

'ममासनार्धे भव मण्डनं ततः
प्रिये मदुत्सङ्गविभूषणं भव ।

भ्रमाद्क्रमादालपमङ्ग मृष्यतां
विना ममोरः क्षतरक्तवासनम्' ॥

वीर नरसिंह नृपते तव विरहे भाति पाण्डुता वपुषि भृशम् ॥
तस्या हृदयगतस्य त्वन्मुखचन्द्रस्य चन्द्रिकाभस्मधुरा ॥

अत्र सखी वक्त्री ।

उत्कासे कण्ठदाहः प्रचुरघृतपयःपानमामज्वरार्त्तै
रक्ता कृष्टिः कृशानामुदरभयहरा कर्कटी सक्तुमिश्रा ।
पथ्या पथ्यातिसारे दृशि सरुजि पुनः क्षारचूर्णप्रयोग-
स्तत्तत्पथ्योपचारैस्तरुणयति यमाडम्बरं जन्तुकेतुः ॥'

हृदये वसतीति मत्प्रियं
यदवोचस्तदवैमि कैतवम् ।

उपचारपदं न चेदिदं
त्वमनङ्गः कथमक्षता रतिः' ॥

'केयं माता पिशाची क इव स जनको भ्रातरः कोऽत्र कीटा
बध्योऽयं बन्धुवर्गः कुटिलविटसुहृच्चेष्टिता ज्ञातयोऽपि ।
हस्तौ निष्पीड्य

आगर्भं यावदेषां कुलमिदमखिलं नैव निःशेषयामि
स्फूर्जन्तः क्रोधवह्नेर्दधति न विरतिं तावदङ्गे स्फुलिङ्गाः' ॥

क्षुद्राः सन्त्रासमेनं विजहित हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्गात्रेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥१॥

अथ रसादिध्वनेरन्यदीयश्लोकानुदाहरिष्यन् 'करोमि नरसिंहस्य चाटुश्लोकानुदाहरन्' इति स्वकृतप्रतिज्ञाभङ्गदोषं परिहरति । चाटुष्विति । रसभावादिभेदादसंलक्ष्यक्रमध्वनिरष्टपिध इत्युक्तं तत्राद्यस्य रसध्वनेः शृङ्गारादिभेदेन नवविधस्यापि क्रमेणोदाहरणानि वक्तुमाह । तत्र रसो यथेति । ममेत्यादि । सम्भोगशृङ्गारोदाहरणं परकीयम् । वीरनृसिंहेति विप्रलम्भशृङ्गारोदाहरणं स्वकीयम् । तत्र पूर्वोक्तप्रभुविषय रत्याख्यभावध्वनिशङ्कां परिहरति । अत्र सखी वक्रीति । न तु कविरिति शेषः । तथा चोक्तशङ्कानवकाश इति भावः । अत्र सर्वत्र स्त्रीपुंसेत्यादिलक्षणानि योज्यानि । उत्कास इति । कर्कटी उर्वारुः । 'उर्वारुः कर्कटी स्त्रियाम्' इत्यमरः । पथ्या हरीतकी । 'हरीतकी पथ्या' इति विश्वः । पथ्या हिता । जन्तुकेतुर्नाम कश्चिद्दग्धहस्तो वैद्याभासस्तद्विडम्बनेयम् ।

मू०—ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्पन्दने दत्तदृष्टिः
'पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति' ॥

दंसमाणुसमांसभालके
कुंभसहस्सवशाहिं शंचिदे ।

अणिंश च पिबामि सोणिदं
बलिशशदं समले भवीयदु' ।

'पश्य कश्चन चकोरलोचने
लोचनाविषयमैन्द्रजालिकम् ।
इक्षुरिष्वसनमङ्कुराः शरा
लक्ष्यमेतदखिलं चराचरम् ॥

'कदा वाराणस्याममरतटिनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहरशम्भो त्रिनयन
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान्' ॥

अत्र भावितीव्रनरकयातनानुचिन्तनादिभिर्विभावैर्जनितः कौपीनधारणशिरोऽञ्जलिपुटघटनादिभिरनुभावैरभिव्यक्तः कदेतिपदसूचितेन चिन्ताख्येन व्यभिचारिभावेन पुष्टः स्वात्मावमानलक्षणो निर्वेदः स्थायी शान्तरसरूपतां बिभ्रद्विश्रान्तिधाम । विभावास्त्वत्राक्षेपलभ्याः ॥

व्या०—ग्रीवाभङ्गेत्यादि । पश्चादर्धं पश्चार्धं चरमकायः । पृषोदरादित्वात्साधुः । स्वमते तिर्यग्गतस्यापि रसस्यानाभासत्वात् सारङ्गगतभयोदाहरणमित्यनुसन्धेयम् । दसमाणुसेत्यादि । समरसीम्नि बसासृङ्मांसमत्तायाः कस्याश्चिद्राक्षस्या अपभ्रंशभाषेयम् ।

दशमानुषमांसभाराः कुम्भसहस्रवसाभिः सञ्चिताः ।
अनिशं च पिबामि शोणितं वर्षशतं समरो भवतु ॥

पश्येत्यादि । अत्रात्यन्ताघटमानार्थघटनदर्शनादद्भुतः ।

क्र्देत्यादि । इह सामान्यलक्षणप्रस्तावोक्तान्यपि विभावादीनि पुनर्विप्रतिपत्तिनिरासदार्ढ्यार्थमुद्भावयति । अत्र भावितात्मेति । एतेन नित्यानित्यवस्तुविवेक इहामुत्रार्थफलभोगविरागः शमदमादिसाधनसम्पत्तिः मुमुक्षुत्वं चेति साधनचतुष्टयसम्पत्तिरुद्दीपिकेत्युक्तम् । नन्वेते विभावाः श्लोकेनोक्ता इत्याशङ्क्याह । विभावास्त्विति । कौपीनधारणादिकार्योन्नेया इत्यर्थः ॥

मू०—शृङ्गारादिरसभेदाः पुनः शास्त्रान्तरसुलभनिरूपणा इति नेह प्रपञ्चिताः ॥

भावो यथा ।

भावो हि नाम देवद्विजगुरुपुत्रमित्रादिविषया रतिर्विभावाद्यापूरितो व्यभिचारी च । कान्ताविषयाया रतेः शृङ्गारत्वेनाङ्गीरात् । तत्र देव विषया यथा

'छिन्ते ब्रह्मशिरो यदि प्रथयति प्रेतेषु सख्यं यदि
क्षीबः क्रीडति मातृभिर्यदि रतिं धत्ते श्मशाने यदि ।

सृष्टा संहरति प्रजा यदि तथापा(प्या)धाय भक्त्या मन
स्तं सेवे करवाणि किं त्रिजगती शून्या स एवेश्वरः' ॥

अत्र भगवद्विषया रतिः प्रतीयते । एवं द्विजातिविषयाप्युदाहार्या पुत्रविषया तु रतिर्वत्सलो रस इति कैश्चिदुच्यते ॥

व्या०—ननु शृङ्गारादीनामवान्तरभेदाः किमिति नोदाह्रियन्तेऽत आह। शृङ्गारादीति। अस्माकं त्वेतावतैव ध्वनिस्वरूपनिरूपणसिद्धेरलमिति भावः। मित्रादीत्यादि। आदिशब्दाद्वर्ण्यनृपादि संग्रहः। आपूरित उपचित इत्यर्थः। एवं द्विजातीति। तत्र द्विजविषये 'अद्य क्रियाः कामदुधाः क्रतूनाम्' इत्यादि गुरुविषये रघुवंशे। ससैन्यश्चान्वगाद्रामम्' इत्यादि रामे राज्ञि भरतवृत्तान्तः। पुत्र विषये 'आलक्ष्यदन्तमुकुलान्' इत्यादि शाकुन्तले। मित्रविषये तु 'अद्वैतं सुखदुःखयोरनुगतम्' इत्यादिकं चोदाहार्यमित्यर्थः। आदिशब्दाद्वर्ण्यनृपतिविषया ग्राह्याः। तत्र स्वचाटुश्लोक एवोदाहरणमिति भावः। पुत्रविषयारतिर्वत्सलो नाम दशमो रस इति केचित्। न तत्स्वमतमित्याशयेनाह। कश्चिदिति। तस्याः पृथग्रसत्वप्रसङ्ग इति भावः॥

मू०—यद्यपि सकलमेव काव्यं रसेनैव जीवति रसश्चैकधनचमत्कारात्मा तथापि क्वापि व्यभिचारिणः सकाशादधिकचमत्कारो भवतीति सोऽपि विभावानुभावप्रकाशितो भाव उच्यते। यथा—

किमसुभिर्ग्लपितैर्जड मन्यसे
मयि निमज्जतु भीमसुतामनः।
मम किल श्रुतिमाह तदर्थिकां
नलमुखेन्दुपरां विबुधः स्मरः॥

अत्र शशिनं प्रत्यसूयया दमयन्त्याः प्रतीयतेऽतिरेकेणेति विप्रलम्भेऽपि असूयाख्यव्यभिचारिचमत्क्रियाप्रयुक्त आस्वादातिशयः॥

व्या०—ननु रसस्य लोकोत्तरचमत्कारित्वात् ध्वनित्वमस्तु; व्यभिचारिणः कथं तथात्वमिति शङ्कामनूद्य विभावादिमहिम्ना कदाचित् सोपि तथेत्याह । यद्यपीति । किं तस्य रसत्वमपि ? नेत्याह— भाव उच्यत इति । त्रिमित्यादि । गलितैरुत्क्रामितैः । तदर्थिकां 'मृतमनसां चन्द्रमसि विलय' इत्येवमर्थपरामित्यर्थः । इह विरहवेदनया चन्द्रातपमसहमाना दमयन्ती चन्द्रमुपालभते । एषा मृता मयि मग्नमना भविष्यति । 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयते' इति श्रुतिप्रामाण्यादिति यदि तेऽभिमानस्तदपि व्याख्यानतो विशेषप्रतिपत्तिः' इति न्यायेन विद्वत्कामदेवव्याख्यानान्नलमुखेन्दुपरमेव श्रुतिरिति हताशो भवानित्यर्थः । एतेनेह नलैकपराया मम परत्रापि तत्सायुज्यमेवेति व्यज्यते; तेन रतेः स्थायित्वं चेति स्थिते सत्याह । अत्रेति । अपकारिणि चन्द्रे मन्युप्रयुक्ता तत्पाण्डित्यासहनरूपासूयेर्ष्यापराख्यो भावो व्यज्यत इत्यर्थः । 'परोत्कर्षाक्षमेर्ष्या स्याद्दौर्जन्यान्मन्युतोऽपि वा' इति लक्षणम् । अत्र विप्रलम्भप्रतीते रसध्वनौ जृम्भमाणे कुतो भावध्वनिरित्याशङ्क्य तत्सम्भवेऽपि उद्भटत्वादयमुद्भाव्य इत्याह । अतिरेकेणेति । अत्र परकीयापकारादयो विभावा निन्दानादरभ्रूभङ्गादयोऽनुभावा इत्यनुसन्धेयम् ।

मू०—रसाभासो यथा ।—

ब्रह्मन्नध्ययनस्य नैष समयस्तूष्णीं बहिः स्थीयतां
स्वल्पं जल्प बृहस्पते जडमते नैषा सभा वज्रिणः ।

वीणां संहर नारद स्तुतिकथालापैरलं तुम्बुरो
सीतायल्लकभल्लमग्नहृदयः स्वस्थो न लङ्केश्वरः ॥

अत्र न कथमपि मिथिलाधिराजतनयायाः प्रेमभाजनं भवति रामभद्रेतरस्ततः सर्वथा तस्यामनौचित्येन रतिः प्रावर्तत रावणस्य(इति) रसाभासः समजनि विप्रलम्भशृङ्गारः । इदमत्र तात्पर्यम् । यत्र परस्परानुकूल्यकल्लोलितः प्रवर्तते स्थायी तत्र रसः । यत्र पुनरेकतरानुरागस्तत्र स्थायिनोऽनौचित्येन प्रवृत्तत्वात् तदाभास एव । अपरे तु रसाभासं तिर्यक्षु प्रचक्षते तन्न परीक्षाक्षमम् । तेष्वपि विभावादिसम्भवात् । विभावादिज्ञानशून्यास्तिर्यञ्चो न भाजनं भवितुमर्हन्ति रसस्येति चेन्न । मनुष्येष्वपि केषुचित्तथाभूतेषु रसविषयभावाभावप्रसङ्गात् । विभावादिसम्भवो हि रसं प्रति प्रयोजको न विभावादिज्ञानम् । ततश्च तिरश्चामप्यस्त्येव रसः ।

यथा—

ददौ सरः पङ्कजरेणुगन्धि
गजाय गण्डूषजलं करेणुः ।
अर्धोपभुक्तेन बिसेन जायां
सम्भावयामास रथाङ्गनामा ॥

अत्र गजेनालम्बलनविभावेन जनिता वसन्तादिभिरुद्दीपनविभावैरुद्दीपिता सुरभिगण्डूषजलदानानुभावप्रकाशिता हर्षादिभिर्व्यभिचारिभिरुपचिता करेणोः सम्भोगशृङ्गारि(र)तां प्रतिपन्नैव रतिः एवं रथाङ्गविषयापि ॥

भावाभासो यथा—

'अस्मद्विस्मयचेष्टितानि निखिलत्रैलोक्यहेलाजय-
ग्रहीभूतसुरासुराणि भवतो भूमेः सुता शृण्वती ।
पत्यौ द्वेषकषायितेन मनसा स्निग्धा मयि स्थास्यति
स्त्रीणां प्रेम यदुत्तरोत्तरगुणग्रामस्पृहाचञ्चलम्' ॥

अत्र रावणस्यौत्सुक्यमनौचित्येन प्रवृत्तम् ॥

व्या० — अस्मदिति । सीतायलकः सीताविरहः । अत्र रावणस्य सीतायां विप्रलम्भशृङ्गारः प्रतीयते । अस्याभासत्वं व्यनक्ति । अत्रेति ।

एकत्रैवानुरागश्चेत् तिर्यङ्म्लेच्छगतोऽपि वा ।
योषितो बहुसक्तिश्चेद्रसाभासस्त्रिधा मतः' ॥
इत्युक्तत्वात् तिर्यग्गतोऽपि रसाभास इति केचित् ।

तन्मतमुपन्यस्य निरस्यति । अपरे त्विति । तिरश्चां विभावादि-सम्भवेऽपि तनुसन्धानवैधुर्यान्न रसाश्रयत्वमिति शङ्कते । विभावादि-ज्ञानेति । समाधत्ते । नेति । कुत इत्याशङ्क्य किमेषां विभा-वादित्वेन ज्ञानं प्रयोजकं स्वरूपमात्रं वेति विकल्प्याद्यं प्रतिबन्द्या समाधत्ते । मनुष्येष्वपीति । रसविषयभावो रसाश्रयत्वम् । द्वितीयं तत्राप्यस्तीत्या-शयेनाह विभावादिति । सम्भवः स्वरूपज्ञानसम्भवः । न विभा-वादिज्ञानं विभावादय इति विशेषज्ञानमित्यर्थः । अन्यथा ज्ञानमात्र-निषेधे अत्यन्तानुपलभ्यमानानामपि तच्चेष्टादीनामुद्दीपकत्वप्रसङ्गः । उप-संहरति । ततश्चेति । उदाहरति । ददाविति ॥

मू०—रसस्य मुख्यत्वे सत्यपि राजानुगतविवाहप्रवृत्तभृत्यवत् कदाचिदङ्गित्वमनुभवन्ति भावशान्त्यादयः ॥

तत्र भावशान्तिर्यथा ।

'पश्यामः किमियं प्रपद्यत इति स्थैर्यं मयालम्बितं
किं मां नालपतीत्ययं खलुशठः कोपस्तयाप्याश्रितः ।
इत्यन्योन्यविलोलदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याजं हसितं मया धृतिहरो वाष्परतु मुक्तस्तया ॥

अत्र ईर्ष्याकृतस्य नायिकायाः कोपस्य शान्तिः । विशि-(स्पृ)ष्टस्यापि कोपस्य कोपत्वानवगमात् ॥

व्या०—ननु रसाङ्गभूतानां भावशान्त्यादीनां ध्वनित्वेऽङ्गित्वं चेति विरोधमाशङ्क्य दृष्टान्तेन निराचष्टे । रसस्येति । यथा राजानुगतभृत्यस्य राजशेषत्वेऽपि विवाहोपाधिना तं प्रत्येव तादात्मिकं शेषित्वं न विरुध्यते तथैषामपि क्वचित्तात्पर्येण प्रतिपादनेन शेषित्वमविरुद्धं प्रत्युत रसोद्दीपकं सदुपकारकमेवेत्यर्थः ॥

पष्याम इति । अत्र कश्चित् कामी स्वप्रियासमागमरहस्यं वयस्याय कथयति ॥

मू०—भावोदयो यथा ।

तदद्य विश्रम्य दयालुरेधि मे
दिनं निनीषामि भवद्विलोकिनी ।
अदर्शि पादेन विलिख्य पत्रिणा
तवैव रूपेण समः स मत्प्रियः ॥'

अत्र नलं प्रति दमयन्त्या औत्सुक्यरूपस्य भावस्य उदयः ॥

विरुद्धयोर्भावयोः परस्परस्पर्धिभावेनोपनिबन्धो भावसन्धिः । यथा ।

'अर्धे चेतसि जानकी न विरमत्यर्धे च लङ्केश्वरः ।
किं चार्धे विरहानलः कवलयत्यर्धं च रोषानलः ।
इत्थं दुर्विधिवैशसव्यतिकराद्दाहे समेप्यर्धयो
रेकं वेद्मि तुषाग्निदग्धमपरं दग्धं करीषाग्निना' ॥

अत्र रतिक्रोधयोः सन्धिश्चर्वणास्पदम् ॥

व्या०—तदद्येति । इन्द्रसन्देशहरिणमाधिष्कृतनिजाकारं नलं प्रति तत्स्वरूपं जिज्ञासमानायास्तदालोकनकौतुकाकृष्टचित्ताया दमयन्त्या वचनमेतत् । पक्षिणा पूर्वं नलप्रहितेन हंसेनेत्यर्थः ॥

अर्ध इति । दुर्विधवैशसव्यतिकराद्दुष्टदैवप्रातिकूल्यमेलनादित्यर्थः । विशसति हिनस्तीति विशसो हिंस्रः । शसुहिंसायामिति धातोः पचाद्यच् । तस्य भावो वैशसं क्रौर्यं प्रातिकूल्यमिति यावत् । युवादित्वादण् प्रत्ययः । अग्नेरिन्धनविशेषाद्दाहकत्वविशेषः प्रसिद्धः । तदिह तुषाग्नेः सह्यत्वं करीषाग्नेरसह्यत्वं चेति विवक्षित्वोक्तम् । एकं वेद्मीत्यादि । 'धान्यत्वक् विपृषास्तुषः' गोर्विट् गोमयमस्त्रियां । ततु शुष्कं करीषोऽस्त्री' इति चामरः ॥

मू०—बहूनां भावानां पूर्वपूर्वोपमर्देनोपनिबन्धो भावशाबल्यम् ।

यथा –

'क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणामुपशान्तये श्रुतमहो कोऽपेति कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥',

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता विश्रान्तिधाम ॥

क्वेत्यादि । एतच्छाकुन्तलायामज्ञाताभिजनविशेषायामासक्तस्य राज्ञो दुष्यन्तस्य ब्राह्मणीशङ्काकलितचेतसो वचनम् । तत्राष्टभिर्वाक्यैः क्रमेणाष्टौ वितर्कादयो भावा ध्वन्यन्ते ।

तत्र–

'तर्को विचारः सन्देहाद्भ्रूलताङ्गुलिनर्तकः ।'
'कालाक्षमत्वमात्सौक्यम् ।'
'तत्वमार्गानुसन्धानात् तत्वनिर्धारणं मतिः ।'
स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते ॥'

अनिष्टाभ्यागमोत्प्रेक्षा शङ्का' ।
'सत्वत्यागादनौद्धत्यं दैन्यं कार्पण्यसम्भवम्' ॥

धृतिश्चित्तस्य नैःस्पृह्यं ज्ञानाभीष्टागमादिभिः ।'
'ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत् ।'
एवमसंलक्ष्यक्रमव्यङ्ग्यध्वनिरष्टधा निष्टङ्कितः ॥

मू० संलक्ष्यक्रमव्यङ्ग्यस्तु त्रिधा । शब्दशक्तिमूलानुरणनरूपव्यङ्ग्योऽर्थशक्तिमूलानुरणनरूपव्यङ्ग्य उभयशक्तिमूलानुरणनरूपव्यङ्ग्यश्चेति । तत्राद्यस्तावदलङ्कारस्य वस्तुनो वा व्यज्यमानत्वेन भवन् प्रथमं द्विधा भवति । द्विविधेऽपि पदवाक्यप्रकाश्या स्यादिति चतुर्विधः ।

क्रमेण यथा—

नरसिंह धरापाल के वयं तव वर्णने ।
अपि राजानमाक्रम्य यशो यस्य विजृम्भते ॥

अत्र राजपदेनेन्दोर्विषयस्य प्रस्तुतत्वे विषयिणो नृपस्याक्रमणादिप्रकृतोपयोगिनः प्राधान्येन प्रतीतेः परिणामो व्यज्यते ।

आक्रम्य स्मरवैरिशेखरसरित्पूरैकसिंहासनं
राजानं नरसिंह पार्थिव तथाहङ्कारभारोध्दुरः ।
त्वत्कीर्तिप्रसरो हसत्ययमसौ शक्रस्य दन्तावलं
व्यालेन्द्रं मुसलायुधं किमपरं देव्याश्च पञ्चाननम् ॥

इह करकलितमुसलतया भगवतः सीरपाणेः समरधुरन्धरत्व रूपं वस्तु मुसलायुधपदेन व्यज्यते ॥

व्या०—अथ संलक्ष्यक्रमव्यङ्ग्यध्वनिं विभजते । संलक्ष्येति । वीणादिवादनानन्तरभावी यो निस्वानस्तदनुरणनं तस्येवरूपं यस्य सोऽनुरणनरूपव्यङ्ग्यः । अत एवोक्तं काव्यप्रकाशे ।

अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ।
शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः ॥' इति ।

असंलक्ष्यक्रमव्यङ्ग्यस्तु स्वकारणविभावादिसम्बन्धितयैव प्रतीतेः नानुरणनरूप इति भावः । तत्र शब्दशक्तिमूलं चतुर्धा विभजते । तत्राद्य इति । पदगतशब्दशक्तिमूलानुरणनरूपसंलक्ष्यक्रमालङ्कारध्वनिः पदगतशब्दशक्तिमूलानुरणनरूपसंलक्ष्यक्रमवस्तुध्वनिः । एवं वाक्यगतौ द्वौ भेदावित्येवं चतुर्विध इत्यर्थः । आद्योदाहरणेऽलङ्कारध्वनिमुद्भावयति । अत्र राजपदेनेति । विषयिण आरोप्यमाणस्येत्यर्थः । आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति लक्षणम् । आरोप्यमाणस्य नृपस्य स्वतादात्म्येन प्रकृतस्येन्दोराक्रमणीयत्वापादनेनोपयोगात् परिणामालङ्कारो राजपदमहिम्ना ध्वन्यत इति पदगतशब्दशक्तिमूलत्वम् । तस्य ध्वनित्वे हेतुमाह । प्राधान्येति । अन्यथा गुणीभूतव्यङ्ग्यं स्यादिति भावः । आक्रम्येत्यादि । गतमेतत् । अत्र वस्तुध्वनिमुद्भावयति । इहेति ॥

मू०—हिरण्यकशिपुक्षेत्रदानदर्शितविस्मयः ।
न कस्य श्लाघनीयोऽसि नरसिंह जगत्पते ॥

अत्र राजनि प्राकरणिकत्वेन अभिधाया नियन्त्रितत्वात् अप्राकरणिकनृसिंहलक्षणद्वितीयार्थाभिधाने कुतः शक्तिः । सकृदुच्चारितस्य शब्दस्यैकार्थाभिधान एव सामर्थ्यं न द्वितीयार्थाभिधाने ; अथानेकार्थोऽयं शब्दस्तावन्न विरमति यावन्न द्वितीयमर्थमभिधत्त इति चेन्न । अनेकार्थस्य शब्दस्यैव अभावात् । यत् पुनरेकस्यै शब्दस्यानेकार्थत्वमिव क्वचन प्रतीतिसरणिमनुसरति स महिमा सादृश्यनिबन्धनस्य भ्रमस्य । अतो निष्फल एवायं श्लिष्टशब्दान्वेषणप्रयास, कवेरिति यदभिधीयते तदमीमांसित-

रमणीयम् । नरसिंह इव नरसिंह इत्युपमाया वाक्येन प्रतीयमानत्वात् ।

यथा वा

गौडगुर्जरकर्णाटलाटमालवसेवणाः ।
नरसिंहनृपे दृष्टे भवन्ति करहाटकाः ॥

व्या०—अथ वाक्यगतशब्दशक्तिमूलमलङ्कारध्वनिमुदाहरति । हिरण्येति । हिरण्यस्य कशिपुनोऽन्नाच्छादनस्य क्षेत्रस्य भूमेश्च दानेन वितरणेन अन्यत्र हिरण्यकशिपोरसुरस्य क्षेत्रदानेन गात्रखण्डनेनदर्शितविस्मयः । अत्र हिरण्यादिवितरणाद्भुतो राजेति प्रकृतो वाच्यार्थः । असुरगात्रखण्डनाद्भुतो भगवान् देवो नृसिंह इत्यप्रकृतो व्यङ्ग्यार्थः । सोऽप्यन्वयव्यतिरेकाभ्यां शब्दशक्तिगम्य एवेति वाक्यगतः शब्दशक्तिमूलो अलंकारध्वनिरिति भावः । नन्विह न कश्चिदलङ्कारः प्रतीयते प्रत्युत वाक्यस्य असम्बद्धार्थप्रतिपादकत्वमिति प्रत्यवतिष्ठते । अत्रेत्यादिना यदभिधीयत इत्यन्तेन । कथमसम्बद्धत्वमित्याशङ्क्याभिधासम्बन्धं तावन्निरस्यति । राजनीति । तर्ह्यभिधान्तरमस्त्वित्याशङ्क्याह । सकृदिति । अनेकार्थस्यापि शब्दस्यैकोच्चारणे एकैवाभिधाशक्तिश्चेष्टते इतरा तु विद्यमानाप्यकृतत्वादुदास्त इत्यर्थः । तर्ह्येकैव शक्तिरर्थान्तरेऽप्यनुवर्त्ततामित्याशयेन शङ्कते । अथेति । परिहरति । नेति । कुत इत्याशङ्क्य विरम्य व्यापारापत्तेरिति परिहारे स्थिते पक्षान्तरावलम्बनेन मूले कुठारमारोपयति । अनेकार्थस्येति । एकस्य शब्दस्यैक एवार्थ इति न्यायादिति भावः । तर्ह्यनेकार्थताप्रतीतेः का गतिरिति चोद्यमनूद्य गतिमाह । यत्पुनरित्यादि । यत्रानेकार्थोऽय-

मेकः शब्द इति प्रतीतिर्जायते तत्राप्येकस्य शब्दस्यैक एवार्थ इति न्यायादर्थभेदाच्छब्दभेदे सत्यपि सादृश्यादेकत्वभ्रमः कारणमित्यर्थः । ततः किमत अतह । तत इति । एकस्यानेकार्थत्वाभावादित्यर्थः । ततोऽपि किमत आह । अत इति । अलङ्कारध्वनिस्तु दूरापास्त इति भावः । सर्वलोकप्रसिद्धस्यानेकार्थत्वस्य दुरपह्नवत्वादविचारितरमणीय-मुक्तमिति समाधत्ते । तदिति । भ्रान्तत्वाभ्रान्तत्व चिन्ता तु किं नः कवीनामिति भावः । किं त्वभिधायाः कुण्ठत्वाद्व्यङ्ग्यत्वमुच्यते असम्बन्धत्वं च नास्त्यौपम्यपर्यवसानादित्याह । नरसिंह इवेति । तस्मादयमलङ्कारध्वनिरिति भावः । अक्लिष्टमुदाहर्तुमाह । यथा वेति । गौडेति । करे हाटकं येषामिति करहाटकाः सुवर्णोपाय-नपाणयो भवन्तीत्यर्थः । करहाटको नाम देशविशेषोऽप्यस्ति तथा च कथं गौडादयः करहाटका इति विरोधालङ्कारः शब्दशक्त्या वाक्येन ध्वन्यते । ननु यद्यत्र विरोधो व्यङ्ग्यः क्व तर्हि वाच्य इत्याशङ्क्याह ॥

मू०—अपिप्रभृतेर्विरोधाभिधायिनः शब्दस्यात्राभावाच्छब्द-शक्त्यैव विरोधो वाक्येन व्यज्यते । यद्यप्ययं क्वचन वाक्यार्थे पुरालङ्कारभावमुपमादिरूपतयानुभवन्नासीत् । सम्प्रति पुनरलङ्कार्य तामवलम्बते तथापि प्रत्यभिज्ञाबलादलङ्कारदशापरित्यागेऽप्यलङ्कार-ध्वनिरित्यभिधीयते ब्राह्मणश्रमणन्यायेन । तद्रूपाभावेन तूपलक्षितं वस्तुमात्रमुच्यते । मात्रग्रहणमिह रूपान्तरनिराकरणाय । तत्तु यथा–

सत्वसागर नृसिंह भूपते
तावकैरलममीभिराशुगैः ।

वैरिणामसव एव यद्भव-
न्त्याशुगाः कलितकार्मुके त्वयि ॥

अत्र तव धनुर्धरणमात्रेणैव समरप्राङ्गणेषु सत्वरमेव भवन्ति गत्वराः परिपन्थिनां प्राणा इति वस्तु शब्दशक्तिमहिम्नैव वाक्येन व्यज्यते ॥

व्या०—अपिप्रभृतेरिति । यत्र विरोधार्थस्याप्यादेः प्रयोगः तत्र विरोधस्य (पुरः) परिस्फूर्तिकत्वाद्विरोधो वाच्यः । अत्र तु वैपरीत्याद्व्यङ्ग्य इति भावः । नन्वलङ्कारस्य ध्वनित्वेऽलङ्कार्यस्य सतः कथमलङ्कारव्यपदेशः ? प्राधान्याप्राधान्ययोरेकत्र विरोधादित्याशङ्क्याह—यद्यपीति । यद्यप्यलङ्कार्यतामवलम्बते तथापीत्यन्वयः । ब्राह्मणश्रमणन्यायेनेति । श्रमणः शबरः । यथा ब्राह्मणः शबरत्वमागतोऽपि भूतपूर्वगत्या ब्राह्मण इति व्यपदिश्यते तद्वदित्यर्थः । वस्तुतस्तु तदपि वस्त्वेवेति द्रष्टव्यम् । तर्हि वस्तुध्वनिः कीदृगत आह । तद्रूपेति । भूतापूर्वालङ्कारत्वरहितं यद्वस्तु तद्वस्तुमात्रमुच्यते तद्ध्वनिः वस्तुध्वनिरित्यर्थः । रूपान्तरं भूतपूर्वालङ्कारभावः । सत्वेत्यादि । आशुगाः बाणाः शीघ्रमार्गगत्वराश्च । अत्र व्यङ्ग्यवस्तु व्यनक्ति । अत्रेति । आशुगादिशब्दशक्त्यैवोक्तवस्तुप्रतीतेरयं वाक्यगतशब्दशक्तिमूलः संलक्ष्यक्रमवस्तुध्वनिरित्यर्थः । एवं शब्दशक्तिमूलश्चतुर्धा दर्शितः ॥

मू०—अर्थशक्तिमूलानुरणनरूपव्यङ्ग्ये त्वर्थस्य स्वतः सम्भवी कविप्रौढोक्तिमात्रनिष्पन्नशरीरः कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरश्चेति त्रयो भेदाः । तेषु त्रिष्वपि भेदेषु वस्तुना वस्त्व-

लङ्कारो वालङ्कारेणापि वस्त्वलङ्कारो वा व्यज्यत इति चतुष्प्रकार-तयास्यार्थशक्तिमूलस्य ध्वनेर्द्वादशप्रकाराः सम्भवन्ति । एते च पदवाक्यप्रबन्धप्रकाश्यतया प्रत्येकं त्रिधा भवन्तः षट्त्रिंशद् भवन्ति । एकावयवगतेन भूषणेन कामिनीव पदप्रकाश्येनापि व्यङ्गेन भारती भवति चमत्काराय सहृदयानाम् । तत्र पद-प्रकाश्यत्वेनोदाह्रियन्ते ।

नृसिंह वसुधाधिप त्वयि रणोन्मुखे धावतः
प्रतीपपृथिवीपतेः पथि पथि प्रदीप्तक्षुधः ।
चिरादगुरवन्ध्यतां दुरवगाहविन्ध्याटवी
पलाशिविटपाश्वलाहृतफलार्पणेन द्विपाः ॥

अत्रावन्ध्यतामगुरित्यादिना वस्तुना गजगतं युद्धवन्ध्यत्वरूपं वस्तु चिरादिति पदेन व्यज्यते ।

नृसिंह क्ष्मापाल त्रिदशतटिनीवीचि तुलिते
यशः पूरे दूरात्तव जगदिदं पूरितवति ।
समुन्मीलत्कालागरुबहुलधूमप्रणयिनी-
स्तमस्तोमस्ताम्यन् विशति कबरीः पक्ष्मलदृशाम् ॥

अत्र प्रवेशनादिरूपेण वस्तुना त्वद्यशोधवलिते जगति पक्ष्मलदृशां कबरीष्वेव श्यामिकेति परिसङ्ख्यालङ्कारः कबरीपदेन व्यज्यते ।

समरवसुन्धरासु नरसिंह धराधिपते
रिपुनृपमौलिनीलमणयस्तव पादयुगे ।
सरसविकस्वरारुणसरोरुहलोभलग-
न्मधुकरमण्डलीललितडम्बरमादधते ॥

अत्र निदर्शनालङ्कारेण रणक्षोणिषु क्षणमपि तव चरणप्रणामाद्विरमन्ति न त्राणार्थिनः प्रत्यर्थिन इति वस्तु लगदिति पदेन व्यज्यते ॥

व्या०—अथार्थशक्तिमूलं विभजते । अर्थशक्तीत्यादि । ननु पदगतेन ध्वनिना काव्यैकदेशवर्तिना चमत्कारः कियानिति आशङ्क्याह । एकावयवगतेनेति । यथा नासाग्रलग्नेन मुक्ताफलेनेति भावः । तत्र षट्त्रिंशतो भेदानां मध्ये इत्यर्थः । तत्र द्वादश पदगता द्वादश वाक्यगता द्वादश प्रबन्धगताश्च । तत्र पदगतास्तावदुच्यन्त इत्यर्थः । तेऽपि स्वतः सिद्धार्थशक्तिमूला वस्तुना वस्त्वलङ्कार ध्वनी अलङ्कारेण च वस्त्वलङ्कारध्वनी इति चत्वारः । एवं कविप्रौढोक्तिसिद्धार्थशक्तिमूलाः कविनिबद्धार्थशक्तिमूलाश्चेति विवेकः । तत्र पदगतस्वतसिद्धार्थशक्तिमूलं संलक्ष्यक्रमे वस्तुना वस्तुध्वनिमुदाहरति । नृसिंहेति । पलाशिविटपाञ्चला वृक्षशाखाग्राणि । विन्ध्याटवीग्रहणं वृक्षाणामत्यौन्नत्यद्योतनार्थम् । चिरादिति पदेनेति । तदर्थशक्त्येत्यर्थः पदस्य तु तत्सहकारित्वम् । एवमुत्तरत्रापि द्रष्टव्यम् । वस्तुना अलङ्कारध्वनिमुदाहरति । **नृसिंहेत्यादि** । कबरीः केशपाशान् । "जानपद" इत्यादिना ङीप् प्रत्ययः । **कबरीष्वेवेति** । कबरीष्वन्यत्र च प्राप्तायाः श्यामिकायाः कबरीष्वेव नियमानात् परिसङ्ख्या ।

एकस्यानेकत्र प्राप्तावेकत्र नियमनं परिसङ्ख्या इति लक्षणादित्यर्थः । अलङ्कारेण वस्तुध्वनिमुदाहरति । समरेत्यादि । अत्र निदर्शनेति । अन्यस्यान्यधर्मस्वीकारासम्भवात् । डम्बरमिव डम्बरमिति सादृश्याक्षेपाद्वस्तुसम्बन्धरूपा निदर्शनेत्यर्थः । विरामे लग्नत्वासम्भवाल्लग्नत्वादस्य व्यञ्जकत्वमित्यर्थः । अलङ्कारेण अलङ्कारध्वनिमुदाहरति ॥

मू०—पूर्वं पयोधेरुदरे स्थितासि
ततः सुधे त्वं हृदये सुधांशोः ।
मुखे कलिङ्गाधिपतेरिदानीं
यथोत्तरं धाम तवाभिरामम् ॥

अत्र पर्यायालङ्कारेण वाक्सुधयोर्भेदेऽप्यभेद इत्येवं रूपातिशयोक्तिर्मुख इति पदेन व्यज्यते । एषूदाहरणेषु स्वतःसम्भविनोऽर्थस्य व्यञ्जकत्वम् ।

हेमाद्रेः कन्दरायां रतिरमणरणाटोपविच्छिन्नहार-
व्यस्तं मुक्ताफलानां तमसि तत इतः स्तोममन्वेषयन्त्याः ।
कस्याश्चित् स्वस्तरुण्या निकटगतनिजप्राणनाथोपगीता
कीर्तिर्ज्योत्स्ना त्वदीया क्षणमकृत मुदं श्रीनृसिंह क्षितीन्द्र ॥

अत्र वस्तुना तमस्यपि प्रकाशं कृतवती भवतः कीर्तिरिति वस्तु मुदमिति पदेन प्रकाश्यते ।

अम्भोजभूचन्द्रकलावतंस-
कंसद्विषः कुत्र पदं लभन्ताम् ।

यशः श्रियस्ते महिमा समन्ताद्
व्याप्नोत्ययं वीर नृसिंह देव ॥

अत्र वस्तुना त्वद्यशोधवलिते जगति पुण्डरीकप्रभृतयो न शक्यन्ते विभावयितुमिति महिमेति पदेन सामान्यालङ्कारः प्रकाश्यते ।

तनौ दत्वा पाकोन्मुखशरसखीं कामपि रुचिं
रिपुस्त्रीभ्यस्तासां कलयसि कलिङ्गक्षितिपते ।
प्रभां ताटङ्कानां श्रवणकुसुमानां विलसितं
स्मितानामालोकं स्तनमलयजानां श्रियमपि ॥

अत्र परिवृत्यलङ्कारेण त्वत्पलायितारितरुणीतनौ विरह-पाण्डिमा समुज्जृम्भत इति वस्तु पाकोन्मुखशरसखीमिति पदेन प्रकाश्यते ॥

व्या०—पूर्वमिति । अत्रैकस्याः सुधाया उदराद्यनेकाधार-वृत्तिनिबन्धनात् क्रमेणैकस्यानेकत्र वृत्तिरूपः पर्यायभेदः । तस्य च मुखे मुख्यसुधानुपपत्तेः वाचि सुधात्वाध्यवसानमन्तरेणानिर्वाहान्मुखपदार्थ-शक्त्या तद्व्यञ्जकत्वमित्यर्थः । स्वतःसिद्धार्थशक्तिमूलाश्चत्वारो भेदा दर्शिता इत्याह । एष्विति ॥ अथैवं कविप्रौढोक्तिसिद्धार्थशक्ति-मूलानपि चतुरो भेदान् क्रमेणोदाहरति । हेमाद्रेरिति । रतिरमण-रणं सुरतक्रीडा । अत्र वस्तुनेति । मोदकरणरूपेत्यर्थः । अम्भोजेत्यादि । कुत्र पदं लभन्तामिति । स्वाश्रयपुण्डरीकहिमाद्रि-

क्षीराब्धीनां यशोमग्नतया दुर्ग्रहत्वात् न कुत्रापि पदलाभ इत्यर्थः । अत्र वस्तुनेति । यशोव्याप्तिरूपेणेत्यर्थः । पुण्डरीकप्रभृतय इत्येव पाठः । क्वचिद् भूशब्दः प्रामादिकः । अन्यथा सामान्यालङ्कारानुत्थानात् ।

'सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता' इति तल्लक्षणम् । न च पुण्डरीकप्रभृतीनामिव पुण्डरीकभूप्रभृतीनां गुणसाम्येन यशसैक्यं सम्भवति । अन्यथा श्लोके पदग्रहणं बाध्येत । प्रभृतिशब्देन हिमाचलपयःपारावारयोः संग्रहः । तनावित्यादि । शरसखीं शरत्सदृशीमित्यर्थः । स्वपरपदार्थविनिमयः परिवृत्तिः सा चेह न्यूनाधिकस्वीकारान्न्यूनपरिवृत्तिरिति विशेषः ॥

मू०—त्वत्खड्गधारा समरे पतन्ती
मूर्ध्नि द्विषां वीर नृसिंह देव ।
विलोक्यतां क्षालयति क्षणेन
तदङ्गनानां स्तनपत्रभङ्गान् ॥

अत्र असङ्गत्यलङ्कारेण नवजलधाराविलक्षणेयं तव करवालधारेति व्यतिरेकालङ्कारो विलोक्यतामिति पदेन प्रकाश्यते । एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरस्यार्थस्य व्यञ्जकत्वम् ।

भुवः केलीतल्पं जयति नरसिंहक्षितिभुजो
भुजः शौर्यक्रीडाडमरसमरारम्भलटहः ।
नवप्रेयोलाभप्रमुदितसमस्ताम्बरचरी-
विकीर्णैर्मन्दारैर्विततमुपहारं भजति यः ॥

अत्र वस्तुना समराभिमुखानशेषानपि सर्वथा निहन्त्येव रिपूनयमिति वस्तु नवप्रेयोलाभेत्यादिना पदेन द्योत्यते ।

धूर्त्ताधोरण देव वासव कथं पङ्केन लिप्तः करी
पातुं तोयमुपागतः सुरनदीं तत्रास्ति पङ्कः कुतः ।
सर्वाशाविजयोत्सवं प्रतिकृतोद्योगे कलिङ्गेश्वरे
स्फायन्ते करिकर्णतालपवनोध्दूताश्वमूरेणवः ॥

अत्र वस्तुना सुरनद्याश्वमूरेणुभिरसम्बन्धेऽपि सम्बन्धः कृत इति स्फायन्त इति पदेनातिशयोक्तिरलङ्कारो द्योत्यते ।

आयोधनेषु रभसादधिरूढवत्या
वीरश्रियः स्तननितम्बभरातिभारात् ।
हन्तुं नृसिंह नृपतेर्न भुजः कथश्चित्
पादोपकण्ठपतितान् क्षमते विपक्षान् ॥

अत्र जीवन्त एव परिपन्थिनो मुक्ता इति कार्ये पृष्टे नृसिंह नृपतिभुजः कथमपि न हन्तुं क्षमते इति कारणाभिधानरूपाप्रस्तुतप्रशंसोपजीवनप्रवृत्तप्रतीयमानहेतूत्प्रेक्षानुप्राणितेन व्याजस्तुत्यलङ्कारेणानवरतक्षात्रधर्माचरणत्वरूपं वर्णनीयविषयं वस्तु पादोपकण्ठपतितानित्यनेन पदेन द्योत्यते ॥

व्या०—त्वदित्यादि । अत्र कार्यकारणयोः क्षालनधारापातयोर्भिन्नदेशत्वादसङ्गत्यलङ्कारः । उपमेयस्य करवालधाराया धारान्तरादुपमानादाधिक्यप्रतीतेर्व्यतिरेको ध्वन्यत इत्यर्थः । कुतूहलपदेत्यनेन

श्लोके विलोक्यतामित्यत्र कुतूहलादिति पाठ उन्नेयः[१] । अथ कविनिबद्धार्थशक्तिमूलांश्चतुरो भेदान् क्रमेणोदाहरति । भुव इत्यादि । डमरो भयङ्करः । लटहः प्रौढः । अत्र वस्तुनेति । विशिष्टमन्दारोपहारभजनरूपेणेत्यर्थः । धूर्तेत्यादि । स्फायन्ते सम्मूर्च्छन्तीत्यर्थः । अत्र वस्तुनेति । करेणुभिः पङ्कलेपरूपेणेत्यर्थः । आयोधनेष्वित्यादि । इहाप्रस्तुतप्रशंसोत्प्रेक्षाव्याजस्तुतीनामङ्गाङ्गिभावेन सङ्करः । तेन राज्ञो नित्यविजयित्वं वस्तु व्यज्यते इत्यलङ्कारेण वस्तुध्वनिरिति व्यनक्ति । अत्रेत्यादि । कार्यकारणसामान्यविशेषसरूपाणामन्यतमस्याप्रस्तुतस्य कथनात् तत्प्रतियोगिनः प्रस्तुतस्य गम्यत्वेऽप्रस्तुतप्रशंसा । अत्र हन्तुमक्षमत्वरूपकारणाज्जीवनामोचनरूपकार्यावगमेन कारणात् कार्यावगमरूपाप्रस्तुतप्रशंसा । पृष्ट इत्यनेन कार्यस्याप्रस्तुतत्वमुक्तम् । तद्विषयभूताक्षमत्वेऽतिभारादिवेति हेतोरुत्प्रेक्षणादुत्प्रेक्षायास्तदुपजीवनप्रवृत्तत्वं व्यञ्जकाप्रयोगात् प्रतीयमानत्वम् । निन्दया स्तुतेः स्तुत्या वा निन्दाया गम्यत्वे व्याजस्तुतिः । अत्राक्षमत्वरूपया निन्दया राज्ञः शरणागतत्राणपरायणत्वपरमकारुणिकत्वनिषेधभीरुत्वादिरूपस्तुतिप्रतीतेर्व्याजस्तुतिभेदः । स च अक्षमत्वनिर्वाहायोक्तोत्प्रेक्षासापेक्षत्वात् तदनुप्राणितः । 'क्षात्रधर्मोऽपि विजयः क्षत्रियस्य हि जीवितम्' इति तद्वृत्तिस्मरणादिति भावः ॥

मू०—बाहुस्ते नरसिंह देव विजयश्रीकेलिसौधध्वज-
स्तत्रापि प्रलयाग्निधूमरुचिना खड्गेन सख्यं गतः ।

---

१ अनेन ज्ञायते 'विलोक्यतामिति पदेन' इत्यस्य स्थाने 'कुतूहलात् इति पदेन' इति पाठः मल्लिनाथेन ..ट इति ।

निर्मर्यादविशीर्यमाणविशिखप्राग्भारशीत्कारिणि
प्राक्रीडत् समरे सपत्नहरिणाक्षीणां हहा हा विधिम् ॥

इह कारणाभिधानरूपाप्रस्तुतप्रशंसानुगृहीतेन काव्यलिङ्गेन सपत्नहरिणाक्षीणां दशा वचनगोचरतामपि नेतुं न शक्यत इति भणिति निषेधेन वक्ष्यमाणविषय आक्षेपालङ्कारो ह हा ह विधमिति द्योत्यते । एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्न-शरीरस्यार्थस्य व्यञ्जकत्वम्

वाक्यप्रकाश्यत्वेन यथा ॥

एतास्ताराः समन्ताद्दिशि दिशि नभसि प्राप्य धाम स्वकीयं
निःसापत्न्यप्रकर्षप्रकटनपटुतां नाटयन्त्यः स्फुरन्तु ।
किं चन्द्रः कुत्र तिष्ठत्ययमियमधुना तस्य वार्तापि लुप्ता
कीर्त्तौ विस्फूर्तिमत्यां शुभचरितनिधेः श्रीनृसिंहस्य राज्ञः ॥

अत्रैतास्ताराः स्फुरन्त्विति विधिरूपेण वस्तुना न स्फुरन्त्विति निषेधरूपं वस्तु व्यज्यते । विधिनिषेधौ हि भावाभावरूपतया विरुद्धाविति न कस्यापि विमतिः । अनयोस्तु वाच्यत्वं तावन्न यौगपद्येन । असम्भवात् । नापि क्रमेण । विरम्य व्यापाराभावात् ।

सङ्घर्षोत्कर्षरिङ्खत्प्लवनकपिकुलोन्मीलितोत्तालशैल-

प्राग्भारैः सेतुबन्धो दशवदनशिरच्छेदनाय व्यधायि ।

पूर्वं तावत् त्वयाऽसौ महति जलनिधौ साम्प्रतं तत्र सेतुं

कं वा जेतुं नृसिंह क्षितिप रचयसि स्वैर्यशश्चन्द्रकान्तैः ॥

अत्र रावणवधाय वारिधौ सेतुस्त्वया बद्ध इत्येवंरूपेण वस्तुना त्वमेव राम इति रूपकं व्यज्यते ॥

व्या०—बाहुरित्यादि । त्वद्बाहुनिसर्गजित्वरस्तत्रापि खड्गग्राही रणे प्रवृत्तः किल, तदा अरिनारीणां विधिं दुर्दशां हा धिक् विधिः किमुच्यते इत्यर्थः । 'अभितः परितः–' इत्यादिना हा शब्दयोगे द्वितीया । अत्र प्रस्तुतारिनारीविधिज्ञानाय तत्कारणभुजमहिमा-भिधानात् अप्रस्तुप्रशंसाभेदे तद्विषयभूतस्य महिम्नो भुजविशेषणानुप्रवेश-नारीदुर्दशाज्ञानहेतुत्वेन पदार्थहेतुककाव्यलिङ्गोत्थापकत्वादनुगृहीतं तदिति तत्सङ्कीर्णकाव्यलिङ्गमिह वाच्योऽलङ्कारः ॥ 'हेतोर्वाक्यपदार्थत्वे काव्य-लिङ्गमुदाहृतम्' । तेनाक्षेपो व्यज्यत इत्यलङ्कारेण अलङ्कारध्वनि-रित्यर्थः । प्रकृतस्योक्तस्य वक्ष्यमाणस्य वा निषेधाभास आक्षेपः । तत्र द्वितीये उक्तनिषेध एव यथा । 'सा नूनमाः किमथवा हतजीवितेन इति । उक्ताः पदगताः ॥

अथ वाक्यगतानपि पूर्ववद्द्वादशभेदान् उदाहर्तुमाह । वाक्य-प्रकाश्यत्वेनेति । ततः स्वतःसिद्धार्थशक्तिमूलेषु वस्तुना वस्तुध्वनि-माह । एता इत्यादि । यत्र चन्द्रोऽपि तत्र स्फुरति न ताराः स्वयं स्फुरन्तु नामेति काक्वा तासां कुतः स्फुरणमिति निषेधो

व्यज्यत इत्याह । अत्रेति । नन्विह विधिनिषेधयोरपि वाच्यत्वं किं न स्यादित्याशङ्क्य तयोः परस्परपरिहारात्मकत्वं तावदाह— विधिनिषेधाविति । ततः किमित्याशङ्क्य नानयोर्युगपत् क्रमाच्च वाच्यत्वमित्याह । अनयोरित्यादिना वस्तुनालङ्कारध्वनिमाह । सङ्घर्षेत्यादि । सङ्घर्षोत्कर्षः स्पर्धातिरेकः तेन रिङ्खत्प्लवनैः प्रवृत्तप्लवैः कपि-कुलैरुन्मीलिता उत्पाटिता उच्चाला उन्नता ये शैलप्राग्भाराः शैलराशयस्तैरित्यर्थः ॥

सू०—पृथ्वीभारावतारं कृतवति भवतो दोष्णि हर्षेण दूतः
शेषेण प्रोषितोऽसौ निवसति भुजगः कोऽपि संवादहेतोः ।
क्रुध्यत्कालीकटाक्षद्युतिदलनकलाकेलिकारस्त्वदीये
पाणौ नायं कृपाणः शुभचरितनिधे श्रीनृसिंह क्षितीन्द्र ॥

अत्र अपह्नुतया सकलैरपि विपक्षैः दुर्निरीक्ष्यस्त्वत्कौक्षेयक इति वस्तु व्यज्यते ।

सेनारजोभिस्तव तिग्मभानु-
राच्छादितोऽसौ नरसिंह देव ।
विरोधिशुद्धान्तमृगेक्षणानां
वक्त्रेन्दुरासीन्मलिनप्रकाशः ॥

इहासङ्गत्यलङ्कारेण ध्वजिनीसमुध्दूतधूलीश्यामलितनभोमण्डला-वलोकनसमकालमेव रिपुभूपाला पलायन्त इत्यतिशयोक्तिरलङ्कारो व्यज्यते । उत समरपराङ्मुखत्वमभजन्त भूभुज इति कार्ये प्रस्तुते रजःपुञ्जपिञ्जरितगगनतलनिभालनानुमितस्याप्रस्तुतस्य सेना-बाहुल्यरूपस्य कारणस्याभिधानादप्रस्तुतप्रशंसा । उतास्मिद्विषा-दाद्यनुभावत्वेनोपनिबद्धाद्विरोधिवधूवदनमालिन्यलक्षणात् कार्यात् प्रस्तुताज्झटति रिपुसुभटरणापसरणादिरूपस्य कारणस्य प्रस्तुतस्यैव प्रतीतेः पर्यायोक्तम् । एषूदाहरणेषु स्वतःसम्भविनोऽर्थस्य व्यञ्जकत्वम् ॥

व्या०—पृथ्वीत्यादि । संवाद एव हेतुस्तस्य; तदर्थमित्यर्थः । 'षष्ठी हेतुप्रयोगे' इति षष्ठी । अत्रापन्हुत्येति । भुजङ्गोऽयं न कृपाण इत्यारोप्यापह्नवरूपयेत्यर्थः । कुक्षौ भवः कौक्षेयकोऽसिः । 'कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु' इति शैषिको ढकञ् प्रत्ययः । सेनेति । अत्र भानौ रजश्छादनं वक्रेन्दोर्मालिन्यमिति कार्यकारणयोः भिन्नदेशत्वरूपोऽयमसङ्गत्यलङ्कारो वाच्यः । तेन बहवोऽलङ्कारा व्यज्यन्त इत्याह । इहासङ्गत्यलङ्कारेणेति । अतिशयोक्तिरिति पलायनावलोक-नयो समकालमेवेत्येककालोक्त्या कार्यकारणपौर्वापर्यवि-ध्वंसनरूपेत्यर्थः । उतेति । अथवेत्यर्थः । निभालनमीक्षणमित्यर्थः । निभालयत ईक्षत इति भट्टमल्लः । अप्रस्तुतप्रशंसेति । कारणकथनात् कार्या-वगमरूपेत्यर्थः । प्रस्तुतकार्योक्त्या प्रस्तुतस्यैव कारणस्य गम्यत्वे पर्यायोक्तम् ॥

मू०—सुराङ्गनाभ्यो मलये त्वदीयं
श्रुत्वा यशो वीर नृसिंह देव ।

जिह्वाञ्चलान्मुल्लयन्ति दुग्ध
मृणाललोभादुभयेऽपि नागाः ॥

अत्र रसनाञ्चलोल्लनरूपेण वस्तुना विशिष्टचैतन्यशून्यानामपि चमत्कारं करोति यशस्त्वदीयमिति वस्तु व्यज्यते ।

वियोगिनो विभ्यति वैरिवीराः
कौतूहलीमश्नुवते चकोराः ।
त्वत्कीर्तिमालोक्य कलिङ्गनाथ
विजृम्भमाणां बहुलेऽपि पक्षे ॥

अत्र वस्तुना भ्रान्तिमदलङ्कारो व्यज्यते ।

उड्डीयमानमनिशं सुरसुन्दरीभि-
र्दानं निशम्य भवतो नरसिंह भूप ॥
म्लानेषु निर्जरतरोर्नवपल्लवेषु
शच्या तवैव यशसा विहितोऽवतंसः ॥

अत्र परिणामेन निरतिशयं तव वितरणमिति वस्तु व्यज्यते ।

पृथ्वी पूर्वापरगिरिघनोत्तुङ्गवक्षोजनम्रा
भूषा बाहोरजनि भवतः श्रीनृसिंह क्षितीन्द्र ।

बाहुश्चास्याः सुरगजकरस्थूलदीर्घः समग्रां
कान्तिं पुष्णात्यघटघटनाचातुरीयं विधातुः ॥

अत्रान्योन्यालङ्कारेणोपमेयोपमा व्यज्यते । एषु कवि-प्रौढोक्तिमात्रनिष्पन्नशरीरस्यार्थस्य व्यञ्जकत्वम् ॥

व्या—अथ कविप्रौढोक्तिसिद्धार्थशक्तिमूलानाह । सुराङ्गनाभ्य इति । दुग्धं क्षीरम् । उभयेऽपि नागाः सर्पा गजाश्च । अत्र वस्तुना वस्तुध्वनिमुद्भावयति । अत्रेति । अत्र नागानां यशसि दुग्धमृणालभ्रान्त्या भ्रान्तिमदलङ्कारः । तेन यशसो दुग्ध-मृणालौपम्यं गम्यत इत्यलङ्कारेणालङ्कारध्वनिश्चास्ति तथापि व्युत्क्रम इति नोद्भावितः । वियोगिन इत्यादि । कुतूहलमेव कौतूहली । चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्रत्ययः । 'षिद्गौरादिभ्यश्च' इति ङीष् । अत्र वस्तुनेति । वियोगिनां चकोराणां च किर्तिविलो-कनहेतुकभयकुतूहलप्राप्तिरूपेणेत्यर्थः । तस्य यशसि चन्द्रिकाभ्रान्ति-निबन्धनत्वात् भ्रान्तिमदलङ्कारव्यञ्जकत्वमित्यर्थः । उड्डीयमानमित्यादि । अत्र यशसावतंसं विहितमिति यशस्यारोप्यमाणस्यावतंसस्य स्वतादात्म्येन प्रसाधकत्वसाधकत्वेन तदुपकारकत्वात्परिणामः । पृथ्वीत्यादि । न घटत इत्यघटो दुर्घटः । पचाद्यजन्तेन नञ् समासः । तस्य घटना । अत्र पृथ्वीबाह्वोरन्योन्यशोभाजनकत्वात् अन्योन्यालङ्कारः तदन्योऽन्यं मिथो यत्रोत्पाद्योत्पादकता भवेत् ।' तेन अनयोरन्योन्य-मेकस्यैव क्रमेणोपमानोपमेयरूपतारूपोपमेयोपमालङ्कारो व्यज्यते । पर्यायेण द्वयोस्तस्मिन्नुपमेयोपमामता' इति ॥

सू०—कस्त्वं भद्र वनेचरः कथय नः कुञ्जं कमप्युद्भट-
ध्वान्तं साध्वसभीदृशं तव कुतो जातं कलिङ्गेश्वरात् ।
गीतैस्तस्य यशोभिरस्ततमसः कुञ्जास्ततः किं मया
कार्यं मा भव कातरः स हि सदा जागर्ति वीरव्रते ॥

अत्र वस्तुना वाक्यार्थरूपेण भीतं पलायितमरण्यव्यासिनं हन्ति किं भवन्तमिति नरसिंहनरपतिविषयमनवरतक्षत्रधर्माचरणप्रवणत्वरूपं वस्तु व्यज्यते ।

युक्ता विपक्षेषु कृपा न कर्तु-
मेते विकुर्वन्ति हि कार्यकाले ।
इत्याहवे वीक्ष्य कलिङ्गनाथं
नाथन्त्यमी प्राञ्जलयः सपत्नाः ॥

अत्र वस्तुना तद्दूषणावसरे न वयं शत्रव इति ध्वन्यते । निषेध एवायमिति किं हृदयम् । न हि न हि । स्वयं शत्रुभिरेव शत्रुत्वनिषेधस्य कृतत्वात् । ततश्च एष निषेधो बाधितः शत्रूणां निर्विकारत्वसततहितकारित्वादिविशेषं व्यनक्तीत्युक्तविषय आक्षेपो व्यज्यते ॥

व्या०—अथ वाक्यगतानेव कविनिबद्धार्थशक्तिमूलांश्चतुरोऽपि भेदानाह । **कस्त्वमित्यादि** । इहाष्टप्रश्नोत्तरवाक्यानि । वीरव्रतमपरावृत्तहननं तत्र जागर्ति । ततो न प्रमाद्यति । अतस्त्वामेष न हन्तीति भाव. । अत्र व्यङ्ग्यव्यञ्जकत्वे विविनक्ति । **अत्र वस्तुनेति** । **वाक्यार्थेनेति** । वीरव्रतजागरणरूपेणेत्यर्थः । हन्ति

किं न हन्त्येव । न भीतं न पलायितम्' इति निषेधादिति भावः । क्षात्रधर्मो धर्मविजयित्वम् । वस्तुना अलङ्कारध्वनिमाह । **युक्तेत्यादि** । आहवे सपत्नाः कलिङ्गनाथं वीक्ष्य स्वामिन् विपक्षेषु कृपा न युक्ता हि यस्मात् ते कार्यकाले विकुर्वन्त्यपकुर्वन्तीति नाथन्ति याचन्त इत्यन्वयार्थौ । अत्र केन वस्तुना कोऽलङ्कारो व्यज्यत इत्याकाङ्क्षायामाह । **अत्र वस्तुनेति** । शत्रवो नानुकम्प्या इति याच्ञारूपवाक्यार्थेनेत्यर्थः । तद्दूषणावसरे एते विकुर्वन्तीति शत्रुदूषणसमय इत्यर्थः । तेन स्वयमेव स्वदूषणायोगादात्मनि शत्रुनिषेधप्रतीतेराक्षेपालङ्कारो व्यङ्ग्य इत्यर्थः । गूढाभिसन्धिः परः पृच्छति । **निषेध एवेति** । मुख्यनिषेध एव किमित्यर्थः । एवकारो निषेधाभासव्यावृत्त्यर्थः । निषेधस्य मुख्यत्वे तदाभासात्मक आक्षेपो न सम्भवतीति भावः । ज्ञातपराभिसन्धिरुत्तरमाह । **न हीति** । न मुख्योऽय निषेध इत्यर्थः । अमुख्यत्वे हेतुमाह । **स्वयमिति** । अग्नावुष्णत्ववत् प्रमाणसिद्धस्यैव शत्रुत्वनिषेधादित्यर्थः । तत किमत आह । **ततश्चेति** । ततश्चोणत्वनिषेधवदाभास इत्यर्थः । निषेधाभासस्य फलमाह । **शत्रूणामिति** । निर्विकारत्वमेते विकुर्वन्तीत्युक्तदोषरहितत्वम् । फलितमाह । **इतीति** । न शत्रवो वयमिति शत्रुत्वानुवादेन निषेधादुक्तविषय आक्षेप इत्यर्थः । उक्तस्य वक्ष्यमाणस्य वा प्रकृतस्य निषेधाभास आक्षेप इत्युक्तम् ।

मू०—प्रागासीन्मकरन्दपिच्छिलतले पद्मस्य गर्भे ततः
शौरेः कौस्तुभकान्तिपूरसुभगाभोगे भुजाभ्यन्तरे ।
आवासस्तव लक्ष्मि सम्प्रति पुनर्निर्व्याजमूर्च्छत्कृपा-
स्रोतः शीतलिते नृसिंहवसुधानाथस्य नेत्राञ्चले ॥

अत्र पर्यायालङ्कारेणोक्तपदप्रासिकृतार्थीकृतात्मनो लक्ष्म्या कलिङ्गेश्वरं प्रति प्रेमातिशयरूपं वस्तु व्यज्यते ।

का त्वं भीरु वधूः प्रसूनधनुषः किं कर्तुमागाः पुनः ॥
स्नातुं कुत्र मुने निसर्गविमले मन्दाकिनीस्रोतसि ।
मा गास्तत्र नृसिंह पार्थिवकरश्लाघासमाकर्णन-
म्लानस्रस्तस्रशीर्णपर्णपटलीपातैः कषायं पयः ॥

अत्रातिशयोक्त्यानितरसाधारणं नृसिंहभूपतिवितरणमिति व्यतिरेको व्यज्यते । एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरस्यार्थस्य व्यञ्जकत्वम् ।

यद्यपि शब्दार्थयोः प्रत्येकं व्यञ्जकत्वमुक्तं तथापि यत्र शब्दस्य व्यञ्जकत्वं तत्र अर्थस्यापि सहकारित्वम् । यत्र पुनरर्थस्य व्यञ्जकत्वं तत्र शब्दस्य ॥

व्या०—अलङ्कारेण वस्तुध्वनिमाह । प्रागिति । व्यङ्ग्यव्यञ्जके विविनक्ति । अत्रेति । पर्यायालङ्कारेणेति । क्रमेणैकस्यानेकाधारवृत्ति रूपेणेत्यर्थः । अलङ्कारेणालङ्कारध्वनिमाह । कात्वमित्यादि । अत्र कस्यचित् मुनेः कामस्य वध्वाश्च प्रश्नोत्तरवाक्यानि पूर्वार्धे षट् । तत्र स्नातुं कुत्रेति चागमनक्रियानुषङ्गात् पृथग्वाक्यद्वयम् । कषायं गन्धदूषितमित्यर्थः । अत्रातिशयोक्त्येति ।

मन्दाकिनीपयसोऽपि विशिष्टदुर्गन्धासम्बन्धेऽपि सम्बन्धोक्तेरसबन्धे सम्बन्ध-रूपयेत्यर्थः । व्यतिरेक इति । उपमानात् कल्पतरोरुपमेयस्य राज्ञ आधिक्यादाधिक्यवर्णनरूप इत्यर्थः ।

ननु शब्दस्य व्यञ्जकत्वेऽर्थस्य वैयर्थ्यं तथार्थस्य व्यञ्जकत्वेऽपि शब्दस्येत्याशङ्क्याह । यद्यपीति । शब्दव्यङ्ग्येष्विति शेषः । सर्वत्र शब्दार्थयोरन्यतरस्य प्राधान्यमन्यस्य तत्सहकारित्वं न तु वैयर्थ्य-मित्यर्थः । उक्ता वाक्यगताः ॥

मू०—प्रबन्धप्रकाश्यत्वेन यथा श्रीमहाभारते गृध्रगोमायु-संवादे–

अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसंकुले ।
कङ्कालबहले घोरे सर्वप्राणिभयङ्करे ॥

न चेह जीवितः कश्चित् कालधर्ममुपागतः
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥

अत्र बन्धुषु निवृत्तेषु ममोपभोगाय भवत्वयं शव इति दिवावलोकिनो गृध्रस्य गोमायुवञ्चनाभिलाषरूपं वस्तु वस्तुनैव प्रबन्धेन व्यज्यते ।

आदित्योऽयंस्थितो मूढाः स्नेहं कुरुत साम्प्रतम् ।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥

अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात् कथं मूढास्त्यजध्वमविशङ्किताः ॥'

अत्रापि रात्रौ ममैवायमुपभोगाय सम्पत्स्यत इति पुरुषव्यावर्तनपरस्य गोमायोर्गृध्रप्रतारणाभिप्रायरूपं वस्तु वस्तुनैव प्रबन्धेन द्योत्यते । एवं अपरेऽप्यर्थशक्तिमूलस्य ध्वनेरेकादशप्रबन्धप्रकाश्यभेदाः प्रबन्धान्तरेषु द्रष्टव्याः ॥

उभयशक्तिमूलानुरणनरूपव्यङ्ग्यस्तु वाक्य एव सम्भवति । यथा—

सच्चक्रनन्दकः श्रीमान् महात्यागदयान्वितः ।
महानुभावः केन त्वं नरसिंह न सेव्यसे ॥

अत्र नरसिंह इव नरसिंह इति वाक्येनोपमालङ्कारो व्यज्यते । अत्र सच्चक्रादौ शब्दशक्तिमूलत्वं महानुभाव इत्यादावर्थशक्तिमूलत्वम् । एषां ध्वनिभेदानामङ्गाङ्गीभावेन सन्देहेनैकव्यञ्जकानुप्रवेशेन च सङ्करस्त्रिविधो भवति संसृष्टिस्त्वेकविधैव ॥

इति श्रीमतो महामहेश्वरस्य कवेर्विद्याधरस्य
कृतावेकावलीनाम्न्यलङ्कारशास्त्रे ध्वनिभेदनिरूपणं नाम
तृतीय उन्मेषः ॥

व्या०—अथ प्रबन्धगतार्थशक्तिमूलानपि वक्तुमाह । प्रबन्धेति । तत्रापि स्वतः सिद्धार्थशक्तिमूलेषु वस्तुना वस्तुध्वनिमाह । अलमिति । वस्तुनैवेति । प्रबन्धार्थरूपेणेत्यर्थः । भेदान्तराणि त्वेकादशापि प्रबन्धगतानि स्वयमूह्यानि । विस्तरभयान्नोदाह्रियन्त इत्याह । एवमपरेऽपीति ॥

अथोभयशक्तिमूलध्वनेः स्वरूपमुदाहरणं चाह । उभयेत्यादि । यत्रोभाभ्यां शब्दार्थशक्तिभ्यामेकोऽर्थो व्यज्यते स उभयशक्तिमूलानुरणन-व्यङ्ग्याख्यो ध्वनिरित्यर्थः । स च वाक्यगत एव न पदगतः प्रबन्धगतो वा । असम्भवादित्यर्थः । सच्चक्रेति । हे नरसिंह नरसिंह भूप सच्चक्रस्य साधुजनमण्डलस्य नन्दक आनन्दकरः । मह उत्सवः त्यागो वितरणं दया कृपा ताभिरन्वितः । महान् अवाङ्मनसगोचरोऽनुभावः क्षात्रशक्तिर्यस्य स त्वं केन न सेव्यसे । राज्ञामपि सेव्य इति वाच्याऽर्थः । व्यङ्ग्यस्तु हे नरसिंह भगवन् नृसिंहावतार सच्चक्रं सुदर्शनं नन्दकः नन्दकनामा खड्गः ते यस्य सः । श्रीर्मा तया समेतः । महानुभावोऽचिन्त्यमहिमा त्वं केन न सेव्यसे सर्वलोकाराध्योऽसीत्यर्थः । वाक्यस्यासङ्गतार्थत्वं परिहरति । अत्र नरसिंह इवेति औपम्यपर्यवसितार्थ व्यञ्जकत्वान्ना-सङ्गतार्थत्वमित्यर्थः । सङ्करसंसृष्टिप्रयुक्तान्तरभेदास्तु ग्रन्थान्तरे द्रष्टव्या इत्याशयेनाह । एषामिति ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीण-
श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
तरलाख्यायामेकावलीव्याख्यायां ध्वनिभेदनिरूपणं नाम
तृतीय उन्मेषः

अथ चतुर्थः उन्मेषः

मू०—तरुणीकुचमण्डलमिव गूढं यस्माच्चमत्कुरुते ।
वाच्यायमानमस्माद् व्यङ्ग्यमगूढं गुणीभूतम् ॥

यथा—

गण्डैरस्थिरपत्रखण्डरचनैः कर्णैरतालीदलैः
अङ्गैरच्छुरिताङ्गरागपरुषैर्नेत्रैरदत्ताञ्जनैः ।
वक्षोजैरनुपात्तमौक्तिकसरैः शंसन्ति ते पौरुषं
निःसीमं नरसिंहदेव भुवने प्रत्यर्थिवामभ्रुवः ॥

अत्र शंसनस्यात्यन्ततिरस्कृतवाच्यस्यातिप्रसिद्धत्वात् अगूढत्वम् ॥

व्या०—उक्ता उत्तमकाव्यस्य ध्वनेर्भेदाः । अथ मध्यमकाव्यस्य गुणीभूतव्यङ्ग्यस्य भेदा उच्यन्ते । ते चाष्टावगूढादयः । तदुक्तं काव्यप्रकाशे ।

'अगूढमपरस्याङ्गं वाच्यसिध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्यं काक्वाक्षिप्तमसुन्दरम् ॥

व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः ॥ इति ।

तत्राद्यं निरूपयति । तरुणीति । 'सर्वमभ्यर्हितद्रव्यं प्रच्छादनमपेक्षते' इति न्यायेन व्यङ्ग्यमङ्गनास्तनमण्डलवद्गूढमेव प्रियं सच्चमत्कुरुतेतरामिति गूढमेव प्रधानं ध्वनिरिति च व्यपदिश्यते । अगूढं

तु प्रविद्धत्वाद्वाच्यवत् । प्रकाशमानतया न तथा चमत्करोतीति गुणीभूतमित्यर्थः । के पुनरिमे गूढत्वागूढत्वे । उच्येदे । इह व्यङ्ग्यस्य द्रुतविलम्बितमध्यभेदेन त्रेधा प्रतीतिः । तत्र यद् द्रुतं प्रतीयते तदगूढं यद्विलम्बितं तदस्फुटं यन्मध्यं तद्गूढमिति विवेकः । उदाहरति । गण्डैरिति । पौरुषं शंसन्ति ज्ञापयन्तीत्यर्थः । शंसिद्धात्वर्थस्य कथनस्यासम्भवात् तत्कार्यं ज्ञापनमात्रं लक्ष्यते तेन प्रत्यर्थित्वं व्यज्यते । एवं स्थिते सत्याह । अत्र शंसनस्येति । शंसनव्यङ्ग्यस्य प्रत्यर्थिपदरूपस्येत्यर्थः । तस्यात्यन्ततिरस्कृतवाच्यत्वं जहल्लक्षणामूलत्वात् । तस्य प्रसिध्या प्रयोगप्राचुर्येण वाच्य(च्याय)मानतया द्रुतप्रतीतेरगूथमित्यर्थः ॥

मू०—वाच्यस्य रसादेर्वा वाक्यार्थस्यापरस्य यत्राङ्गम् ।
व्यङ्ग्यं भवति तदेतत्तज्ज्ञैरपराङ्गमाख्यातम् ॥२॥

यत्रानुरणनरूपं व्यङ्ग्यं वाक्यार्थीभूतस्य वाच्यस्यापरस्याङ्गं तादृशस्य रसादेरपरस्यापरं रसादि वाङ्गम् ॥

क्रमेण यथा–

तत्तद्वीर नृसिंह भूप भवतो दानापदानं मुहुः
श्रुत्वा सिद्धपुरन्ध्रिगीतरचनाशिल्पेषु कल्पद्रुमः ।

नाश्लिष्टो लतया न पल्लवपुटैः पुष्णाति रागोद्गमं
पुष्पैर्नोद्गिरति स्मितं मधुकरध्वानैर्न चाभाषते ॥

अत्र समासोक्तिस्तावदलङ्कारः । तत्र च प्रतीयमानेना-

नुगतस्य वाच्यस्य प्राधान्येनाङ्गित्वम् । आरोपितनायिका-नायकमिथुनधर्मयोर्लताकल्पद्रमयोरेव वाक्यार्थत्वात् ॥

व्या०—अपराङ्गस्यं द्वितीयभेदमाह । वाच्यस्येति । अपराङ्गमित्यत्रापरशब्देनाङ्गयमिधीयते । स चेह वाक्यार्थीभूतो रसादेरन्यो वाच्यो रसादिर्वा तथाभूत इति द्विविधः । अङ्गं च व्यङ्ग्यत्वं(ङ्ग्यं) द्विविधमुरणनरूपं रसादिश्च तयोस्ताभ्यमङ्गिभ्यां यथासंख्यं सम्बन्धे द्विविधपराङ्गमिति संग्रहार्थं व्याचष्टे– यत्रेति । तादृशस्य वाक्यार्थीभूतस्येत्यर्थः । तत्राद्यभेदोदाहरणं– तत्तदिति । दानापदानं दानाद्भुतम् । गीतरचनाशिल्पेषु गीतप्रबन्धनिर्माणे इत्यर्थः । व्यङ्ग्यं तावदत्र सम्भावयति । अत्रेति । प्रस्तुतविशेषणसाम्यात् अप्रस्तुतस्य गम्यत्वे समासोक्तिस्ततोऽस्ति व्यङ्ग्यमिति भावः। तस्यापराङ्गत्वं व्यनक्ति । तत्र चेति । नायकमिथुनरूपस्य प्रतीयमानस्य वाक्यार्थी-भूतलताकल्पद्रुमवाच्यस्योपस्कारत्वात् तदङ्गत्वमिर्थः । मिथुनधर्म आश्लिष्टत्वादिः ॥

मू०—यथा वा

नरसिंह देव न वयं कवयो नास्माकमीदृशो धर्मः ।
एष वचसां विलासः केवलमुपहारकुसुमतां व्रजतु ॥

अत्रोक्तस्य कवित्वरूपस्य वस्तुनो निषेधः कृतः सन्नत्र राजनि सर्वेषामपि गुणानां विद्यमानत्वात् अधिकगुणारोपणा-सम्भवान्निरतिशयनरसिंहनरमतिगुणानुवादमात्रपर्यवसायि काव्यमिद-मिति कमपि विशेषमभिव्यनक्ति । स च वाच्यस्यैवोपस्कुरुत इति वाच्याङ्गमेवैतत् ॥

व्या०—अत्रैवोदाहरणान्तरमाह । **नरसिंहेति** । अत्राङ्गाङ्गिनौ विविनक्ति । **अत्रोक्तस्येति** । एतेनोक्तवस्तुविषय आक्षेपालङ्कारभेदोऽयमित्युक्तम् । अधिकगुणारोपणासम्भवादित्यर्थः । इत्येवंरूपं विशेषमित्यन्वयः । स च विशेषो वाच्यस्य पूर्वोक्तनिषेधाभासरूपस्येत्यर्थः । वाक्यार्थीभूतस्येति शेषः । तदुपस्कारत्वेन तच्छेषात्तदङ्गमित्यर्थः ॥

मू०—यथा वा

ब्रूमः किं पद्मनाभं वसति यदुदरे विश्वमेतत्समस्तं
किं वा नागाधिराजं स्वपिति सुखमसौ यत्र लक्ष्म्या समेतः ।
किं वा चन्द्रार्धचूडं यदुपरि भजते सोऽपि हारस्य लक्ष्मी-
माधत्ते सोऽपि चित्ते तव वसति रुचिं गाङ्गवंशावतंस ॥

अत्र प्रभुविषयस्य रतिभावस्याङ्गमद्भुतः ।

स्तोतव्यस्तिग्मरोचिस्त्रिभुवनभवनप्राङ्गणं लङ्घते यः
चक्षुर्यस्यायमासीत् स भवति जगति श्लाघनीयो मुकुंदः ।
देवः सोऽप्येष यस्याः कलयति कुचयोश्चूचुकाद्वैतलक्ष्मीं
लक्ष्मीं श्रीमन्नृसिंह क्षितिप रमयते तामपि त्वत्कटाक्षः ॥

अत्र तिग्मरोचिःप्रभृतिविषयो रत्याख्यो भावः प्रभुविषयस्य रतिभावस्याङ्गम् ।

त्वत्प्रत्यर्थिवसुन्धरेश्वरमणीः सन्त्रासतः सत्वरं
यान्तीर्वीर विलुण्ठितुं सरभसा याताः किराता वने ।

तिष्ठन्ति स्तिमिताः प्ररूढपुलकास्ते विस्तितोपक्रमा-
स्तासामुत्तरलैः स्तनैरतितरां लोलैरपाङ्गैरपि ॥

अत्र रसाभासः प्रस्तुविभयस्याङ्गम् ॥

व्या०—अथ रसाद्यपराङ्गमष्टविधं च क्रमेणोदाहर्तुमाह । यथा वेत्यादि । तत्र रसमपराङ्गमुदाहरति । ब्रूम इत्यादि । वसतिरर्चि निवासेच्छाम् । अत्राङ्गाङ्गिनौ विविनक्ति । अत्रेति । अद्भुतवस्तुदर्शनोत्थोऽद्भुतरसोऽङ्गमित्यर्थः । यद्यपीह रसभावादीनामष्टा-नामप्यनियमेन मिथोङ्गाङ्गिभावो भवति तथापि चाटुषु कविभावस्यैव प्रायशः प्राधान्यात् तस्यैव सर्वत्राङ्गित्वं निबद्धमित्यनुसन्धेयम् । अत्र रसाभास इति । अनौचित्यप्रवृत्तत्वादिति भावः ॥

सू०— त्वयि लोचनगोचरं गते
सफलं जन्म नृसिंह भूपते ।
अजनिष्ट ममेति सादरं
युधि विज्ञापयति द्विषां गणः ॥

अत्र भावाभासः प्रस्तुविषयस्य रतिभावस्य रतिभावस्य अङ्गम् ।

नृसिंह भवतो दानं निशम्य निभृतेक्षणाः ।
विन्नस्तहस्ताः कान्तारेष्वासते राजकुञ्जराः ॥

अत्र मदाख्यस्य भावस्य शान्तिरङ्गं प्रस्तुविषयस्य रतिभावस्य ।

समालोक्यालेख्यस्थितमपि मृगाक्ष्यः फणभृतं
प्रकम्पन्ते धैर्यं त्वदरितरुणीनां त्वनुपमम् ।
यदेतास्त्वद्धाटद्यामधिरजनि यान्त्यः फणभृतां
फणारत्नं हस्तैः पिदधति दृढं वीर विपिने ॥

इह रिपुभूदालभामिनीभयरूपस्य भावस्योदयो नरसिंहनरपति विषयस्य रतिभावस्याङ्गम् ॥

व्या०—त्वदीत्यादि । अत्र शरणार्थिनां द्विषां नरसिंहदर्शनोत्थहर्षस्त्वयीत्यादिना वागारम्भेण व्यज्यते । स च वीरधर्म इत्यनौचित्यप्रवृत्तत्वादेव भावाभासः पूर्ववदङ्गमित्याह । अत्र भावाभास इति । नृसिंहेत्यादि । दानं खण्डनं मदश्च । राजान एव कुञ्जरा इति रूपकसमासः । दानादिलिङ्गात् । निभृतेक्षणा निश्चलाक्षाः । विस्रस्तहस्ता विहस्ताश्चिन्तानिर्वेदाभ्यामिति भावः । एतेनमदक्षयो व्यज्यते । स च पूर्ववदङ्गमित्यर्थः । यान्त्यो धावनयः ॥

मू०—एकाभूत् कुसुमायुधेषुधिरिव प्रव्यक्तपुङ्खावलि-
र्जातं मङ्गलपालिकेव पुलकैरन्या कपोलस्थली ।
लोलाक्षीं क्षणमात्रभाविविरह क्लेशासहां पश्यतो
द्रागाकर्णयतश्च वीर भवतः प्रौढाहवाडम्बरम् ॥

अत्र लोलाक्षीप्रेमसमरौत्सुक्ययोः सन्धिः प्रभुविषयस्य रतिभावस्याङ्गतया स्थितः ।

सौभाग्यं तस्य चित्रं तदधि चपलता कापि मद्वीरलक्ष्म्याः
पश्यत्सु श्लाघते या रणभुवि नृपतिष्वद्भुतं तद्भुजाय ।
धिग्धातुः प्रातिकूल्यं मयिबलमतुलं तस्य कस्य ब्रवीमी-
त्याचक्षाणो विरोधी श्रयति गिरिवनं श्रीनृसिंह क्षितीन्द्र ॥

अत्र स्मृतिनिर्वेदचिन्तानां शबलतापूर्ववदङ्गम् । एत एव रसवदादयोऽलङ्काराः ॥

व्या०—भावसन्धिमाह । एकेति । एका भवतः कपोलस्थलीत्यन्वयः । मङ्गलपालिला मङ्गलार्थमंकुरपात्रम् । द्वयोस्तुल्यबलयोर्विरुद्धयोर्भावयोः समावेशः सन्धिः । बहूनां पूर्व पूर्वोपमर्देन समावेशः शबलता । तां चाह । सौभाग्यमिति । सौभाग्यं सौन्दर्यं चित्रमद्भुतं तत्तस्मादधिचपलताधिकचापलम् । नृपतिषु पश्यत्सु पश्यतो नृपतीननादृत्येत्यर्थः । "षष्ठीचानादरे" इति चकारात् सप्तमी । भुजाय श्लाघते भुजमभिलषतीत्यर्थः । "श्लाघह्नुङ्—" इत्यादिना सम्प्रदानत्वाच्चतुर्थी । अत्रेति । रणात् पलायमानस्य शत्रोरिमे स्मृत्यादयश्चत्वारो भावाः क्रमात् सौभाग्यभुजश्लाघनादैवनिन्दाबलप्रशंसावाक्येषु व्यज्यन्ते । तेषां शबलता पूर्ववत् कविभावस्याङ्गमित्यर्थः । नन्वेवं रसादीनां प्राधान्ये ध्वनित्वमप्राधान्ये गुणीभूतव्यङ्ग्यत्वमेवं च सति रसवदाद्यलङ्काराणां कोऽवकाश इत्याशङ्क्याह । एवं चेति । गुणीभूता एवेत्यर्थः । तथा च सर्वस्वकारः सूत्रयाञ्च-

कार । 'रसभावतदाभासभावप्रशमानां निबन्धे रसवत् प्रेयऊर्जस्विसमाहितानि भावोदयभावसन्धिभावशबलताश्च पृथगलङ्कारा:' इति । रसस्याङ्गत्वेन निबन्धे रसवान् । भावस्याङ्गत्वे प्रेयोलङ्कार: । तदाभासत्वे ऊर्जस्वी । भावप्रशमनस्याङ्गत्वे समाहितम् । भावोदयादीनां तथा निबन्धने तु तन्नामकास्त्रय: पृथगलङ्कारा इति सूत्रार्थ: ॥

मू०—वाच्यस्य सिद्धिहेतुं कृतिन: कथयन्ति वाच्यसिध्यङ्गम् ।

पत्रावलीकवलनान्यरिभूमिपाल-
लीलावतीस्तनतटेष्वलमादधाना ।
गङ्गातरङ्गधवलानि यश: पयांसि
दुग्धे धरातिलक वीर तवासिधेनु: ॥

अत्रासिधेनोर्धेनुत्वं व्यङ्ग्यं यशस: क्षीरत्वरूपकलक्षणस्य वाच्यस्य सिद्धिमादधाति ।

यथा वा

धाराविषं त्वदसिकालभुजङ्गमस्य
दृष्ट्वा सुदु:सहतरं समरे नरेन्द्रा: ।
मूर्च्छां भजन्ति नरसिंह वसुन्धरेश
किञ्चोद्वहन्ति वपुराश्रितवर्णभेदम् ॥

अत्र धाराविषमिति विषशब्देन सलिलमभिधीयते । तस्यैव वाक्यार्थत्वात् । न तावदिदं श्लिष्टशब्दनिबन्धनं पर-

म्पादितम् । विषशब्दादाविर्भवन्त्या गरलार्थप्रतीतेः प्राक् कृपाणस्य फणित्वरूपणासिद्धेः । अत्र हि प्रकरणादिनाभिधाम्भसि नियमिता । अम्भस्तु कृपाण एव सम्भवति न भुजङ्गमे । तस्मादम्भःसम्भव एव रूपके बाधकं प्रमाणम् । नाप्युपमा । भुजङ्गमेभ्यःसम्भवाभावेन साधर्म्याभावात् । विषशब्दस्य श्लिष्टत्वेन साधर्म्यमस्त्येवेति चेत् ; तर्हि श्लेषः कारणमुपमाया इति वाच्यम् । तच्च विचारविकलम् ॥ कृपाणस्य वाक्यार्थत्वेऽम्भस्यभिधानियमनेन श्लेषस्यैवानुदयात् । तस्माद्विषशब्देन शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यमहिम्ना गरलं व्यङ्ग्यं कृपाणभुजङ्गमस्येति रूपकस्य वाच्यस्य सिद्धिं करोतीति वाच्यसिध्यङ्गम् ॥

व्या०—तृतीय भेदं लक्षयति । वाच्यस्येति । यद्विना वाच्यं न सिध्यति तद्वाच्यसिध्यङ्गमित्यर्थः । अत एवार्थस्य द्रव्यदेवतादिवत् करणशरीरनिवर्तकतया सन्निपत्योपकारकाङ्गस्य वाच्योपस्कारमात्रकारितया प्रयाजादिवदारादुपकारकादपराङ्गाद्भेदः । पत्रावलीत्यादि । पत्रावलीकवलनानि मकरिकापत्रलुण्ठनानि पर्णपुञ्जग्रसनकानि च स्तनतटेषु गिरिप्रस्थेष्विति च प्रतीयते आदधाना कुर्वाणा । पयांसि क्षीराणि । असिधेनुश्छुरिका । 'छुरिका चासिधेनुका' इत्यमरः । लक्षणार्थमत्र दर्शयति । अत्रेति । वाच्यव्यङ्ग्ययोरसिधेन्वोरभेदाध्यवसानादिति भावः । विषयविशेषे किञ्चिन्मीमांसितुमुदाहरणान्तरमाह । धारेत्यादि । धारा शस्त्रमुखं जलसन्त-

तिश्च । विषं तोयं गरलं च गम्यते । धाराखाग्राम्बुसन्तयोर्विषं गरलतोययोः' इत्यभिधानात् । असिरेव कालभुजङ्गमः कृष्णसर्प इति रूपकम् । नरेन्द्रा राजानो विषवैद्याश्च । 'नरेन्द्रो विषवैद्येऽपि' इति वैजयन्ती । मूर्च्छा बाह्यान्तःकरणानां शक्तिविघातः । वर्णभेदो वैवर्ण्यम् । नरेन्द्राणामपि तत्रापि दर्शनादेव विषवेगाविर्भाव इति विरोधश्च ध्वन्यते । अत्रासिकालभुजङ्गस्य धाराविषमित्यत्र चतुर्धा संशयः । किं विद्वन्मानसेत्यादिवच्छ्लिष्टपरम्परितरूपकम् । किं वा श्लेषवशादेव सविषत्वसाधर्म्यात् कालभुजङ्गम इवासिरित्युपमितसमासाश्रयणादुपमा । आहोस्विन्निरवकाशतया सर्वालङ्कारसङ्कोचको मूर्च्छादिकार्यविशेषोत्थापितगरलार्थप्रतिभोल्लासितो विषमिति श्लेष एव तन्निर्वाहकतया तु तदङ्गमसिभुजङ्ग इति रूपकम् । यद्वा विषपदव्यङ्ग्येन गरलेनासिभुजङ्गमस्येति वाच्यरूपकसिद्धेर्वाच्यसिध्यङ्ग नाम गुणीभूतव्यङ्ग्यभेद इति । तत्र व्यङ्ग्यपक्षं सिद्धान्तयिष्यन् तदुपयोगितया विषपदस्येह वाच्यार्थं तावदाह । **अत्र धारेति** । गरलं तु व्यङ्ग्यमिति भावः । सलिलार्थत्वे हेतुमाह । **तस्यैवेति** । प्रकरणादिना तस्यैव वाक्यार्थान्वयित्वादित्यर्थः । ननु व्यङ्ग्यपक्षे वृत्तिद्वयाश्रयणं गरीयः । अतोऽभिधैकमूलश्लिष्टपरम्परितरूपकाश्रयणमेव श्रेय इति प्रथमं पूर्वपक्षमुत्थाप्य निराचष्टे— **न तादिति** । रूपकहेतुकं रूपकं परम्परितरूपकम् । युक्तिमाह— **विषशब्दादिति** । विषमेव विषमिति श्लिष्टरूपकादित्यर्थः । यथा विद्वन्मानसेत्यत्र तवर्ण्यस्य प्रभोर्हंसत्वरूपणं मानसमेव मानसमिति श्लिष्टरूपकहेतुकं तद्वदसेः फणित्वरूपणं विषमेव विषमिति श्लिष्टरूपकहेतुकं न भवति । ततः प्रागेव

भीषणत्वादिनापि तत्सिद्धेरित्याह– प्रागिति । एतेन साधकप्रमाणाभाव उक्तः । अथ बाधकं प्रमाणं वक्तुमाह– अत्र हीति । तर्ह्युभयोरम्भस्त्वनिमित्तमेवास्तु रूपकमितीमां शङ्कां परिहरति –अम्भस्त्विति । ननु कृपाणेऽपि कुतोऽम्भःसम्भव इति चेद्धाराद्वारेति ब्रूमः । धाराशब्दवाच्यशस्त्रमुखे प्रतीयमानसलिलसम्पत्त्यभेदाध्यवसायेन अम्भःसामान्यसम्भवादिति । फलितमाह– तस्मादिति । रूपके श्लिष्टपरम्परितरूपकेऽम्भसः प्रकरणादिना गरलाभिधानिवारकत्वेन तत्सम्भव एव बाधकमित्यर्थः । द्वितीयं पक्षं परिहरति– नाप्युपमेति । भुजङ्गमेऽम्भःसम्भावनेत्युपलक्षणं करवाले गरलाभावाच्चेति द्रष्टव्यम् । ननु श्लेषमहिम्ना सविषत्वं साधर्म्यमुपमाप्रयोजकमस्तीति शङ्कते । विषशब्दस्येति । यत्र श्लेष एव न सम्भवति कुतस्तत्र तन्मूलसाधर्म्यसम्भावनेति परिहरति– तर्हीति । वाक्यार्थत्वे इति प्राकरणिकत्वकथनम् । अम्भसि धाराम्भसीत्यर्थः । अत एव यः केवलश्लेष एवायमिति तृतीयः पक्षः स खुरक्षेपादेवाहत इत्याशयेन तुरीयो व्यङ्ग्यपक्ष एवेति निगमयति । तस्मादिति ॥

मू०—यत्र न सदपि व्यङ्ग्यं स्फुटतां भजते तदस्फुटाभिख्यम् ॥३॥

नृसिंह भूप भवतः संख्यामत्सरिणो गुणाः ।
त्रिविक्रमपदैरेव मितमेतज्जगत्त्रयम् ॥

अत्र यद्यप्यनन्तानां गुणानां त्रिविक्रमपदत्रयमिते जगति समावेशो न घटत इत्यस्ति व्यङ्ग्यं तथापि झटिति न

प्रतिभासत इत्यस्फुटम् ॥

व्या०—अस्फुटव्यङ्ग्याख्यं भेदान्तरमाह। यत्रेति। झटिति न प्रतिभासत इति। किन्तु विलम्बतः प्रतिभासते अतोऽस्फुट-व्यङ्ग्यमेतदित्यर्थः।

मू०—यदि वाच्यं व्यङ्ग्यं वा मुख्यतया निश्चितं न भवेत्।
सन्दिग्धप्राधान्यं तत्तु सुधीभिर्विनिर्दिष्टम् ॥

त्वामारूढं मदगजपतिस्कन्धमाधूतखड्ग-
च्छायाविद्युद्वलयितभुजं वीक्ष्य युद्धे नृसिंह।

दूरोदञ्चत्पुलकपटलीवर्मिताङ्गस्तुरङ्गे
दत्ते दृष्टिं विदितरभसे न्यक्कृतेभः सपत्नः ॥

अत्र वेगवत्तरतुरङ्गावलोकनेन किं पलायितुमचक्रमतेति व्यङ्ग्यं प्रधानं किं वा 'दत्ते दृष्टिं तुरङ्गे' इति भयानुभावरूपं वाच्यं प्रधानमिति सन्दिग्धम्।

व्या०—सन्दिग्धतुल्यप्राधान्ये इत्यत्र सन्दिग्धप्राधान्यं तुल्य-प्राधान्यं चेति द्वौ भेदौ विवक्षितौ। तत्राद्यं लक्षयति— यदीति। मुख्यतया प्रधानतयेत्यर्थः। सन्दिग्धंप्राधान्यं यत्र तत्तथोक्तम्। त्वमित्यादि। छाया लोहभासः ताभिरेव विद्युद्भिर्वलयितः सञ्जात-

वलयौ भुजौ यस्य तम् । पुलकपटलीवर्मिताङ्गत्वं नृसिंहवीक्षणात् पूर्वं रणोत्साहात् पश्चात्तु भयादित्यनुसन्धेयम् । विदितरभसे प्रसिद्धवेगे ।

अचकमतेति । अकामयतेत्यर्थः । कर्मणि ङित्वादात्मनेपदम् । लुङि 'णिश्री'— इत्यादिना च्लेश्चङादेशः ॥

मू०—यस्मिन्ननयोः साम्यं तुल्यप्राधान्यमिष्यते तदिदम् ।
अस्पृष्टाञ्जनसम्पदः स्मृतिपथावस्थायिलीलास्मिताः ।

प्रत्याख्यातवतंसदामरचनास्त्यक्ताङ्गरागश्रियः ।
दूरोध्दूतकुरङ्गनाभिमकरीभङ्गास्तरङ्गभृवः ।

सञ्जाता नरसिंह पार्थिव भवत्प्रत्यर्थिपृथ्वीभुजाम् ॥

अत्र रिपुनृपकान्ताकर्तृकस्याञ्जनस्पर्शाभावरूपस्य कार्यस्य वाच्यस्यारिनरपतिमरणरूपस्य कारणस्य व्यङ्ग्यस्य च समं प्राधान्यम् ॥

व्या०—तुल्यप्राधान्यं लक्षयति— यस्मिन्निति । अनयोर्वाच्यव्यङ्ग्ययोः । साम्यं समप्रधानत्वम् । निश्चितमिति शेषः । तुल्यं तुल्यत्वेन निश्चितं प्राधान्यं यत्र तथोक्तम् । अस्पृष्टेति । अत्र पर्यायोक्तमलङ्कारः तत्राञ्जनादिपरिहाररूपं प्रस्तुतं कार्यं वाच्यं तत्कारणं प्रस्तुतमेव भर्तृमरणं व्यङ्ग्यं तयोश्चमत्कारसाम्यात् समप्राधान्यमित्याह— अत्रेति ॥

मू०—आक्षिप्तं यत् काक्वा काक्वाक्षिप्तं तदाख्यातम् ॥

सर्वार्थिनामर्थितपूरणार्थं
परिस्फुरत्त्यागमहोत्सवेऽत्र

त्वयि स्थिते वीर नृसिंह भूप
न लज्जते सम्प्रति पारिजातः ॥

अत्र लज्जत एवेति व्यङ्ग्यं वाच्यनिषेधसहभावेन स्थितम् ॥

व्या०—काक्वाक्षिप्तं लक्षयति— आक्षिप्तमिति । काकुः स्वरविकारः । सर्वेत्यादि । इह न लज्जत इत्यत्र न लज्जते किमिति काक्वा लज्जत एवेति व्यज्यत इत्याह— अत्रेति । तस्य गुणीभावे हेतुमाह— वाच्येति । वाच्यो यो निषेधः काकुयुक्तस्तत्सहभावेन चमत्करणे तदनुगामितया स्थितं न तु स्वातन्त्र्येणेत्यर्थः ॥

मू०—यद्भजति न सौन्दर्यं तदसुन्दरमीरितं सद्भिः ।
इत्थममुष्य भिदाष्टकमुट्टङ्कितमेतदस्माभिः ॥

अयज्ञः स्वर्लोकः सुकृतमतपः क्लेशसुभगं
सुधासारोऽनभ्रः फलमकुसमश्रीसहचरम् ।

अशौर्यं साम्राज्यं निधिरखननायाससुलभो
नृसिंह क्षोणींद्रो नयनपथमस्माकमगमत् ॥

इह निरतिशयसुखजनकत्वरूपं कारणं व्यङ्ग्यं सदपि न सौन्दर्यमावहति ।

उत्तिष्ठ कन्दखननाय गृहाण चापं
गाहस्व काननमिति प्रहितोऽपि वध्वा ।
आकारितोऽपि सहकेलिसखैः किरातै-
रद्रेर्न वीर विजहाति दरीमरिस्ते ॥

अत्र त्वच्चापविलसितस्मरणजनितं भयमात्रं प्रतीयते । तस्य किमपि सौन्दर्यं न प्रतिभासत इत्यसुन्दरम् ॥

इति श्रीमतो महामहेश्वरस्य कवेर्विद्याधरस्यकृता-
वेकावलीनाम्न्यलङ्कारशास्त्रे गुणीभूतव्यङ्ग्यनिरूपणं नाम
चतुर्थ उन्मेषः

व्या०—अष्टमं भेदमाचष्टे । यदिति । यत् सदपि न हृद्यं तदसुन्दरमित्यर्थः । अयज्ञ इति । नृसिंह नृपतिसाक्षात्कारो ऽयमयज्ञस्वर्गादितुल्य इत्यर्थः । तत्रायज्ञ इति यज्ञनिषेधात् तत्कारणं निरतिशयसुखजनकत्वं व्यज्यते तच्च वाच्यान्नातिरिच्यते चमत्क्रियये-त्यसुन्दरमित्याह– इहेति । अत्रैवोदाहरणान्तरमाह– उत्तिष्ठेति । आकारित आहूतः । सुगममन्यत् । एषां च भेदानां ध्वनिभेदवदन्योन्यसङ्करसंसृष्टी द्रष्टव्ये । तथा ध्वनेरपि स्वभे-दैर्गुणीभूतव्यङ्ग्यभेदैरलङ्कारव्यङ्ग्यभेदैश्च सह सम्भेदः पुनर्भूयात् । प्रपञ्चादुक्तं ध्वनिकारेण ।

'सगुणीभूतव्यङ्गैः सालङ्कारैः सह प्रभेदैः स्वैः ।
संकरसंसृष्टिभ्यां पुनरप्युद्योतते बहुधा ॥' इति

इति पदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्याय
कोलाचलमल्लिनाथसूरिविरचितायां
एकावलीव्याख्यायां तरलाख्यायां गुणीभूतव्यङ्ग्यनिरूपणं नाम
चतुर्थ उन्मेषः ।

अथ पञ्चम उन्मेषः

मू० अङ्गिनि रसे स्थिता ये विभ्रत्युत्कर्षहेतुतां सततम् ।
आत्मनि शौर्यादय इव ते नाम्नैते गुणाः कथिताः ॥१॥

आत्मनि शौर्यादय इव समवायवृत्त्याङ्गिनि रसे स्थिताः सन्त उत्कर्षहेतवो भवन्ति माधुर्यादयो गुणाः । अलङ्कारास्तु हारादय इव कण्ठादीनां संयोगवृत्त्या वाच्यवाचकरूपाणामङ्गाना मतिशयमादधाना रसमुपकुर्वन्ति । अत एव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते । यथा प्रांशुतममवलोक्याशूरेऽपि शूरोऽयमिति शूरत्वबुद्धिं विदधत्यविश्रान्तबुद्धयस्तथा मधुरादिरसधर्मव्यञ्जकत्वदर्शनात् सुकुमारेषु वर्णेष्वपि माधुर्यादि व्यवहरन्ति ।

वस्तुतस्तु रसस्य धर्मा गुणाः । गुणालङ्काराणां समवायवृत्त्या स्थितिरिति गड्डुरिकाप्रवाहेण ॥

व्या०—तदेवं उत्तममध्यमकाव्यनिरूपणानन्तरं यदव्यङ्ग्यं चित्राख्यमधमकाव्यं तन्निरूपणं प्राप्तावसरमपि काव्यगडुत्वान्नातीवोपयुज्यते, यावदुपयुज्यते तावदलङ्कारप्रस्तावे भविष्यतीति आशयेनोपेक्ष्य सम्प्रति काव्यात्मनिरूपणानन्तरं तद्धर्मनिरूपणमेव सङ्गतमित्यभिप्रेत्य गुणान्निरूपयंस्तेषां सामान्यलक्षणं तावदाह । अङ्गिनीति । ननूत्कर्षहेतुत्वमलङ्कारेष्वतिव्याप्तमित्याशङ्क्य व्याचष्टे । आमत्नीति । अलङ्कारास्तु नैवमित्याह । अलङ्कारास्त्विति । काव्यात्मरससमवेतास्तदुत्कर्षहेतवो धर्मा गुणाः, काव्याङ्गसंयुक्तास्तदुत्कर्षहेतवोऽलङ्कारा इति भेद इत्यर्थः वाच्यवाचकरूपाणां शब्दार्थरूपाणामित्यर्थः । शब्दार्थौ वपुरित्युक्तम् । रसमुपकुर्वन्तीति । लोके वपुषि भूषितेऽहं शूर इतिवदेवाहं भूषित

इत्यभिमान दर्शनादङ्गसङ्गिभिरलङ्कारैरङ्गिनो रसस्यापि तद्वारोपकारश्चमत्कारातिशयदर्शनादवसेयः । रसाभावे त्वङ्गोपकार एव । 'गुणास्तु रसं विना न सन्त्येव तद्धर्मत्वात्तेषामित्यर्थः । माधुर्यादिगुणानां सुकुमारादिवर्णान्वयव्यतिरेकानुविधानं तु तद्व्यङ्ग्यत्वनिबन्धनं न तु तद्धर्मत्वनिबन्धनमित्याह । **अत एवेति** । केषांचित्तद्धर्मताबुद्धिस्तु भ्रान्तिरेवेति सदृष्टान्तमाह । यथा प्रांशुतममित्यादि । अविश्रान्तबुद्धयोऽगाढमतयः । तस्मादङ्गिसमवेता गुणा अङ्ग संयुक्तास्त्वलङ्कारा इत्युक्तम् । उभयेषां भेदो लोकवदेवेत्युपसंहरति– **वस्तुतस्त्विति** । ननु लोके तथास्तु; काव्येतु गुणालङ्काराणां द्वयानामपि समवायवृत्तिरेवेति मतं न समीक्ष्य भाषितमिति दूषयति– **गुणालङ्काराणामिति** । **गड्डरिकाप्रवाहेणेति** । गड्डरिका मेषी । लोके मेष्यामेकस्यामेकेन पथा प्रयोजनं विनैव गच्छन्त्यामितरा अपि मेष्यस्तथैव तेनैवपथा यद्गच्छन्ति स गड्डरिकाप्रवाहो गतानुगतिरन्धपरम्परेति यावत् । युक्तिरुक्तैवेति भावः ।

रचनाधर्मा गुणा अत एव काव्यव्यवहारहेतवः । अलङ्कारास्तु सन्ति चेत्तदतिशयाधायका इति भोजवामनौ । तन्मतं दूषयितुमनुभाषते– **युवतेरित्यादि** ।

मू०— युवतेरिव रूपमङ्ग काव्यं
स्वदते शुद्धगुणं तदप्यतीव ।
विहितप्रणयं निरन्तराभिः
सदलङ्कारविकल्पकल्पनाभिः ॥

यदि भवति वचश्च्युतं गुणेभ्यो
वपुरिव यौवनवन्ध्यमङ्गनानाम् ।

अपि जनदयितानि दुर्भगत्वं
नियतमलङ्करणानि संश्रयन्ते ॥

इति भोजः । 'काव्यशोभाया कर्त्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः' इति वामनोऽप्याह । तन्न विचारितरमणीयम् । तथाहि यद्येते काव्यव्यवहारप्रयोजकीभवन्तः सम्भूय काव्यव्यवहारं प्रयोजयन्ति तदानीमसमग्रगुणयोर्गौडीपाञ्चाल्योः काव्यानात्मत्वप्रसङ्गः । अथ कतिपये तदा गुणमात्रसम्भवेऽपि काव्यव्यवहारप्राप्तिः । तस्मादलङ्कार एव काव्यव्यवहारप्रयोजकः । गुणस्तु वस्तुतोऽस्त्येव; तस्य रसधर्मत्वात् । किन्त्वलङ्कारस्तं नापेक्षते; ततस्तत्कृता शोभैव नास्तिः कुतस्तरां तदतिशयोऽलङ्कारजन्य इति ॥

व्या—अलङ्कारविकल्पकल्पनाभिरलङ्कारविशेषसृष्टिभिः । विहितप्रणयं कृतसख्यं, तद्युक्तमित्यर्थः । अथान्वयमुक्त्वा व्यतिरेकमाह—यदीति । दूषयति— **तन्न विचारितेति** । किं सर्वे गुणाः सम्भूय काव्यलक्षणं कतिपये वेति द्वेधा विकल्प्याद्यं दूषयति । यद्येत इति । गुणविशिष्टपदरचनात्मिका रीतिरात्मा काव्यस्येति तेषां मतम् । ताश्च तिस्रो वैदर्भी गौडी पाञ्चाली चेति । तत्र 'समग्रगुणा वैदर्भी' इत्युक्त्वोक्तम्— ओजः कान्तिमती गौडीया; माधुर्यसौकुमार्योपपन्ना पाञ्चाली' इति । तत्र गुणसाकल्यस्य काव्यलक्षणत्वे गौडीपाञ्चाल्योरव्याप्तिः स्यादित्यर्थः । द्वितीये त्वतिव्याप्तिरित्याह । अथेति ।

अद्रावत्र प्रज्वलत्यग्निरुच्चैः
प्राज्यः प्रोद्यन्नुज्वलत्येष धूमः ।

इत्यादावप्योजःप्रभृतिगुणसत्तामात्रेण काव्यत्वापत्तिः । अथ स्वमतं निगमयति । तस्मादिति । शोभैव नास्तीति । अव्यभिचारिणीति शेषः । स्वयमेवोत्कर्षहेतव इत्युक्तम् ॥

मू०—संक्षेपेणाधुना लक्ष्म गुणानां प्रणिगद्यते ।
आनन्दस्यन्दिता तज्ज्ञैर्माधुर्यमभिधीयते ॥

सम्भोगे करुणे विप्रलम्भे शान्ते च तत् क्रमात् ।
काष्ठां पुष्यति चित्तस्य विलीनत्वमिवार्पयत् ॥

ओजो दीप्त्यात्मविस्तारकारणं परिकीर्तितम् ।
क्रमेण वीरबीभत्सरौद्रेष्वेतत् प्रकर्षति ॥४॥

किं च भग्नमनोवृत्तिस्वभावेऽपि भयानके ।
दीप्तत्वेन स्वभावस्य भजत्योजः परां भुवम् ॥५॥

यश्चित्तं व्यश्नुतेऽह्नाय शुष्केन्धनमिवानलः ।
स प्रसादो मतः सर्वरससाधारणस्थितिः ॥६॥

श्लेषः समाधिरौदार्यमपि स्वीकृतमोजसा ।
अर्थव्यक्तिः प्रसादाच्चकथञ्चिन्नातिरिच्यते ॥७॥

समता दोषराहित्यमात्रं स्यान्न पुनर्गुणः ।
सौकुमार्यं च कान्तिश्च भवेद्दोषविपर्ययः ॥८॥

पदानामेकपदवद्भासमानत्वं श्लेषः । आरोहावरोहक्रमरूपः समाधिः । विकटत्वमौदार्यम् । एषामन्तर्भाव ओजसि । झटित्यर्थप्रतिपत्तिहेतुरूपार्थव्यक्तिः प्रसादान्नापरा । मार्गाभेदरूपा

समता दोषाभावमात्रं न गुणः । अपारुष्यरूपं सौकुमार्यं श्रुतिकटुकस्य दोषस्य विपर्ययः । पदानामौज्ज्वल्यरूपा कान्तिर्ग्राम्यस्य ॥

व्या०—तदेवं गुणानां सामान्यलक्षणमभिधाय सम्प्रति प्रतिज्ञापूर्वकं विशेषलक्षणान्याह— संक्षेपेणेति । तत्र माधुर्यमोजः प्रसादश्चेति त्रय एव गुणा इति सिद्धान्तमभिसन्धायादौ माधुर्यं लक्षयति— आनन्देति । आल्हादैकमयत्वमित्यर्थः । स च शृङ्गारकरुणशान्ताना धर्म इत्याह— सम्भोग इति । चित्तस्य विलीनत्वं द्रवत्वम् । ओजो लक्षयति— ओज इति । दीप्तिः प्रज्वलनं तद्रूपो य आत्मविस्तारश्चित्तविकासस्तत्कारणमित्यर्थः । न केवलं वीरादिष्वेवायं गुणः किं तु भयानकेपीत्याह —किं चेति । ननु मनोमज्जनात्मके तत्र कुतो दीप्तेरवकाश इत्याशङ्क्याह— दीप्तत्वेनेति । विभावस्य भीषणालोकनाद्युद्दीपनविभावस्येत्यर्थः । प्रसादं लक्षयति— य इति । अनलवदिति रौद्राद्यभिप्रायेण; शृङ्गारादिषु तु स्वच्छाम्बुवदिति द्रष्टव्यम् । अत एवोक्तं काव्यप्रकाशे—

'शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ॥' इति

ननु श्लेषादयो दश गुणाः । तदुक्तम्—

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः ॥

इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ॥' इति । तत् कथं त्रय एवोक्ता इत्याशङ्क्य सत्यमेषां केषांचिदेष्वेवान्तर्भावात्

केषांचिद्दोषविपर्ययरूपत्वाच्च त्रित्वं सिद्धमित्याह– श्लेष इति । अन्तर्भावाद्यभिव्यक्तये श्लेषादिस्वरूपमाह– पदानामिति ॥

मू०—त्रीनभिधाय गुणान् वयमधुना रीतीः प्रचक्ष्महे तिस्रः ।
वादर्भीपाञ्चालीगौडीयेत्यत्र संक्षेपात् ॥९॥

अकृतसमासस्पर्शा समग्रगुणगुम्फिता तत्र ।
एकैव जयति रीतिर्विदलितवीणाभिमानसर्वस्वा ॥१०॥

ओजः कान्तिविहीनामाहुः श्लथसन्धिबन्धुरां कवयः ।
पञ्चषपदसमुदञ्चल्ललितसमासां च पाञ्चालीम् ॥११॥

ओजः कान्तिकराम्बितसकलोद्धतपदविराजितां वृत्तिम् ।
बिभ्राणा रीतिर्ज्ञैर्गौडीया रीतिराम्नाता ॥१२॥

एतासामेव साङ्कर्याद्भवन्त्यावन्तिकादयः ।
पार्थक्येन ततोऽस्माभिर्नाभ्यधीयन्त ताः पुनः ॥१३॥

तल्लक्षणं राज्ञोक्तम् । यथा–

'अन्तराले तु पाञ्चालीवैदर्भ्योर्यावतिष्ठते ।
सावन्तिका समस्ता स्याद् द्वित्रैस्त्रिचतुरैः पदैः ॥

समस्तरीतिव्यामिश्रा लाटीया रीतिरुच्यते ।
पूर्वरीतेरनिर्वाहात् खण्डरीतिस्तु मागधी ॥'

दर्शनानन्तरे त्वेता वैदर्भीपाञ्चालीगौडीया चेति तिस्रो रीतयो मधुरमध्यमपरुषवर्णारब्धत्वान्मधुरा मध्यमा परुषा चेति

वृत्तयो रसविषयव्यापारत्वेन कथ्यन्ते । यदुक्तमलङ्कारसर्वस्वकारेण । 'वृत्तिरतु रसविषयोव्यापारः' इति ।

इति श्रीमतो महामाहेश्वरस्य कृता
एकावलीनाम्न्यलङ्कारशास्त्रे गुणनिरूपणं नाम
पञ्चम उन्मेषः

व्या०—अथ गुणप्रसङ्गात् तद्विशिष्टरचनात्मिका रीतिरिति प्रतिज्ञायाः सङ्गतिं सूचयन् लक्षयति— **त्रीनित्यादि** । ननु सन्त्येव रीत्यन्तराण्यपि कथं तिस्र एवेत्युक्तम् ? तत्राह— **एतासामिति** । अत्र मतान्तरमाह— **दर्शनान्तरेष्विति** । तत्र सम्मतिमाह— **यदुक्तमिति** । वृत्त्यनुप्रासशब्दनिर्वचनप्रस्ताव इत्यर्थः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीण-
श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
एकावलीव्याख्यायां तरलाख्यायां गुणनिरूपणं नाम

पञ्चम उन्मेषः ॥

अथ षष्ठ उन्मेषः

मू०—न विधेयप्राधान्यं वृत्तिर्वक्तुं प्रगल्भते यस्मात् ।
अविमृष्टविधेयांशस्तस्मादस्यामुदीर्यते दोषः ॥१॥

परस्परसव्यपेक्षप्रधानोपसर्जनभावापन्नविध्यनुवादरूपावयवघटितयशालि तावद्वाक्यम् । अज्ञातज्ञापनं विधिः । प्रमाणान्तरसिद्धस्य पदार्थस्य प्रयोजनान्तरेण स्वरूपकीर्तनमनुवादः । यथा गौरयं पदा न स्प्रष्टव्य इत्यत्र गौरयमित्यनुवादभागः पदा न स्प्रष्टव्य इति हि विधीयते । अत्र च विधेयस्यार्थस्य प्राधान्यमनुवाद्यस्य पुनरप्राधान्यम् । स चायं विधेयानुवाद्ययोः प्रधानोपसर्जनभावो वाक्यात् प्रतीयते न वृत्तेः । वृत्तिमासाद्य प्रधानोपसर्जनभावस्य निमज्जनप्रसङ्गात् । तत्र समासेषु कर्मधारये यथा—

जाते वीर नृसिंह भूप चलतस्त्वत्सैन्यपाथोनिधे
न्यञ्चद्भूतलभारभंगुरफणोत्सङ्गोरगाधीश्वरे ।
बाष्पोत्सङ्गितलोचनं कुचतटीविन्यस्तहस्ताञ्चलं
तस्यान्तःपुरसुभ्रुवामुदचरन् हाकारगर्भा गिरः ॥

अत्र न्यञ्चद्भूतलभारभंगुरफणोत्सङ्गत्वं तावद्विधेयम् । तच्चोरगाधीश्वरेणानुवाद्येन समं समासतया न्यग्भावमानीतम् । फणोत्सङ्गे भुजङ्गेश्वरे' इति समुचितः पाठः ॥

व्या०—तदेवमुपादेयतया जिज्ञासिता गुणा उक्ताः । अथ हेयतया जिज्ञास(स्य)माना दोषाः प्रदर्श्यन्ते । तत्र काव्यापकर्षहेतवो दोषा इति सामान्यलक्षणम् । ते च अन्यत्र पद वाक्यार्थगतत्वेन त्रिविधा अपि बहुधा प्रपञ्चिताः । ते च तत्रैव द्रष्टव्या इत्याशयेन तेषु बहुवक्तव्यानविमृष्टविधेयांशप्रभृतीन् पञ्चपान् व्याकुर्वन् पदवाक्यगतत्वेन द्विभेदेऽविमृष्टविधेयांशे आद्यं भेदं लक्षयति– **नेत्यादि** । वृत्तिः संसर्गः । सा च कृत्तद्धितसमासरूपेण त्रिधा । तया विधेयप्राधान्यं यत्र न्यक्क्रियते स पदगताविमृष्टविधेयांश इत्यर्थः । कथं वृत्तेः प्राधान्यतिरोधायकत्वमित्याशङ्क्य विध्यादिस्वरूपनिरूपणपूर्वकं तद्दर्शयति– **परस्परेत्यादि** । अवयवद्वितयमवान्तरवाक्यद्वयं तच्छालि तावद्वाक्यं तदुक्तं महावाक्यमित्यर्थः । एकवाक्यत्वे हेतुमाह– **परस्परसव्यपेक्षेति** । सापेक्षत्वे हेतुमाह– **प्रधानेति** । तत्रापि हेतुर्विध्यनुवादेति । तत्र विधिशब्दार्थमाह–– **अज्ञातेति** । अनुवादस्वरूपमाह– **प्रपाणान्तरेति** । प्रमाणान्तरेत्यनेन पौनरुक्त्यपरिहारः । उदाहरति– **गौरित्यादि** । तत्र प्रधानाप्रधाने विविनक्ति– **अत्र चेति** । ननु किमिदमुच्यते विधेयस्य प्राधान्यमप्राधान्यमनुवाद्यस्येति । एवं चेद्दध्ना जुहोतीत्यत्रापि विधेयस्य दध्नः प्राधान्यमनुवाद्यस्य होमस्याप्राधान्यं चापद्येत । किं च वाजपेयाधिकरणपूर्वपक्षे वाजपेयेन स्वाराज्यकामो यजेतेत्यत्र धात्वर्थस्य यजेस्तन्त्रेण गुणफलसम्बन्धे विरुद्धत्रिकद्वयापत्तिं वदता सिद्धान्तिना विधेयस्य गुणत्वमनुवाद्यस्य प्राधान्यं चोक्तम् । तथाच वार्तिकम् । ततः स्वफलेनोपादेयविधेयगुणभूतयागग्रहणाद्गुणेन चोद्देश्यानुवाद्यप्रधानभूतापेक्षणात्तन्त्रत्वाभावः' इति ।

तथा च संग्रहः ॥

उपादेयविधेयत्वगुणत्वानि यजेः फले ।
उद्देश्यत्वानुवाद्यत्वप्राधान्यानि गुणान्वये ॥ इति ।

इहोद्देशो मानसी विवक्षा । उपादेयत्वम् अनुष्ठेयत्वम् । तत्र सिद्धस्योद्देशः साध्यस्यानुष्ठानमिति सिद्धसाध्यभावादुद्देश्यत्वोपादेयत्वयोर्विरोधः प्राप्ताप्राप्तरूपत्वादनुवाद्यविधेयत्वयोर्गुणप्रधानत्वयोस्तत्त्वादेवेत्यलं प्रसक्तानुप्रसक्त्या । तदेतत् सम्यग्विवेचितमस्माभिस्तन्त्रवार्त्तिकटीकायां वाजपेयाधिकरणे । तस्माद्विधेयस्य प्राधान्यमप्राधान्यं चानुवाद्यस्येति न मीमांसामांसलं वच इति प्रतीमः । नैष दोषः । इह विधेयस्य प्राधान्यं नाम तात्पर्यविषयत्वमात्रमप्राधान्यं चानुवाद्यस्यातद्विषयत्वमात्रं न तु दधिहोमयोरिव पारार्थ्यहेतुकः शेषशेषिभावलक्षणो गुणप्रधानाभाव इति । अस्तु प्रस्तुते किमायातमत आह— **स चायमिति । तत्रेति ।** वृत्तित्रयमध्ये इत्यर्थः । **न्यग्भावमानीतमिति ।** विधेयांशस्य समासे गुणभावेन प्राधान्यं तिरोहितमित्यर्थः । एवं 'मौर्वी द्वितीयामिव कार्मुकस्य' इत्यत्र द्वितीयमौर्वीमिति पाठेऽयं दोष इत्याद्यूह्यम् ॥

मू०—बहुव्रीहौ यथा—

त्यागश्रीहसितेन्द्रकेलिविपिनक्षोणीरुहाहंकृतिः
कीर्त्तिव्रीडितकार्तिकेन्दुमहिषीगण्डस्थलीपाण्डिमा ।
हेलापाण्डवितप्रतापलहरीविधूतकल्पानलः
केषामेष न वर्णनीयमहिमा वीरः कलिङ्गेश्वरः ॥

अत्र कल्पद्रुमाहङ्कारादिनानुवाद्येन समं हसनादि विधेयत्वात् प्रधानतया विवक्षितं समासेन गुणीभूतम् ।

'त्यागेनोपहसन् महेन्द्रविपिनक्षोणीरुहाहं कृतिं
कीर्त्यापत्रपयन् सुधांशुमहिषीगण्डस्थलीपाण्डुताम् ।

निर्धुन्वन् प्रबलप्रतापलहरीनृत्येन कल्पानलम्'

इति निरवद्यः पाठः ।

द्विगौ यथा—

विधुन्तुद ममाधुना बत करिष्यते किं भवा-
निति स्फुरदहंकृतिरतुहिनदीधितिर्निर्भयम् ।
विधाय तव कीर्तिभिर्निजवपुः सहस्राण्यसौ
कलिङ्गवसुधाधिप त्रिषु जगत्सु विद्योतते ॥

अत्र सङ्ख्यायाः सङ्ख्येयेषु जगत्सु निरवशेषतावगमैकप्रयोजनमतिशयमादधानायाः प्राधान्यमभिमतं तच्च त्रिजगत्यामिति समासेनोपसर्जनत्वमानीयते ॥

व्या०—त्यागेत्यादि । इन्दुमहिषी चन्द्रिका । समं समानेनेति सम्बन्धः । हसनादीति विच्छेदः । विधुन्तुदेति । विधुं तुदतीति विधुन्तुदो राहुः 'विध्वरुषोस्तुदः' इति खश् प्रत्ययः 'अरुर्द्विषद्—'इत्यादिना मुमागमः । नन्वत्र द्विगुरेव नास्ति कथमिदं द्विगूदाहरणमित्याशङ्क्य प्रत्युदाहरणमेतत् । उदाहरणं तु त्रिजगत्यामिति व्यतिरेकादुन्नेयमित्याशयेनाह— अत्र संख्याया इति । प्राधान्ये

हेतुमाह– निरवशेषितेति । अन्यथा जगत्स्विति बहुवचनेन त्रित्व-संख्याया पौनरुक्त्यादिति भावः । त्रिजगत्यामिति 'तद्धितार्थ–'' इत्यादिना समाहारे द्विगुः ॥

मू०–तत्पुरुषे यथा–

यदिह ककुभां सीम्नि व्योम्नः स्थलेऽप्यमितं यश-
स्तव कथमपि ज्योत्सागौरं नृसिंह नरेश्वर ।
तदिदमखिलं चित्रं पञ्चाशता परमक्षरैः
कृतपरिकरे वाग्व्यापारे निवेशयते कविः ॥

अत्रामितमिति निषेधस्तावद्विधेयत्वेनाभिधित्सितः; मानं पुनरनुवाद्यत्वेन । अनयोः समासेनाभिधानमनुचितम् । समासे विध्यनुवादगतत्वेन विवक्षितयोः प्राधान्याप्राधान्ययोर्विपर्यासप्रसङ्गात् । अतश्च

'यदिह न दिशां सीम्नि व्योम्नः स्थलेऽपि मितं यशः'

इति पाठः परिणमयितव्यः । यत्र तु विध्यनुवादभावो नाभिमतस्तत्र समासः स्यादेव । यथा 'निधिरखननायास सुलभः ।'

यथावा–

आक्रम्य स्मरवैरिशेखरसरित्पूरैकसिंहासनं
राज्ञानं नरसिंह पार्थिव तथाहङ्कारभारोध्दुरः ।

त्वत्कीर्तिप्रसरो हसत्ययमसौ शक्रस्य दन्तावलं
व्यालेन्द्रं मुसलायुधं किमपरं देव्याश्च पञ्चाननम् ॥

अत्र प्रलयघनघटारटितपटुतरहुङ्कारपरिपीतहरिदन्तदन्तावलमदस्रोतस्तयानितरकेसरिसाधारणत्वं पञ्चाननस्याभिधातुमभिमतं तावद्भगवत्याः पार्वत्याः सम्बन्धित्वेनेति देव्याः प्राधान्यं पञ्चाननेन समं समासमकुर्वता नोपसर्जनतां नीतम् । समासे हि पञ्चाननस्य प्राधान्यं न तु देव्याः । तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् । एवं कृत्तद्धितयोरपि वृत्तिर्नादरणीया ॥

व्या०—यदिहेत्यादि । कृतपरिकरे कृतपरिवारे कृत सहाय इत्यर्थः ॥ अत्रामितमिति नञ् समासस्तत्पुरुषः । तेन विषयस्य निषेधस्य प्राधान्यं न्यक्कृतमित्याह- अत्रेति । अनुचित्ये हेतुमाह— समास इति । एवं तर्हि नञ्समासो निरवकाश इत्याशङ्क्याह— यत्र त्विति । तत्पुरुषान्तरं व्यतिरेकोन्नेयमाह— आक्रम्येति । एवं विधेयस्य समासे गुणीभावो दोषायेत्युक्तं तद्वृत्त्यन्तरेऽप्यतिदिशति । एवं कृत्तद्धितयोरपीति ॥

मू०—सर्वं कषति न केषामेषां समरेषु विद्विषां गर्वम् ।
कालीव दानवानां वीर कृपाणी तव स्थिता पाणौ ॥

अत्र कषणस्य कर्मत्वेन सर्वमिति गर्वविशेषणमुत्कर्षप्रकाशनपरतया प्राधान्येन विवक्षितम् । सर्वंकषेति कृद्वृत्त्या न गुणतां नीतम् ।

न कस्य कर्णयोर्हर्षमेषा वर्षति भारति ।
कवित्वतत्त्वनिष्ठस्य नरसिंहस्य भूपतेः ॥

अत्र नरसिंहसम्बन्धित्वेन भारत्याः प्रकर्षो वक्तुमिष्ट इत्यस्याः प्राधान्यं नरसिंहीति तद्धितवृत्त्या न म्लानिमानीतम् । विभक्त्यन्वयव्यतिरेकानुविधायिनी विशेषणानां विधेयतावगतिः । विशेष्येपूत्कर्षापकर्षविधायिनामेषां शाब्दे गुणभावेऽप्यार्थं प्राधान्यं विशेष्याणां शाब्दे प्राधान्येऽप्यार्थो गुणभावोऽनूद्यमानत्वात् । समासे तु समुदितार्थाभिधायितया नोत्कर्षः प्रतीयतेऽपकर्षो वा ॥

व्या—तत्र कृद्वृत्तेः प्रत्युदाहरणमाह– **सर्वमिति** । सर्वंकषेति व्यतिरेकेण कृद्वृत्तेरुदाहरणोक्तिः । ननूपपदसमासत्वात् समासवृत्तिरेवेयं किं न स्यात् । समासात् पूर्वमेव 'सर्वकूलाभ्रकरीषेषु कषः' इति सर्वोपपदेन खचा समासात् पूर्वभाविना विधेयस्य सर्वशब्दार्थस्य प्राधान्यन्यक्कारे पश्चात् समासोत्पत्तेरिति तद्धितवृत्तेरपि प्रत्युदाहरणमाह– **नेति** । अत्रापि नारसिंहीति व्यतिरेकेणोदाहरणोक्तिः । यथा वैश्वदेव्यामिक्षेत्यत्र वैश्वदेवीशब्दस्य तद्धितप्रत्ययसामर्थ्यात् देवताविशिष्टद्रव्यपरत्वं तथा नारसिंही भारतीत्युक्ते नरसिंहसम्बन्धभारतीपरत्वं प्रतीयते न तु नरसिंह परत्वम्; प्रकृत्यर्थप्राधान्यन्यक्कारेण प्रत्ययेन स्वार्थप्राधान्यप्रकाशनादित्यर्थः । ननु नरसिंहस्येति च नारसिंहीति च षष्ठीतद्धितयोः सम्बन्धमात्रविहितयोः को विशेषो येनैकत्र विशेषणप्राधान्यमन्यत्र विशेष्यप्राधान्यं चेत्याशङ्क्याह । **विभक्तीति** । विभक्तिर्हि प्रातिपदिकादुत्पन्ना तदर्थस्य विशेषतः सामान्यतो वा सम्बन्धं बोधयन्ती न तस्य विधेयस्य प्राधान्यं तात्पर्यविषयतारूपं तिरोधत्ते । तद्धितस्तु तस्येदमिति तत्सम्बन्धिन्यर्थान्तरे विहितस्यैव प्राधान्यं गमयन् प्रकृत्यर्थप्राधान्यं व्याहन्तीत्यन्वयव्यतिरेकाभ्यामवगम्यत इत्यर्थः । ननु नरसिंहस्य भारतीति विभक्तिप्रयोगेऽपि नरसिंहस्य विशेषणत्वादेव

अप्राधान्यं विशेष्यत्वादेव भारत्याः प्राधान्यं च गम्यते कुतस्तेन नरसिंहस्य प्राधान्यमित्याशङ्क्याह— विशेष्येष्विति । अकलङ्कं मुखं कलङ्की चन्द्र इति प्रयोगे शब्दादन्यथात्वेऽपि विशेष्यमुखचन्द्रगतोत्कर्षापकर्षहेतुत्वेन तद्विशेषणयोः सकलङ्कत्वाकलङ्कत्वयोर्विधेयत्वात् प्राधान्यं तात्पर्यविषयत्वरूपं विशेष्ययोर्मुखचन्द्रयोः नूद्यमानयोरप्राधान्यं चार्थाद्विध्यनुवादसामर्थ्यरूपादवगम्यत इत्यर्थः । वृत्तौ तु नैवमित्याह— **समासेति** । समासः संसर्गस्त्रिविधापि वृत्तिरिति यावत् । समुदितार्थो विशिष्टार्थः ।

मू०—अव्ययीभावे यथा—

नाथः काकोदराणां कथयति लिखति क्ष्मापतिः कार्त्तवीर्यो
मेलानन्दो जलानां निधिरचलपतिर्लेखनी व्योमपत्रम् ।
संख्या पारेपदार्धं यदि भवति पुनः किं च वैरिञ्चमायुः
संख्येयत्वं तदानीं दधति तव गुणा श्रीनृसिंह क्षितीन्द्र ॥

अत्र प्रभोः प्रकर्षसंकाशनं प्रस्तुतं तच्चगुणबाहुल्यप्रतिपादनेनाभिमतम् । तत् पुनर्गुणानामगणनीयतया क्रियते । सा च संख्याया अभावादेवाभूत् । अत एव संख्याधिक्याशंसनं कृतम् । इहाल्पीयसी संख्या परार्धरूपा तया गुणगणनं कर्त्तुमशक्यम् । अतः पारे इत्यस्याव्ययार्थस्य विशेष्यस्यानूद्यमानत्वात् न प्राधान्यम् । परार्धस्य तु विशेषणस्य विधेयत्वात् प्राधान्यं तच्च न्यग्भावितं समासेन । ततश्च 'संख्या दूरे परार्धात्' इति न्यायः पाठः । द्वन्द्वस्य विशेष्यविशेषणभावाभावेऽपि यदा प्रत्येकं क्रियासम्बन्धोपलक्षणं प्राधान्यमभिमतं तदा न समासः कर्त्तुमुचितः । उपसर्जनत्वप्रसङ्गात् ।

प्रत्युदाहरणं यथा–

गर्जद्दुर्जयशत्रुसैन्यजलधेर्मन्थाय विद्वज्जना-
भीष्टानां परिपूरणाय वसुधावष्टम्भदानाय च ।
राजन् वीर नृसिंह शैव भवतः सृष्टे भुजे वेधसा
व्यर्थः सम्प्रति मन्दरः सुरतरुः सर्पाधिपश्चाभवत् ॥

अत्र भवनक्रियायां मन्दारादीनां प्रत्येकं सम्बन्धः प्राधान्येनाभिधातुमभिमतो न समासेनावसादितः ॥

व्या०—पुनः सिंहावलोकेन समासवृत्तिमेवाह–

अव्ययीभावे यथेति । नाथ इत्यादि । फणिपतेः सहस्रमुखत्वात् कथकत्वं, कार्तवीर्यस्य सहस्रकरत्वाल्लेखकत्वं चेति भावः । मेलानन्दः मषीपात्रम् । अचलपतिहिमाद्रिः लेखनी लेखवर्णिका । परार्धस्य पारे पारेपरार्धम् । 'पारे मध्ये षष्ठ्या वा' इत्यव्ययीभावः । को नु दोष इत्याशङ्क्याह– अत्रेत्यादि । अत्र पारे-शब्दार्थप्रतियोगित्वेन परार्धस्यैव विधेयत्वात् तस्य च पूर्वपद(पदार्थ)-प्रधानेऽव्ययीभावे उत्तरपदार्थभावेन प्राधान्ये तिरोधानादविमृष्टविधेयांशोऽयं दोष इत्याह– अतः पार इत्यादि । द्वन्द्वेप्यस्य दोषस्य क्वचिदवकाशं सम्पादयति– द्वन्द्वस्येति । यत्र द्विदैवत्येषु द्वयोर्देवतयोरिव मिलितयोः क्रियासम्बन्धो विवक्षितस्तत्रैव द्वन्द्वे न दोषः । यथा–

स निर्विश्य यथाकामं तटेष्वालीढचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलो मलयदर्दुरौ ॥'

इत्यत्र मलयदर्दुरयोः स्तनौपम्यसामर्थ्यान्मिलितयोर्निवेशनक्रिया-कर्मत्वेन द्वन्द्वः कृतः ।

'नयवद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।'

इत्यत्र सदसतोः प्रत्येकमेवोपदर्शनक्रियाकर्मत्वात् द्वन्द्वो न कृतः । अत एवोपदर्शितमित्येकवचनप्रयोगश्चेत्यर्थः । उपसर्जनत्वप्रसङ्गा-दिति । द्वन्द्वकरणे उक्तलक्षणप्राधान्यन्यक्कारप्रसङ्गादित्यर्थः । गर्जदि-त्यादि । अत्राभवदित्येकवचनप्रयोगाद्द्वन्द्ववद्बहुवचनमप्युक्तोपसर्जनता-हेतुत्वाद्धेयमित्यनुसन्धेयम् ।

मू०—अनुवाद्यविधेयांशावुक्तौ स्यातां विपर्ययेण यदा ।
अविमृष्टविधेयांशो भवति तदानीं तु वाक्यगतः ॥२॥

यथा—

कलानिधे वीर कलिङ्गनाथ
प्रायस्त्वमिन्दोरपरावतारः ।
त्वां पश्यतामेव मुदः स्फुरन्ति
यदुत्तरङ्गाः कविकैरवाणाम्

अत्र त्वामनूद्य चन्द्रावतारत्वं विहितम् । यदि पुनरस्य पदद्वयस्य वैपरीत्येनोपादानमकरिष्यत्तदा निर्विवादमिदं दूषणमभ-विष्यत् । धर्मिणमुद्दिश्य धर्मो विधीयत इति सिद्धस्योद्देश्यत्वं साध्यस्य च विधेयत्वम् । तयोर्विपर्ययेणोपादाने तार्किकैरपि नित्यमाकाशमित्यादावप्राप्तकालस्य निग्रहस्थानस्याभ्युपगतत्वात् ।

यथा वा—

लोकत्रयेऽपि चरितैस्तव कोऽपि तुल्य
स्तैस्तैर्बभूव भवितास्ति च किं न वेति ।
आलोकनाय नृपते नरसिंह नूनं
देवः सुधाकिरणमौलिरभूत् त्रिनेत्रः ॥

अत्र सुधाकिरणमौलित्वमनूद्य त्रिनेत्रत्वं विहितमिति नायं दोषः । विपर्ययोपादाने भवत्येव ।

यथा—

उत्कण्ठाभारताम्यत् कुवलयनयनामानसाम्भोजभानु-
श्चिन्तासन्तापमीलत्कविकुलकुमुदव्यूहनक्षत्रनाथः ।
ईर्ष्यासंवर्धमानप्रतिनृपतिकुलाम्भोधिकुम्भोद्भवश्च
ख्यातः सर्वत्र योऽसौ जगति विजयते श्रीनृसिंहः क्षितीन्द्रः ॥

अत्र यदः प्रयोगो नोचितः । यत्र हि यत्तदोरन्यतरस्य निर्देशस्तत्र तत्प्रत्यवमर्शिना तदितरेणोपसंहारो न्याय्यः । तयोरनुवाद्यविधेयार्थत्वेनाभिधातुमभिमतयोः परस्पर सव्यपेक्षत्वेन सम्बन्धस्य नियतत्वात् । स पुनरुपक्रमोपसंहारक्रमो द्विविधः शब्दश्चार्थश्चेति । तत्र द्वयोरुपादाने शाब्दः ॥

व्या० —वाक्यगताविमृष्टविधेयांशं लक्षयति— **अनुवाद्येति** । **अत्रत्वामिति** । 'अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्' इति न्यायादिति भावः । विपरीतोपन्यासे तु व्यत्यासेनोद्देश्यविधेयांशत्वप्रसङ्गादयं दोषः स्यादित्याह— **यदि पुनरिति** । **धर्मिणमिति** । 'सिद्धं धर्मिणमुद्दिश्य साध्यधर्मो विधीयते' इति न्यायादिति भावः । **अप्राप्तकालस्येति** । 'अवयवविपर्यासवचनमप्राप्तकालम्' इति लक्षणसूत्रम् ।

अथ यत्तच्छब्दयोरनुवाद्यविधेयपरयोः प्रयोगव्यवस्थातिक्रमणेऽप्ययमेव दोष इति वक्तुमुदाहरति उत्कण्ठेति । कोऽत्र दोषस्तत्राह **अत्र यदः प्रयोगो नोचित इति ।** योसावित्थं सर्वत्र ख्यात इति पूर्वस्मिन्ननुवाद्यवाक्ये यच्छब्दं प्रयुज्याप्युत्तरस्मिन् विधेयवाक्ये स विजयत इति तच्छब्दस्यावश्यप्रयोक्तव्यस्याप्यप्रयुक्तत्वादिति भावः । कोऽयं निर्बन्ध इत्याशङ्क्य न्यायबलमाह— **यत्र हीति ।** यत्तदोः परस्परसापेक्षार्थबोधकत्वेन नित्यसम्बन्धित्वादन्यतरेणोपक्रमे तदितरेणोपसंहारो न्यायसिद्धतया दुर्वार इत्यर्थः ॥

हिमकरकलामौलिः कृष्णः सरोरुहसम्भवः
फणधरकुलं नालं बोध्दुं नृसिंह नरेश्वर ।
यदमरधुनीं दुग्धाम्भोधिं मरालमहीश्वरं
स खलु महिमा विश्वाख्यातस्तवैव यशः श्रियः ॥

अत्र यदित्युक्त्वा स इत्युक्तम् ।

एकतरोपादाने त्वार्थः । तदितरस्य सामर्थ्येनावसीयमानत्वात् । तत्र केवलस्य तद उपादाने सत्यार्थो न त्रैविध्यमतिक्रामति । प्रक्रान्तप्रसिद्धानुभूतविषयतयोपकल्पितसंनिधिना यच्छब्देन तच्छब्दस्याभिसम्बन्धात् ॥

व्या०—**हिमकरेति ।** अत्र हरादयश्चत्वारोऽपि गङ्गादींश्चतुरोऽपि बोध्दुं नालमिति यत् स ते यशः श्रियो महिमेत्यन्वयार्थौ । अत्र यत्तदोर्द्वयोरुपादानाच्छाब्दोयं क्रम इत्याह— **यदिति ।** आर्थं क्रमं निरूपयति । **एकतरेति ।** एकतरोपादान इत्युपलक्षणम् । उभयानुपादान इत्यपि द्रष्टव्यम् । तथा च केवलतच्छब्दोपादानात् केवल-

यच्छब्दोपादानादुभयानुपादानाच्चेत्यर्थात् त्रिविध इत्यर्थः । तत्राप्याद्य-स्त्रिविध इत्याह । तत्र केवलस्येति । तिस्रोविधा दर्शयन्नार्थत्वं समर्थयते प्रक्रान्तेति ॥

मू०—क्रमेण यथा—

लोकेऽस्मिन् नरसिंहदेवनृपतिर्दाता न कल्पद्रुम-
स्तेजस्वी स न पद्मिनीसहचरः कान्तः स नो चन्द्रमा ।
गम्भीरः स न वाहिनीपरिवृढस्तुङ्गः स नो चन्द्रमा ।
शिल्पज्ञः स न पद्मभूः किमपरं वाग्मी स नो वाक्पतिः ॥

अत्र तेजस्वी स इत्यादौ प्रक्रान्तेऽर्थे तच्छब्दः ।

सा किं दत्तवती कदा बत शिला कस्मै स शाखी पुनः
कस्यालोकपथं गतो निविशते कस्यान्तिके सा पशुः ।
पर्याया नरसिंह पार्थिव तव प्रख्याति(त)चिन्तामणि-
र्मन्दारो दिविषद्गवी त्रिभुवनश्लाघ्याः समस्ता अमी ॥

इह निरतिशयवितरणचणतया प्रसिद्धा या शिलेति प्रसिद्धेऽर्थे तच्छब्दः ।

त्वत्प्रत्यर्थी गिरिचरगजस्याङ्कके दत्तदृष्टि
स्तस्मिंस्तस्मिन् स्मरति मधुरं तत्तदङ्गं प्रियायाः ।
कुम्भाभोगे गुरुकुचतटं दन्तयोर्गण्डलक्ष्मी-
मूरु हस्ते गतिषु च गतिं श्रीनृसिंह क्षितीन्द्र ॥

अत्र तत्तदित्यनेन पदेनानुभवैकगोचराः प्रकाश्यन्तेऽर्था इत्यनुभूतेऽर्थे तच्छब्दः । यच्छब्दस्तूत्तरवाक्यगतत्वेनोपात्तः सामर्थ्यात् पूर्ववाक्यगततच्छब्दस्योपादानं नापेक्षते ।

यथा–

श्रीमन्नृसिंह नृपते कविकाव्यशय्यां
त्वत्कीर्तिरेति भुवनत्रयगर्भभारात् ।
यस्याः प्रभा भजति दौहृदपाण्डुभावं
प्रौढीभवत्यसिमिषेण च रोमराजिः ॥

प्रागुपात्तस्तु यच्छब्दोपादानं विना साकाङ्क्षः ॥

व्या०—लोक इत्यादि । परिवृढः प्रभुः । "प्रभौ परिवृढ" इति परिपूर्वात् बृहेर्धातोर्निष्ठान्तो निपातः । अत्र सर्वत्र तच्छब्देन नृसिंहदेवनृपतिरिति प्रक्रान्तस्य नृपतेः परामर्शात् प्रक्रान्तगोचरोऽयं भेद इत्याह– अत्र तेजस्वीति । सा किमित्यादि । निविशत इति । 'नेर्विशः' इत्यात्मनेपदम् । दिविषदां गौर्दिविषद्गवी कामधेनुः । 'गोरतद्धितलुकि' इति समासान्तष्टच् । 'टिड्ढाणञ्' इत्यादिना ङीप् । अत्र सा शिलेत्यादितच्छब्देन प्रसिद्धचिन्तामण्यादिपरामर्शात् प्रसिद्धार्थगोचरोऽयं द्वितीयो भेद इत्याह– इहेति । वितरणचणतया दानवित्ततयेत्यर्थः । 'तेन वित्तश्चुञ्चुप्चणपौ' इत्यादिना चणप् प्रत्ययः ।

सदृशदर्शनादयो विरहिणां विनोदाइति स्थिते णत्याह– त्वदित्यादि । कुम्भाभोग इत्यादौ सर्वत्र दत्तदृष्टिरित्यनुषङ्गः । सकृद्दर्शनात् स्मृतिर्जायते इति भावः । तद्वदत्रापि । तथा तच्छब्दस्य

पूर्वानुभूतपरामर्शित्वादनुभूतार्थगोचरोऽयं तृतीयोभेद इत्याह– अत्रेति ।

अथ केवसयच्छब्दोपादानाद्यः स्तमाह– यच्छब्दस्त्विति । अस्य भेदस्य सम्भावनार्थं विषयमाह– **उत्तरवाक्यगतत्वेनेति** । **श्रीमदित्यादि** । शय्या पदमैत्री तल्पं च । भुवनत्रयस्य गर्भत्वं कीर्तेस्तत्क्रोडीकारेण वृत्तेः । दोहदं गर्भिणी मनोरस्थतेन यः पाण्डुभावः पाण्डुता तामित्यर्थः । एवं यच्छब्दस्य पूर्ववाक्यगतत्वेनाप्यार्थं भेदान्तरमस्तु तथा च योऽसावित्यादिप्रयोगोपपत्तिरित्याशङ्क्य तन्न सम्भवतीत्याह । प्रागुपात्तस्त्विति ॥

मू०—यथा–

यत्र द्वीपस्तुषारक्षितिभृदुडुगणो मौक्तिकानां निकायः
शैवालं व्योम शङ्खः कुसुदकुलगुरुर्धाम सान्ध्यं प्रवालः ।
यूथं दिक्कुञ्जराणां करिमकरकुलं किं च कृष्णः कृपाण-
स्त्वत्कीर्तिक्षीरवार्द्धिः स जयति जगति श्रीनृसिंह क्षितीन्द्र ॥

इह स जयतीति यदि न क्रियेत तदा यच्छब्दस्य साकाङ्क्षत्वम् ।

यासामम्बुधिरालवालवलयं चक्राचलेन्द्रो वृतिः
कुल्याः सह्यकलिन्दविन्ध्यतनया मुख्या महानिम्नगाः ।
मेरुः संश्रयभूरुहो मधुकरालापाः कवीनां गिर-
स्ताः प्रीतिं जगतां नृसिंह दधति त्वत्कीर्तयो वीरुधः ॥

अत्र ताः प्रीतिमिति यदि न क्रीयेत तदा यच्छब्द-(स्य)साकाङ्क्षत्वम् ॥

क्वचित् पुनरुपात्तवस्तुविषयतयोपकल्पितयोरुभयोरपि सामर्थ्यादाक्षेपः ।

यथा

न भवसि कथंकारं श्लाघ्यः कलिङ्गपुरन्दर
स्मर इति वरारोहाः साक्षान्मुकुन्द इतीन्दिरा ।
सुरतरुरिति त्वां सेवन्ते निरन्तरमर्थिनो
भरतमुनिरित्यार्यास्तौर्यत्रयीनिपुणा अपि ॥

अत्र ततः कथं न श्लाघ्यो भवसि यतस्त्वां सेवन्त इति एवं तु योऽसावित्यत्र तच्छब्दोपादानं विना साकाङ्क्षत्वम् । असाविति तच्छब्दार्थ एवेति यद्यभिसन्धिस्तन्न बन्धुरम् ।

कविकुवलयप्रालेयांशुर्जगत्त्रयपावनै-
र्भवसि न गुणैः कस्य श्लाघ्यः कलिङ्गपुरन्दर ।
हिमरुचिरसौ कीर्त्या यस्य प्रकामपराजितः
स्मरहरशिरःस्रोतस्विन्यां निमज्जति लज्जितः ॥

अत्रादःशब्दस्य तच्छब्दार्थप्रतीतिपथानधिरोहात् । अत्र तच्छब्दार्थप्रतीतिपद्धतिमध्यास्त एवेति यदि यौष्माकीणमाशयमधिवसति तदा—

कति कति भुवः कोणे कोणे क्वचित् क्वचिदूर्जितैः
वितरणगुणैः प्राप्ताः ख्यातिं न सन्ति नराधिपाः ॥

अलमधरयन्नेतानिन्दुश्रिया स्वयशःश्रिया
स जयति महीमन्दारोऽसौ नृसिंहनरेश्वरः ॥

अत्रादस्तच्छब्दयोः प्रयोगे पौनरुक्त्यं दुष्परिहारं स्यात् ।

व्य०—अथोभयानुपादानाद्यस्तृतीयो भेद उद्दिष्टस्तमाह— **क्वचित्पुनरिति** । यत्तदोरनुपादानेऽपि तद्विषयोपादानसामर्थ्यादेव तल्लाभ इत्यर्थः । उदाहरति— **नेति** । इह यत्तदोरर्थसिद्धिं व्यनक्ति— **अत्रेति** । इति शब्दः प्रकारवचनः । इत्येवं यत्तदोरर्थसिद्धेरार्थोऽयमुपक्रमोपसंहारक्रम इत्यर्थः । अस्तु योऽसावित्यत्र किमायातं तत्राह— **एवं त्विति** । उक्तरीत्यास्य भेदस्य उक्तसकलभेदवहिर्भावादित्यर्थः । तर्हि यः ख्यातोऽसौ विजयत इत्यदः शब्दस्यैव विध्यन्वयेन तच्छब्दार्थतेति शङ्कते— **असावीति** । नैतद्युक्तम् । अदः शब्दश्रवणे तच्छब्दार्थप्रतीत्यनुदयादित्युदाहरणेन परिहरति— **तन्नेत्यादिना** । **अदःशब्दस्येति** । हिमरुचिरसावित्यस्येत्यर्थः । नन्वत्रादःशब्दात्तच्छब्दार्थ एव न प्रतीयत इति शङ्कते— **अत्र तच्छब्दार्थेति** । अदः शब्द इति शेषः । यौष्माकीणं युष्मदीयम् । 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति खञ्प्रत्ययः 'तस्मिन्नणि च युष्माकास्माकौ' इति युष्माकादेशः । अट् कुप्वाङ्—' इत्यादिना णत्वम् । आशयमधिवसति । आशयेवसतीत्यर्थः । 'उपान्वध्याङ्वसः' इति कर्मत्वम् । तदा तददसोः सहप्रयोगो न स्यादिति परिहरति— **तदेति** ।

अपि च योसाविति यच्छब्देन सह प्रयोगादपि नादसस्तच्छब्दार्थत्वमित्याशयेनाह— **किं चेति** ।

मू०—किञ्चादःशब्दस्तच्छब्दार्थमाहेति यदुच्यते तत्तुच्छम् ।

तच्छब्दस्य यच्छब्दसान्निध्यमध्यासीनस्य प्रसिद्धपरामर्शित्वात् ।

यथा—

यत्तदुत्तीर्णमर्यादं नरसिंह नभस्तलम् ।
कीर्तेस्तव तदप्यासीत् कस्तूरीतिलकं मुखे ॥

अत्र यत्तत्तदपीत्युक्तम्

यथा वा ।

यत्तद्वैरिवसुन्धरेशरमणीताटङ्कलीलायित
स्तोमारम्भनिरंकुशं तव धनुस्तात् केन न श्लाघ्यते ।
मौर्वीचुम्बितकोटिता जलनिधिव्यालोलकाञ्चीगुणा
जाता येन नृसिंह देव समरे सभ्रूविलासा मही ॥

अत्र यत्तदित्यभिधाय तदित्यभिहितम् । एवमिद मदसावपि यच्छब्दसन्निधाने प्रसिद्धिं परामृशतः; इतरथा तु प्रत्यक्षायमाणमर्थम् । तस्माद्योऽसावित्यत्र यच्छब्दसांनिध्य-मध्यासीनस्यादःशब्दस्य प्रसिद्धिपरामर्शित्वात् तच्छब्दा-काङ्क्षा न विरमति । अतस्तच्छब्देन भवितव्यम् । ततश्च जगति स जयतीति पाठः परिणमयितव्यः ॥

व्या०—तच्छब्दस्याप्येवं किमु वाच्यमन्येषामित्यपिशब्दार्थः । एवं यच्छब्दयोगिनस्तच्छब्दस्य प्रसिद्धिमात्रपरत्वमुदाहृत्यान्यत्राप्यतिदिशति— एव-मिदमिति । एतदोऽप्युपलक्षणमेतत् । तथाच 'यदेतदस्यानुतटं विभाति' 'योऽयमश्वः पताकेयम्' 'व्रजविटपममुं ददस्व तस्यै' इत्यादि । 'य एषो ऽन्तर्हृदय आकाशः' 'यदिदं किं च' 'योसौ तपन्नुदेति' इत्यादौ सर्वत्र लोकवेदयोः ततेतदिदमदसां यच्छब्दयोगिनां प्रसिद्धि

परत्वमेव दृष्टम् । अन्यथोत्तरवाक्येषु पुनस्तच्छब्दानुपपत्तेरित्यतिदेशार्थः । तथाप्यनङ्गीकारे बाधकमाह । इतरथेति । परमप्रकृतमुपसंहरति । तस्मादिति । ननु 'एष निष्कण्टकः पन्थाः यत्र सम्पूज्यते हरिः' पवनाग्निसमागमोह्ययं सहितं ब्रह्म यदस्त्रतेजसा' 'यत्तु दन्दह्यते लोकमदो-दुःखाकरोति माम्' 'एतद्वाग्नेः प्रियंधामं यद् घृतं' 'अयं वाव यः पवते सोऽग्निर्नाचिकेतः' 'अमुना सह निरर्थं योस्मान् द्वेष्टि' इत्यादौ लोकवेदयोरेतदिदमदसामपि तच्छब्दार्थत्वं दृश्यते कथं योऽसावित्यत्र तच्छब्दं विना साकाङ्क्षत्वं तत्राह– यच्छब्दसान्निध्यमध्यासीनस्येति । यत्र यच्छब्दस्य व्यवधानेनैषां प्रयोगस्तत्र तथास्तु । यत्र त्वव्यव-धानं तत्र तेषां प्रसिद्धिपरत्त्वमेवेत्यनुसन्धेयम् । 'सैषा स्थली यत्र विचिन्वता त्वाम्' 'मृदुतीक्ष्णतरं यदुच्यते तदिदं मन्मथ दृश्यते त्वयि' 'सैषा भार्गवी वारुणी विद्या' 'तामिमामप्रदाहाय' तदद्श्चन्द्र-मसि कृष्णम्' इत्यादिलोकवेदप्रयोगदर्शनात् । इत्यविमृष्टविधेयांशः ॥

मू०—भवति प्रक्रमभङ्गः प्रक्रान्तं यत्र भज्यते वस्तु ।

प्रक्रमस्य प्रस्तावस्य भङ्ग इति कृत्वान्वर्थाभिधानोऽयम् । उद्देश्यप्रतिनिर्देश्यभावः प्रक्रमस्य विषयः । उद्देश्य प्रतिनिर्देश्य भावाभावविषयं च पौनरुक्त्यम् । अयं च प्रकृतिप्रत्ययोपसर्गविभक्तिवचनकालकारकलिङ्गसर्वनामविशेषणपर्याय-वाक्यसमासालङ्कारगतत्वेन भवन्ननेकधा भवति ।

क्रमेण प्रत्युदाह्रियते ॥

जीयात् पार्वणरोहिणीशकिरणश्रेणीसमालिङ्गित-
क्षीराम्भोधितरङ्गलङ्घितयशोराशिः कलिङ्गेश्वरः ।

आश्चर्यं समरे निमज्ज्य सहसा यत्खड्गधाराम्भसि
प्रोन्मज्जन्ति समन्ततः प्रतिभटाः स्वर्वाहिनीस्रोतसि ॥

अत्र निमज्ज्येत्यस्य स्थाने निपत्येति यद्यकरिष्यत तदा प्रकृतिप्रक्रमभङ्गः सम्पत्स्यत ॥

व्या०—अथ प्रक्रमभङ्गं लक्षयति– भवतीत्यादि । प्रक्रमस्य प्रक्रान्तस्य भङ्गो यस्मिन् स प्रक्रमभङ्ग इति व्याचष्टे– प्रक्रमस्येति । ननु प्रक्रान्तस्य भङ्गः प्रक्रमभङ्गः; अभङ्गे पौनरुक्त्यं तया चैकं सन्धित्सोरपरं प्रच्यवत इति न्यायपात इत्याशङ्क्योभयोर्विषयव्यवस्थां दर्शयति– उद्देश्येति । उद्देशो निर्देषः । निर्दिष्टस्यैव शब्दस्य प्रयोजनवशात् पुनर्निर्देषः प्रतिनिर्देशः । तत्र सर्वथा तस्यैव शब्दस्य सर्वनाम्नो वा प्रयोगः कर्तव्यः । अन्यथा पर्यायप्रयोगेऽपि तदर्थ-प्रत्यभिज्ञातिरोधानात् प्रक्रमभङ्गः । यत्र तु उद्देश्यप्रतिनिर्देश्यभावो-नास्ति तत्र तस्यैव प्रयोगे पौनरुक्त्यस्यावकाश इत्यनयोर्विषयविभाग इत्यर्थः । अत्र निमज्ज्येति । लोके निमग्नस्यैवोन्मज्जनमिति स्थितिः । निपत्येत्युक्ते शब्दभेदमहिम्ना निमज्जनादर्थान्तरप्रतीतेरुक्त-स्थितिभङ्गादयं दोषः । तत्र मज्जिप्रकृते वात्र वृत्त्यपेक्षणात्तदभावे प्रकृतिप्रक्रमभङ्ग इत्यर्थः । एवमुत्तरत्रापि सर्वत्रोह्यम् ॥

मू०—लोके विक्रमितुं त्रिविक्रमपदाद्दातुं सुरक्ष्मारुहा-
द्धात्रीं धातुमहीश्वरात् प्रभवितुं पत्युश्च नाकौकसाम् ।
तत्तत्कीर्तिविकासवासितनभः सीम्नां गुणानां निधिः
को वा वीर नृसिंह देव नृपतिस्त्वामन्तरेणाधिकः ॥

अत्र दानाय कल्पद्रुमादिति पाठे प्रत्ययप्रक्रमभङ्गो भवति ।

दयायै दक् कर्णः सरसकविसूक्ताय वदनं
सरस्वत्यै पृथ्व्यै भुजशिखरमीशाय हृदयम् ।
इति प्रत्तास्तावत् स्वयमवयवा अप्यविरतं
प्रदेयं किं कस्मै न तव नरसिंह क्षितिपते ॥

अत्र प्रत्ता इत्यभिधाय प्रदेयमित्यभिहितम् । इतरथोप-सर्गप्रक्रमभङ्गप्रसङ्गः ॥

व्या०—लोक इत्यादि । पदादित्यादौ सर्वत्र 'पञ्चमी विभक्ते' इति पञ्चमी । प्रत्ययप्रक्रमभङ्ग इति । दानायेत्युक्ते तुमन् प्रत्ययस्य प्रक्रान्तस्य भग्नत्वादित्यर्थः । प्रत्ता इति । प्रपूर्वात् ददातेः कर्मणि क्तः । 'अच उपसर्गात्तः' इति दस्तकारा-देशः । इतरथेति । देयमित्येवोक्त इत्यर्थः ॥

मू०—मदान्धास्त्वन्नागाः प्रतिभटपुरं वीर सहसा
धनाक्रीडं क्रीडाशिखरिकमनीयं जगृहिरे ।
ददुस्तेभ्यः कल्पद्रुमपरिगतोद्यानसुभगं
भविष्णुभ्राजिष्णुत्रिदशगिरिगीर्वाणनगरम् ॥

अदुरिति पाठे त्वत्र विभक्तिप्रक्रमभङ्गः ।

वीर नृसिंह कवित्वं चम्पकसौरभ्यमिन्दुसौन्दर्यम् ।
गङ्गाजलमाधुर्यं कस्य न भुवनेषु सर्वदा मान्यम् ॥

अत्रैकवचनं निर्व्यूढमिति न वचनप्रक्रमभङ्गः ।

सुत्रामा गोत्रभेदं रचयति भजते दृष्टिवैषम्यमीशो
हीनं कृष्णोऽधिशेते क्षिपति सुमनसो मार्गणान् पुष्पचापः ।

इन्दुर्दोषाकरत्वं कलयति कुमुदं मन्दयत्यंशुमाली
पश्यामस्ते नृसिंह क्षितितलतिलक क्वापि नैवोपमानम् ॥

अत्र वर्तमानस्य कालस्य प्रक्रान्तस्य निर्वाहान्न काल-प्रक्रमभङ्गः ॥

व्या०—मदान्धा इति । न्यूनग्रहणेनाधिकदानान्मदान्धत्व-मिति भावः । अत एवाधिकपरिवृत्तिरलंकारः । घनाक्रीडं निरन्तरोद्यानम्-असुभगं सुभगं भवतीति सुभगंभविष्णु । 'कर्तरि भुवः खिष्णुच् खञौ' इति सुभगोपपदात् भवतेः खिष्णुच् प्रत्ययः । भ्राजनशीलो भ्राजिष्णुः । 'भुवश्च' इति चकारादिष्णुच् । स त्रिदशगिरिः यस्मिन् तथोक्तम् । अदुरिति पाठे त्विति । लुङ् विभक्त्यु-पादाने जगृहिरे इति लिङ्विभक्तिप्रक्रमभङ्ग इति भावः । सुत्रामेत्यादि । गोत्रभेदं पर्वतभेदं कुलभेदं च । दृष्टिवैषम्यं त्रिनेत्रत्वमतुल्यदर्शित्वं च । अहीनमहिपतिं हीनं क्षुद्रं च । सुमनसः पुष्पाणि विदुषश्च । दोषाकरत्वं निशाकरत्वं दोषाणामाकरत्वं च । कुमुदं कैर्भवोवं कोर्भुवो मुदं च ॥

मू०— तव क्रियन्ते करुणाकटाक्षैः
श्रियः कवीनां नरसिंह देव ।

ताभिर्विकासा पनसः पुनस्तैः
सूक्तानि तैस्त्वद्गुणवर्णनानि ।

इहानुक्तस्य कर्तुः प्रक्रान्तस्य निर्वहणान्न कारकप्रक्रमभङ्गः ।

बिम्बं चन्द्रमसः कलङ्कमयते धत्ते विकारं पयः
कुन्दं म्लानिमुपैति किं न कुरुते मैत्रीं मृणालं जलैः ।
मालिन्यं भजते हरित्करिमदस्यन्देन मन्दाकिनी
स्रोतो वीर नृसिंह भूप भवतः केनोपमेयं यशः ॥

अत्र नपुंसकमेव प्रतिकर्तृगतत्वेनोपनिबद्धमिति न लिङ्ग-प्रक्रमभङ्गः ।

लोकेस्मिन् नरसिंह देवनृपतिर्दाता न कल्पद्रुम-
स्तेजस्वी स न पद्मिनीसहचरः कान्तः स नो चन्द्रमाः ।
गम्भीरः स न वाहिनीपरिवृढस्तुङ्गः स नो मन्दरः
शिल्पज्ञः स न पद्मभूः किमपरं वाग्मी स नो वाक्पतिः ॥

अत्र तच्छब्देनैव प्रक्रान्तेन निर्वाहात् नास्त्येव सर्वनाम-प्रक्रमभङ्गः ।

प्रागासीन्मकरन्दपिच्छिलदले पद्मस्य गर्भे ततः
शौरेः कौस्तुभकान्तिपूरसुभगाभोगे भुजाभ्यन्तरे ॥

आवासस्तव लक्ष्मि सम्प्रति पुनर्निर्व्याजमूर्च्छत्कृपा
स्रोतः शीतलिते नृसिंहवसुधानाथस्य नेत्राञ्चले ॥

अत्र सविशेषणस्य विशेष्यस्याभिधातुं प्रक्रान्तस्य निर्वाहान्न विशेषणप्रक्रमभङ्गः ।

किमेतासामन्तःपुरपरिसरे केवलमभू-
दसूर्यम्पश्यत्वं त्वदरिसुदृशामुत्कलयते ।
इदानीमप्येता गिरिगहनगेहप्रणयिनी-
रसूर्यम्पश्यत्वं सततमुपबध्नाति किमिदम् ॥

अत्र द्वितीयस्यासूर्यम्पश्यत्वमिति शब्दस्य स्थाने 'अनर्का-लोकित्वम्' इति यदि क्रियते तदा पर्यायप्रक्रमभङ्गः ॥

व्या०—अनुक्तस्य कर्तुरिति । कटाक्षैरित्याद्यनभिहितकर्तु-रित्यर्थः । तत्र 'कर्तृकरणयोस्तृतीया' इति तृतीयाविधानात् । किमेतासामिति । सूर्यं न पश्यन्तीत्यसूर्यम्पश्याः । राजदारत्वात् तथा गुप्ता इत्यर्थः । असमर्थसमासोऽयम् । नञो दृशिना सह सम्बन्धात् । पूर्वमैश्वर्याद्देवासूर्यम्पश्यत्वं सम्प्रति तु भयादिति भावः । इतःपरमेतद्-दोषशेषः स्पष्टार्थः ॥

मू० – सन्त्यज्य पुष्पसमयं कुसुमाभिवृद्धिं
ज्योत्स्नाविजृम्भितमपास्य तुषारभानुम् ।
मुक्ताफलोल्लसितमम्बुनिधिं विहाय
कीर्तिस्तव स्फुरति वीर कलिङ्गनाथ ॥

अत्र वाक्येन वक्तुं प्रक्रान्तं निर्वाहं प्रापितमिति न वाक्य-प्रक्रमभङ्गः ।

काश्मीरपांसुरुचिरांशुकचारुहारै-
र्या प्राग्बभौ कुचतटी रिपुसुन्दरीणाम् ।

सैवाद्य भाति कुपिते त्वयि वीर भूभृद्
धातुच्छटातरुणपल्लवरक्तसूत्रैः ॥

अत्र समासस्य निर्व्यूढत्वान्न समासप्रक्रमभङ्गः ।

त्यागस्तावत् सुरतरुयशः कौमुदीकालमेघः
शौर्यं कुन्तीतनयचरितश्रुत्यनध्यायपर्व ।
कान्तिः पुष्पायुधवपुरहं भावरुद्रावलोकः
कस्ते वक्तुं प्रभवति गुणान् श्रीनृसिंह क्षितीन्द्र ॥

अत्र रूपकस्य निर्वाहान्नालङ्कारप्रक्रमभङ्गः ।

अत्र प्रकृतिप्रत्ययपर्यायादीनां प्रक्रान्तानामर्थभेदाभावेऽप्येकरसायाः प्रतीतेः परिस्खलनं प्रतिभातीति न शब्दभेदमाद्रियन्ते कवयः ॥

मूलम्०—

यदवाच्यस्य वचः स्यादवाच्यवचनं तु तद्गदितम् ॥३॥

निःशेषनिर्जरनमस्कृतपादपद्मं
यं नीलपूर्वमिह लोहितमामनन्ति ।
देवः स एष भवतः शशिखण्डमौलिः
श्रेयः श्रियं दिशतु वीर नृसिंह देव ॥

इह नीललोहित इति प्रसिद्धायाः संज्ञाया विशेषणविशेष्यभावेनाभिधानमनुचितम् । विरोधात् । संज्ञायाः

संज्ञिगतत्वेनैव विशेषणत्वमुचितं न स्वगतत्वेन । किं चायमभिधानानुकारः । स पुनरुभयप्रकारः शाब्दार्थत्वभेदात् । तत्र शाब्दो यत्रेति नावच्छेदः क्रियते । यथात्रैव 'यं नीललोहित इति स्फुटमामनन्ति' इति पाठे । आर्थो यत्रेतिना नावच्छेदः । यथात्रैव 'यं नीललोहितमिति (ह) स्फुटमामनन्ति' इति पाठे प्रकृते तावदभिधानं 'नीललोहित' इति न तु 'नीलपूर्वो लोहित' इति अतोऽभिधानेतरानुकरणस्यावाच्यस्य वचनं दोषः ।

चमत्कारं गौरीसहचरतनुस्पर्धि न कथं
विधत्ते भूयांसं भुवि तव कलिङ्गेश्वर यशः ।
यदन्तः कालिन्दीतटरुहतमालद्युति नभः
सुधाभानुक्रोडस्थितहरिणकेलिं कलयति ॥

अत्र तनुतटरुहस्थितपदान्यवाच्यानि । तस्माद् परिस्पर्धिकालिन्दीपरिसरक्रोडीकृतेति पठनीयम् ।

व्या०—अथावाच्यवचनं नाम दोषान्तरं लक्षयति– यदवाच्यस्येति । उदाहरति– निःशेषेति । नीलपूर्वं लोहितं नीललोहितमित्यर्थः । अत्र दोषांशं दर्शयति– इहेति । नीलपूर्व लोहितमिति विशेषणविशेष्यभावेन निर्देशो न युक्त इत्यर्थः । तत्र हेतुमाह– विरोधादिति । को विरोधस्तत्राह– संज्ञाया इति । संज्ञा हि संज्ञिनं विशिषती तस्यैव विशेषणं स्यात् न तु स्वस्य । स्वस्यैव स्वविशेषकत्वे आत्माश्रयप्रसङ्गात् । न ह्युत्पलनीलिमापि नीलिम्ना व्यावर्तते । ननु नात्र संज्ञायाः संज्ञाविशेषणत्वमुच्यते किं तु तदेकदेशस्यैकदेशान्तरविशेषणत्वमतो नात्माश्रय इति चेत्; सत्यं;

किं तु नीलपूर्वो लोहित इत्युक्ते नीलशब्दपूर्वो लोहितशब्द इत्युक्तं स्यात् । अर्थस्य तत्पूर्वकत्वासम्भवात् । तच्चासङ्गतत्वात् अवाच्य-मेवोच्यत इत्यवाच्यवचनमेवेदं सिद्धम् । अत्रैव युक्त्यन्तरमाह । किं चेति । अभिधानानुकारो नामधेयानुकरणम् । इति नावच्छेदः क्रियते इति शब्देनाभिधीयत इत्यर्थः । एवं नावच्छेदः क्रियत इत्यत्रापि नाभिधीयत इत्यर्थः । एवं च पूर्वत्र प्रथमा उत्तरत्र द्वितीया । अत एव 'निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः' इति वामनः । अस्त्वयमपि नामधेयानुकार एवेत्याशङ्क्याह । प्रकृते तावदिति । फलितमाह– **अत इति** । अस्यैव प्रकारान्तरमाह– **चमत्कारमित्यादि** । अत्रावाच्यांशं दर्शयति– **अत्रेति** । तदवचनेऽपि तदर्थस्य सामर्थ्यलभ्यत्वादित्यर्थः ॥

मू०—कारणाधारसम्बन्धैर्व्यभिचारो न दृश्यते ।
यत्र तस्य प्रयोगे स्यादवाच्यवचनं यथा ॥४॥

यथा–

हृदा हृष्यति जानाति ध्यायत्यध्येति खिद्यते ।
विलोकयति नेत्रेण श्रवणेन शृणोति च ॥

चित्रं चेतसि चिन्तेर्ष्याहर्षेच्छाक्रोधविस्मयाः ।
मनसि प्रमदोत्साहभयज्वरमदात्ययाः ॥

दिक्कुक्षिम्भरिभिः कठोरकरभीकर्णप्रभाभासुरै-
श्चित्रं वीर नृसिंह भूप तुरगोत्कीर्णैः परागोत्करैः ।

स्वत्सेनाविजयोत्सवव्यतिकरे व्याप्तं वियन्मण्डलं
हम्मीरक्षितिपालचेतसि परं मालिन्यमुन्मीलितम् ॥

अत्र तुरगखुरोत्कीर्णैरिति नोक्तम् । उत्किरणस्य खुरकरणत्वे व्यभिचाराभावात् ।

दारिद्र्यस्य दयालुत्वं नृसिंह नृप किं स्तुवे ।
यन्मत्वापि निजं नाशमस्माभिस्त्वामदर्शयत् ॥

अत्र दृशेः परस्मैपदे प्रयोज्यकर्तुः कर्मत्वविधानात् अस्माभिरित्यस्यावाच्यस्य वचनं दोषः । 'मां भवन्तमदर्शयत्' इति पठनीयम् । अस्मिन् पुनः पाठे किं स्तुव इत्येकत्वेनात्मानं निर्दिश्यास्माभिरिति बहुत्वेन निर्देशाद्वचनप्रक्रमभङ्गोऽपि नास्ति ॥

व्या०—पुनर्भङ्ग्यन्तरमाह— **कारणेत्यादि** । कारणाव्यभिचारमुदाहरति— **हृदेत्यादि** । आधाराव्यभिचारमुदाहरति— **चित्रमित्यादि** । सम्बन्धाव्यभिचारमुदाहरति— **दिगित्यादि** । कुक्षीन् बिभ्रति पूरयन्तीति कुक्षिभरयस्तैः । 'फलेग्रहिरात्मंभरिश्च' इति चकारान्निपातः । अत्र मालिन्यपरागव्याप्त्योर्वैयधिकरण्यादसङ्गत्यलङ्कारः । **उत्किरणस्येति** । तुरगकर्तृकस्येति शेषः । भिदान्तरमाह— **दारिद्र्यस्येति** । मत्वापि निश्चित्यापीत्यर्थः । यः स्वोच्छेदमविगणय्य परदुःखप्रहाणे प्रवर्तते तस्य दयां कः परिच्छेत्स्यतीत्यर्थः । तथा चैतद्दर्शिनामर्थिनां सद्यो दारिद्र्यविमुक्तिरिति भावः । अत्राप्यवाच्यांशमुद्घाटयति । **अत्र दृशेरिति** । ण्यन्तस्येति शेषः । **प्रयोज्यकर्तुरिति** ।

अणि कर्तुरित्यर्थः । कर्मत्वविधानादिति । दृशेर्बुद्ध्यर्थत्वाद् 'गतिबुद्धि–' इत्यादिना परस्मैपदे नित्यमणि कर्तुर्ण्यन्ते कर्मत्वविधानादित्यर्थः । आत्मनेपदे तु 'अभिवादिदृशोरात्मनेपद उपसंख्यानम्' इति कर्मसंज्ञाविकल्पः । अत एव 'दृशेर्बुद्ध्यर्थत्वान्नित्यप्राप्तौ पक्षे निवर्त्यते' इति कैयटः । अस्माभिरित्यवाच्यस्येति । उक्तरीत्या कर्तृत्वेनाप्रयोक्तव्यस्येत्यर्थः । पाठान्तरे लाभान्तरमप्याह । अस्मिन् पुनरिति ॥

मू०—यद्वाच्यस्यावचनं वाच्यावचनं तदुच्यते चतुरैः ।

निजचरणमविधनिपतनपरमपि पुर एव वीक्ष्य हम्मीरम् ।
राजन् नृसिंह समरे तिष्ठति तूष्णीमसौ खड्गः ॥

इह निजेत्यनेन नृसिंहनृपतिसम्बन्धे चरणयोरभिमते खड्गसम्बन्धप्रतीतिरित्येतन्न वाच्यम् । अभवन्मतयोगमितीदं मतान्तरे प्रसिद्धम् । तवेति समुचितः पाठः । अन्यस्यालङ्कारस्य विषये अलङ्कारान्तरोपनिबन्धो यत्र तत्रापि वाच्यावचनमेव ॥

व्या०—एवमवाच्यवचनमुक्त्वा तद्विपर्ययाद्वाच्यावचनं नाम दोषान्तरमाह– यद्वाच्यस्येति । उदाहरति– निजेत्यादि । पुर एव वीक्ष्यापीत्यपेरन्वयः । तूष्णीं तिष्ठतीति । शरणागतवधनिषेधादिति भावः । एतेनास्य कारुणिकत्वं व्यज्यते । अत्र कवेः प्रमादाल्लेखकदोषाद्वा प्रथमपादो मात्राहीनः । अतो निपतनेति सोपसर्गः पाठः कार्यः । अत्र चरणयोर्नृपे सम्बन्धो वाच्यः स नोक्त इति वाच्यावचनमेतदित्याह– इहेति । अभवन्नविद्यमानो मतयोग इष्टसम्बन्धो यस्मिन् सोऽभवन्मतयोगः । इष्टश्चेह चरणयोर्नृपयोगः स नास्तीत्यन्वर्थेयं संज्ञा । विषयान्तरेऽप्यमुं दोषं सञ्चारयति– अन्य-

स्येति । 'मृगीपरिभवो व्याघ्र्यामित्यवेहि त्वया कृतम्' इत्यादावेकवाक्यतया निदर्शनाविषये दृष्टान्तोक्तौ तदवचनाद्वाच्यावचनम् । न चेदमवाच्यवचनमेवेति वाच्यम् । दुष्टस्योक्तावेवाच्यवचनं; देवपूर्वं गिरिमित्यादौ । अन्यथा वाच्या वचनमेव पुरः स्फूर्तिकत्वादुद्भाव्यम् । एवं 'स्मरामि वानीरगृहेषु सुप्तम्' इत्यादौ सादृश्यप्रतीतिव्यतिरिक्तनिमित्तस्मृतावलङ्कारान्तरविषये स्मरणोक्तावपि सम्भवतोऽलङ्कारान्तरस्यावचनाद्वाच्यावचनमेवोद्भाव्यमित्याद्यूह्यम् । (इति) वाच्यावचनम् ।

मू०—दोषोऽर्थपौनरुक्त्यं प्ररूढमभिधीयते बहुधा ॥५॥

यथावभासनं तथैवार्थस्य विश्रान्तिः प्ररूढत्वम् । शब्दपौनरुक्त्यस्य न दोषत्वम् । तस्यानुप्रासाद्यलङ्कारत्वेनाङ्गीकारात् । बहुधा प्रकृत्यादिविषयत्वात् ।

तत्र प्रकृतिविषयत्वं यथा–

करटविलुठद्दानस्रोतस्विनीसुरभीकृत-
त्रिभवनपुटप्रेङ्खत्पुष्पन्धयध्वनिडिण्डिमः ।
सभयकुतुकं दृष्टः पौरैः कलिङ्गपुरन्दर
प्रथयतितरां कस्यानन्दं न ते गजतागणः ॥

अत्र गजतेति समूहार्थायाः प्रकृतेर्गणस्य च पौनरुक्त्यम् । 'करिणां गणः' इति पाठः परिणमयितव्यः ।

प्रत्ययविषयं यथा–

अर्धमङ्गमुपगूढवल्लभं
बिभ्रदर्धमपि भस्मभासुरम्

एक एव सुहृदिन्दुशेखरो
रागिणामपि विरागिणामपि ॥

अत्र विरागिणामिति मत्वर्थीयस्य पौनरुक्त्यम् । बहुव्रीहिणैव तदर्थावगतेः । कर्मधारयगर्भितान्मत्वर्थीयाद्बहुव्रीहिरेव वरम्, अपरथा प्रक्रियागौरवापत्तेः । भूमनिन्दार्थानामप्यस्त्यर्थानुयायित्वान्न पौनरुक्त्यपरिहारः शक्यक्रियः ।

उभयविषयं यथा—

दुर्वारैस्ते यशोभिः सकलमपि मम ध्वान्तमाचान्तमेतत्
तत् किं कुर्यामिदानीमिति तव गदितुं श्रीनृसिंह क्षितीन्द्र ।
लोकालोकेन पाथोधरनिवहनिभाः प्रेषिताः पश्य भान्ति
प्राप्ताः प्रत्यन्तपृथ्वीभृत इव गजता द्वारदेशोपकण्ठम् ॥

अत्र समूहार्थायाः प्रकृतेर्बहुवचनस्य च पौनरुक्त्यम् । 'प्राप्ताः प्रत्यन्तशैला इव मदकरिणः' इति पाठः परिणमयितव्यः ॥

व्या०—अथ पौनरुक्त्यं लक्षयति— दोष इत्यादि । किमिदं प्ररूढत्वमत आह— यथेति । अन्यथासिद्धत्वं प्ररूढत्वमित्यर्थः । अर्थग्रहणस्य प्रयोजनमाह— शब्देति । कुतो बहुधात्वं तदाह— प्रकृतीति । करटेति । पुष्पाणि धयन्तीति पुष्पन्धयाः पुष्पलिहो मधुपा इत्यर्थः । "नाडिमुष्ट्योश्च" इति चकारादनुक्तसमुच्चयार्थाद्धेटः पुष्पोपपदात् खश् प्रत्यये मुमागमः । गजानां समूहो गजता । 'गजाच्चेति वक्तव्यम्' इति समूहार्थे तल्प्रत्ययः । प्रकृतेः सुप्प्रत्यय-

प्रकृतेरित्यर्थः । **प्रत्ययविषयं यथेति** । इह आन्ध्रदेशीयेषु कोशेषु प्राचीनः प्रा(प्र)कृतराजनामाङ्कितउदाहरणश्लोकः प्रमादाद् भ्रष्टः । अर्धमङ्गमित्यादिरिन्दुशेखरविषयस्तु केनापि प्रक्षिप्तः । पौनरुक्त्यांशं दर्शयति— **अत्रेति** । पुनरुक्तत्वे हेतुमाह— **बहुव्रीहिणैवेति** । ननु मा भूदिह बहुव्रीहिः कर्मधारयादयं मत्वर्थीय इत्याशङ्क्याह— **कर्मधारयगर्भितादित्यादि** । मत्वर्थीयादिति पाठः । बहुव्रीहिरिति तु प्रामादिकोपात्तः । बहुव्रीहिरेव वरमिति । न कर्मधारयान्मत्वर्थीय' इति निषेधादिति भावः । सर्वधनीत्यादौ त्विन्नन्तो बहुव्रीहिरिति स्थितगतिः । विपक्षे बाधकमाह— **अपरथेति** । तर्ह्यस्त्यर्थे बहुव्रीहि-भूमाद्यर्थे मत्वर्थीय इति न पौनरुक्त्यमित्याशङ्क्याह— **भूमेति** । भूमादिष्वपि 'तदस्यास्त्यस्मिन्— 'इत्यस्त्यर्थ एव मत्वर्थीयविधानाद्बहुव्रीहेरप्यस्त्यर्थत्वाद् दुर्वारं पौनरुक्त्यमित्यर्थः । प्रकृतिप्रत्ययोभयपौनरुक्त्यमुदाहरति— **दुर्वारैरिति** । **किं कुर्यामिति** । किं प्रियं कुर्यामित्यर्थः । गदितुं प्रियं वक्तुमित्यर्थः ।

मू०—पदपौनरुक्त्यं यथा—

देवस्यास्य चिराय मत्प्रभुकुलाराध्यस्य गौरीपते-
रेषा नैव कदाप्यनुग्रहकथालक्ष्मीधुरामर्हति ।
इत्यालोच्य रुषेव केतकदलद्रोणीमियं निन्दति
स्वैरं वीर नृसिंह देव भवतः कीर्तिर्जगज्जाङ्घिकी ॥

अत्रालोचनार्थस्य पौनरुक्त्यम् । इतिशब्देनैव तदवगतेः ।

प्रत्युदाहरणं यथा—

पलायनपरस्य मे नियतमन्तरायो महा-
नियं भवति दुर्वहा वसुमती भुजालाम्बिनी ।
इतीव विरहय्य तामजनि जैत्रयात्रोत्सवे
विरोधिनृपतिर्लघुस्तव नृसिंह पृथ्वीपते ॥

अत्रालोच्येति न कृतम् । यां क्रियां प्रत्यसाधारण्येन प्रसिद्धो यः कर्ता तस्योपादाने सा न वाच्या । अत एव

उत्कण्ठाभारताम्यत्कुवलयनयनामानसाम्भोजभानु-
श्चिन्तासन्तापमीलत्कविकुलकुमुदव्यूहनक्षत्रनाथः ।
ईर्ष्यासंवर्द्धमानप्रतिनृपतिबलाम्भोधिकुम्भोद्भवश्च
ख्यातः सर्वत्र योऽसौ जगति स जयति श्रीनृसिंह क्षितीन्द्रः ॥

इत्यत्र मानसाम्भोजादिषु विकासादिक्रिया नोपात्ता ।

वीराः प्राक् कति नात्र तैरहमसावित्थं न संवर्द्धिता
न त्राता न च लालितेति भवतः प्रत्यायनं कुर्वती ।
त्वत्कीर्तिः कलहंसकम्बुरजनीजानिच्छलेन स्पृश-
त्यम्भोजासनकंसशासनपुरारातीन् कलिङ्गेश्वर ॥

अत्र शासनपदस्य पौनरुक्त्यम् । अरातिपदेनैवाभिमतार्थावगमात् । कंसशासनश्च पुरारातिश्चेति द्वन्द्वाश्रयणमिह नोचितम् ।

व्या०—देवस्येति । अनुग्रहकथालक्ष्मीधुरामनुग्रहातिशयमित्यर्थः।

"ऋक्पुर्–" इत्यादिना समासान्तोऽच् प्रत्ययः । नार्हति न भजति । "नाक्षतैः पूजयेद्विष्णुं न केतक्या महेश्वरम्" इति निषेधस्मरणादिति भावः । जङ्घया चरतीति जाङ्घिकी । चरति इति ठक् । टिड्ढाणञ्–" इत्यादिना ङीप् । विरहय्येति । त्यक्त्वेत्यर्थः । "ल्यपि लघुपूर्वात्" इत्ययादेशः । सा न वाच्येति । यस्यां क्रियायां यः कर्ता प्रतिनियतस्तदुक्त्यैव तस्या अपि गम्यमानत्वात् सा क्रिया पृथङ् न वाच्या । उक्तौ वा पौनरुक्त्यमित्यर्थः । नोपात्तेति । भान्वादेः । कर्तुरुपादानादिति शेषः । वीरा इति । संवर्धिता पोषिता । त्राता भयहतुभ्यो रक्षिता । त्रातेः कर्मणि क्तः । लालिता उपलालिता । प्रत्यायनं विश्वासनं शपथमिति यावत् । रजनी जाया यस्य स रजनिजानिश्चन्द्रः । "जायाया निङ्" इति समासान्तो निङादेशः । इह कलहंसादीनामम्भोजासनादिचिन्हत्वात् तत्स्पर्श एव तत्तद्देवतास्पर्शः । देवतापादसंस्पर्शस्तल्लिङ्गस्पर्शनं तथा" इति वचनादित्यभिप्रेत्याह– छलेनेति । अभिमतेति । कंसपुरशब्दयोरेव द्वन्द्वे तदन्ते श्रुतस्यारातिशब्दस्य प्रत्येकसम्बन्धे कंसारातिः पुरारातिश्चेत्यर्थस्यावगमादित्यर्थः । ननु द्वन्द्वान्तराश्रयणेऽपि तदर्थावगतिरस्त्येवेत्याशङ्क्याह– कंसशासनश्चेति । ननूभयत्रापि द्वन्द्वलक्षणस्य चार्थस्य सम्भवे कुतोऽन्यतरपक्षपातोऽन्यतरदोषश्चेत्याशङ्क्याह– उपायेति ।

मू०—उपायलाघवासम्भवात् । कंसपुरयोरराती(इ)ति तत्पुरुषे पुनराश्रीयमाणे कतरोऽपि न विरोधः । तत्रोपायलाघवसम्भवात् प्रतीतिः प्रधानमिति सैवानुसरणीया । न लक्षणमात्रम् । प्रतीत्यर्थमेव लक्षणस्याश्रीयमाणत्वात् । 'अम्भोजासनकैटभारिगिरिशानेषा कलिङ्गेश्वर' इति पाठे नायं दोषः । सर्वनामपरामर्शयोग्यस्यार्थस्य पुनः स्वशब्देनाभिधानं कथितपदा-

परपर्यायं पुनरुक्तमेव मन्तव्यम् । इवशब्देन यत्रैकेनैव दीपकत्वात् कर्तृकर्मादीनामप्युपमानोपमेयभावः प्रतीयते तत्र द्वितीयस्येवशब्दस्य प्रयोगो न योग्यः । पदपौनरुक्त्यप्रसङ्गात् ।

विशेष्यस्याभिधाने तु सामान्योक्तिर्न युज्यते ।
यथा मेरुगिरिः श्वासमरुच्चन्दन पादपः ॥६॥

और्वो वाह्निर्मणिर्मुक्ता शेषोऽहिः पुष्पमम्बुजम् ।
वसन्तर्तुः शरत्कालः कल्पान्तसमयादि च ॥७॥

मदाम्भोऽश्रुजलं स्वेदसलिलं पचनादिषु ।
विधिव्यापारकर्मादि प्रयोज्यं न कदाचन ॥८॥

प्रत्युदाहरणं यथा–

सङ्गीतादिविचारवार्धितरणे सांयात्रिकः कस्य न
श्लाघ्यो वीर कलिङ्गपार्थिव भवान् भूलोकचिन्तामणिः ।
रेखालाञ्छितकैतवेन सुकृती पद्माभिधानो निधिः
साक्षाद्यस्य करे कुबेरनगरीसर्वस्वमुज्जृम्भते ॥

अत्र तरणव्यापार इति नोक्तम् । तरणस्य व्यापारे व्यभिचाराभावात् ॥

इति श्रीमतो महामहेश्वरस्य कवेर्विद्याधरस्य कृतौ
एकावलीनाम्न्यलङ्कारशास्त्रे
दोषनिरूपणं नाम
षष्ठ उन्मेषः ॥

व्या०—अन्यत्र लाघवं दर्शयति— **कंसेति** । ननु लक्षणमुपेक्ष्य लाघवे कः पक्षपातस्तत्राह— **प्रतीतिरिति** । लघुप्रतीतिरित्यर्थः । **सैवेति** । लघुप्रतीतिरेवेत्यर्थः । प्रतीत्यर्थं लघुप्रतीत्यर्थम् । सर्वनामपरामर्शयोग्यस्येत्यादि । यथा

शुचि भूषयति श्रुतं वपु
प्रशमस्तस्य भवत्यलंक्रिया ।
प्रशमाभरणं पराक्रमः
स नयापादितसिद्धिभूषणः ॥

इत्यत्र प्रशमाभरणमिति प्रशमस्य पुनः स्वशब्देनोपादनं पुनरुक्तम् । अन्यत्र सर्वनाम्नैव परामर्शान्न दोषः । नन्वेतन्मतान्तरेऽपि कथितपदं नाम दोषान्तरमुच्यते तत् कथं पुनरुक्तमत आह— **कथितपदापरपर्यायमिति** । अनेकेवोपमां केचिदाहुः । यथा—

'ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥' इति ।

स्वमते तदपि पुनरुक्तमेवेत्याह— **इवशब्देनेति** । पौनरुक्त्यन्तराण्याह— **विशेष्यस्येत्यादि** । **पचनादिष्विति** । पचनविधिः पाकव्यापारो भोजनकर्मेत्यादि पुनरुक्तमित्यर्थः सुगममन्यत् ॥

इति पदवाक्यप्रमाणपारावारपारीण
श्रीमहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायाम्
एकावलीव्याख्यायां तरलाख्यायां
दोषनिरूपणं नाम
षष्ठ उन्मेषः ॥

अथ सप्तम उन्मेषः

मू०—अथ दोषव्यावृत्त्यालङ्कारः कथ्यतेऽधुनास्माभिः ।
पुनरुक्तवदाभासो भवति प्रमुखावभासनं द्वेधा ॥१॥

यद्यपि शब्दालङ्कारनिरूपणानन्तरमर्थालङ्कारनिरूपणमुचितं तथाप्यर्थपौनरुक्त्यस्यैव प्ररूढस्य दोषत्वेनाभिधानात् तद्विपर्ययस्यालङ्कारत्वदर्शनाय व्युत्क्रमेणात्र कथनमेतस्य । प्रमुख आपाततः प्रतिभासनं न पुनस्तत्रैव विश्रान्तमर्थैक्यम् । अन्यथा पर्यायत्ववशाच्छब्दान्तरस्यार्थान्तरवृत्तेरसम्भवात् । तद्द्वेधा नामाख्यातगतत्वेन । क्रमेण यथा—

अभ्यस्ताशेषविद्याभरगुरुधिषणं विद्विषद्रक्तपान-
क्रीडानिस्त्रिंशखड्गं विरचितवसुधाचक्ररक्षाविभूतिम् ।
किं चालोकप्रभावक्षपितबुधविपद्ध्वान्तमुद्गायति त्वां
तुङ्गे शृङ्गे सुमेरोः सुरयुवतिगणः श्रीनृसिंह क्षितीन्द्र ॥

अत्र गुरुधिषणयोर्निस्त्रिंशखड्गयो रक्षा विभूत्योरालोकप्रभयोर्नाम्नोः पुनरुक्तवदाभासनम् ।

तान् निर्माति करोति हस्तितरिपून् युद्धेषु ते विक्रमान्
यैर्लोको भरते बिभर्ति कुतुकं रामेऽपि न प्रस्तुते ।

किं चाभ्यर्थनदुष्कृतानि शमयस्याकर्णयस्येकदा
यद्याकृष्टसुधारसं सुमनसां सूक्तं कलिङ्गेश्वर ॥

अत्र निमीति करोतीत्यादिकयोराख्यातयोः ॥

व्या०—अर्थालङ्कारनिरूपणाय सङ्गतिमाह:— अथेति । दोषनिरूपणानन्तरं तत्प्रतियोगितयालङ्कारनिरूपणं सङ्गतमित्यर्थः । तत्र पुनरुक्तवदाभासो नाम कश्चिदर्थालङ्कारस्तमादौ लक्षयति:— पुनरुक्तवदाभास इति । अपुनरुक्तोऽपि यत्र अर्थ आपाततः पुनरुक्तवदाभासते स पुनरुक्तवदाभासो नामालङ्कार इत्यर्थः । द्वेधेत्यस्य विभागकथनं नामाख्यतगतत्वेनेति शेषः । नन्वर्थालङ्कारोऽयं कथमप्रस्तावे निरूप्यत इत्याशङ्क्य चिरन्तनप्रसिध्येति पूर्वेषां परिहारे स्थिते स्वयं परिहारान्तरमाह:— यद्यपीति । अर्थपौनरुक्त्यस्यैवेत्येवकारः शब्दपौनरुक्त्यव्यवच्छेदार्थः । प्ररूढस्येत्यत्र रूढव्यवच्छेदः । तद्विपर्ययस्येति । प्ररूढार्थपौनरुक्त्यविपर्ययस्याप्ररूढपौनरुक्त्यस्येति यावत् । प्रमुखशब्दार्थमाह आपतत इति । आरम्भ इत्यर्थः । प्रतिभासनशब्दतात्पर्यमाह:— न पुनरिति । ननु तत्रैव विश्रान्तिः कथं न भविष्यतीत्याशङ्क्याह:— अन्यथेति । अर्थान्तरस्विकारमनन्तरेणानुपपत्तेरित्यर्थः । विभाजते— तद्द्वेधेति । अभ्यस्तेति । गुरुधिषणं भरितबुद्धिमित्यर्थः । निस्त्रिंशखड्गं निर्दयखड्गम् । "निस्त्रिंशो निर्दये खड्गे" इति विश्वः । वसुधाचक्रस्य रक्षा रक्षणम् विभूतिरैश्वर्यं च विरचितं येन तम् । आलोकप्रभावो दृष्टिमहिमा । कुत्रेह पुनरुक्तवद्भासनं तदाह— अत्रेति । 'गीष्पतिर्धिषणो गुरुः' । 'विभूतिर्भूतिरक्षयो' । 'तेजः प्रभाव आलोक' इत्यभिधानैः पर्यायत्वप्रतीतेरित्यर्थः । द्वितीयमुदाहरति— तानिति । कर इति च्छेदः ।

अतिहस्तितरिपून् हिंसितशत्रून् । यैर्विक्रमैर्भरते भरताख्ये शाकुन्तलेये राज्ञि रामे दाशरथौ प्रस्तुते प्रशस्ते । अभ्यर्थनदुष्कृतानीति च्छेदः । याञ्चा दुःखानीत्यर्थः । इह पुनरुक्तवदाभासमुद्भावयति । अत्रेति । आदिशब्दाद् भरते बिभर्तीत्यनयोर्निशमयस्याकर्णयसीत्यनयोश्च संग्रहः ।

मू०—पुनरुक्तवदाभासं कथयित्वार्थैकनिष्ठमपि ।
अथशब्दालङ्काराः प्रस्तूयन्ते त्रयोऽधुनास्माभिः ॥

शब्दस्य पौनरुक्त्यं व्यञ्जनसमुदायमाश्रितं यस्मात् ।
सच्छेकानुप्रासः संख्यानियमे समुल्लसति ॥

द्वयोर्द्वयोर्व्यञ्जनयोर्ययोः कयोश्चिदन्योन्यमसकृत्सादृश्यं सङ्ख्यानियमः । छेकाः विदग्धास्तैः प्रयुक्तोऽक्षमनुप्रासः इत्यन्वर्थः ।

कलाकलापं दधदुज्ज्वलोज्ज्वलं
मुहुस्तमस्तोममपाकरोति यः ।
न कस्य हर्षं वसुधासुधाकरः
करोत्ययं वीरनृसिंहभूपतिः ॥

व्या—अथ सङ्गतिकथनपूर्वकं शब्दालङ्कारान् प्रस्तौतिः—पुनरुक्तवदीति । अर्थालङ्कारत्वेऽपि, अर्थपौनरुक्त्यदोषप्रसङ्गाच्चिरन्तनप्रसिध्या च पुनरुक्तवदाभासं पूर्वमभिधाय पुनरर्थापेक्षया शब्दस्य प्रतीतावन्तरङ्गत्वेन प्रथमं शब्दालङ्काराः प्रस्तूयन्त इत्यर्थः ॥

इह शब्दपौनरुक्त्यं शब्दालङ्कारोऽनुप्रासाख्यः । स च त्रिविधः । छेकानुप्रासो, वृत्त्यनुप्रासो, लाटानुप्रासश्चेति । तत्राद्यं

लक्षयति— शब्दस्येति । तत्र शब्दपौनरुक्त्यं द्विविधं—व्यञ्जनमात्रपौनरुक्त्यं स्वरव्यञ्जनसमुदायपौनरुक्त्यं च । तत्र व्यञ्जनमात्रपौनरुक्त्यं सति सङ्ख्याविशेषनियमे छेकानुप्रास इत्यर्थः । नियतसङ्ख्याविशेषं दर्शयति— द्वयोर्द्वयोरिति । अत्र 'सोऽनेकस्य सकृत्पूर्वः' इत्यादिना सकृद्व्यञ्जन युग्मावृत्तिश्छेकानुप्रासः । असकृदावृत्तिर्वृत्त्यनुप्रास इत्याह काव्यप्रकाशकारः । अलङ्कारसर्वस्वकारस्तु तद्विपरीतं सिद्धान्तयाञ्चकार । तन्मतावलम्बेनाह— असकृत्सादृश्यमिति । उदाहरति— कलेति । अत्र छेकानुप्रासे व्यञ्जनमात्रपौनरुक्त्यस्येष्टत्वात् कलाकलासुधासुधेत्यादौ स्वरव्यञ्जनसमुदायपौनरुक्त्याद्यमकभेदेनास्यैकाभिधानलक्षणः सङ्करः ।

मू०—सङ्ख्यानियमाभावे भवति पुनर्वृत्त्यनुप्रासः ।

केवलव्यञ्जनसादृश्यं सकृद्व्यञ्जनसादृश्यं त्र्यादीनां व्यञ्जनानामितरेतरसादृश्यं सङ्ख्यानियमाभावः । वृत्तिस्तु रसविषयो व्यापारस्तत्समुचिता वर्णरचनेह वृत्तिः । तदुपलक्षितोऽयमनुप्रास इत्यन्वर्थाभिख्योऽपि ।

क्रमेण यथा—

श्रीमन्नृसिंह नरनाथ कथं यशस्ते
कृत्तारिकण्ठरुधिरारुणितात् कृपाणात् ।
कैलासकाशकरकाकुमुदेन्दुकुन्द-
मन्दारमौक्तिकमृणालमनोज्ञमासीत् ॥

युक्ताविपक्षेषु कृपा न कर्तु-
मेते विकुर्वन्ति हि कार्यकाले ।

इत्याहवे वीक्ष्य कलिङ्गनाथं
नाथन्त्यमी प्राञ्जलयः सपत्नाः ॥

जगति गजगतिर्नन्दतु श्रीनृसिंहः ॥

व्या०—द्वितीयभेदं लक्षयति । सङ्ख्येत्यादि । सङ्ख्यानियमाभाव इत्येतद्विवृणोति । केवलेति । कैवल्यमसमुदितत्वम् । सादृश्यं पौनरुक्त्यं सकृद्व्यञ्जनेत्यत्र व्यञ्जनद्वयसादृश्यं विवक्षितम् । एवं च सत्यसकृदेकैकव्यञ्जनपौनरुक्त्यं सकृद्व्यञ्जनद्वयपौनरुक्त्यं त्रिचतुरादिव्यञ्जनसमुदायपौनरुक्त्यं चेत्यर्थः । अलङ्कारसर्वस्वकारोक्तरीत्या वृत्त्यनुप्रासशब्दं निर्वचन् वृत्तिशब्दस्य तावत्तदुक्तं मुख्यार्थमाह— वृत्तिस्त्विति । इह तद्वती वर्णरचना वृत्तिरुपचारादुच्यत इत्याह— तत्समुचितेति । क्रमेणेति । प्रथमोदाहरणे केवलव्यञ्जनपौनरुक्त्यं व्यक्तम् । द्वितीयोदाहरणे नाथं नाथमिति सकृद्व्यञ्जनद्वयपौनरुक्त्यम् । तृतीये जगति जगतीति त्र्यादिसादृश्यम् ॥

मू०—इदमेव स्वरसहितं व्यञ्जनसमुदायमाश्रितं यमकम् ॥४॥

अत्र क्वचिद्भिन्नार्थकत्वं क्वचिदनर्थकत्वं क्वचिदेकस्यानर्थकत्वमन्यस्य सार्थकत्वमिति संक्षेपतः प्रकारत्रयम् । क्रमेण यथा—

कलिङ्गनाथ यस्मात्त्वं प्रभवः सर्वसम्पदाम् ।
अतस्तव तुलां प्राप्तुं प्रभवः केऽपि नापरे ॥

अत्र प्रभवः प्रभव इत्यभिहितयोर्भिन्नार्थकत्वम् ।

भाग्यसौभाग्यसौजन्यनिधिं नरहरिं स्तुमः ।
चतुरं चतुराम्भोधिमेखलावनिपालने ॥

अत्र भाग्यसौभाग्यसावित्यनयोरनर्थकत्वम् । प्रथमस्य चतुरमित्यस्य सार्थकत्वमपरस्यानर्थकत्वम् ।

प्रायशो यमके चित्रे रसपुष्टिर्न दृश्यते ।
दुष्करत्वादसाधुत्वमेकमेवात्र दूषणम् ॥५॥

रलयोर्डलयोस्तद्वल्लळयोर्बवयोरपि ।
नमयोर्नणयोश्चान्ते सविसर्गाविसर्गयोः ॥६॥

सबिन्दुकाबिन्दुकयोः स्यादभेदेन कल्पनम् ।
यमकं तु विधातव्यं कथञ्चिदपि न त्रिपात् ॥७॥

वर्णानामथ पद्माद्याकृतिहेतुत्वमुच्यते चित्रम् ।

कर्णशष्कुल्यवच्छिन्नाकाशसमवेतैः ककारादिभिरभेदेन ग्रहणाल्लिप्यक्षरेष्वप्ययं ककार इत्यैक्यप्रतीतेः शब्दालङ्कारत्वमत्रौपचारिकम् । कर्णिकाप्रमुखस्थानविशेषश्लिष्टानां वर्णानां पुनः पुनरावृत्तिव्यावृत्तिभ्यामादानादक्षरसङ्कोचश्चित्रम् ॥

व्या०—एवं व्यञ्जनमात्रपौनरुक्त्ये छेकानुप्रासाद्युक्त्वा शब्दमात्रपौनरुक्त्यसाम्यात् स्वरव्यञ्जनसमुदायपौनरुक्त्याश्रितं यमकाख्यं शब्दालङ्कारान्तरमाह— इदमेवेति । इदमिति पौनरुक्त्यं परामृश्यते । नियतसङ्ख्याकस्वरव्यञ्जन पौनरुक्त्यं यमकमित्यर्थः । तत् त्रेधा विभजते— अत्र क्वचिदिति । आद्यभेदद्वयोरितिशेषः । अत्र

प्रभव इति । प्रभवत्यस्मादिति प्रभवः कारणम् । "ऋदो रप्" प्रभवन्तीति प्रभवः समर्थाः । "विप्रसम्भ्यो ड्वसंज्ञायाम्" इति ड्डप्रत्ययः । इत्युभयोः पार्थक्यमित्यर्थः । ननु केयमास्था कवीनां नीरसयोश्चित्रयमकयोरित्याशङ्क्याह– प्रायश इति । वैचित्र्यवशादेव चमत्कारकारित्वसम्भवात् न रसापेक्षा प्रेक्षावतामित्यर्थः । तर्हि कथं न सर्वादरस्तत्राह– दुष्करत्वादिति । अशक्तानामनादरो न तु शक्तानामिति भावः ॥ तत्र वर्ज्यावर्ज्ये दर्शयति– रलयोरित्यादिना । न त्रिपादिति । त्रिपादवृत्तियमकम्, स्वमताभिधानम् इदम् । मतान्तरे तु तदप्यस्त्येव । "एकद्वित्रिचतुष्पादयमकानां विकल्पना" इत्यादिना दण्डिना लक्षणोदाहरणाभ्यां बहुधा प्रपञ्चितत्वादिति ॥

तदेवं यमकमुक्त्वा स्वरसहितव्यञ्जनावृत्तिमत्वसाधर्म्यात् तदनन्तरं चित्राख्यं शब्दालङ्कारविशेषं लक्षयति– वर्णानामित्यादि । ननु शब्दात्मलिप्यक्षरगताकारचित्रस्य कथं शब्दालङ्कारतेत्याशङ्क्याह– कर्णेति । अशब्देष्वपि लिप्यक्षरेषु गम्यगमकयोरभेदोपचारात्तथात्वमित्यर्थः । चित्रमात्रव्यापकलक्षणं निष्कृष्याह– कर्णिकेति ॥

मू०—अत्र यद्यपि बन्धचित्रमाकारचित्राद्भिन्नं मन्यमानैरपि चिरन्तनैर्न किञ्चिद्भेदकमुक्तम् तथापि ईश्वरकर्तृकत्वे सत्यपि यदेककर्तृकतया प्रसिद्धं तत् पद्मशैलादिकमाकारचित्रम् । यत्तु द्विकर्तृकं हलमुसलमुरजगोमूत्रिका चापचक्रादि तद्बन्धचित्रमित्यनयोर्भेदः कल्पयितुं शक्य एवास्माभिः । तथापि न कल्पितः आकारचित्र इवेह बन्धचित्रेऽपि वर्णानामाकारोल्लासकत्वात् । पद्मादिरूपतयाक्षराणां लिख्यमानत्वेन चित्रसादृश्याच्चित्रमिदमुच्यते । अहो येन क्रमेण गतावर्णपंक्तिस्तेनैव क्रमेण प्रत्यागतेत्याश्चर्यकारित्वाद्वा चित्रमित्यन्वर्थबलाद्वर्णानामाकाराउल्लासकत्वेनाव्याप्तावपि गतप्रत्यागता-

र्धभ्रमसर्वतोभद्रधेनुप्रभृतिगतिचित्रमत्र संगृहीतम् । अभिनवपदार्थ-पर्यालोचनेन मन्दबुद्धीनां चितो ज्ञानस्य त्राणाद्वा चित्रमित्यन्वर्थ-महिम्ना निष्कण्ठय निरोष्ठ्यनिस्तालव्यादिस्थानचित्रं च स्वीकृतम् । एतच्च काव्ये गड्डभूतमिति नेह प्रतायते । यत् पुनः स्वरविरहित-व्यञ्जनमात्रसादृश्यप्रयुक्तं वर्णचित्रमपरैरभ्यधायि तदस्मिन् दर्शने वृत्त्यनुप्रास एव । यथा–

कलङ्किकङ्ककाकोलकुले कलकलाकुले ।
कङ्केलिकलिकालोल किं का कोकिल काकली ॥

स्वरचित्रं तु बन्धशैथिल्यकारितया दोष एवेति नालङ्कारतया स्वीकृतम् । यदाह राजा–

उरुगुं द्युगुरुं युत्सु चुक्रुशुस्तुष्टुवुः पुरु ।
लुलुवुः पुपुषुर्मुत्सु मुमुहुस्तु मुहुर्मुहुः ॥

व्या०—अथ बन्धचित्रगतिचित्रस्थानचित्राणामप्याकारचित्र एवा-न्तर्भावं कर्तुमनन्तर्भाववादिभिरनुक्तमपि बन्धचित्राकारचित्रयोश्चो(:स्वो)-त्प्रेक्षापरिकल्पितमेव भेदकमुपन्यस्यति– अत्र यद्यपीति । चिरन्तनै-र्नोक्तं चेत् कोऽन्यो वक्ष्यतीत्याशङ्कयाह– तथापीति । ईश्वरकर्तृकत्वे सत्यपीति । कृत्स्नस्य जगत इति शेषः । एककर्तृकतयेति । ईश्वरमात्रकर्तृकतयेत्यर्थः । द्विकर्तृकमिति । ईश्वरकर्तृकमस्मदादिकर्तृकं चेत्यर्थः । अस्मदादिकर्तृकेऽपीश्वरस्य सर्वोत्पत्तिमन्निमित्तत्वेन कर्तृत्वस्य शब्दलिङ्गाभ्यामङ्गीकारादिति भावः । तर्हि तथैवास्त्वित्यत आह– तथापि न कल्पित इति । कुत इत्यत आह– आकारेति । आकारो-ल्लासहेतुत्वाविशेषादाकारचित्र एवान्तर्भूतं बन्धचित्रमपीत्यर्थः । 'आश्चर्या-

लेख्ययोश्चित्रम्' इत्यमरः । तत्रालेख्यार्थत्वमाश्रित्य चित्रशब्दस्येह प्रवृत्तिनिमित्तमाह— **पद्मादिरूपतयेति** । चित्रमद्भुतमाश्चर्यमित्यर्थः ।

तर्ह्याकारोल्लासहेतुत्वाभावाद्गतिचित्रेऽर्धभ्रमसर्वतोभद्रादावव्याप्तिरित्याशङ्क्य चित्रशब्दस्याश्चर्यार्थताश्रयणेन तत्रापि प्रवृत्तिनिमित्तं सम्भावयति— **अहो येनेति** । गतागताभ्यां चित्रत्वादाश्चर्यत्वाच्चित्रमिति गतिचित्रेऽपि नाव्याप्तिरित्यर्थः । तर्हि गतप्रत्यागतरहिते स्थानचित्रे निरोष्ठ्याद्यावव्याप्तिरित्याशङ्क्य रूढिं विहाय चितो ज्ञानस्य त्राणात् चित्रमिति योगाश्रयणेन तत्रापि चित्रशब्दं प्रवर्तयति । **अभिनवेति** । निरोष्ठ्य-निष्कण्ठ्याद्यपूर्वार्थपरिशीलनेत्यर्थः । **अन्वर्थेति** । चितं संविदं त्रायत इति चित्रं; व्युत्पत्तिविशेषहेतुरिति यावत् । ''आतोऽनुपसर्गे कः'' इदं चित्रं निरोष्ठ्यादिस्थानचित्रेप्यस्तीति न कुत्राप्यव्याप्तिरित्यर्थः ।

ननु । चित्रस्य किमुदाहरणमतआह— **एतच्चेति** । गडुभूतं दुर्गन्धि रित्यर्थः । नेह प्रतायते न प्रतन्यत इत्यर्थः । 'तनोतेर्यकि' इति विकल्पादनुनासिकस्याकारादेशः । द्व्यक्षरत्र्यक्षरादिचित्रमनुप्रासेऽन्तर्भाव-यति— **यत् पुनरिति** । तत्र द्व्यक्षरमुदाहरति— **कलङ्कीत्यादि** । कलकलाकुले कोलाहलसंकुले, कलङ्किनो दुष्टाः ये कङ्का लोहपृष्ठाख्याः पक्षिविशेषाः, काकोला द्रोणकाकास्तेषां कुले सङ्घे, हे कोकिल कङ्के-लयो लताविशेषास्तासां कलिकासु, लोल सतृष्ण, काकली त्वदीयः कलस्वरः, का किं कापि किं, न कापीत्यर्थः । **उरुगुमिति** । उरुर्महती गौर्वज्रं यस्य तमुरुगुं वज्रहस्तमित्यर्थः । द्युगुरुं दिवस्पति-मिन्द्रं युत्सु युद्धेषु बुबुधुः सारवत्तया विविदुः । बोधतेर्भौवादिका-ल्लिटि परस्मैपदम् । पुरु प्रभूतं तुष्टुवुरस्तुवन् लुलुवुः लुनन्ति स मुत्सु मोदेषु पुपुषुः पुष्टिं गताः मुमुहुर्मुह्यन्ति स ॥

सू०—शब्दार्थपौनरुक्त्यं अरूढमभिधीयते दोषः ॥५॥

अस्यार्थपौनरुक्त्येनैव गतार्थत्वादत्राभिधानं शब्दार्थ पौनरुक्त्यलक्षणतृतीयकक्ष्यागतालङ्कारनिरूपणैकप्रयोजनम् ।

तात्पर्यभेदयुक्तं लाटानुप्रास इत्यदः कथितम् ।

तात्पर्यमन्यपरत्वं तदेव भिद्यते न शब्दार्थस्वरूपम् । नायमनन्वयः । पौनरुक्त्यस्य तात्पर्यमात्रभिन्नस्यात्र प्रयोजकत्वात् । अनन्वये चार्थमात्रगत युगपदुपमानोपमेयभावस्योपयुक्तत्वात् । शब्दैक्यस्य पुनरौचितीवशेन प्रसङ्गसङ्गतत्वात् । तस्माद्भिन्नविषयत्वमनयो ।

प्रतिभटकान्ताकुचतटमकरीलुण्टाकचापटङ्कारः ।
वीर नृसिंह इन्नाजौ वीरनृसिंहश्चिरं जयति ॥

इत्यादावेकवाचकानुप्रवेशलक्षणः सङ्करः स्यात् ।

उदाहरणं तु—

ताला जा अन्ति गुणा जाला दे सहियएहि घेपन्ति ।
रइकिरणाणुग्गहिआ इहोन्ति कमलाइ कमला इ ॥

अत्र प्रथमः कमलशब्दो वस्तुमात्राभिधायी द्वितीयस्तु सौरभसौकुमार्यकान्तिमत्वसम्भावितकान्तावदनोपमानत्वादिधर्मरूपार्थ इत्यस्त्येव तात्पर्यभेदः ।

पञ्चैतेऽलङ्कारा निर्णीताः पौनरुक्त्यकक्षायाम् ॥९॥

इति श्रीमतो महामाहेश्वरस्य विद्याधरस्य कवेः
कृतावेकावलीनाम्न्यलङ्कारशास्त्रे
शब्दालङ्कारनिरूपणं नाम
सप्तम उन्मेषः ॥

व्या०—केवलार्थपौनरुक्त्यं दोषः केवलशब्दपौनरुक्त्यमनुप्रास इति चोक्तम् । अथोभयपौनरुक्त्यमपि प्ररूढं चेद्दोष एवेत्याह— **शब्दार्थेति ।** नन्वस्याप्यर्थद्वारकत्वादर्थपौनरुक्त्येन गतार्थस्येह पुनरभिधाने प्रयोजनमाह— (किं प्रयोजनमित्यतआह) **अस्येति** । उभयपौनरुक्त्यजीविनो लाटानुप्रासस्यैतस्माद् भेदेन लक्षणार्थमित्यर्थः । तथा तं लक्षयति— **तात्पर्येति ।** अद उभयपौनरुक्त्यमित्यर्थः । अन्यथा दोष इति भावः । तात्पर्यपदार्थमाह— **अन्यपरत्वमिति** । नन्वनन्वयार्थालङ्कारादस्य भेदो न स्यात्तत्राह— **नायमिति** । उभयोर्भेदकमाह— **पौनरुक्त्यस्येति** । उभयपौनरुक्त्यं लाटानुप्रासे प्रयोजकमनन्वये त्वर्थपौनरुक्त्यं तावतैवैकस्य युगपदुपमानोपमेयभावसिद्धेरित्यर्थः । किमर्थं तर्हि तत्र शब्दैक्यं कुर्वन्ति कवयो नियमेनेत्याशङ्क्याह— **शब्दैक्यस्य पुनरिति** । **औचित्यवशेनेति** । उद्देशप्रतिनिर्देश्ययोरेकरूप्यमिति न्यायबलेनान्यथा पर्यायप्रक्रमभङ्गापत्तेर्न तु लक्षणत्वेनेत्यर्थः । एवं सति अन्योन्यसापेक्ष्यशब्दार्थपौनरुक्त्यंलाटानुप्रासोऽनन्वये त्वर्थमात्रपौनरुक्त्यमिति विषयभेद इति निगमयति— **तस्मादिति** । एवं चानन्वयेऽनयोरेकवाचकानुप्रवेशलक्षणः सङ्कर इति सोदाहरणमाह— **प्रतिभटेति ।** लुण्टाको निवर्तक इत्यर्थः । "जल्प भिक्ष—"इत्यादिना षाकन् प्रत्ययः । लाटानुप्रासस्य प्रसिद्धोदाहरणमाह । तालेति ।

तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते ।
रवि किरणानुगृहीतानि भवन्ति कमलानि ॥

अत्र तात्पर्यभेदं दर्शयति— **अत्र प्रथमेत्यादि** । बुद्धिसौकर्याय पौनरुक्त्यमूलालङ्कारसङ्ख्यामाह— **पञ्चेत्यादि** । केवलार्थपौनरुक्त्यमूलः पुनरुक्तवदाभासः । अव्यवधानेन सकृद्व्यञ्जनद्वयपौनरुक्त्याश्रितच्छेकानु-

प्रासः । अनियमेनैकद्वित्र्यादिव्यञ्जनमात्रपौनरुक्त्याश्रितो वृत्त्यनुप्रासः । स्वरव्यञ्जनसमुदायपौनरुक्त्याद्यमकम् । शब्दार्थोभयपौनरुक्त्याल्लाटानुप्रासः । इत्येवं पौनरुक्त्यरूपाः पञ्चालङ्कारा निर्णीता इत्यर्थः । तत्राद्योऽर्थालङ्कारः । अन्ये चत्वारः शब्दालङ्काराः । चित्रं च पञ्चमः शब्दालङ्कार इति विवेकः ।

इति पदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्याय
कोलाचलमल्लिनाथसूरिविरचितायां
एकावली व्याख्यायां तरलाख्यायां शब्दालङ्कारनिरूपणः
सप्तम उन्मेषः ॥

अथ अष्टम उन्मेषः

अर्थालङ्करणानि प्रकटीकुर्मोऽधुना तु तत्रापि ।
ब्रूमः प्रथमं भेदाभेदप्राधान्यतस्तावत् ॥१॥

विलसति सति साधर्म्ये स्यादुपमानोपमेययोरुपमा ।
द्वि(द्वे)धाभ्यधायि कविभिः पूर्णालुप्ताविभेदेन ॥२॥

उपमेति लक्ष्यनिर्देशः । शेषस्तु लक्षणम् । समानो धर्मो ययोस्ते सधर्माणौ; अर्थादुपमानोपमेये, इन्दुवदनादिके । तयोर्भावः साधर्म्यं; कविसमयप्रसिद्धं कान्तिमत्त्वादि; न तु वस्तुत्वप्रमेयत्वादि ग्राह्यम् ॥

व्या०—तदेवं शब्दालङ्कारानुक्त्वा सम्प्रत्यर्थालङ्कारनिरूपणाय सङ्गतिमाह । अर्थालङ्करणानीति । तुशब्दः प्रस्तावभेदकः । पूर्वं प्रतीतावन्तरङ्गत्वाच्छब्दालङ्कारा उक्ताः । अधुनात्वर्थालङ्कारा उच्यन्त इत्यर्थः । आदावुपमानिरूपणस्य कारणमाह । तत्रापीति । अर्थालङ्कारेष्वपीत्यर्थः । मुखमेव चन्द्रः मुखचन्द्रः, मुखं चन्द्रश्च शोभते, मुखं वा चन्द्रो वा, न मुखं किन्तु चन्द्र इत्यादिसादृश्यविच्छित्ति विशेषै रूपकदीपकाद्यनेकालङ्कारबीजतयोपमायाः प्रथमं निरूपणमित्यर्थः । सादृश्यमूलत्वाविशेषादस्याः को भेद इत्याशङ्क्याह— भेदाभेदेति । इह सादृश्यमूलेष्वलङ्कारेषु केचिद् भेदप्रधाना यथा व्यतिरेकादयः । केचिदभेदप्रधाना यथा रूपकादयः । इयं तूभयप्रधानेति सर्वालङ्कारोत्तीर्णोऽयमलङ्कार इत्यर्थः ॥ एवं सङ्गतिमुक्त्वा लक्षणं विभागं चाह— विलसतीति । इह षष्ठ्यन्तस्य लक्ष्यपदसम्बन्ध शङ्कानिरासार्थं लक्ष्य-

लक्षणांशौ विविनक्ति– उपमेति । सादृश्यार्थ(प्रतीत्यर्थं)साधर्म्य शब्दं व्याचष्टे– समान इति । किं तत् साधर्म्यं तदाह– कविसमयेति । अन्यथा पर्वतपरमाण्वोरप्यौपम्यप्रसङ्ग इत्यभिप्रायेणाह– न त्विति ।

सू०—अत एवोपमानोपमेययोरुपादानमिह कविसमयबहिर्भूतोपमानोपमेयनिरसने पर्यवसितम् । इतरथा कुमुदमिव मुखं कारणमिव कार्यमित्यादावप्युपमा स्यात् । कार्यकारणयोः साधर्म्यमेव कुतस्त्यमिति चेन्न । कारणगुण प्रक्रमेण कार्ये गुणारम्भ इत्यनयोरपि साधर्म्यस्य सम्भवास्पदत्वात् । ननु भेदाभेदप्राधान्यवचनमिह न समीचीनमिति चेत् उच्यते । तन्न चतुरचेतसां विचारधुरमधिरोहति ॥ साधर्म्ये सति प्रकारत्रयस्य सम्भवात् । तथा हि क्वचित् भेदप्राधान्यं दृष्टं यथा व्यतिरेके । क्वचिदभेदप्राधान्यं यथा रूपके । क्वचित् पुनरुभयप्राधान्यं यथास्यामेव । तच्चेदत्र नापोदीयेत तदा व्यतिरेकरूपकयोरपि विषयमियमाक्रामेत् ।

व्या०—ननु नायमर्थो लक्षणाक्षरेषु प्रतीयत इत्याशङ्क्याह– अत एवेति । येनाधिकगुणेन सहोपमीयते तदुपमानमप्रकृतं चन्द्रादिकं; यत्तु न्यूनगुणं सदुपमीयते ततुल्यतया वर्ण्यते तदुपमेयं, प्रकृतं मुखादिकं तयोरित्यर्थः । इहोक्तलक्षणोपमानोपमेयैकनियतसाधर्म्यग्रहणसाधर्म्या (सामर्थ्या)देव तदवगमे पुनस्तयोः स्वशब्दोपादानं सिद्धे सत्यारम्भो नियमार्थ इति न्यायात् पूर्वोक्तनियमपर्यवसितमिति तात्पर्यम् । विपक्षे बाधकमाह– इतरथेति । तत्र कार्यकारणयोः साधर्म्यप्रसक्तिरेव नास्तीति शङ्कते– कार्येति । कार्यगुणानां कारणगुणपूर्वकत्वात्तयोर्गुणतः साधर्म्य

मस्तीति परिहरति– **नेति** । भेदाभेदप्राधान्ये उपमानोपमेययोः साधर्म्यमुपमेति लक्षणं; तत्र भेदाभेदप्राधान्यमिति विशेषणं व्यर्थं व्यावर्त्त्यानुपलम्भादिति । शङ्कते– **नन्विति** । रूपकव्यतिरेकादि-सकलौपम्यगर्भालङ्कारव्यावर्तकत्वान्न वैयर्थ्यमिति परिहरति– **उच्यत इति** । भेदो विशेषः । अभेदः सामान्यम् । तदुभयात्मकं हि सादृश्यम् । यथाहुः । यत्र किञ्चित् सामान्यं कश्चिच्च विशेषः स विषयः सदृशतायाः' इति । तत्र क्वचिद् भेदस्य प्राधान्यं क्वचिदभेदस्य । इहतूभयोः प्राधान्यं; तेन भेदाभेदप्राधान्य इत्यनेनान्यातरप्रधानसादृश्य-मूलरूपकव्यतिरेकादिसर्वौपम्यगर्भालङ्कारव्यावृत्तिः । साधर्म्यादनौपम्यगर्भा-लङ्कारव्यावृत्तिः । उपमानोपमेयग्रहणं तु कविसमयविरुद्धसाधर्म्यनिवृत्त्यर्थ-मित्युक्तम् । तेन सर्वालङ्कारोत्तीर्णेयमुपमेति सुष्ठूक्तं भेदाभेदप्राधान्य इति ॥

मू०—साधर्म्यं तु गुणक्रियारूपमनुगतमिह भवेदेकेनैव श्लिष्टेनाश्लिष्टेन वा शब्देनोपादानमर्हति। श्लिष्टशब्दोपादानेऽप्यत्र न श्लेषः। तस्य धर्मरूपतयाङ्गत्वात् । श्लिष्टशब्दोपात्तयोर्वस्तुतो भिन्नयोरेव धर्मयोरिहैकरूपतावगतिः भेदे सत्यभेद इत्येवं रूपाति-शयोक्तिमहिम्नेति श्लेषप्रतिभोत्थापितातिशयोक्त्यनुप्राणितेयमुपमेति मन्तव्यम् । उपमानोपमेयसाधारणधर्मोपमावाचकानामुपादाने भव-न्त्येषा पूर्णा स्यात् । एषामुपमानादीनामन्यतमस्य द्वयोस्त्रयाणां-वा लोपे भवन्ती लुप्तेति योगोऽप्यनयोः सम्भवति ॥

व्या०—समानधर्मनिर्देशं द्वेधा दर्शयति– **साधर्म्यं त्विति** । ननु समानधर्मस्य श्लिष्टशब्देनोपादाने श्लेष एव स्यानौपमेत्याशङ्क्याह– **श्लिष्टशब्देति** । **न श्लेष इति** । प्रधानमिति शेषः । अप्राधान्ये

हेतुमाह— **तस्येति** । शेषः परार्थत्वादिति न्यायेनोपमापेक्षितसमानधर्म सम्पादकतया तादर्थ्यात्तदङ्गत्वं यथावघातादेर्यागोपाधिक(गौपयिक)तण्डुलादिनिष्पादनेन यागार्थत्वात्तदङ्गत्वम् । तदेतदाह— **धर्मरूपतयेति** । धर्मं समानधर्मं रूपयतीति सम्पादयतीति धर्मरूपस्तस्य भावस्तत्ता तयेत्यर्थः । ननु श्लिष्टशब्दोपात्तयौर्धर्मयोर्वस्तुतो भेदात् कथं श्लेषस्य साधर्म्यसम्पादकत्वं तत्राह— **श्लिष्टशब्दोपात्तयोरिति** । भिन्नयोरप्यभेदाध्यवसायात् साधर्म्यसिद्धिरित्यर्थः । सा च पूर्णा लुप्ता चेति द्विविधेत्युक्तं द्वेधेत्यादि विभागवचने[1] । तयोः स्वरूपमाह— **उपमानेति** । उपमावाचकाः सादृश्यवाचका इवादयः ॥

मू०—पूर्णा द्विविधा श्रौती आर्थी चेति । इवादयस्तु यत्पराः शब्दास्तस्यैवोपमानत्वमिति यद्यप्युपमानमेव विशिंषन्ति तथापि श्रुतेर्महिम्ना षष्ठीवत् सम्बन्धं द्योतयन्तीति तत्सद्भावेनान्वितार्था श्रौती । तेन तुल्यमित्याद्युपमेय एव तत्तुल्यमस्येत्युपमान एव इदं च तच्च तुल्यमित्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिः । साम्यपर्यालोचनया तुल्यताप्रतीतिरिति तत्र साधर्म्यस्यार्थत्वात् । तुल्यसदृशसनाभिसन्निभसंकाशनीकाशसहचरसोदरादिपदोपादाने सार्थकाभिधानेयमार्थी । एवमियं श्रौती चार्थी चेति द्विविधापि पूर्णा वाक्ये समासे तद्धिते च भवन्ती न पद प्रकार(त्व)मतिक्रामति ।

व्या०— तत्र पूर्णापि द्विधा विभजते:— **पूर्णेति** । साक्षात् सादृश्यप्रतिपादका इववद्वायथाशब्दाः तत्प्रयोगे श्रौती । धार्मि-

---

1. कारिकायामिति शेषः ।

व्यवधानेन सादृश्यप्रतिपादकास्तुल्यादिशब्दाः तत्प्रयोगे त्वार्थीत्यर्थः । ननु किमिवादिशब्दाः सादृश्यपर्यवसायिनस्तद्विशिष्टधर्मिपर्यवसायिनो वा ? आद्ये चन्द्र इव मुखमित्युक्ते चन्द्रसादृश्यं मुखमित्युक्तं स्यादित्य-सम्बन्धोक्तिरेव । द्वितीये तुल्यादिशब्दवत् उपमानविशेषकत्वाविशेषे सर्वाप्यार्थ्येवेति केयमार्थी श्रौती चेति विभागप्रत्याशेत्याशङ्क्याह— इवा-दयस्त्विति । यथा राज्ञः पुरुष इत्यादौ सम्बन्धार्थे विधानात् षष्ठी श्रुत्या सम्बन्धमेव बोधयन्ती सम्बन्धिनि पर्यवस्यति तद्वदिवा-दीनामप्यर्थात् सदृशपर्यवसानम् । श्रुत्या तु सादृश्यगमकत्वमेवेति तत्प्रयोगे श्रौतीत्यर्थः । तुल्यादिशब्दानां तु श्रुत्या सदृशपरत्वमर्थात्तु सादृश्यपर्यवसानमिति तेषां प्रयोगेत्वार्थीत्याह— तेन त्वतुल्यमित्यादा-विति । अथानयोर्वाक्यसमासतद्धितगतत्वेनैकैकस्यास्त्रैविध्ये पाड्विध्य-माह— एवमिति ॥

मू०—महीमण्डलमन्दार नरसिंह नरेश्वर ।
यशः पीताम्बरं भाति तव विष्णोर्वपुर्यथा ॥

इयं वाक्ये श्रौती पूर्णा । यथाशब्देन समं समासस्या-भावात् ।

कृपाणस्तव विध्वस्तविश्वामित्रमनोरथः ।
नरसिंह धरानाथ वसिष्ठ इव रासते ॥

इयं समासे श्रौती पूर्णा । इव शब्देन समं समासस्य सम्भवात् ।

वाहिनीश्वरता लक्ष्मीशालिता भूरिसत्वता ।
अकूपारवद्भाति नृसिंह नृपते तव ॥

इयं श्रौती पूर्णा तद्धिते । अकूपारस्येवाकूपारवदिति सम्बन्ध इवार्थे वतेर्विहितत्वात् ।

नृसिंह भूप भवतः कराय श्लाघते न कः ।
दानवारिस्थितिर्यत्र भाति सागरवत् सदा ॥

इयमपि श्रौती पूर्णा तद्धिते । सागर इव सागरवत् इत्यधिकरण इवार्थे वतेर्विधानात् ।

हेलयैव विनिर्धूततारापतियशस्तव ।
सदृशं भाति रामेण नरसिंह नरेश्वर ॥

इयमार्थी पूर्णा वाक्ये ।

नरसिंह महीपाल समस्तोऽपि रिपुस्तव ।
पारावारसमानत्वं दधाति स्वपदच्युतः ॥

इयमार्थी पूर्णा समासे । पारावारसमानत्वमिति समासस्य विद्यमानत्वात् ।

अयं तव यशोराशिरुच्चैरावणजित्वरः ।
इह रामवदाभाति नरसिंह महीपते ॥

अत्र रामेण तुल्यं वर्तत इति तुल्यार्थे वतेर्विधानात् इयमार्थी पूर्णा तद्धिते दर्शिता । एवमियं षोढा ॥

व्या०—महीति । पीताम्बरं तिरोहिताकाशं, पीतवस्त्रं च । अतः श्लिष्टविशेषणत्वात् श्लेषप्रतिभोत्थापिताभेदातिशयोक्त्यनुप्राणिते-

यमुपमा । एवमनन्तरोदाहरणेष्वपि द्रष्टव्यम् । कृपाण इति । विश्वेषाममित्राणां मनोरथा इत्येकत्र विश्वस्य मित्रं विश्वामित्रः कौशिकः । "मित्रे चर्षौ" इति दीर्घः । तस्य मनोरथा इत्यन्यत्र । **समासस्य सम्भवादिति** । 'इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इत्युपसंख्यानादिति भावः । **वाहिनीति** । वाहिन्यो नद्यः सेनाश्च । लक्ष्मीः पद्मा, सम्पच्च । सत्वा जन्तवः, सत्वं बलं च । **इवार्थे इति** । "तत्र तस्येव" इति सादृश्यार्थविहितत्वादिति भावः । तस्येवेति षष्ठ्यर्थे वतिमुदाहृत्य तत्रेवेत्यधिकरणार्थेऽप्युदाहरति— **नृसिंहेति** । कराय भुजाय । 'श्लाघह्नुङ्—' इत्यादिना सम्प्रदानत्वाच्चतुर्थी । दानवारिदानोदकं; दानवानामरिर्विष्णुश्च तस्य स्थितिः । **हेलयेति** । तारापतिश्चन्द्रो, वालिश्च । **नरसिंहेति** । स्वपदच्युतः स्वस्थानभ्रष्टः । स्वपन्नच्युतो विष्णुर्यस्मिन् स इति च । **अयमित्यादि** । उच्चस्योन्नतस्यैरावणस्येन्द्रवारणस्य जित्वरस्तद्वद्धवल इत्यर्थः । अन्यत्रोच्चैरिति च्छेदः । रावणो दशकण्ठः तुल्यार्थ इति । 'तेन तुल्यं क्रियाचेद्वतिः' इति सूत्रेण विधानादित्यर्थः ॥

मू०—लुप्तापि द्वेधा श्रौती चार्थी चेति । तत्र धर्मानुपादाने श्रौती लुप्ता वाक्ये समासे चेति द्वेधा । तद्धिते त्वेषा न सम्भवति । इवार्थे सम्भवतोऽपि धर्मानुपादाने वतेरसम्भवात्, कल्पनादेरिवार्थे विधानाभावाच्च । तेनेयं पञ्चधा । क्रमेण यथा ।

खड्गो यथोरगपतिस्तव कौमुदीव
कीर्तिर्युगान्ततपनेन समः प्रतापः ।

वाक्यं पचेलिमरसालफलानुकारि
बाहुस्तु वीर नरसिंह सुमेरुकल्पः ॥

अत्र खड्गो यथोरगपतिरित्यादौ क्रूरत्वादेर्धर्मस्यानुपात्तत्वादियं लुप्ता पञ्चप्रकाराप्येकस्मिन्नेव श्लोके दर्शिता ।

उपमानानुपादाने वाक्ये यथा–

साहित्यार्णवकर्णधार करुणापीयूषपाथोनिधे
विद्वच्चातकवारिवाह कमलापर्यङ्कपङ्केरुह ।
त्वां केनोपमिमीमहे त्रिजगति प्राप्तप्रकर्षैर्गुणै-
स्तुल्यं ते नरसिंह पार्थिववयं कुत्रापि न प्राप्नुमः ॥

अत्र तुल्यशब्दोपादानादार्थी वाक्ये । तुल्यशब्देन समासाकरणात् । त्वत्तुल्यमितिपाठे त्वेषैव समासे भवति । अत्रोपमानस्य सत्तायाः सम्भाव्यमानत्वादनन्वयालङ्कारो न शङ्कनीयः । अत्र न प्राप्नुम इत्यनेनोपमानस्याप्राप्तिरुक्ता न त्व भावः ॥

व्या०—अथ लुप्तां विभजते– लुप्तेति । इयमेकलोपे द्विलोपे त्रिलोपे च वक्ष्यते । तत्रैकलोपे यदा धर्मलोपस्तदा श्रौती द्विधा, आर्थी तु त्रिधेति पाञ्चविध्यमाह– तत्र धर्मानुपादान इति । द्विधात्वे हेतुमाह– तद्धितेत्विति । असम्भवे को हेतुरित्याशङ्क्य किं स तद्धित इवार्थो वतिः कल्पबादयो वेति द्वेधा विकल्प्याद्यं परिहरति– इवार्थ इति । द्वितीये न श्रौतीत्याह– कल्पनादेरिति । सुगममन्यत् । उपमानानुपादाने श्रौती न सम्भवति आर्थी च

वाक्यसमासगतत्वेन द्विधैव । तामुदाहरति– साहित्येति । इहोप-मानिषेधसाम्यादनन्वयादभेदमाशङ्क्याह– अत्रोपमानस्येति । सम्भावनां दर्शयति– अत्रेति । अनन्वये उपमेयस्यैवोपमानत्वकथनादुपमानस्या-त्यन्तमभावः प्रतीयते । अत्र तु प्राप्तिमात्रनिषेधात् स्वरूपसत्ता सम्भाव्यत इति भेद इत्यर्थः ।

सादृश्यवाचकेवाद्यनुपादानेऽपि कतिचिद्भेदानाह– वाचकेति ।

मू०—वाचकानुपादाने यथा–

समसमयसमुद्यद्द्वादशादित्यशङ्का-
चकितजगदसौढप्रौढतापे प्रतापे ।
शिशिरयितुमशेषं गाङ्गवंशावतंस
प्रभवति तव कीर्यिर्दुग्धवीचीसमीची ॥

अत्र दुग्धवीचीव समीची व्यापिनीति वाचकलोपः ।
यथा वा

पृथुलकुचभारमुत्कटदमनं तरलाक्षमाकुलश्वसनम् ।
अन्तःपुरीयति वनं यवनावनिवल्लभो नृसिंह नृप ॥

अत्र अन्तःपुरमिवाचरतीति वाचकलोपः ।

तव वीर कलिङ्गेश कृपाणः पन्नगायते ।
पानक्रीडासु यस्याजौ रिपुकीर्तिः पयायते ॥

अत्र पन्नग इवाचरति, पय इवाचरतीति वाचकलोपः ।
यथ वा–

पश्यन्नवघनदर्शं तव वीर नृसिंह निस्त्रिंशम् ।
वङ्गः सङ्गरसीमनि सञ्चरति मरालसञ्चारम् ॥

अत्र नवघनमिव दृष्ट्वा मराल इव सञ्चरतीति वाचकलोपः ।

द्विलोपे यथा

तुलामालम्बते यस्य नृसिंह नृपते भवान् ।
न व्यलोकि न चाश्रावि स कश्चन महीतले ॥

अत्र यस्येत्युममानस्य शौर्यादेर्धर्मस्य च लोपः ।

व्या०—वाचकलोप इति गम्यमानस्याप्रयोग एव लोप इति सर्वत्र ज्ञेयम् । पृथुलकुचेति । पृथुलकुचानां भारो यस्मिन् तत् । 'लकुचो लिकुचो डिहुः' । पृथुलः कुचभारो यस्मिन्नित्यन्यत्र । मदनः स्मरो, धुर्धूरश्च । श्वसनो मदनद्रुमो निश्वासश्च । 'श्वसनो मदनद्रुमो मदनस्मरधुर्धूराः' । इत्यादि विश्वः । अक्षो विभीतकवृक्षः, अक्षि चक्षुरिति च । पक्षे "बहुव्रीहौ सक्थ्यक्ष्णोः–" इति षच् । वनमन्तःपुरीयति अन्तः पुरमिवाचरति । "उपमानादाचारे" इति उपमाने कर्मणि क्यच् । "क्यचि च" इतीकरः । तवेति । पन्नग इवाचरति पन्नगायते । पयः क्षीरमिवाचरति पयायते । "कर्तुः क्यङ् सलोपश्च" इति कर्तरि क्यङ् । आजसोऽप्सरसो नित्यं पयसस्तु विभाषया' इति विकल्पात् सकारलोपः । पश्यन्निति । नवघनमिव दृष्ट्वा नव घनदर्शं मराल इव सञ्चर्य मरालसञ्चारम् । "उपमाने कर्मणि च" इति कर्मण्युपमाने चकारात् कर्तर्युपमाने च क्रमादुभयत्र णमुलप्रत्ययः । कषादित्वादुभयत्रानुप्रयोगश्च । तुला-

मिति । अत्र शौर्यादेर्धर्मस्य निर्देशादुपमानस्य स यस्य तुलामालम्बते स न कश्चनेति प्रसक्तिमात्रेण सर्वनाम्नानूद्य निषेधः कृतः न तु शृङ्गग्राहिकया कस्यचिन्निर्देश इत्यनयोर्लोपः । तव तुलामित्युपमेय-वाचकयोरनिर्देश इति द्विलोपः ॥

मू०—त्रिलोपे यथा

समालोक्यालेख्यस्थितमपि मृगाक्ष्यः फणभृतं
प्रकम्पन्ते धैर्यं त्वदरितरुणीनां त्वनुपमम् ।
यदेतास्त्वद्धाटचामधिरजनि यान्त्यः फणभृतां
फणारत्नं हस्तैः पिदधति दृढं वीर विपिने ॥

अत्र मृगस्याक्षिणी इव आयते अक्षिणी यासां ता मृगाक्ष्य इत्युपमानवाचकधर्माणां लोपः ॥

इयं च क्वचिद्वस्तुप्रतिवस्तुभावेन भवति । यथा—

पराध्यर्मणिकेयूरस्तव वीर भुजार्गलः ।
धत्ते फणामणिश्लाघ्यां फणिनामीशितुः श्रियम् ॥

अत्र पराध्यर्त्वं श्लाघ्यत्वं चेत्येक एव धर्मः कथितपदस्य दुष्टत्वाभिधानात् पर्यायशब्देनोपनिबद्धः । एकस्यैव धर्मस्य वारद्वयमुपादानं वस्तुप्रतिवस्तुभावः । क्वचित् पुनर्बिम्बप्रतिबिम्ब-भावेन यथा—

वक्षस्थली तव नृसिंह धराधिनाथ
विन्यस्तनिस्तलतरङ्गिततारहारा ।
चामीकरक्षितिधरस्य तटीव भाति
मन्दाकिनीसलिलवेणीविटङ्कितश्रीः ॥

अत्र विन्यस्तनिस्तलतरङ्गितताग्हारत्वं मन्दाकिनीसलिलवेणि-विटङ्कितश्रीत्वं च वस्तुतो भिन्नावेव धर्मावभिन्नतयातिशयोक्त्या-ध्यवसितौ साधारण्यं भजतः । भिन्नयोरेव धर्मयोर्द्विरुपादानं बिम्बप्रतिबिम्बभावः ॥

व्या०—त्रिलोपं व्यनक्ति— **अत्र मृगस्येति** । अत्र वाचकस्येवशब्दस्य गम्यमानार्थत्वादप्रयोग एव लोपः । धर्मस्य चायतत्वस्य सामर्थ्यलब्धस्याप्रयोग एव लोपः । उपमानस्य तु प्रथमाक्षिशब्दस्य 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्य 'उत्तरपदलोपश्च' इति लोपः । अत्र कान्ताक्ष्णोर्मृगाक्षिणी उपमानं; तदवयव(वि)त्वान्मृगोऽप्युपमानमुच्यते । एवं स्थिते मृगस्याक्षिणीति षष्ठीसमास उपमानपूर्वपदः । तस्य 'अनेकमन्यपदार्थे' इत्युत्तराक्षिशब्देन सह बहुव्रीहौ पूर्वोक्तषष्ठीसमासो-त्तरपदस्य पूर्वाक्षिशब्दस्य लोपो भवतीति सूत्रार्थः ।

एवं कतिचिल्लुप्ताभेदानुक्त्वा भेदान्तराणि स्वयमूह्यानीति उपेक्ष्य सम्प्रति समानधर्मनिर्देशमाह— **इयं चेति** । समानधर्मः क्वचिदेक एव साधारण्येनोभयानुगामितया सकृन्निर्दिश्यते यथा वागर्थाविव सम्पृक्तावित्यत्र सम्पृक्तत्वम् । क्वचित् पुनः पार्थक्येन निर्दिश्यते । स च वस्तुप्रतिवस्तुभावेन बिम्बप्रतिबिम्बभावेन चेति द्वेधा । तत्राद्य-मुदाहरति— **परार्ध्येति** । अत्र फणिनामिशितुः श्रियमिति निदर्शनायां तामिवेत्युपमोपजीविन्यां परार्ध्यत्वं साधारणो धर्म एक एव श्लाघ्य इति शब्दान्तरेणोपादाने पृथक् निर्दिष्टः । स वस्तुप्रतिवस्तुभाव इत्यर्थः । शब्दान्तरेण कारणमाह— **कथितेति** । दोषोन्मेषे पौनरुक्त्यप्रस्ताव इति शेषः । वस्तुप्रतिवस्तुभावस्य लक्षणमाह— **एकस्यैवेति** । **वारद्वयमिति** । एकस्यैव धर्मस्यैकदोपमेये वस्तुत्वेन निर्देशः

पुनरुपमानेऽपि प्रतिवस्तुत्वेन प्रतियोग्यर्थत्वेन शब्दान्तरेण निर्देशो वस्तु-प्रतिवस्तुभाव इत्यर्थः । न चार्थपौनरुक्त्यमत्र शङ्कनीयम् । धर्मि-भेदेन भिन्नस्य तस्य प्रत्युत वैचित्र्यादिति । बिम्बप्रतिबिम्बभावमुदाहरति– वक्षस्थलीति । नन्वत्र भिन्नयोर्धर्मयोः कथं समानधर्मत्वं तत्राह अत्रेति । हारसलिलयोरत्यन्तभिन्नयोरपि सादृश्याद् बिम्बप्रतिबिम्बवद-वस्थितयोरभेदाध्यवसायादुभयानुगतैकधर्मत्वाभिमानात् समानधर्मत्वसिद्धि-रित्यर्थः । बिम्बप्रतिबिम्बभावं लक्षयति– भिन्नयोरेवेति । भिन्नयो-रेव वस्तुनोरत्यन्तसदृशयोरुभयधर्मत्वेन पृथङ् निर्देशो बिम्बप्रतिबिम्बभाव इत्यर्थः ॥

मू०—यत्रोपमानगतानेकधर्मसम्बन्ध उपमेयस्याभिधातुमभि-मतस्तत साधारणमुपमावाचकं पदं वाच्यमेव कर्तव्यं न तु धर्मा-भिधायि-पदोपादानेन प्रतीयमानम् । यथा–

कलिङ्गक्ष्मापाल त्रिदशतटिनीवीचितुलिते
यशः पूरे दूरात् तव जगदिदं पूरितवति ।
समुन्मीलत्कालागरुबहलधूमप्रणयिनी-
स्तमस्तोमस्ताम्यन् विशति कबरीः पक्ष्मलदृशाम् ॥

अत्र त्रिदशतटिनीवीचिवद् व्यापकत्वमपि यशः पूरस्या-भिमतमतो वीचितुलित इत्युक्तं न तु वीचिधवल इति । धवल इत्युक्ते धवलत्वसहचरितधर्मान्तरमपि प्रतीयत इति चेन्न । अतिप्रसङ्गात् । यत्र शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यमहिम्नैवोपमा-प्रतीतिस्तत्र वाच्या न कार्या; पौनरुक्त्यप्रसङ्गात् । यथोदाहृतं प्राक्—

हिरण्यकशिपुक्षेत्रदानदर्शितविस्मयः ।
न कस्य श्लाघनीयोऽसि नरसिंह जगत्पते ॥

व्या०— वाचकोपादाने विशेषमाह— **यत्रोपमानेति** । साधारणमित्येकधर्मसाधारणं तत्प्रत्यायनक्षममित्यर्थः । उपमावाचकं सादृश्यवाचकं तुल्यादिपदमित्यर्थः । धर्माभिधायि साधारणधर्मविशेषवाचकमित्यर्थः । न प्रतीयमानमिति कर्तव्यमित्यनुषङ्गः । अत्र तुलित इति सादृश्यवाचकप्रयोगात् वीचिगतानेकसमानधर्मवर्तीति स्यात् । धवल इत्युक्ते तु धावल्यस्यैव प्रतीतिः स्यान्नान्यस्येति वाचकमेवोक्तमित्यर्थः । ननु धर्माभिधायिपदप्रयोगेऽपि तत्साहचर्यात् धर्मान्तरप्रतीतिः सम्भवतीति शङ्कते— **धवल इति** । अतिप्रसङ्गेन परिहरति **नेति** । 'तया स पूतश्च विभूषितश्च' इत्यत्र पूतत्वविभूषितत्वयोरन्यतरोपादानवैयर्थ्यं स्यादित्यर्थः । यत्र तूपमाया व्यङ्ग्यत्वं न तत्र वाचकप्रयोगः कार्य इत्याह— **यत्र शब्दशक्तीति** । अत्र प्रागुक्तमुदाहरणं स्मारयति— **यथेति** । **हिरण्येत्यादि** । व्याख्यातार्थमेतत् । अत्र भगवान् नृसिंह इव नृसिंहनृप इत्युपमा व्यङ्ग्यत्वान्न वाच्या कार्या पौनरुक्त्यादित्यर्थः ।

इत्युपमा

मू०—यद्युभयोः पर्यायात् स्यादुपमानोपमेयत्वम् ।
सन्निहितवाक्यभेदे सत्युपमेयोपमा द्विविधा ॥३॥

अत्रोपमेयस्योपमानत्वकरणमुपमानान्तरनिरसनैकप्रयोजनम् । द्विविधा धर्मस्य वस्तुप्रतिवस्तुतया निर्देशे साधारण्ये चेति ।

क्रमेण यथा—

लोचनमधुकरमधुरं मधुकरलोचनमनोहरं भवतः ।
कमलमिवाननमाननमिव कमलं भाति वीर नरसिंह ॥

अत्र एकस्मिन् वाक्ये तावदाननमुपमेयम् । तत्र च लोचनं सम्भवति न मधुकरः । ततो लोचनं मधुकर इव लोचनमधुकरः । कमले तु लोचनासम्भवाल्लोचनमिव मधुकरः लोचनमधुकरस्तेन मधुरमित्युपमासमासः । अपरत्र तु कमलमुपमेयम् । तत्र मधुकरः सम्भवति न तु लोचनम् । ततो मधुकरो लोचनमिव मधुकरलोचनम् । आनने तु मधुकरासम्भवात् मधुकर इव लोचनं मधुकरलोचनं तेन मनोहरमित्यत्राप्युपमासमास एव । ततश्चार्थभेदादिह धर्मभेद इति चेन्न । भेदे सत्यभेद इत्येवंरूपातिशयोक्तिमहिम्ना भिन्नस्यापि धर्मस्यैकरूपत्वाध्यवसायः । एकस्यैव धर्मस्य वारद्वयमुपादानं वस्तुप्रतिवस्तुभावः । द्विरुपादाने च निमित्तं सम्बन्धिभेदः । सम्बन्धिभेदश्च वाक्यभेदात् ।

वीर नरसिंह विभाति क्षितिमण्डलभारभरणहेमाद्रे ।
मन्दाकिनीव भवतः कीर्तिर्मन्दाकिनी च कीर्तिरिव ॥

अत्र विमलत्वादिरूपः साधारणो धर्मः प्रतीयत एवेति धर्मसाधारण्यम् ॥

व्या०—भूयसा साधर्म्यादुपमानन्तरमुपमेयोपमां लक्षयति—यद्युभयोरिति । उभयोरुपमानोपमेययोः । इह सर्वत्रोपमेयमुद्दिश्योपमानं विधीयते । यन्मुखं तत् कमलमिवेति । तस्योद्देश्यविधेय

भावस्य सिद्धसाध्यभ(भा)वनान्तरीयकतया युगपदेकत्र विरोधादुक्तं–**पर्यायादिति** । स च पर्यायोऽनेकस्मिन् वाक्ये सम्भवीत्यत उक्तं **वाक्यभेदे सतीति** । ननु वाक्यभेदे एकं वाक्यमुपमा स्यात् मुखं पद्ममिवेति । अपरं प्रतीपभेदः स्यात् पद्मं मुखमिवेति । एव मलङ्कारद्वयमापद्येतेत्याशङ्क्याह– **सन्निहितेति** । सन्निहितत्वमे सन्निहितत्वमेकवाक्यता; तत्रोपमेयोपमा । यत्र तु व्यवहितयोरनयोर्द्वयोर्विन्ध्ययोरिव मिथो निराकाङ्क्षता तत्र पूर्वोक्तमलङ्कारद्वयमुपतिष्ठत इति । तथापि विरुद्धधर्मसंसर्गाद्वाक्यस्याप्रामाण्यापत्तिरित्याशङ्क्याह– **अत्रोपमेयस्येति** । विरोधे गुणवादः स्यादिति न्यायादादित्यो यूपो यजमानः प्रस्तर इत्यादिवत् प्रशंसापरत्वेनाविरोधान्नाप्रामाण्यमित्यर्थः । एतेन विरुद्धधर्मसंसर्गित्वाविशेषेऽप्यनन्वये पदैकवाक्यता । इह तु वाक्यैकवाक्यतेत्यादिभेदोऽनुसन्धेयः । विभागवचनं व्याचष्टे– **द्विविधेति** । द्वैविध्यमेव दर्शयती– **धर्मस्येति** । विम्बप्रतिविम्बभावे तु प्रायेणोक्तैकवाक्यत्वाभावान्न वैचित्र्यमिति नायमस्य विषय इति भावः । **लोचनेति** । अत्र लोचनमधुकरमधुरत्वमेकत्र समानधर्मः । अपरत्र मधुकरलोचनमनोहरत्वम् । तयोरुपमेयसम्बन्धे उपमितसमासाश्रयणादुपमानसम्बन्धे उपमासमासाश्रयणाच्चार्थभेदे समानधर्मत्वं न सम्भवतीति प्रत्यवतिष्ठते– **अत्रेत्यादिना चेदित्यन्तेन** । **एकस्मिन्निति** । कमलमिवाननमिति वाक्ये इत्यर्थः लोचनमधुकरइत्यत्रोपमितसमास इति शेषः । **अपरत्रेति** । आननमिव कमलमित्यस्मिन् वाक्य इत्यर्थः । मधुकरलोचनमित्यत्राप्युपमितसमास इति शेषः । फलितमाह– **ततश्चेति** । ततः समासभेदादित्यर्थः । उपमासमासे लोचनसदृशमधुकरमधुरत्वमर्थः । एवं मधुकरलोचनमनोहरमित्यत्राप्येकत्र लोचनसदृशमधुकरमनोहरत्वमपरत्वमपरत्र मधुकरसदृशलोचनमनोहरत्वं चेत्यर्थ भेदः । ततो धर्मभेद इत्यर्थः । सत्यम् । तथाप्यनयोरभेदाध्यवसायाददोष इति परिहरति–

नेति । अत्र योऽयं लोचनमधुकरमधुरत्वं नाम धर्मः वस्तुतस्तस्यैव मधुकरलोचनमनोहरमिति शब्दान्तरेण पृथङ्‌निर्देशात् वस्तुप्रतिवस्तुभावः अयमित्याशयेनाह– एकस्यैवेति । नन्वेकस्य द्विरुपादाने किं निमित्तं ? पौनरुक्त्यादित्याशङ्क्याह– द्विरिति । इहाननकमले एकं सम्बन्धि, कमलानने चापरं अद्वेदाद्वेदेन उपादानमित्यर्थः । सम्बन्धिभेदोऽपि कथमाननकमलयोरिव द्विः श्रवणादित्याशङ्क्याह– सम्बन्धिभेदश्चेति । तयोरेवोपमानोपमेयभावविनिमयेन वाक्यद्वये निर्देशाद्भेद इत्यर्थः । द्वितीयभेदमुदाहरति– वीरेति । न कश्चिदत्र धर्मः श्रूयते कुतः साधारण्यमत आह– अत्रेति ।

इत्युपमेयोपमा ॥

मू०—अनुगतिरुपमाङ्गानामेकस्मिन्नेव जायते वाक्ये
यद्येकस्य तदानीमन्वर्थोऽनन्वयः कथितः ॥४॥

उपमाङ्गानामित्युपमानोपमेयोपमावाचकसाधारणधर्माणाम् । एकस्य तूपमानोपमेयत्वादिविरुद्धधर्मसम्बन्ध सदृशान्तरनिषेधध्वननाय । अत एवास्यान्यसम्बन्धवन्ध्यत्वादन्वर्थत्वम् । यथा

प्रतिभटकान्ताकुचतटमकरीलुण्टाकचापटङ्कारः ।
वीरनृसिंह इवाजौ वीरनृसिंहश्चिरं जयति ॥

अत्रोपमेयस्योपमानत्वं क्रियमाणमुपमानमेव नास्त्यस्येति किमपि लोकोत्तरं वस्तु व्यनक्ति ॥

व्या०—उपमेयस्यैवोपमानोक्तिसाम्यादुपमेयोपमानन्तरमनन्वयं निरूपयति– अनुगतिरिति । एकस्येत्युपमाव्यावृत्तिः । एकस्मिन् वाक्ये

इत्युपमेयोपमाख्या वृत्तिः । इहापि पूर्ववदेव विरुद्धधर्माध्यासो निरसनीय-इत्याह– एकस्येति । उदाहरति । प्रतिभटेति । लुण्टाको व्याख्यातः । इहालङ्कारेण वस्तुध्वनिमुद्भावयति– अत्रेति ॥

इत्यनन्वयः ॥

मू०—सदृशं सदृशानुभवाद्यत्र स्मर्येत तत् स्मरणम् । नेद-मनुमानम् । सदृशमनुभूय सदृशमेव स्मर्यत इति नियमाभावात् । सदृशदर्शनेन विसदृशस्यापि स्मरणसम्भवात् । यत्र तु सदृशं दृष्ट्वा सदृशमेव स्मर्यते तत्र स्मरणमलङ्कारः ।

यथा–

त्वत्प्रत्यर्थी गिरिचरगजस्याङ्कके दत्तदृष्टि-
स्तस्मिंस्तस्मिन् स्मरति मधुरं तत्तदङ्गं प्रियायाः ।
कुम्भाभोगे गुरुकुचतटं दन्तयोर्गण्डलक्ष्मी
मूरू हस्ते गतिषु च गतिं श्रीनृसिंह क्षितीन्द्र ॥

अत्र कुम्भाभोगाद्यनुभवात् पीनस्तनतटादेः सदृशस्यैव स्मरण-मुपनिबद्धम् । सादृश्येतरकारणांकुरिता तु स्मृतिर्नास्यालङ्कारस्य गोचरः ।

अहो स रणदुन्दुभिः क्वनु गतं तदा तैर्बलै-
रहो स पुरविप्लवः[१] क्व खलु सा कुरङ्गेक्षणा ।

---

१ पुरविड्वर इति व्याख्यानुसारी पाठः ।

अहो तदपि दुर्दिनं क्व नु गतः कुमारो भवे-
दिति भ्रमति ते रिपुर्गिरिवनं कलिङ्गेश्वर ॥

अत्राहो इति वागारम्भानुभावेन सूचिता सैन्यवियोगादि-जनिता स्मृतिर्व्यभिचारीभाव एव ॥

व्या०—अथ सादृश्यप्रस्तावात् तदेकनिबन्धनं स्मरणालङ्कारं लक्षयति– **सदृशमिति** । अनुमानेऽन्तर्भावमाशङ्क्याह– **नेदमिति** । नियमाभावात्; सदृशदर्शनात् सदृशस्यैव स्मृतिरिति व्याप्त्यभावादित्यर्थः । तत्र हेतुमाह– **सदृशस्येति** । उदाहरति– **त्वदिति** । गतमेतत् । स्मृतिमात्रस्य स्मरणालङ्कारत्वशङ्कां वारयति– **सादृश्येति** । तादृशीं स्मृतिमुदाहरति– **अहो इति** । पुरविड्वरः पुरविप्लवः । दुर्दिनं शरदुर्दिनमित्यर्थः । अत्र सर्वं परित्यज्य पलायितस्य रिपो रणदुन्दुभि-प्रभृतीनां स्मृतिस्तद्वियोगोत्थ चिन्तादिहेतुका न सादृश्यहेतुकेत्याह– **अत्रेति** । भाव एवेति न तु स्मरणालङ्कार इत्यर्थः । प्रेयोलङ्कारस्य तु विषय इति भावः ।

इति स्मरणालङ्कारः

मू०—सम्प्रति कतिचिदभेदप्राधान्येऽलंकृतीर्ब्रूमः ॥

प्रथमं निरूपयामस्तत्राप्यारोपगर्भितास्तावत् ।
तद्रूपकमारोपे यत्रापन्हूयते न तद्विषयः ॥६॥

अत्र अभेदप्राधान्याभिधानाद्वस्तुतोऽस्त्येव भेदः । अत एवोपमा प्रतीयते । भेदाभेदप्रयुक्तस्य साधर्म्यस्यैतां प्रति

प्रयोजकत्वात् । अभेदप्रयुक्तं साधर्म्यं रूपकं प्रति प्रयोजकम् । विषयस्यापह्नूयमानत्वे त्वपह्नुतिरभिधास्यते । यदा तु विषयी विषयं रूपयति रूपवन्तं करोति तदान्वर्थाभिधानं रूपकम् ॥

व्या०—एवं सादृश्याश्रयेण भेदाभेदतुल्यत्वे उपमादींश्चतुरो अलङ्कारान्निरूप्य सम्प्रत्यभेदप्राधान्येनालङ्कारान् प्रस्तौति— सम्प्रतीति । अभेदप्राधान्येऽपि केचिदारोपमूलाः केचिदध्यवसायमूलास्तत्रारोपमूलाः प्रथमं निरूप्यन्त इत्याह— प्रथममिति । तत्र बहुप्रपञ्चतया रूपकमादौ लक्षयति— तदिति । आरोपोऽन्यत्रान्यस्यावापः । यथा मुखं चन्द्र इत्यत्र मुखे चन्द्रत्वस्य । एतेनाध्यवसायमूलोत्प्रेक्षातिशयोक्तिभ्यां भेदः । विषयनिगरणेनाभेदप्रतिपत्तिरध्यवसायः । विषयनिगरणमन्तरेणाभेदप्रतिपत्तिरारोप इत्यनयोर्भेदादिति । अत्र साधर्म्यमित्युपमातोऽनुवर्तते । तच्च भेदाभेदात्मकमित्युक्तम् । तदुभयप्राधान्यादुपमादय उक्तास्तद्वैलक्षण्यार्थमिहोक्तमभेदप्राधान्य इति । तत्र प्राधान्यग्रहणस्य प्रयोजनमाह— अत्राभेदेति । प्राधान्यमेवेह निषिध्यते भेदस्य तेनोभयमप्यत्रास्तीत्यर्थः । ततः किमत आह— अत एवेति । उभयसद्भावादेवेत्यर्थः । तत्सद्भावस्योपमाप्रत्यायकत्वे हेतुमाह— भेदाभेति । तत्प्राधान्यप्रयुक्तस्येत्यर्थः । रूपकस्य ततो भेदमाह — अभेदप्रयुक्तमिति । अभेदप्राधान्यप्रयुक्तमित्यर्थः । भेदस्तु तिरोहितो वर्तत इति भावः । यथाहुः ।

'उपमैव तिरोभूतभेदो(दा)रूपकमिष्यते' इति ।

विषयानपह्नवविशेषणस्य व्यावर्त्यमाह— विषयस्येति । रूपकसंज्ञां व्युत्पादयति— यदात्विति । रूपवन्तं करोतीति । महारञ्जनरागः पटमिव स्वरूपेण विषयमुपरञ्जयतीत्यर्थः ।

'अनपन्हुतरूपस्य विषयस्योपरञ्जनम् ।
भवेद्विषयिणा यत्र रूपकं तत् प्रकीर्त्यते ॥

मू०—इदं तु निरवयवं सावयवं परम्परितश्चेति प्रथमं त्रिधा । तत्राद्यं केवलं मालया चेति द्विधा । द्वितीयमपि समस्तवस्तुविषयमेकदेशविवर्ति चेति द्विधा । तृतीयं तु श्लिष्टाश्लिष्टशब्दनिबन्धत्वेन द्विविधम् । तत्तु प्रत्येकं केवलं मालया चेति चतुर्विधम् । तदेवमिह भेदाष्टकमेवोट्टङ्कितम्' । व्यस्तसमस्तत्वादिकथने वैचित्र्याभावात् । तत्रावयवतो निष्क्रान्तं निरवयवं केवलं यथा–

हेमाद्रेः कन्दरायां रतिरमणरणाटोपविच्छिन्नहार-
व्यस्तं मुक्ताफलानां तमसि तत इतः स्तोममन्वेषयन्त्याः ।
कस्याश्चित् स्वस्तरुण्या निकटगतनिजप्राणनाथोपगीता
कीर्तिज्योत्सा त्वदीया क्षणमकृत मुदं श्रीनृसिंह क्षितीन्द्र ॥

इदं निरवयवं केवलमेकवारमेव निरूपणात् । निरवयवं मालया यथा–

कलानामालम्बः कुसुमविशिखस्य प्रतिकृतिः ।
क्षितेः क्षेमं लक्ष्म्याः शरणमरणिः क्षात्रमहसः ।
विलासो भारत्याः सुकृतपरिपाकः प्रणयिनां
खल्लूरी सौख्यानां जयति नरसिंह क्षितिपतिः ॥

इदं निरवयवं मालया; एकस्यानेकधा निरूपणात् ।

व्या०—तद्विभजते– इदं त्विति । निरवयवादिसंज्ञा स्वयमेव व्युत्पादयिष्यति । नन्वन्येऽपि समस्तव्यस्तादिभेदाः सन्ति कथमष्टैव निष्टङ्किता इत्याशङ्क्याह– व्यस्तेति । अथ संज्ञाव्युत्पादनपूर्वमेकैकश उदाहरणान्याह– तत्रेति । यत्रावयव्येव रूप्यते नावयवास्तन्निरवयवम् । तदेकं चेन्निरवयवकेवलरूपकमित्यर्थः । हेमाद्रेरित्यादि । गतमेतत् । अत्र कीर्तिरेव ज्योत्स्नेत्येकवारमवयविन एव रूपणान्निरवयवकेवलमित्याह इदमिति । कलानामिति । कलानां विद्यानामालम्ब आधारः । प्रतिकृतिः प्रतिनिधिः । क्षेममिति । क्षेमङ्करे क्षेमत्वोपचारः शरणं गृहम् । अरणिरग्निमन्थदारु । क्षात्रमहसः क्षात्रतेजसः प्रतापाग्नेरित्यर्थः । प्रणयिनामर्थिनाम् । खल्ली औषधमर्दन शिला । अत्र क्षितिपतेरवयविन एकैकस्यानेकधा निरूपणान्निरवयवमालारूपकमित्याह– इदं निरवयवं मालयेति ॥

मू०—समस्तानि वस्तूनि विषयो यस्येति समस्तवस्तुविषयं सावयवं यथा ।–

यत्र द्वीपस्तुषारक्षितिभृदुडुगणो मौक्तिकानां निकायः
शैवालं व्योम, शङ्खः कुमुदकुलगुरुर्धाम सान्ध्यं प्रवालः ।
यूथं दिक्कुञ्जराणां करिमकरकुलं किं च कृष्णः कृपाण-
स्त्वत्कीर्तिक्षीरवार्धिः स जयति जगति श्रीनृसिंहक्षितीन्द्र ॥

इदं सावयवम् । वार्ध्यवयवानामपि द्वीपादीनां रूपणात् । एकदेशविवर्ति सावयवं यत्रैकं रूपकं कृतं सदकृतमपि रूपकान्तरं सामर्थ्यात् गमयति । यथा–

भुवः केलीतल्पं जयति नरसिंह क्षितिभुजो
भुजः शौर्यक्रीडाडमरसमरारम्भलटहः ।

नवप्रेयोलाभप्रमुदितसमस्ताम्बरचरी-
विकीर्णैर्मन्दारैर्विततमुपहारं भजति यः ॥

इह दोष्णः केलीतल्पत्वेन रूपणाद्भुवो नायिकात्वेन रूपणं गम्यते ॥

व्या०—यत्रावयव्यवयवाश्च कार्त्स्न्येन रूप्यन्ते तत् समस्तवस्तुविषयं सावयवरूपकमित्याह— समस्तेति । यत्रेत्यादि । स्पष्टम् । कृष्णो विष्णुः । विवर्ति विपरिणामीति शङ्कां वारयति— विशेषेण वर्तत इति । एतदेव व्यनक्ति— यत्रैकमिति । यत्रावयवावयविनामन्यतमरूपणादन्यस्य रूपणं गम्यते तदेकदेशविवर्तिसावयवरूपकमित्यर्थः । भुव इति । लटहः प्रौढः । गतमेतत् । अत्र केलीतल्पस्य नायिकाशयनधर्मकत्वादवयविरूपणादवयवरूपणं गम्यत इत्यभिप्रायवानाह— इह दोष्ण इति । उपलक्षणमेतत् । 'विगलन्मधुव्रतकुलाशु(श्रु)जलं न्यमिमीलदब्जनयनं नलिनी ॥' इत्यत्राब्जनयनाद्यवयवरूपणान्नलिनीनायिकेत्यवयविरूपणं गम्यते । तथा 'निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका ॥' इत्यत्र वियदालयादपरदिग्गणिकेत्यत्रावयवावयविरूपणाद्रविमित्यत्र विटमित्यवयवान्तररूपणं गम्यत इत्याद्यूह्यम् ॥

मू०—परम्परा जातास्येति परम्परितं श्लिष्टशब्द निबन्धनं केवलं यथा ।—

किं वर्ण्यसे वीर कलिङ्ग भूप
विलासिनीमानसराजहंस ।
भवन्ति यत्कान्तिसुधापयोधेः
पयो मनुष्या नलकूबराद्याः ॥

अत्र वीर नरसिंहभूपस्य राजहंसत्वेन रूपणं मनसः सरस्त्वेन रूपणं प्रति निमित्तम् । तच्च मानसमेव मानसमिति

श्लिष्टेनैव शब्देन कृतमिति श्लिष्टशब्दनिबन्धनं परम्परितमिदम् । केवलमेकवारमेव रूपणात् । श्लिष्टशब्दनिबन्धनं परम्परितं मालया यथा—

रविः पद्मोल्लासे कुवलयविकासे हिमकरः
क्षमाभृत्पक्षालीदलनपरिहासे हरिहयः ।
अशाम्यद्दानाम्भः प्रसरणविलासे करिपति-
र्न केषामासेव्यः स भवति कलिङ्गेश्वर भवान् ॥

अत्र राज्ञो रवित्वादिरूपणं पद्माया उल्लास एव पद्मस्योल्लास इत्यादिरूपणकारणम् ।

अश्लिष्टशब्दनिबन्धनं परम्परित केवलं यथा—

वीर नरसिंह भूप प्रतिभटविषधरगरुत्मता भवता ।
एष कमलासहायश्चित्रं हृदयेन धार्यते भगवान् ॥

अत्र वीर नरसिंहस्य गरुत्मत्वरूपणहेतुकं प्रतिभटानां विषधरत्वरूपणमित्यश्लिष्टशब्दनिबन्धनमिदं केवलं सकृदेव निरूपणात् ।

व्या०—अथ परम्परितभेदान् निरूपयितुं परम्परितशब्दार्थमाह—**परम्परेति** । तारकादित्वादितच्प्रत्ययः । यत्र रूपकद्वयं हेतु हेतुमद्भावेन स्थितं तत् परम्परितं तद्यदि श्लिष्टशब्देन सकृत् कृतं तदा श्लिष्टकेवलपरम्परितमित्यर्थः । तदुदाहरति— **किमित्यादि** । अत्र राज्ञो राजहंसत्वेन रूपणस्यान्यथानुपपत्तेर्मानसमेव मानसमिति श्लिष्टरूपकप्रवृत्तिहेतुत्वादिदं श्लिष्टपरम्परितरूपकं; तच्चैकाकित्वात् केवलं चेत्याह—

अत्रेति । श्लिष्टमालापरम्परितमुदाहरति— रविरिति । पद्माया उल्लासः स एव पद्मस्योल्लासः । कुवलयं भूवलयं तदेव कुवलयमिन्दीवरम् । क्षमाभृत्पक्षा राजवर्गास्त एव क्ष्माभृत्पक्षाः पर्वतगरुतः । परिहासो विनोदः । दानं द्रव्यप्रतिपादनं तदम्भ एव दानाम्भो मदोदकम् । अत्रैकस्यैव राज्ञोऽनेकधा श्लिष्टपरम्परितरूपणाच्छ्लिष्टमालापरम्परितमित्याह— अत्र राज्ञ इति । अश्लिष्टकेवलपरम्परितमुदाहरति— धीरेत्यादि । हृदयेनेति । न तु स्कन्धेनेति व्यतिरेक इति भावः ॥

मू०—अश्लिष्टशब्दनिबन्धनं मालया यथा—

यशस्त्रिदशवाहिनीहिमगिरिः प्रतापातप-
प्रथाप्रथमभूधरः प्रतिबलाब्धिमन्थाचलः ।
पराक्रममहामदद्विरदकेलिविन्ध्यस्थिरं
गुणौघमणिरोहणो विजयते कलिङ्गेश्वरः ॥

इदमश्लिष्टशब्दनिबन्धनं मालया । अनेकशोरूपणात् । इदं तु वैधर्म्येणापि सम्भवति ।

'त्यागस्तावत् सुरतरुयश' इत्यादि ॥

व्या०—अश्लिष्टमालापरम्परितमुदाहरति । यश इति । प्रताप एवातपस्य प्रथा प्रथनमाविर्भावस्तस्याः प्रथमभूधर उदयाद्रिः । परं तु स्पष्टमेव तदेवं प्रवर्तक विषयत्वेन परम्परितमुक्तम् । क्वचिन्निवर्तक विषयत्वेनापि दृश्यत इत्याह— इदं त्विति । वैधर्म्येण व्यतिरेकेणेत्यर्थः । त्याग इत्यादि । यशोगङ्गादिप्रवर्तकत्वेन हिमगिरित्वादिरूपणं कृतं प्राक् अत्र तु यशःकौमुद्यादिनिवर्तकत्वेन त्यागादीनां कालमेघत्वादिना रूपणमिति वैधर्म्येणेत्युक्तम् ।

मू०—यत्र व्यस्तं रूपकं तत्र न विप्रतिपद्यामहे । यत्र समस्तं तत्रोपमारूपकयोः साधकबाधकप्रमाणसद्भाव एवान्यतरनिश्चय कारणम् । तत्रोपमायाः परिग्रहे साधकं यथा—

शरासनमिदं नमत्तव विलोक्यलोकोत्तरं
पिनाकमिव दानवास्तुहिनरश्मिचूडामणेः ।
अमी रिपुमहीभृतो युधि कलिङ्गपृथ्वीपते
सरत्नविरुदाङ्गदं तव नमन्ति पादाम्बुजम् ॥

इह रत्नविरुदाङ्गदसम्बन्धः पादे सम्भवतीत्युपमायां प्रत्यनुगुणतां भजते । अम्बुजे तु न सम्भवतीति न रूपकं प्रत्यनुगुणता । बाधकं यथा—

शोषिताशेषदुर्वारवैरिस्त्रीजनमानसः ।
नृसिंह भूपते भाति प्रतापतपनस्तव ॥

अत्र शोषिताशेषदुर्वारवैरिस्त्रीजनमानसत्वलक्षणसाधारणधर्मोपादानमेव प्रतापस्तपन इवेत्युपमायाः शङ्कामपाकरोति । 'उपमितं व्याघ्रादिभिः—'' इत्यादिना सूत्रेण सामान्याप्रयोग एव तस्याः प्रादुर्भावात् ॥

व्या०—तदेवं रूपकमष्टधा निष्टङ्कय सम्प्रति प्रसङ्गात् समस्तरूपके किञ्चिन्मीमांसितुमारभते— यत्र व्यस्तमिति । समस्ते तु समासस्योभयसाधारणरूपत्वादुपमारूपकयोर्यस्य साधकं प्रमाणमस्ति तस्य परिग्रहोऽर्थादितरस्य त्यागः । यस्य तु बाधकं तस्य परित्यागोऽर्थादितरस्य स्वीकार इत्याह— यत्र समस्तमिति । तत्रौपमास्वीकारे साधकमुदाहरति— शरासनमिति । रत्नखचितं यद्विरुदाङ्गदं

बिदुराङ्कितकटकं तेन सहेति तथोक्तम् । अत्र पादाम्बुजमित्युपमा-स्वीकारे साधकमुद्भिनत्ति– इहेति । तेनेह व्याघ्रादीनामाकृतिगणत्वात् "उपमितं व्याघ्रादिभिः– " इत्यादिनोपमितसमास आश्रयणीय इत्यर्थः । उपमाबाधकमुदाहरति– शोषितेति । मानसं मनः सरो विशेषश्च । बाधकमुद्भावयति– अत्रेति । सामानधर्मोपादानस्य बाधकत्वे हेतुमाह– उपमितमिति । व्याघ्र इव शूर इति प्रत्युदाहरणादिति भावः ॥

मू०—रूपकपरिग्रहे साधकं यथा–

यस्यानिशं दिविषदश्चरणारविन्द-
मुत्तंसयन्त्यमितभक्तिभरावनम्राः ।
देवः सुधाकरकिशोरकचारुचूडः
स श्रेयसेऽस्तु भवतो नरसिंह देव ॥

अत्रोत्तंसनमरविन्देन क्रियते न पुनश्चरणेनेति रूपकपरिग्रहे उत्तंसनमेव साधकं प्रमाणम् ।

यथा वा–

तल्पेषु कल्पद्रुमपल्लवानां
निषेदुषीभिः सुरसुन्दरीभिः ।
त्वत्कीर्तयो वीर कलिङ्गनाथ
मनः कुरङ्गं रञ्जयन्ति गीताः ॥

इह रञ्जेरनुषङ्गलोप एव रूपकं प्रत्यनुकूलतामालम्बते न तूपमां प्रति । तस्यैतां प्रति प्रतिकूलत्वात् । यदाह दुर्गसिंहः

रङ्गैर्मृगरमण इत्यनुषङ्गलोपः[1] । यत्र पुनरन्यतरपरिग्रहे साधक-बाधकप्रमाणविरहस्तत्र सन्देहसङ्करः । यत्रारोपविषयं विनैव रूपणं क्रियते तत्र दोष एव । यथा—

एतत्तत् समरस्थलं कलयत श्लाघ्यं कलिङ्गक्षितुः
सैन्यैर्यत्र पुनश्च पाण्डवचमूसंरम्भसम्भावनाः ।
दिक्कान्ताकुचकुम्भकेलिपुलकैर्वर्णैः कृपाणैरपि
क्रीडाकृष्टकरालकालरजनीचक्रैश्चिरं चक्रिरे ॥

इह कुचकुम्भविषयो नोपात्तः ॥

व्या०—यस्येति । स्पष्टम् । रूपकसाधकस्यैवोदाहरणान्तरमाह । तल्पेष्विति । सुरसुन्दरीभिर्गीतास्त्वत्कीर्तय इत्यन्वेतव्यम् । अत्रापि रूपकसाधकमुद्घाटयति— इह रङ्गैरिति । अनुषङ्गलोपो अनुनासिकलोपः । तस्यैतां प्रतीति । तस्यानुषङ्गलोपस्य एतामुपमां प्रतीत्यर्थः प्रतीतितुल्ये हेतुमाह— यथा हीति । अनुषङ्गलोपमाहेत्यन्वयः । इहमृगमरणे ह्यनुषङ्गलोप उक्तः । तत्र मन एव कुरङ्ग इति रूपके मृगरमणं भवति । कुरङ्ग इव मन इत्युपमितसमासे तु मनोरमणं स्यान्न मृगरमणमित्यनुषङ्गलोप एव नोपमां सहते । ततो 'मयूरव्यंसकादयश्च' इति रूपकसमास आश्रयणीयः । तेषामाकृतिगणत्वादित्यर्थः । रूपके बाधकं तु 'मुकुलितनयनैर्मुखारविन्दैर्घनमहतामिव पक्ष्मणां भरेण' इत्यत्र मुखैरेवारविन्दैरिति रूपकपरिग्रहे मुकुलितनयनैरिति विशेषणं बाधकम् । अरविन्दानां नयनसम्बन्धायोगात् । ततः पारिशेष्यात् व्याघ्रादित्वा-

१. 'लोपम्' इति व्याख्यानुसारी पाठः ।

दुपमितसमास इत्याद्यूह्यम् । यत्र त्वन्यतरनिश्चायकप्रमाणाभावस्तत्र सन्देहसङ्करः । यथा 'पाणिपल्लवविधूननमन्तः' इत्यादावित्यभिप्रेत्याह– यत्र पुनरिति । यत्र रूपके निर्विषयारोपः क्रियते स दोष एवेत्याह– यात्रारोपेति । एतदिति । कलयतेति च्छेदे लोट् । यत्र समरस्थले सैन्यैः कर्तृभिर्बाणैः कृपाणैरपि करणैः पाण्डवचमूसंरम्भसम्भावनाश्चक्रिर इत्यन्वयः । अत्र दोषांशमुद्घाटयति– इह कुचकुम्भेति । दिक्कान्तानां प्रसिद्धकुचासम्भवात् । क्वचिच्छैलादिविषये कुचकुम्भत्वमारोप्यम् । न चेह कश्चिद्विषयउपात्त इति दोषप्रायमित्यर्थः ।

मू०—यत्र त्वारोप्यमाणस्य विषयिण एकत्वेऽपि बहुत्वं तत्र न दोषः । विषयेषु प्रत्येकमारोपात् । यथा मुखेन्दव इति ।

व्या०—लोके प्रसिद्धैकाकिम.वस्याप्यनेकेष्वारोप्यमाणस्यैकस्य वस्तुनोऽनेकत्वेन निर्देशो न दोषः । आविष्टलिङ्गत्ववदाविष्टसंख्याकत्वनियमाभावादित्याह– यत्र त्विति । अदोषत्वे हेतुमाह– प्रत्येकमिति । न हि मुखेन्दव इत्यत्र मुखसमुदाये चन्द्रस्यारोपः किं तु प्रतिमुखम् । ततो विषयबहुत्वारोपः । विषयिणि बहुत्वव्यपदेशो न विरुध्यते प्रतिमाचन्द्रवत् । बुद्धिपूर्वकत्वं तु विशेष इति भावः ॥

इति रूपकम् ॥

मू०—तं परिणामं द्विविधं कथयन्त्यारोप्यमाणरूपतया ।
परिणमति यत्र विषयः प्रस्तुतकार्योपयोगाय ।

एष न रूपकम् । आरोप्यमाणस्य प्रकृतोपरञ्जकत्वे रूपकस्य जागरूकत्वात् । यत्रारोपविषयः प्रकृतकार्यसिध्यर्थमारोप्यमाणात्म-

तया परिणमति तत्र यथार्थाभिधानः परिणामः । सामानाधिकरण्यवैयधिकरण्याभ्यां भवन्न द्वैविध्य मतिक्रामति । यथा–

अमरनगरीसौधोत्सङ्गाधिरोहमहोत्सव-
व्यतिकरधुराधौरेयाणामरातिमहीभुजाम् ।
मरकतमयी निश्रेणिस्त्वत्कृपाणलता कवीन्
कति न कुरुते श्लाघाव्यग्रान् कलिङ्गपुरन्दर

अत्रारोप्यमाणनिश्रेणिरूपतया परिणमन्ती कृपाणलता प्रकृतममरनगरीसौधोत्सङ्गाधिरोहणं कार्यं प्रत्युपयोगितां भजते ।

राजन् नृसिंह भवतः समरोत्सवेषु
धूलीभिरन्धतमसं सपदि व्यधायि ।
निस्त्रिंशकृत्तशिरसाममरत्वभाजां
स्वर्गाङ्गनासुरतकेलिषु शात्रवाणाम् ।

अत्रारोप्यमाणान्धतमसरूपतया परणतानां धूलीनां प्रस्तुतसुरतोपयोगित्वम् ॥

व्या०—तदेवमारोपमूलेषु प्रकृतोपरञ्जकतया रूपकं निरूप्य तद्वैधर्म्येण प्रकृतोपयोगितया परिणामं लक्षयति– तमित्यादिना । यत्र प्रकृतकार्योपयोगितया विषयो विषय्यात्मना परिणमति स परिणामालङ्कारः । स च वक्ष्यमाणभङ्ग्या द्विविध इत्यर्थः । ननु विषयस्य विषय्यारोपणाविशेषात् को विशेषो रूपकपरिणामयोरित्याशङ्क्याह– एष न रूपकमिति । कुत इत्याशङ्क्य रूपके भेदमाह– आरोप्य-

माणस्येति । परिणामे विशेषमाह– यत्रारोपविषय इति । आरोप्यमाणस्य प्रकृतोपरञ्जकत्वे रूपकं प्रकृततादात्म्येन प्रकृतोपयोगित्वे परिणाम इत्यर्थः । यथाह सर्वस्वसञ्जीवनीकारश्चक्रवर्ती

'विषय्याकारमारोप्य विषयस्थगनं यदा ।
रूपकत्वं तदा तत्र रञ्जनेन समन्वयः ॥

यदा तु विषयो रूपात् स्वस्मादप्रच्युतो भवेत् ।
उपयुक्त्यै पराकारः परिणामस्तदा मतः ॥' इति ।

पूर्वोद्दिष्टं द्वैविध्यं दर्शयति– सामानाधिकरण्येति । अमरेति । व्यतिकरधुरासम्पर्कभारः । 'ऋक्पूर' इत्यादिना अप्रत्ययः समासान्तः । धुरं वहतीति धौरेयः । 'धुरो यड्ढकौ' इति ढक् प्रत्ययः । श्लाघाव्यग्रान् प्रशंसोत्सुकान् । लक्ष्ये लक्षणं पातयति– अत्रेति । द्वितीयमुदाहरति– राजन्निति । अन्धं तमोऽन्धतमसं गाढध्वान्तम् । 'अवसमन्धेभ्यस्तमसः' इति समासान्तोऽच् प्रत्ययः । धूलीभिरन्धतमसं व्यधायि धूल्योऽन्धतमसत्वेन परिणता इत्यर्थः । धूलीभिरिति वैयधिकरण्यम् । अत्रापि लक्षणार्थे योजयति– अत्रेति ॥

(इति)परिणामः

मू०—किसलयति कविः प्रतिभावशतः प्रकृतार्थभित्तिकं यत्र ।
संशयमप्रकृतेऽर्थे सन्देहोऽयं समाख्यातः ॥८॥

यत्र सादृश्यदर्शनात् स्वप्रतिभावशेन वर्णनार्थं कविः सन्देहमुपनिबध्नाति तत्र प्रकृतस्य सन्दिह्यमानत्वादन्वर्थोऽयमलङ्कारः;

न तु स्थाणुर्वा स्यात् पुरुषो वा स्यात् इतिवत् स्वरसप्रवृत्ते सन्देहे इत्याशयेनाभिहतं प्रतिभावशात इति ।

यथा–

कान्तः किं कैरविण्याः कलयति कमलोल्लासने नैष शक्तिं
नाथः किं वासराणामुदयति कुमुदे नैष लक्ष्मीं वितन्वन् ।
किं कृष्णो न द्विजानामधरयति पतिं भूयसोक्तेन किं वा
ज्ञातः पश्चान्नृसिंहक्षितितलतिलक त्वं विचित्रैश्चरित्रैः ॥

अत्र चन्द्रादिरूपतया सन्दिह्य ज्ञातस्त्वमिति निश्चयः कृत इति निश्चयान्तः सन्देहः । किं चैष निश्चयसाधककमलोल्लासनादिपदद्योतनीयव्यावर्तकांशगतश्लेषमूलाभेदाध्यवसायरूपातिशयोक्त्यनुप्राणितोऽत्र वर्तत इत्यनयोरङ्गाङ्गिभावेन सङ्करः । भूयसोक्तेन किं वेति वाक्याभिहितेनाक्षेपालङ्कारेण सह संसृष्टिरपि । तेन चाक्षेपालङ्कारेण निर्दिष्टेष्वन्येषु वा त्रिदशेष्वपि न तेऽस्ति तुल्य इति व्यतिरेको व्यज्यते । अयं च सन्देहः शुद्धोऽपि सम्भवति यत्र संशय एव पर्यवसानम् । क्वचिदारोप्यमाणानां भिन्नाश्रयत्वेऽपि दृश्यते । यथा–

किं निम्नेषु समीकृता वसुमती शैलाः किमुत्सारिताः
किं प्रक्षालितमम्बरं धवलिताः किं वा वनश्रेणयः ।
अप्येताः कवलीकृताः किमुदिशः सर्वाः किमेकीकृताः
कीर्त्या वीर नृसिंह भूप भवतः सप्तापि पाथोधयः ॥

अत्रारोपविषयभूतायां कीर्तावारोप्यमाणानि समीकरणादीनि वसुमतीप्रभृतिभिन्नाश्रयगतत्वेनोपनिबद्धानि ॥

व्या०—अथारोपप्रस्तावादभेदप्राधान्य एव सन्देहालङ्कारं लक्षयति **किसलयतीति** । कविप्रतिभोत्थापितसादृश्यनिबन्धनः प्रकृताप्रकृतगोचरः सन्देहः सन्देहालङ्कार इति लक्षणार्थ इत्याह— **यत्रेति** । प्रतिभावशत इति विशेषणस्य व्यावर्त्यमाह— **न त्विति** । अयं तु त्रिविधः— निश्चयान्तः, शुद्धः, निश्चयमध्यश्चेति । तत्राद्यमुदाहरति— **कान्त इति** । कमलाया उल्लासनं कमलस्योल्लासनं च । कुमुदे कोर्भुवो मोदाय अन्यत्र कुमुदे कैरवे । कृष्णो विष्णुर्द्विजानां पतिं ब्राह्मणोत्तमं पक्षिराजं च । अधरयत्यवधीरयत्यधिरोहति च । **किं भूयसोक्तेनेति** । अलमतिबहूक्तेनेत्यर्थः । विचित्रैश्चरित्रैरन्येष्वसम्भावितैरसाधारणैर्गुणैरित्यर्थः । इह सन्देहस्य निश्चयान्तत्वं व्यनक्ति— **अत्रेति** । अभ्युच्चयत्वेनालङ्कारविशेषमिहोद्भावयति । **किं चेति** । इह सन्देहभेदस्य निश्चयान्तत्वेन विच्छित्तिविशेषस्तावद्विवक्षितः । निश्चयान्तत्वं च सति निश्चये । स च व्यावर्तकधर्मायत्तः । स चेह कमलोल्लसनादिः । अत्र कमलस्योल्लासनं चन्द्राद्व्यावर्तकम् । तच्च प्रकृते राज्ञि न सम्भवति । यत्तु सम्भवति कमलाया उल्लासनं न तद्व्यावर्तकम् । तथापि तस्य व्यावर्तकाभेदाध्यवसायरूपातिशयोक्तिमहिम्ना व्यावर्तकत्वे ततो निश्चयान्निश्चयान्तः सन्देह इत्यस्यानया श्लेषमूलातिशयोक्त्या द्रव्यदेवतावत् सन्निपात्योपकारितयाङ्गाङ्गिभावेन सङ्कर इत्यर्थः । न केवलं सङ्करः किं तु संसृष्टिरपीत्याह— **भूयसेति** । साम्यविषये किञ्चिच्चन्द्रादिकमुक्त्वा वक्तव्यान्तरस्यारुच्या निषेधाद्वक्ष्यमाणविषयेऽभिधेयांशोक्ता वंशान्तरनिषेधरूप आक्षेपभेदस्तेन सहास्य संसृष्टिरित्यर्थः । इहालङ्कारेणालङ्कारध्वनिमप्याह— **तेन चेति** । अथ शुद्धभेदमाह— **शुद्धोऽपीति** । एवं धर्मिणि धर्म्यन्तरारोपेण त्रेधा संशय उक्तः । अथैकस्मिन् धर्मिणि नानाविषयानेकक्रियारोपेण भेदान्तरमाह— **क्वचि-**

दारोप्यमाणानामिति । किमित्यादि । कवलीकृता मिश्रीकृता एकलोलीकृता इत्यर्थः । अत्रारोप्यमाणानां भिन्नाश्रयत्वं व्यनक्ति—अत्रेति । इह कीर्तौ विषयभूतायामारोप्यमाणानां कीर्त्येककर्तृकाणां समीकरणाद्यनेकक्रियाणां वसुमत्याद्यनेककर्मकत्वमेव भिन्नाश्रयत्वम् । अयं भावः । प्रायेण क्रियाभेदे कारकैक्यं यथा 'सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम्' । तथा कारकभेदे तु क्रियैक्यं यथा 'अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु इत्यादि । अत्र तूभयमपि भिन्नमिति विशेष इति ॥

(इति)सन्देहः ॥

मू०—वस्त्वन्तरप्रतीतिर्विलसति सादृश्यहेतुका यत्र ।
तं भ्रान्तिमन्तमेतं ब्रुवतेऽलङ्कारपारदृश्वानः ॥९॥

अतस्मिंस्तदिति प्रत्ययो भ्रान्तिः । सा विद्यते यस्मिन्निति भ्रान्तिमान् । नायं स्मरणम् । तत्तांशस्पर्शिज्ञानरूपतया स्मरणस्याङ्गीक्रियमाणत्वात् । नापि सन्देहः । विरोधस्फूर्तिपुरःसरतया परस्परविरुद्धकोटिद्वयनिविष्टज्ञानरूपत्वेन सन्देहस्याभ्युपगम्यमानत्वात् । न चैवमतिव्याप्तिः । प्रकृताप्रकृतत्वेन मिथो विरोधिनी जानामीत्यादिवाक्यस्यालङ्कारतयानाद्रियमाणत्वात् । इदन्तांशावच्छिन्नं ज्ञानं हि भ्रान्तिमतो विषयः ।

यथा—

सुराङ्गनाभ्यो मलये त्वदीयं
श्रुत्वा यशो वीर नृसिंह भूप ।

जिव्हाश्चलान्युल्ललयन्ति दुग्ध-
मृणाललोभादुभयेऽपि नागाः ॥

सादृश्येतरकारणांकुरिता च भ्रान्तिर्नास्यालङ्कारस्य गोचरः ।

कल्पान्तक्षुभ्यदम्भोभरतरलतरोदन्वदुत्तुङ्गरिङ्खत्
कल्लोलश्रेणिहल्लीसकवलितमिव प्रेक्ष्यते क्षोणिचक्रम् ।
त्वत्खड्गोत्कृत्तवक्षःस्थलविवरवलत्प्राणवायुप्रयाण-
भ्राम्यच्चेतोभिराजौ प्रतिभटसुभटैः श्रीनृसिंह क्षितीन्द्र ॥

अत्र गाढतरमर्मप्रहारः कारणं भ्रान्तेः । सन्देहानन्तरं तु भ्रान्तिमतो निरूपणमसम्यग्ज्ञानत्वसाधर्म्येण ॥

व्या०—असम्यग्ज्ञानप्रस्तावात् संशयानन्तरं भ्रान्तिमन्तमाह—**वस्त्वन्तरेति** । कविकल्पितसादृश्यनिबन्धना भ्रान्तिर्यस्मिन् कृतिविशेषे विद्यते स भ्रान्तिमदलङ्कार इत्यर्थः । भ्रान्तेर्लक्षणमाह— **अतस्मिन्निति** । मत्वर्थमाह— **सेति** । नन्वसन्निकृष्टार्थगोचरा सादृश्यनिबन्धना स्मृतिरेवेयमिति । स्मरणालङ्काराद्भेदमाशङ्क्य तत्तामात्रोल्लेखिनी प्रतीतिः स्मृतिरिदन्तोल्लेखिनी तु भ्रान्तिरित्यनयोर्भेद इत्याह— **नायमिति** । तर्हीदन्तोल्लेखित्वाविशेषात् सन्देहेऽतिव्याप्तिरित्याशङ्क्याह— **नापीति** । इदमिदं वेत्यनवधारणात्मा विरुद्धकोटिद्वयालम्बी विमर्शः संशयः, भ्रान्तिस्त्विदमेवेत्यवधारणात्मिकामिथ्याप्रतीतिरिति भेद इति भावः । एवं च सति द्वे इमे विरुद्धे इत्यादिज्ञानेषु सन्देहशङ्का न कार्येत्याह **न चैवमित** । तस्मात् सन्देहस्मरणाभ्यां विविक्तविषय एव भ्रान्तिमानित्याह— **इदन्तेति** । इदमिति मिथ्यावधारणमित्यर्थः । उदा-

हरति । सुराङ्गनाभ्य इति । उभये नागाः सर्पा गजाश्च । तेषाँ यशसि सादृश्यादिदं दुग्धमिदं मृणालमिति च भ्रान्तेरिह वर्णनाद् भ्रान्तिमदलङ्कार इति ज्ञेयम् । कल्पान्तेति । हल्लीसकं मण्डलाकारनृत्तशेषः । 'यन्नृत्यं मण्डलाकारं तद्धल्लीसकमुच्यते' इति लक्षणात् । अत्र भ्रान्तिकारणमुद्भावयति— गाढतरेति । एतेनेदं रजतमित्यादिदोषजभ्रमाणामलङ्कारत्वं निराकृतमित्यनुसन्धेयम् । अस्य सन्देहानन्तर्ये कारणमाह— सन्देहान्तरमिति ॥

(इति)भ्रान्तिमान्

मू०—तत्तन्निमित्तभेदादेकमनेकैरनेकधा यत्र ।
उल्लिख्यते स धीरैरुल्लेखः कथ्यतेऽन्वर्थः ॥ १० ॥

अस्य न रूपके तावदन्तर्भावः । वस्तुनस्ताद्रूप्येऽस्य प्रगल्भमानत्वात्; प्रकृतोपरञ्जकत्वमात्रेण रूपकस्य चरितार्थत्वात् । नापि भ्रान्तिमति । अतद्रूपस्य तद्रूपताप्रतिभासेऽप्यनेकधोल्लेखलक्षणं विच्छित्यन्तरमुररीकृत्यास्य प्रवर्तमानत्वात् । नाप्यभेदाध्यवसायरूपायामतिशयोक्तौ । एकस्यानेकप्रतिपत्तृकर्तृकत्वेनानेकधोद्वङ्कितत्वात् । सर्वथा रूपकादेर्विभक्त एवास्य विषयः । यदि पुनः क्वचन । तत्प्रतिभासस्तदानीमपि न विरोधः कश्चन । रूपकादिना सहास्यैकवाचकानुप्रवेशलक्षणस्य सङ्करस्याभिमतत्वात् । तस्माद्यत्रैकस्यानेकधोल्लेखः क्रियते तत्रोल्लेखालङ्कारः । अनेकधोल्लेखनिमित्तं त्वनेकधर्मसम्बन्धः । तत्र रुच्यर्थित्व व्युत्पत्तयो यथायोगं प्रयोजिकाः । ततश्च यथासम्भवं प्रवर्तमानरुच्यर्थित्व-

व्युत्पत्तिप्रयुक्तानेकधर्मसम्बन्धरूपनिमित्तवशादेकमनेकैरनेकधोल्लिख्यत इति यौगिकत्वमप्यस्य सम्भवतीति ॥

यथा—

न भवसि कथं-कारं श्लाघ्यः कलिङ्गपुरन्दर
स्मर इति वरारोहाः साक्षान्मुकुन्द इतीन्दिरा ।
सुरतरुरिति त्वां सेवन्ते निरन्तरमर्थिनो
भरतमुनिरित्यार्यास्तौर्यत्रयीनिपुणा अपि ॥

अत्रैक एव कलिंङ्गपुरन्दरस्तत्तत्सौन्दर्यादिगुणयोगात् स्मराद्यनेकरूपतया निरूपितः ॥

व्या०—अतस्मिंस्तद्बुद्धिसाम्याद्भ्रान्तिमदनन्तरमुल्लेखं लक्षयति— तत्तदिति । एकस्य.नेकनि.मित्तयोगादनेकैरनेकधोल्लेखनमुल्लेख इत्यर्थः । अन्यस्यान्यत्वेन रूपणात् रूपकमेवेदमित्याशङ्कयाह— अस्येति । भेदकमाह— वस्तुन इति । विषयस्यारोप्यमाणतादात्म्यनिमित्तवैचित्र्यमुल्लेखः; रूपके तु तदुपरक्ततामात्रनिमित्तमिति भेद इत्यर्थः । तर्ह्यस्य भ्रान्तिमत्यन्तर्भाव इत्याशङ्क्यैकधानेकधोल्लेखनाभ्यामनयोर्भेद इत्याह— नापि भ्रान्तिमतीति । तर्हि भेदेऽभेदरूपातिशयोक्तावन्तर्भावः स्यादित्याशङ्क्य ग्रहीतृभेदाभेदाभ्यामनयोर्भेदइत्याह— नाप्यभेदेति । अनन्तर्भावं निगमयति— सर्वथेति । तादृग्विच्छित्तिविशेषसम्भवादिति भावः । अन्यत्र विविक्तविषयसम्भवादित्याह— यदि पुररिति । विविक्तविषयमेव निष्कृष्याह— तस्मादिति ।एकस्यानेकधोल्लेखने योग्यता कथमत आह— अनेकधेति । अनेकेषामप्यारोप्यमाणानां ये धर्मा असाधारणगुणास्तेषां

सम्बन्धः सद्भावः । स एवास्यानेकधोल्लेखनयोग्यतापादक इत्यर्थः । तथापि किमर्थमुल्लिखन्तीति प्रतिपत्तिप्रवृत्तिप्रयोजकापेक्षायामाह— तत्रेति । रुचिरनुरागः, अर्थित्वं लिप्सा, व्युत्पत्तिः शब्दार्थसङ्गतिग्रहः आसां च रुच्यादीनां समासेन व्यासेन वा यथासम्भवं प्रयोजकत्वमिति दर्शयन् लक्षणार्थं निष्कृष्याह— ततश्चेति । अन्वर्थ इत्युक्तं संग्रहे; तद् व्यनक्ति— उल्लिख्यत इत्यादि । उदाहरति— नेति । अत्र स्मरमुकुन्दत्वोल्लेखनयो रुचिर्निमित्तं सुरतरुत्वोल्लेखनेऽर्थित्वं भरतमुनित्वोल्लेखने व्युत्पत्तिरित्यनुसन्धेयम् । लक्ष्ये लक्षणं पातयति— अत्रेति ।

(इति) उल्लेखः ॥

मू०—कलयति विषयेऽपह्नवमारोप्यं यत्र भासते सुतराम् ।
आहुरपह्नुतिमेतां बन्धच्छाया त्रयी चास्याः ॥११॥

अत्र प्रक्रान्तापह्नववैधर्म्येण निरूपणमेतस्याः । रूपकमारभ्यारोपकक्ष्यागतालङ्कारविचारः प्रस्तुत इति । विषय आरोपस्य । अस्याश्च त्रयी बन्धच्छाया । तथा हि क्वचिदारोपविषयमपह्नुत्यारोप्यते विषयी । क्वचिद्विषयमारोप्यारोपस्यापह्नूयते विषयः । क्वचित् पुनरसत्यत्वाभिधायिभिश्छलादिभिः शब्दैरपह्नवो निर्दिश्यते । तत्राद्यभेदद्वयं वाक्यभेद एव सम्भवति । तृतीयभेदे त्वेकवाक्यत्वम् ।

क्रमेण यथा—

अश्रान्तस्यन्दमानोद्धुरमदलहरीसौरभोन्मेषहर्ष-
प्रेङ्खोलच्चञ्चरीकप्रकरपरिकरं दिग्गजाः किं वहन्ति ।
किं तूदग्रं कलिङ्गेश्वर तव भुजयोश्चण्डिमानं विलोक्य
व्रीडाचिन्तावनम्रान् स्फुटमसितपटैश्छादयन्ति स्वहस्तान् ॥

अत्रापह्नवपूर्वक आरोपः । मधुकरकुलमिदं न भवतीत्यपह्नवं विधाय नीलपटावगुण्ठनरूपतयारोपस्य कृतत्वात् ।

पृथ्वीभारावतारं कृतवति भवतो दोष्णि हर्षेण दूतः
शेषेण प्रेषितोऽसौ निवसति भुजगः कोऽपि संवादहेतोः ।
क्रुध्यत्कालीकटाक्षद्युतिदलनकलाकेलिकारस्त्वदीये
पाणौ नायं कृपाणः सकलगुणनिधे श्रीनृसिंह क्षितीन्द्र ॥

अत्रारोपपूर्वकोऽपह्नवः । फणधरपतिप्रहितोऽयं दूतभुजग इत्यारोपं विधाय न भवति कृपाण इत्यपह्नवस्य कृतत्वात् । किं चात्रापह्नुत्या सकलरिपुवधूवैधव्यमचिरेण रणे भवता करिष्यत इति वस्तु प्रतीयते ।

वीरश्रीसिंहकान्ताविहरणकनकक्ष्माधराकारबाहो
कीर्तिज्योत्स्नासुधांशो गुणमणिजलधे श्रीनृसिंह क्षितीन्द्र ।
प्रत्यग्रोदग्रजाग्रद्दवदहनघनज्वालमालापदेशा-
द्देशाः शोकं वहन्ते निजपतिविरहाद्दुःखितास्त्वद्रिपूणाम् ॥

अत्रापदेशशब्देनापह्नवनिर्देशः कृतः । एकस्मिन्नेव वाक्येऽपह्नवाभिधायिभिश्छलादिशब्दव्यतिरिक्तैर्वपुर्भङ्गिनामादिभिः शब्दैरपह्नवनिर्देशो द्रष्टव्यः ॥

व्या—अथारोपगमेषु परिशेषादपह्नवस्य लक्षणं विभागं चाह—कलयतीति । विषयेऽपह्नवं कलयति भजति, अपह्नुते सतीति यावत् । यत्रारोप्यमाणस्यारोपविषयापह्नवेनावभासनं सापह्नुतिः । सा च त्रिधा निबध्यत इत्यर्थः । अस्याः संगतिमाह— अत्र प्रक्रान्तेति । प्रक्रान्ता रूपकादयो नापह्नुत विषयाः; एषा त्वपह्नुत विषयेति वैधर्म्यलक्षण-

संगतिरित्यर्थः । नन्वेषु विषयापह्नवस्य कः प्रसङ्गः ? अत आह रूपकमारभ्येति । आरोपप्रस्तावात् विषयापहारस्य प्रसक्तिरस्तीत्यर्थः । इति शब्दो हेत्वर्थे । संग्रहे विषय इत्युक्तं, कस्येत्याकाङ्क्षायामाह– विषय आरोपस्येति । संग्रहस्यं विभागभागं विवरीतुमाह– अस्याश्चेति । अपह्नुत्यारोपः, आरोप्यापह्नवः, छलादिशब्दैरसत्यत्वप्रतिपादनं चेति त्रिविधोऽस्या बन्ध इत्यर्थः । अभ्रान्तेति । चञ्चरीका भृङ्गाः वहन्ति किम् , नवहन्तीत्यर्थः । अपरं सुगमम् । वीरेति । वीरश्रीरेव सिंहकान्ता सिंहाङ्गना । देशा जनपदाः । निजपतिविरहात् स्वस्वामिनाशात् । इह लक्षणार्थं योजयति– अत्रेति । छलादिशब्दैरपह्नव निर्देश इत्युपलक्षणम् । वपुर्भङ्ग्यादिशब्दैरपह्नवनिर्देशे, ऽप्येष भेदः स्यादेवेत्यर्थः– अपह्नवाभिधायिभिरिति । (इति) अपह्नुतिः ।

मू०—अप्रकृतत्वेन स्यादध्यवसायो गुणाभिसम्बन्धात् ।
साध्यः प्रकृतस्य यदा कथितोत्प्रेक्षा तदा तज्ज्ञैः ॥

आरोपादध्यवसायस्य प्रकृष्यमाणत्वादत्र निरूपणं समुचितमेतस्याः । अभिन्नत्वेन प्रतिभासनमध्यवसायः । स द्विविधः सिद्धः साध्यश्च । यत्र लक्ष्यमाणगुणसम्बन्धात् विषयिणो विषयगतत्वेनारोप्यमाणत्वाद्भिन्नस्यापि विषयिणो विषयक्रोडीकारेण प्रवृत्तत्वादभिन्नत्वेन प्रतीतिस्तत्राध्यवसायः सिद्धः । एतदाश्रयेणातिशयोक्तेः प्रथमः प्रकारः कथयिष्यते । यत्र पुनरुपात्तविषयत्वाद्विषयिणो भिन्नत्वेन प्रतिभानं तत्र व्यञ्जनव्यापारेणाभिन्नत्वप्रतीतेः साध्यमानत्वात् साध्यः । एतदवलम्बनेन प्रवर्तमानायाः पुनरस्याः सम्भावनमभिमानस्तर्कऊहश्चेति पर्यायाः ॥

व्या०—तदेवमभेदप्रधानेष्वलङ्कारेषु, आरोपमूलास्तावदुक्ताः । अथाध्यवसायमूलामुत्प्रेक्षां ताल्लक्षयति- **अप्रकृतत्वेनेति** । अप्रकृत-गुणक्रियाभिसम्बन्धात् प्रकृतस्याप्रकृतत्वेन सम्भावनमुत्प्रेक्षेत्यर्थः । सङ्गति माह- **आरोपादिति** । अप्रकृतगुणक्रियाभिसम्बन्धात् चमत्कारविशेष-कारित्वं प्रकर्षः । अध्यवसायस्य लक्षणमाह- **अभिन्नत्वेनेति** । विषयनिगरणेनेति शेषः । अन्यथारोपेऽतिव्याप्तेः । अत एव 'विषय-निगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः' इति सर्वस्वकारः । इदं तावद्विवेक्तव्यम् । अध्यवसायो निश्चयज्ञानं; स च सम्यक् मिथ्या चेति द्विप्रकारो लोके यथा शुक्तावेव शुक्तिरियमिदं रजतमिति च । स द्विरूपोऽपि नालङ्कारः । चमत्काराभावात् किं तु बुद्धिपूर्वकैवेय मतस्मिंस्तद्बुद्धिरन्यधर्मसम्बन्धनिबन्धना 'अयं पारिजात' इत्यादि । सोऽयमलौकिकोऽपरोऽध्यवसाय इहालङ्कारमूलत्वेन विवक्षितस्तस्यैव लोकोत्तर चमत्कारकारणत्वात् । तं विभजते- **स द्विविध इति** । तत्र सिद्धाध्यवसायस्य स्वरूपमाह- **यत्र लक्ष्यमाणेति** । **विषयगतत्वेनेति** । 'अयं पारिजात' इतिपुरोवर्तिविषयतादात्म्येनेत्यर्थः । नन्वन्यशब्दस्या-न्यत्रप्रयोगे कः सम्बन्धोऽत आह- **लक्ष्यमाणगुणसम्बन्धादिति** । लक्ष्यमाणा ये गुणा वितरणादयस्तद्योगादियं पुनर्लक्षितलक्षणेत्यर्थः । विवेचितं चैतद् द्वितीयोन्मेषे । तादात्म्यारोपणस्य फलमाह- **भिन्नस्या-पीति** । कथं भिन्नस्याभिन्नतया प्रतीतिसम्भवस्तत्राह- **क्रोडीकारेणेति** । विषयस्य क्रोडीकारो निगरणमनुपादानमिति यावत् । यत्र विषयस्यो-पादानं तत्राध्यवसायः साध्य इति वक्ष्यति । यत्र तु तस्यानुपादानं तत्र विषयिण एवोपादानमहिम्ना तस्य वस्तुतोऽसत्यस्यापि सत्यताप्रतीतौ विषयस्य तदात्मनाध्यवसितत्वादध्यवसित प्राधान्ये 'ज्ञातो घट' इत्यत्र घटं प्रति ज्ञानस्यैवाध्यवसायस्याध्यवसितं प्रत्युपसर्जनत्वं

प्रतीयते । एतदेवाध्यवसायस्य सिद्धत्वं नाम । तदेतदाह– **तत्राध्यवसायःसिद्ध इति** । सिद्धाध्यवसायस्योपयोगमाह-**एतदाश्रयेणेति** । **प्रथमः प्रकार इति** ।

भेदेऽभेदरूप इत्यर्थः । इतरेषु भेदेष्वभेदाध्यवसायासम्भवादिति भावः । अलङ्कारसर्वस्वकारस्तु तेष्वपि स्वतः सिद्धक वि प्रौढोक्तिसिद्धातिशययोरभेदाध्यवसायसम्भवान्नाव्याप्तिरित्याह– 'अत्र चातिशयाख्यं तत् फलं प्रयोजकत्त्वान्निमितम् तत्राभेदाध्यवसायः' इत्यादिना सन्दर्भेण । अथ साध्याध्यवसायस्वरूपमाह– **व्यञ्जनव्यापारेणेति** । अभिधायाः किं प्रतिबन्धकं तदाह– **भिन्नत्वेन प्रतिभानमिति** । तथा प्रतिभाने हेतुमाह– **उपात्तेति** । यत्र विषयविषयिणोर्द्वयोरुपादानं तत्र भेदवदवभासादभेदो नावभासते । विषयिणोऽसत्यताप्रतीतेः । तथापि विषयस्य तथा व्यपदेशतद्धर्मयोगित्वाभ्याम भेदोऽध्यवसीयते सम्भाव्यत इति व्यापारप्राधान्याध्यवसायः साध्य इत्यर्थः । अस्योत्प्रेक्षादिशब्दप्रवृत्तिनिमित्तत्वेनोपयोगमाह– **एतदवलम्बनेनेति** । इयं च व्यञ्जकेवादिशब्दयोगे वाच्या । तदप्रयोगे प्रतीयमाना चेति प्रथमं द्विविधा । द्विविधाया अपि गुणः क्रिया वा निमित्तं; तच्च क्वचिदुपात्तं क्वचिदनुपात्तं च । विषयोऽपि जातिगुणक्रियाद्रव्यतदभावरूपेणाष्टविधः । स च स्वरूपेण हेतुत्वेन फलत्वेन च यथायोगमुत्प्रेक्ष्यते ॥

मू०—श्रीमन्नृसिंह नृपते भवतो यशोभिः
क्षीरार्णवं स्नपितरं परिभूयमानम् ।
उत्पश्यतः सितकरस्य कुरङ्ग एष
शोकाग्निधूम इव भाति तदात्मजस्य ॥

अत्र धूमत्वेनोत्प्रेक्षणे कुरङ्गस्य प्रवृत्तिनिमित्तं श्यामत्वं गुणो लक्ष्यमाणः । तदभिन्नत्वप्रतीतिः साध्या प्रयोजनम् । उपमोपक्रमादुत्प्रेक्षा यथा–

स्वःसिन्धौ विबुधेन्द्रविभ्रमवने खे हाटकाद्रौ दिशां
कण्ठे वीर नृसिंह देव भवतः कीर्तेः परिस्फूर्तयः ।
डिण्डीरप्रकरन्ति फुल्लकलिकाभारन्ति तारावधू-
नाथांशुप्रसरन्ति निर्झरसरित्पूरन्ति हारन्ति च ॥

अत्रोपमानत्वेनोपनिबद्धस्यापि डिण्डिरप्रकरादेः स्वःसिन्धुप्रमुखेषु स्थानविशेषेषु सम्भवौचित्यादभिन्नत्वेन प्रतीतेरुत्प्रेक्षायामुपमायाः पर्यवसानम् । क्रियायाः फलत्वेनापि ।

यथा-

कैलासान् कीर्तिरेषा सृजति कति न ते दत्ततिग्मांशुयात्रा-
भङ्गांस्त्यागस्तु शृङ्गाश्वलदलितनभःपर्वणः स्वर्गशैलान् ।
इत्थं मन्दाक्षचिन्ताप्रसरविधुरधीरात्मभूरात्मगुप्त्यै
लीनो वैकुण्ठनाभीसरसिजकुहरे श्रीनृसिंह क्षितीन्द्र ॥

अत्र विधुरधीरत्वं गुणो हेतुः ॥

व्या०—अत्र तु दिङ्मात्रमुदाहरति- श्रीमदिति । अत्र स्वपितरमित्यनेनैवात्मजत्वे प्रतीयमाने पुनरात्मजग्रहणं शोकातिशयद्योतनार्थम् । उत्प्रेक्षाया विषयमाह- अत्रेति । निमित्तमाह- प्रवृत्तीति । धूमशब्दस्य लक्षितलक्षणया कुरङ्गे प्रयोगं विवक्षन्नाह- गुणो लक्ष्यमाण इति । एतेनेयमुपात्तगुणनिमित्ता जातिस्वरूपोत्प्रेक्षेति द्रष्टव्यम् । लक्षणाप्रयोजनमाह- तदभिन्नत्वप्रतीतिरिति । सिद्धाध्यवसायव्युदासार्थमुक्तं- साध्येति । उपमेयोपक्रमो यस्यां सोपमोपक्रमा । स्वरिति ।

डिण्डीरप्रकरन्ति डिण्डीरप्रकरा इवाचरन्ति । "सर्वप्रातिपदिकेभ्यः" इत्युपमानादाचारार्थे क्विप् । 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां वर्तमाने लट् । एवं सर्वत्र । अत्र स्वःसिन्ध्वादिभिर्डिण्डीरप्रकरादीनां यथासङ्ख्यमन्वयात् यथासङ्ख्यालङ्कारे तत्सङ्कीर्णेयमुपमोपक्रमोत्प्रेक्षा । उपक्रमत्वं व्यनक्ति— **अत्रेति** । उक्तानुशासनप्राबल्यान्मुखतो डिण्डीरप्रकरादेरुपमानत्वावभासेऽपि कीर्तिस्फूर्तीनां स्वःसिन्ध्वादिशु डिण्डीरादिरूपतानियमाभावो न सम्भवौचित्यात् । सम्भावनमात्रस्य न्याय्यत्वात् डिण्डीरप्रकराः किमित्यभेदाध्यवसाये पर्यवसानादियमुत्प्रेक्षैवेत्यर्थः । इह क्वचिद् धर्मिणि धर्म्यन्तरारोपः यथोदाहृतं प्राक् । क्वचिद्धर्मस्य आरोपः । यथा वक्ष्यति । तत्र विशेषमाह— **तत्रेति** । गुणस्य हेतुत्वेनैवोत्प्रेक्षाक्रियायास्तु स्वहेतुत्वेन फलत्वेन चेत्यर्थः । तत्र गुणहेतूत्प्रेक्षामुदाहरति— **कैलासानित्यादि** । तत्रात्मभुवो लीनत्वं प्रति चिन्ताविधुधीहेतुत्वोत्प्रेक्षणात् क्रियानिमित्तगुणहेतूत्प्रेक्षेयं व्यञ्जकप्रयोगाद् गम्येत्यभिप्रेत्याह— **अत्रेति** ।

मू०—त्वत्तः कोऽप्यपरः कदापि पुरुषश्चित्तेऽपि न स्थापित-
स्त्वच्चिन्तापरया मयेपि भवतः प्रत्यायनां कुर्वती ।
तन्वी दुःसहपञ्चबाणदहनोत्सङ्गं प्रविष्टा सती
पाण्डिम्ना विरहोत्थितेन सुभगा व्याख्याति शुद्धिं निजाम् ॥

अत्र प्रत्यायना(न)करणं शुद्धिप्रकाशनहेतुः ।

त्रैलोक्यप्रथमानवीरपरिषद्व्यावृत्तवीरायित
श्रीमन् वीर नृसिंह देव भवतः कर्तुं वतंसं यशः ।
यत् पूर्वं श्रवणावतंसपदवीं नीतं धरित्रीभुजां
तत्कम्पेन निरन्तरेण शिरसः प्रभ्रंशयन्ते बुधाः ॥

अत्र वतंसीकरणं फलम् ॥ तत्र तदभिधायिन इवादे-रुपादानं न कार्यम् । पौनरुक्त्यापत्तेः । यथा

ननु मृगाङ्कमृगस्य तृणैर्विना
कथममुष्य भविष्यति जीवितम् ।
इति मृगाङ्करुचः कुरुते तृणं
तव कृपालु कलिङ्गपते यशः ॥

कान्त्यानया तव तुलातपनीयराशि-
र्मन्दीकृतद्युतिरवाञ्छति लज्जमानः ।
किं चामुनार्थिभवनेषु निधीकृतेन
जाता नृसिंह नृपते वसुधा यथार्था ॥

मरुत्पाथोवह्निव्यतिकरसुतीक्ष्णेन तपसा
तुलामध्यारूढं तव तदपि कान्त्या जितमहः ।
इति स्नात्वा दानाम्भसि तव नृसिंह क्षितिपते
सुवर्णं निर्विण्णं विरचयति तीर्थेषु वसतिम् ॥

दिङ्मातङ्गैः सह स्पर्शभ्रान्तितः प्राप्य शुद्धये ।
पुष्करं गाहते कीर्त्तिर्नृसिंह नृपते तव ॥

व्या०—क्रियाहेतूत्प्रेक्षामुदाहरति— त्वत्त इति । एषा च क्रियानिमित्तक्रियास्वरूपोत्प्रेक्षा पूर्ववद् गम्येत्याह— अत्र प्रत्यायनेति । क्रियाफलोत्प्रेक्षामुदाहरति— त्रैलोक्येति । वीरायितं वीरकर्म । अत्र शिरः कम्पस्य यशोवतंसीकरणार्थत्वोत्प्रेक्षणात् क्रियानिमित्तक्रियाफलोत्प्रेक्षे-यमित्याह— अत्र वतंसीति । विशेषान्तरं वक्तुमाह— यत्रेति ।

अत्रापि विपयव्याप्त्यर्थमुदाहरणचतुष्टयमाह— **नन्विति** । इह तृणकरण-मनादरकरणम् । तद्घाससम्पादनेनाभेदाध्यवसायात् कृपालुत्वगुणरूप-हेतूत्प्रेक्षायां निमित्तमिति श्लेषमूलाभेदातिशयोक्तिप्राणितक्रियानिमित्तगुणहेतू-त्प्रेक्षेयम् । तत्र कृपालुत्वस्य चेतनधर्मस्याचेतने यशसि विरोधात् कृपालुरिवेत्युत्प्रेक्षागमकत्वान्नेवादिशब्दप्रयोगावकाश इत्याशयः । **कान्त्येति** । अत्र तुलातपनीयराशेरवाञ्चनस्य लज्जाहेतुकत्वोत्प्रेक्षणात् क्रियानिमित्तगुण-हेतूत्प्रेक्षा । लज्जमान इवेत्युत्प्रेक्षाक्षेपकत्वं तुल्यमिति व्याख्यातम् । **मरुदिति** । धमनतापनसेकैः शोधितमेव सुवर्णं देयमिति भावः । **तुलामध्यारूढमिति** । तुलापुरुषदानमित्याशयः । तीर्थेषु पात्रेषु गङ्गादिषु च । अत्रापि सुवर्णस्य तीर्थवसतेर्निर्वेदहेतुकत्वोत्प्रेक्षणात् क्रियानिमित्तगुणहेतूत्प्रेक्षैव । निर्विण्णमिवेत्युत्प्रेक्षालाभः पूर्ववत् । **दिगिति** । मातङ्गा गजाश्चाण्डालाश्च । भ्रान्तिः पर्यटनं व्यामोहश्च । पुष्करमम्बरं तीर्थविशेषश्च । चाण्डालस्पर्शिनोऽपि शुद्ध्यर्थं तीर्थमवगाहन्त इति भावः । इहापि शुद्धये इति फलोत्प्रेक्षा पुष्करावगाहनक्रिया-निमित्ता श्लेषमूलाभेदातिशयोक्त्युत्थापितेति सङ्करः । फलस्य लिप्सा-लक्षणत्वात् अचेतनायां कीर्त्तौ विरोधाच्छुद्धय इवेति सादृश्याक्षेपादिवा-द्यनपेक्षा ॥

इति (उत्प्रेक्षा) ॥

मू०—अध्यवसितिसिद्धत्वं प्रकृतस्यान्यत्वकल्पनं यद्वा ।
सम्बन्धासम्बन्धौ तद्व्यत्यासे भवेदतिशयोक्तिः ॥१३॥

अध्यवसितिसिद्धत्वमिति भेदे सत्यभेदः । प्रकृतस्या-न्यत्वकल्पनमिति अभेदे भेदः । तद्व्यत्यासे सम्बन्धासम्बन्धा-वित्यसंबन्धे संबन्धः सम्बन्धे त्वसम्बन्ध इति चतुर्धा भवत्य-तिशयोक्तिः । अतिशयस्योक्तिरिति यौगिकत्वमस्याः । क्रमेण यथा—

पल्लवतः कल्पतरोरेष विशेषः करस्य ते वीर
भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते ॥

अत्र कर्णशब्दवाच्ययोरर्थयोर्भेदेऽप्यभेदनिर्देशः ।

अशेषभोगाधारं त्वामक्रमात्तबलिश्रियम् ।
कलिङ्गेश्वरजानामि नूतनं पुरुषोत्तमम् ॥

अत्रापि पुरुषोत्तमशब्दवाच्ययोरर्थयोर्भेदेऽप्यभेदो निर्दिष्टः ।

इदमन्यत् सारस्वतमन्यद्गाम्भीर्यमन्यदौदार्यम् ।
त्वं नरसिंह नरेश्वर न भवसि पैतामही सृष्टिः ॥

अत्र सारस्वतादीनामभेदेऽप्यन्यत्वेन भेदः ।

स्थाने स्थाने कुलशिखरिषु त्वद्यशो गीयमानं
सिद्धद्वन्द्वैस्तटतरुलताकेलिदोलाधिरूढैः ।
श्रुत्वा हर्षात् प्रसुपितगतावौपवाह्ये कुरङ्गे
मन्दायन्ते मलयमरुतः श्रीनृसिंह क्षितीन्द्र ॥

अत्र कुरङ्गेण मलयमरुतामसम्बन्धेऽपि सम्बन्धः ।

त्वयीत्थं सर्वेभ्यो वितरति कलिङ्गेश्वर सदा
न दानप्रस्तावो दिविचरतरूणां समजनि ।
यदि स्यादेतेषामपि विषमकण्डूविनयन-
क्षणारम्भेष्वैरावणकरटकाषव्यतिकरैः ॥

अत्रामरतरूणां वितरणसम्बन्धेऽप्यसम्बन्धः ॥

व्या०—तदेवमध्यवसायप्राधान्योत्प्रेक्षां लक्षयित्वा सम्प्रत्यध्यवसितप्राधान्येनातिशयोक्तिं विभागपूर्वकमाह— **अध्यवसितीति** । अध्यवसितिरध्यवसायः । तस्याः सिद्धत्वं सिद्धरूपता अध्यवसितप्राधान्यमिति यावत् । एतेनाध्यवसायप्रधानोत्प्रेक्षाव्यावृत्तिः । एतच्च प्रथमभेदे एव न भेदान्तरेष्विति दर्शयन् भेदान् विशदयति— **अध्यवसितिसिद्धत्वमिति** । अभेदप्रतिपत्तेरध्यवसायशब्दार्थत्वादिति भावः । **चतुर्धेति** । एतत्प्रस्तावनिरूप्यभेदाभिप्रायम् । भेदान्तरस्यापि कार्यकारणपौर्वापर्यभङ्गाख्यस्य अलङ्कारसर्वस्वकारोक्तच्छायासङ्गतिवशेन कार्यकारणभावमूलालङ्कारप्रस्तावे वक्ष्यमाणत्वात् । काव्यप्रकाशकारस्तु भेदेऽभेदः, अभेदे भेदः, यद्यर्थशब्दप्रयोगादसम्भावितार्थान्तरकल्पनं, कार्यकारणपौर्वापर्यभङ्गश्चेत्येवं चातुर्विध्यं सिद्धान्तयाञ्चकार । तदपि चिन्त्यम् । तथा हि तन्मते सम्बन्धासम्बन्धाख्यौ नालङ्कारावतः पृथग्भूतौ वा स्वोक्तभेदान्यतमान्तर्भूतौ वा । नाद्यः । विच्छित्तिविशेषसद्भावात् । न द्वितीयः । भेदकानिरूपणात् । न तृतीयः । प्रथमभेदयोः[1] धर्मितादात्म्यविधिनिषेधात्मनोः संसर्गमात्रविधिनिषेधात्मकत्वेन अनयोरन्तर्भावायोगात् । चतुर्थे त्वप्रसक्तिरेव । तृतीयभेदे तु किमनयोः तत्रान्तर्भावस्तस्य वाऽनयोरिति विमृश्यताम् । तथा हि ।

पुष्पं प्रवालोपहितं यदि स्यात्
मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद्विषदस्य तस्या-
स्ताम्रोष्ठपर्यस्तरुचः सितस्य ॥

---

१. काव्यप्रकाशकाराङ्गीकृतयोरित्यर्थः ।

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः ।
तस्यामुखं तदा साम्यपराभवमवाप्नुयात् ॥

इत्यादिकं हि तस्योदाहरणम् । तत्राद्येऽसम्भावितोऽर्थः पुष्पप्रवालयोः मुक्ताफलविद्रुमयोश्च सम्बन्ध एव यदिशब्देन सम्भाव्यते इत्यसम्बन्धे सम्बन्धभेद एवायम् । द्वितीये तु अकलङ्कं चेदिति कलङ्कासम्बन्ध इन्दोश्चेच्छब्देन सम्भाव्यत इति सम्बन्धेऽप्यसम्बन्धभेद एवायम् । एवं स्थिते सामान्ये विशेषस्यान्तर्भाव उचितः । विशेषे वा सामान्यस्य तदत्र भवन्त एव विदाङ्कुर्वन्तु । तस्मादस्मदुक्तः पञ्चधा विभाग एव न्याय्य इत्यलम् । तर्हि किमत्रानुगतं सामान्यलक्षणम् । अध्यवसितप्राधान्ये त्वतिशयोक्तिः इति सर्वस्वकारोक्तमेवेति ब्रूमः । न चाव्याप्तिः । स्वतःसिद्धकविप्रौढोक्तिसिद्धातिशययोः फलभूतयोरभेदाध्यवसानस्य सर्वभेदव्यापकत्वात् । यथाह सञ्जीवनीकारः ।

"अभेदाध्यवसायो हि फलेऽतिशयनामनि ।
न पुनः फलितोऽस्त्यत्र भेदोऽभेदे न सिध्यति ॥" इति ।

फलितविषयाभेदाध्यवसायो न व्याप्नोतीत्यर्थः । एतल्लक्षणविवक्षयैव सामान्यसंज्ञां व्युत्पादयति— **अतिशयस्योक्तिरिति** । तर्ह्येतदाश्रयेणातिशयोक्तेः प्रथमः प्रकारः कथयिष्यत इति कथमुक्तं प्राक् । फलिताभेदाध्यवसानविवक्षयेत्यविरोधः । तस्मान्निष्कण्टकमेतत् सर्वथेति सन्तोष्टव्यम् । पल्लवत इति पल्लवादित्यर्थः । कर्णं श्रोत्रं राधेयं च । एकः पल्लवो भूषयत्यवतंसतया । अन्यः करस्तिरस्कुरुते वितरणेनेत्यर्थः । नन्वयं व्यतिरेको न तु अतिशयोक्तिरित्याशङ्क्याह— **अत्र कर्णशब्दवाच्ययोरिति** । श्लेषमूलातिशयोक्त्युत्थापितो व्यतिरेकसङ्कर इति भावः । अस्यैवोदाहरणान्तरमाह—

अशेषेति । अशेषाणां भोगानामाधारः, शेषशरीरशायी न भवतीति तथोक्तम् । अक्रमेण यौगपद्येनात्ता बलिनां प्रबलद्विषां श्रीर्येन तम्, क्रमेण पादन्यासेनात्ता बलेरसुरस्य श्रीर्येन स न भवतीति तथोक्तम् । पुरुषोत्तमं पुरुषश्रेष्ठं हरिं च । अत्र व्यतिरेकश्लेषमूलातिशयोक्त्युत्थापिता नूतनपुरुषोत्तमत्वोत्प्रेक्षा । तत्रातिशयोक्त्यंशं दर्शयति– **अत्रेति** । द्वितीयभेदमुदाहरति– **इदमन्यदिति** । तृतीयं भेदमुदाहरति– **स्थान इति** । औपवाह्ये राजवाह्ये । यद्यपि 'राजवाह्यस्त्वौपवाह्यः' इति कुञ्जरभेदेष्वमरस्तथापि कुरङ्गे उपचर्यते । मन्दायन्ते मन्दा-भवन्ति । "भृशादिभ्यो भुव्यच्वेर्लोपश्च" इति क्यङ्-प्रत्ययः ॥

(इति) अतिशयोक्तिः ॥

मू०—इत्थमलङ्कारद्वयमध्यवसायाश्रयेण निर्णीय ।
अधुनालंकृतिवर्गं गम्यौपम्याश्रयं ब्रूमः ॥१४॥

औपम्यगम्यतायां प्रकृतानां तुल्यधर्मसम्बन्धे ।
अप्रकृतानामथवा चतुर्विधा तुल्ययोगिता ज्ञेया ॥१५॥

तुल्यधर्मेण योगो जातोऽस्यामित्यन्वर्थनामा तुल्ययोगिता । धर्मस्तु द्विविधो गुणः क्रिया च । ताभ्यां सह प्रत्येकं प्रकृतानामेवाप्रकृतानामेवाभिसम्बन्धादियं चतुर्धा । क्रमेण यथा–

प्रत्यर्थिपृथ्वीपतिमानमर्दनं
सेवासमायातनृपालपालनम् ।
कात्यायनीपादसरोजपूजनं
नैसर्गिकं ते नरसिंह भूपते ॥

अत्र अरिमर्दनादीनां प्रकृतस्य राज्ञो धर्मत्वात् प्रकृतत्वम्। नैसर्गिकत्वं गुणः। अत्रैव विद्योतत इति पाठे क्रिया।

गर्जद्दुर्जयशत्रुसैन्यजलधेर्मन्थाय विद्वज्जना-
भीष्टानां परिपूरणाय वसुधावष्टम्भदानाय च।
श्रीमन्नुत्कलभूमिपाल भवतः सृष्टे भुजे वेधसा
व्यर्थः सम्प्रति मन्दरः सुरतरुः सर्पाधिपश्चाभवत्॥

अत्र मन्दरादीनामुपमानत्वादप्राकरणिकत्वम्। व्यर्थत्वं गुणः। अत्रैव निन्द्य इति पाठे क्रिया।

श्लेषप्रतिभोत्थापिताप्येषा सम्भवति।

यथा-

अलङ्कारावबद्धानि काव्यान्यरिकुलान्यपि।
नरसिंह महीपाल कीर्तिं पल्लवयन्ति ते।

व्या०—अथालङ्कारान्तरनिरूपणाय सङ्गतिमाह- इत्थमिति। औपम्यगर्भेष्वपि पदार्थवाक्यार्थगतत्वेन द्वैविध्ये वाक्यार्थस्य पदार्थपूर्वकत्वात् पूर्वं पदार्थगतमलंकारद्वयं न्याय्यं; तत्रापि समासस्य व्यासपूर्वकत्वात् प्रकृताप्रकृतसमासाश्रयाद्दीपकात् पूर्वं व्यासाश्रितां तुल्ययोगितां लक्षयति- औपम्येति। औपम्यगम्यतायामित्यधिकारकथनम्। केवलप्रकृतानां केवलाप्रकृतानां वा तुल्यधर्मयोगे तुल्ययोगिता। सा च वक्ष्यमाण-भङ्ग्या चतुर्विधेत्यर्थः। संज्ञां व्युत्पादयति- तुल्यधर्मेणेति। तारकादि-त्वादितच्प्रत्ययान्तेत्यर्थः। धर्मस्वरूपनिरूपणपूर्वकं चतस्रो विधा दर्शयति- धर्म इति। अतःपरं सुगमम्। अलङ्कारेति। अलङ्कारैरुपमा-दिभिरवबद्धानि सन्नद्धानि। अन्यत्रालमत्यन्तं कारायामवबद्धानि निगलि-

तानि । अभेदाध्यवसायेन त्वलङ्कारावबद्धत्वं काव्यानामरिकुलानां च केवल-प्रकृतानां समानधर्मः । एवमप्रकृतत्वेनाप्युदाहार्य्यम् ।

इति तुल्ययोगिता ॥

मू०—मिलितानां तु तथैषां दीपकमित्युच्यते षोढा ।
एतदलंकृतियुगलं कथितं तावत् पदार्थगतत्वेन ॥१६॥

अत्रोपमागर्भत्वे सत्यपि वाच्यालङ्कारमुखेनैव चारुत्वम् । अतो न ध्वनित्वेन व्यपदेशः; किं तु गुणीभूतव्यङ्ग्यत्वेन एषां प्रकृतानामप्रकृतानां प्रकृताप्रकृतानां च । तथेति ग्रहणं गुणक्रियायोग इत्याद्यनुवृत्त्यर्थम् । सम्भूय वर्तमानानि प्रकृता-प्रकृतान्यत्र प्रयोजकानि । अत एवोपमानोपमेयभावस्य वास्तव-त्वम् । इवादेरनुपादानादौपम्यस्य गम्यत्वम् । परमार्थतो वाक्यार्थगतत्वेनास्यालङ्कारस्य सम्भवेप्येऽकया क्रिययानेकवस्तुनो भिन्नस्य सम्बन्धादौचितीवशेन पदार्थगतत्वेनाभिधानम् । प्रकृता-प्रकृतान्यतरसान्निध्यमधितिष्ठन्नपि साधारणो धर्मः प्रसङ्गेनान्यदपि दीपयतीति दीपकम् । यदुक्तं विद्वदलङ्कारे कविचक्रवर्तिना हरिहरेण—

'यः प्रस्तुताप्रस्तुतयोर्वर्गे क्वापि सङ्गतः ।
समानो धर्म एकोऽन्यद्दीपयेत्तत्तु दीपकम् ॥'

इति । साधर्म्यस्य तु वाक्यादिमध्यान्तगामित्वादेतत् षट् प्रकारम् ।

क्रमेण यथा—

करोति न मुदं कस्य नरसिंह नरेश्वर ।
राकाचन्द्रमसो बिम्बं पुण्डरीकं यशस्तव ॥

क्षीरोदवीची कमलासखेन
प्रकाशते भानुमता दिनश्रीः ।
द्यौः पारिजातेन कलिङ्गनाथ
निशा शशाङ्केन मही त्वया च ॥

वीर नृसिंह कवित्वं चम्पकसौरभ्यमिन्दुसौन्दर्यम् ।
गङ्गाजलमाधुर्यं कस्य न भुवनेषु सर्वदा मान्यम् ॥

एवं गुणयोगेऽपि ॥

व्या०— एवं प्रकृताप्रकृतव्यासाश्रयणेन तुल्ययोगितामुक्त्वा तत्सामस्त्याश्रयणे दीपकं निरूपयति— **मिलितानामिति** । तुशब्दस्तुल्ययोगितावैलक्षण्यार्थः । व्यासे तुल्ययोगिता; दीपकं तु मिलितानां समस्तानामेषां प्रकृताप्रकृतानां तुल्यधर्मसम्बन्धे सम्पद्यते । तच्च वक्ष्यमाणरीत्या षड्विधमित्यर्थः । इहौपम्यस्य गम्यमानत्वाद् ध्वनिरेवायं किं न स्यादत आह— **अत्रेति** । इह विद्यमानमपि व्यङ्ग्यमौपम्यरूपं वाच्यालङ्कारोपस्कारकतया स्थितत्वादपराङ्गनामा गुणीभूतव्यङ्ग्यभेदो भवन्न ध्वनिव्यपदेशमर्हतीत्यर्थः । समस्तानां प्रयोजकत्वे फलमाह— **अत एवेति** । तुल्ययोगितायां हि केवलं प्रकृतानामुपमैव(मुपमेयतैव) केवलाप्रकृतानां तूपमानत्वमेवेति वैवक्षिक एवोपमानोपमेयभावः; अत्र तूभयेषां सामस्त्यान्मुख्य एव गम्यत इत्यर्थः । गम्यत्वे हेतुमाह— **इवादेरिति** । ननु समानधर्मस्य प्रत्यर्थसम्बन्धे वाक्यार्थगतत्वमेवास्य तत् कथं पदार्थगतत्वमत आह—

परमार्थत इति । वस्तुतो वाक्यार्थगतत्वेऽपि सर्वत्र सम्बध्यमानैक-धर्मस्य पदार्थत्वात् तद् दृष्ट्या पदार्थगतत्वोपचार इत्यर्थः । क्रिया-ग्रहणं गुणस्याप्युपलक्षणम् । प्रवृत्तिनिमित्तमाह— **प्रकृताप्रकृतेति** । कथमेकत्रावस्थितस्यानेकत्रोपकारकतेत्याशङ्क्याह— **प्रसङ्गेनेति** । अन्यार्थ-मनुष्ठितस्यान्योपकारकत्व(त्वं,प्रसङ्गः । यथा पश्वार्थानुष्ठितप्रयाजादीनामि-ष्ट्युपकारकत्वम् । यथावा लोके देवसमीपे स्थापितस्य दीपस्य कुम्भस्तम्भाद्युपलम्भोपकारकत्वं; तथायमप्येकत्र स्थितः सर्वं दीपयतीति दीपकमुच्यत इत्यर्थः । अत्राभियुक्तसम्मतिमाह— **यदिति** । विभागं दर्शयति— **साधर्म्यस्य त्विति** । साधर्म्यं समानधर्मो गुणक्रियारूपो द्विविधः । तस्यैकस्यैवादिमध्यान्तगतत्वेन त्रैविध्ये द्वैविध्यमित्यर्थः । **वाक्यादिमध्यान्तगामित्वादिति** । वाक्यानामादिमध्यान्तवाक्यानां यथासंख्यं य आदिमध्यान्तास्तद्गतत्वादित्यर्थः । एवं च वैचित्री-विशेषाद्विच्छित्तिविशेषलाभः । आदिमध्यान्तवाक्यगतत्वमात्रेणाप्ययमलङ्कार इष्यत एव । तत्र क्रियायोगे भेदत्रयं क्रमेणोदाहरति— **करोतीत्यादि** । गुणयोगे भेदत्रयस्याप्युदाहरणमूह्यमित्याह— **एवं गुणयोगेऽपीति** ॥

(इति) दीपकम् ॥

मू०—वाक्यार्थगतत्वेन स्यात् सामान्यं पृथग्विनिर्दिष्टम् ।
यस्यां द्वेधा तज्ज्ञैः सा प्रतिवस्तूपमा सामाम्नाता ॥१७॥

पदार्थगतालङ्कारनिरूपणानन्तरं वाक्यार्थगतालङ्कारनिरूपणावसरः । पदार्थारब्धत्वाद्वाक्यार्थस्य । वस्तुशब्दस्य वाक्यार्थाभिधायित्वात् प्रतिवाक्यार्थमुपमेति सार्थकाभिधानेयं द्विधा ।

साधर्म्येण वैधर्म्येण च ।

क्रमाद्यथा—

दातारः कति न प्रभाकरकरक्रीडासखीनां दिशां
चक्रे किं तु नृसिंहपार्थिवतुलामेकोऽपि नारोहति ।
अध्यास्ते न परोऽपि कश्चन मणिश्चिन्तामणिप्रक्रिया-
मब्धिः क्षीरपयोधिभङ्गिमचलः कैलासहेलामपि ॥

अत्रारोहणमध्यासनं चेत्येक एव धर्म उपमेयवाक्ये उपमान वाक्ये च पर्यायपदेनोपनिबद्धः ।

याश्वादैन्यपराङ्मुखी भवतु वो जिह्वा नृपेष्वर्थिनः
सर्वस्यापि कलिङ्गभूपतिरिह क्षेमङ्करः सेव्यताम् ।
तत्तादृक्फलभारवैभवनमन्नीरन्ध्रशाखाभरे
मन्दारे पुरतः स्थिते किमपरैर्लक्षेण वृक्षैरपि ॥

अत्र मन्दार एव सेव्यतामिति प्रतीतिरस्तीत्येक एव साधारणो धर्म उभयत्रापि वर्तते ।

सन्तोपकरणनिपुणो नरसिंह नरेश्वर त्वमखिलस्य ।
नानन्ददानचतुरश्चिन्तामणिमन्तरेण कोऽप्यस्ति ॥

अत्र व्यतिरेकमुखेनाभिधानाद्वैधर्म्यम् ॥

व्या—अथौपम्यगर्भेषु पदार्थगतालङ्कारनिरूपणानन्तरं वाक्यार्थगतालङ्कारप्रस्तावे सामान्यधर्मस्य सकृन्निर्देशेन दीपकमुक्त्वा तद्वैधर्म्येणासकृन्निर्देशेन प्रतिवस्तूपमामाह । वाक्यार्थगतत्वेनेति यत्रोपमानोपमेयवाक्ययोरेक एव समानधर्मः पर्याय-शब्देन पृथङ्निर्दिश्यते सा प्रतिवस्तूपमा । सा च साधर्म्यवैधर्म्याभ्यां द्विविधेत्यर्थः । सङ्गतिमाह—पदार्थगतेति । वाक्यार्थस्य पदार्थसंसर्ग-

त्मकत्वात् तदारब्धत्वव्यपदेशः। संज्ञां व्युत्पादयति— वस्तुशब्दस्येति। प्रतिवस्तु प्रतिवाक्यार्थमुपमा समानधर्मोऽस्यामिति प्रतिवस्तूपमेत्यर्थः। दातारं इति। दिशां चक्रे दिङ्मण्डले परशब्दस्य मण्यब्ध्यचलैः प्रत्येकं सम्बन्धः। क्वचित् समानधर्मस्यैकत्रैव प्रयुक्तस्यापरत्र गम्यत्वेऽप्येषा सम्भवतीत्याशयेनोदाहरणान्तरमाह— याञ्चेति। क्षेमं करोतीति क्षेमकरः। 'क्षेमप्रियमद्रेऽण् च' इति खच्प्रत्ययः। अत्रोपमेयवाक्ये प्रयुक्तं सेव्यत्वमुपमानवाक्येऽपि प्रतीयत इत्याह— अत्रेति। वैधर्म्योदाहरणमाह— सन्तोपेति॥

इति प्रतिवस्तूपमा॥

मू०—बिम्बप्रतिबिम्बत्वं यद्युपमानोपमेययोर्भवति।
धर्मस्यापि तदानीं दृष्टान्तः कथ्यते द्विविधः॥१८॥

अत्र दृष्टान्तालङ्कारमहिम्नैव बिम्बप्रतिबिम्बभावेन प्रतीयमानमुपमानोपमेयभावमनादृत्य दृष्टान्तोदाहरणनिदर्शनरूपाः शब्दाः कविना न प्रयोक्तव्याः। पौनरुक्त्यापत्तेः। दृष्टोऽन्तो निश्चयो यत्रेति। क्रमेण यथा—

त्वमसि रिपुनराधिनाथमाथ-
प्रकटभुजार्गलविक्रमो नृसिंहः।
मदकरटिकठोरकुम्भपीठी
दलनदुरन्तनखांकुरो मृगेन्द्रः॥

अपि सहजमनोहरं कवित्वं
भवति नृसिंहगुणान्वितं मनोज्ञम्।

अङ्कुचकलशसङ्गतं तरुण्याः
कलयति मौक्तिकदाम दुर्भगत्वम् ॥

व्या०—एवं शुद्धसामान्यनिर्देशेन प्रतिवस्तूपमामुक्त्वा सम्प्रति बिम्बप्रतिबिम्बभावेन वाक्यभेदाश्रितं दृष्टान्तमाह— **बिम्बेति** । न केवलं धर्मिणोः किं तु धर्मस्यापि बिम्बप्रतिबिम्बभावेन निर्देशो यत्र स दृष्टान्तः । स च पूर्ववत् साधर्म्यवैधर्म्याभ्यां द्विविध इत्यर्थः । दृष्टान्तादिवाचकप्रयोगे तु नायमलङ्कार इत्याह— **अत्रेति** । भिन्नयोरेव वस्तुनोरत्यन्तसदृशयोरुभयत्र पृथङ् निर्देशो बिम्बप्रतिबिम्बभावः । सञ्ज्ञां व्युत्पादयति— **दृष्ट इति** । दार्ष्टान्तिके सन्दिग्धस्यार्थस्यात्र निश्चयदर्शनादयं दृष्टान्त इत्यर्थः । **त्वमित्यादि** । अत्रारिमथनकरिमथनयोर्भुजनखरयोश्च बिम्बप्रतिबिम्बभावः । **अपीति** । अत्र नृसिंहगुणाङ्कितत्वकुचकलशसङ्गतत्वयोर्बिम्बप्रतिबिम्बभावः ॥

(इति) दृष्टान्तः ॥

मू०—प्रतिबिम्बनस्य करणं सम्भवता यत्र वस्तुयोगेन ।
गम्यमसम्भवता वा निदर्शना सा द्विधाभिमता ॥१९॥

पूर्वत्र प्रतिबिम्बनस्य प्रक्रान्तत्वादिहैव लक्षणमुचितमेतस्याः । वस्तुयोगेन वस्तुसम्बन्धेन । द्विधा सम्भवद्वस्तुसम्बन्धा, असम्भवद्वस्तुसम्बन्धा च । क्रमेण यथा—

यद्प्येकाकिन्यो यदपि रमणीया युवतय-
स्तथापि स्वच्छाश्चेद्दधति जगति श्लाघनधुराम् ।
इहार्थे प्रामाण्यप्रकटनपरा कीर्तिरनिशं
भुजङ्गानां लोके चरति नरसिंह क्षितिपते ॥

अत्र स्वच्छत्वाद्भुजङ्गलोकं भ्रमन्त्याः कीर्त्तेरुक्तार्थप्रामाण्यप्रकटनपरत्वेन सम्बन्धः प्रतिबिम्बनमाक्षिपति ।

दृप्यद्दुर्वारवैरिक्षितिपतिवनितालोचनाम्भोरुहेन्दुः
क्रीडासौधं कलानां जगति गजगतिर्नन्दतु श्रीनृसिंहः ।
यत् कीर्तिक्रोडलीलं कलयति गगनं क्षीरनीराकरान्त-
र्निद्राणस्य स्रवन्तीसहचरदुहितुः प्राणनाथस्य लीलाम् ॥

अत्र भगवतः श्रीकृष्णस्य लीलया सम्बन्धः कथमपि गगनस्य न सम्भवतीति लीलामिव लीलामवगमयति । एषा पदार्थवृत्तिरुदाहृता । वाक्यार्थवृत्तिर्यथा—

वीरनरसिंहतेजः स्तुतिवर्त्मनि यः प्रणेतुमभिलषति ।
अभिनवकमलकलाचीकुहरे विनिवेशयेत् स वडवाग्निम् ॥

अत्र दृष्टान्तालङ्कार इति चेन्न । परस्परनिरपेक्षवाक्यार्थगतत्वेन तस्य प्रगल्भमानत्वात् । अत्र पुनः परस्परसापेक्षत्वं वाक्यार्थयोरिति निदर्शनेनैव भवितु मर्हति । इयं पुनः प्राकरणिकधर्मस्याप्राकरणिकगतत्वेनासम्भवे निरचायि चिरन्तनैः । वस्तुतस्तु विपर्ययेऽपि सम्भवति । उभयथापि सम्बन्धानुपपत्तेः समानत्वात् । क्रमेण यथा—

या चण्डांशुमयूखमण्डलमहाहङ्कारसर्वङ्कषा
ख्याता वीर नृसिंह देव जगति प्रौढिः प्रतापस्य ते ।
त्वद्धाटी-चकिताः पलाय्य विपिने वासं पराः कोटयः
कुर्वन्तोऽनुभवन्ति सन्ततमिमां दावानले विद्विषः ॥

अत्र प्रतापः प्रकृतस्तद्धर्मस्य प्रौढेरप्रकृते दावानले कुतः सम्भवः इत्युपमानोपमेय भावः प्रतीयते ।

यः कैलासनिवासधूर्जटिजटाकोटीरतारापति-
ज्योत्स्नाचुम्बितसिद्धसिन्धुलहरीगर्भेऽपि विभ्रमः ।
उद्वेलाम्बरचूडकालिमकथानिर्मन्थनोत्कन्धरः
सोऽयं वीर नृसिंह देव नृपते त्वत्कीर्त्तिषु प्रेक्ष्यते ॥

अत्र सिद्धसिन्धुलहरीगर्भेऽपि योऽप्रकृतास्तद्धर्मस्य विभ्रमस्य प्रकृतासु किर्त्तिषु असम्भवादौपम्यस् गम्यम् ॥

व्या०—अथ बिम्बप्रतिबिम्बभावे वाक्यभेदेन दृष्टान्तमुक्त्वा तदभेदेन निदर्शनां दर्शयति— प्रतिबिम्बनस्येति । यत्र वस्तुसम्बन्धेन प्रतिबिम्बनं गम्यते सा निदर्शना । सा च सम्भवद्वस्तुसम्बन्धाऽसम्भवद्वस्तुसम्बन्धा चेति द्विविधेत्यर्थः । सङ्गतिमाह— पूर्वत्रेति । सम्भवन् बाधरहितः सन्नेव वस्तुसम्बन्धः स्वसामर्थ्यात् प्रतिबिम्बनं कल्पयति यत्र सा सम्भवद्वस्तुसम्बन्धा । यत्र त्वसम्भवन् बाधितः सन्ननुपपत्त्या प्रतिबिम्बनमाक्षिपति सा त्वसम्भवद्वस्तुसम्बन्धेत्यर्थः । यदपीति । इहार्थे स्वच्छानां सर्वत्र श्लाघ्यस्वरूपार्थे । भुजङ्गाः सर्पा विटाश्च । सम्भवद्वस्तुसम्बन्धत्वं दर्शयति । अत्रेति । प्रामाण्यप्रकटन परत्वं तेन सम्बन्धः सम्भवन्नेवेति शेषः । कारीषोऽग्निरध्यापयतीतिवत् तत्समर्थाचरणरूपतया सम्भवात् । प्रतिबिम्बनमाक्षिपतीति । कीर्ति पतिव्रतयोरिति भावः । दृप्यदित्यादि । स्पष्टम् । वीरेति । कलाची पात्रविशेषः । अत्र यदेतत्तेजःस्तुतिकरणं तत् कमलक्रोडे वडवाग्निनिवेशमिति सामानाधिकरण्येन सम्बन्धः प्रतीयते । स च

विरोधादसम्भवंस्तद्वद्दुष्करमिति वाक्यार्थयोः प्रतिबिम्बनमाक्षिपतीति वाक्यार्थ वृत्तिरियं निदर्शनेति भावः । उदाहृतभेदेऽस्य दृष्टान्तादभेदमाशङ्कते— अत्रेति । परिहरति— नेति । भेदक्रमाह— परस्परेति । यत्र परस्परनिरपेक्षार्थत्वेन वाक्यार्थभेदस्तत्र दृष्टान्तः । यत्र सापेक्षार्थत्वेन विध्यर्थवादयोरिव वाक्ययोरेकवाक्यता तत्र निदर्शनेति भेदः । सापेक्षत्वं चोक्तरीत्या वाक्यार्थे वाक्यार्थसमारोपादिति भावः । एवं पूर्वाचार्यानुसारादुपमानधर्मस्योपमेयेऽसम्भवादियं निदर्शनोक्ता । वस्तुतस्तु उपमेयधर्मस्योपमानेऽसम्भवादपीयं सम्भवतीत्याह— इयं पुनरिति । तत्राद्यभेदः प्रागुदाहृतोऽपि स्फुटार्थं पुनरुदाह्रियत इत्याशयेनाह— क्रमेणेति । येति । सर्वं कषतीति सर्वंकषा । 'सर्वकूलाभ्रकरीषेषु कषः' इति खच् प्रत्यये मुमागमः । कोटेः परं परः कोटयः; अपरिमिता इत्यर्थः । 'पञ्चमी' इति योगविभागात् समासः । राजदन्तादित्वात् कोटेः परनिपातः । पारस्करादित्वात् सुडागमः । शेषं सुगमम् ॥

इति निदर्शना ॥

मू०—उपमानादुपमेयं यत्राधिक्यस्य गोचरीभवति ।
सति भेदप्राधान्ये व्यतिरेकोऽयं समाख्यातः ॥ २० ॥

भेदो वैलक्षण्यम् ।

पवित्रसद्गोत्रमुदीरयन्ति
त्वामुत्कलाधीश बिडौजसं च ।
इयान् विशेषो युवयोर्यदेष
नापारिजातस्त्वमपारिजातः ॥

अत्र श्लेषप्रतिभोत्थापितदीपकानुप्राणितो व्यतिरेकः ॥

श्रीमन्नुत्कलभूमिपाल भवतो दानाम्बुकल्लोलिनी
मेतां पूरपवित्रितावनितलां दृष्ट्वापगानां पतिः ।
शिप्रां नेच्छति नर्मदां न मनुते गोदावरीं नेक्षते
कालिन्दीं न धिनोति सिद्धतटिनीं नाश्लिष्यति प्रागिव ॥

अत्रेतराभ्यो दानाम्बुकल्लोलिनी सौभाग्येन विशिष्यत इति व्यतिरेकः ॥

व्या०— अथौपम्यगर्भेष्वेव भेदप्राधान्यात् व्यतिरेकं लक्षयति– **उपमानादिति** । अत्रोपमानादुपमेयस्याधिक्ये अल्पत्वे वा द्वेधा व्यतिरेकः इत्यलङ्कारसर्वस्वकारः । तत्राद्यभेदे न विवादः । द्वितीये तु

'क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम् ।
विरमप्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥'

इत्येतदुदाहृत्य चन्द्रादुपमानादुपमेयस्य यौवनस्ययातस्यानि वर्तित्वादल्पत्वमिति व्याख्यातं तत् काव्यप्रकाशकारेणास्थैर्यस्यानिवर्तित्वमाधिक्यमेव नाल्पत्वमित्येकत्वमेव न द्वैधमिति प्रत्याख्यातम् । न चान्यदस्योदाहरणं दृश्यते युज्यते वा तस्मात्तन्मतेनैव स्वयमप्याह– **आधिक्यस्येति** । यत्रोपमानादुपमेयस्याधिक्यं भेदप्राधान्येन कथ्यते स व्यतिरेक इत्यर्थः । आधिक्यं चोपमेयस्योत्कर्षहेतावुपमानस्यापकर्षहेतौ च सति सम्भवे तत्र द्वयोर्हेत्वोरुक्तो एकैकोक्तौ च चत्वारोऽस्य भेदाः । ते पुनरिवादिशब्दप्रयोगात् सदृशादिशब्दप्रयोगादर्थाक्षेपाच्च शाब्दत्वार्थत्वाक्षिप्तत्वैः सादृश्यत्रैविध्येन त्रैविध्ये द्वादशभेदाः । ते च श्लेषाश्लेषाभ्यां द्वेधेत्येवं चतुर्विंशतिरस्य भेदाः ।

तत्र दिङ्मात्रमुदाहरति– **पवित्रेति** । पवित्रं पावनं सच्छोभनं गोत्रं कुलं नाम वा यस्य तम् । अन्यत्र पवेर्वज्रात् त्रसन्तस्त्रस्यन्तो गोत्रा अद्रयो यस्य तम् । 'गोत्रं नामकुलाद्रिषु' इति विश्वः । एष बिडौजा अपगत-पारिजातं यस्य सोऽपारिजातः निःसपत्नो न नित्यमसुरोपद्रुतत्वात् । त्वं पारिजात इत्युपमानादाधिक्यमुपमेयस्य । अपारिजातः पारिजातरहितो नेति च प्रतीयते । अयं च द्वयोर्हेत्वोरुक्तावाक्षिप्तसादृश्यः श्लेषाश्रितो भेदः । स च पवित्रेत्यादिप्रकृताप्रकृतसमानधर्मस्यावाक्यगतत्वाद्दीपकभेदेनापि सङ्कीर्ण इत्याशयेनाह– **अत्र श्लेषेति** । **श्रीमन्नित्यादि** । अयं तु द्वयोरनुक्ता-वाक्षिप्तसादृश्योऽश्लेषाश्रितः । इतगनादरकरणादाधिक्यं प्रतीयत इत्याह– **अत्रेति** ॥

(इति) व्यतिरेकः ॥

मू०—प्राधान्येन निबद्धं यद्युपमानोपमेययोरेकम् ।
अन्यत् सहार्थसहितं भवति सहोक्तिस्तदा ख्यता ॥२१॥

यथा–

संग्रामाङ्गणभूषणस्य भवतः कर्णावतंसीभव-
ज्यावल्लीवलयोद्धुरेण धनुषा मुक्तैः समं मार्गणैः ।
एतैस्तैः प्रतिमल्लभूमिपतिभिः स्पर्धानुबन्धादिव
श्रीमन् वीर नृसिंह देव सहसा दिक्चक्रमुल्लङ्घितम् ॥

अत्र मार्गणानां प्रतिमल्लपलायनं प्रति निमित्ततामातन्वतामपि समसमयत्वेनोपनिबन्धः । रिपुगतदिक्चक्रलङ्घनं शाब्दं बाणगतं तु सहार्थसामर्थ्यात् प्रतीयते ।

श्लेषभित्तिकाध्यवसायमूला यथा–

रणे वीरनृसिंहस्य सिंहनादेन तर्जिताः ।
मदं मुञ्चन्ति मातङ्गैः सहैव परिपन्थिनः ॥

अत्र मदयोर्भेदेऽप्यभेदः ॥

व्या०— अथ भेदप्राधान्येनैव सहोक्तिं लक्षयति– **प्राधान्येति** । इहोभयोः प्रकृतत्वात् उपमानोपमेयभावो वैवक्षिकः । तत्र सहार्थनिर्दिष्टस्य अप्राधान्यादुपमानत्वमर्थादितरस्य प्राधान्यादुपमेयत्वम् । यत्रोपमानोपमेययोरेकस्य शाब्दः क्रियासम्बन्ध इतरस्य सहार्थनिर्देशाद्गम्यः सा सहोक्तिरित्यर्थः । सा च नियमेनातिशयोक्तिमूला सती कार्यकारणपौर्वापर्ययरूपातिशयोक्तिमूला श्लेषाभित्तिकाभेदाध्यवसायमूला चेति द्विधा । तत्राद्यमुदाहरति– **संग्रामेति** । अत्र मूलभूतामतिशयोक्तिं तावद्दर्शयति– **अत्रेति** । लक्षणार्थं च योजयति– **रिपुगतेति** । रिपूणां क्रियासम्बन्धः शाब्दः । अत एव तेषां प्राधान्यम् । बाणानां तु सहार्थसामर्थ्यगम्य इत्यप्राधान्यम् । "सहयुक्तेऽप्रधाने" इति अप्राधान्ये तृतीयाविधानादिति भावः । अयं चात्र गुणप्रधानभावः शाब्द एव । वस्तुतस्तु कालोपलक्षणत्वादुभयेषां समप्राधान्यमेव दिक्चक्रोल्लङ्घने शाखाप्रस्तरयोरिव प्रहरणे । यया सह शाखया प्रस्तरं प्रहरतीत्यत्र प्रस्तर-प्रहरणस्य प्रक्षेपात्मनः कृष्णविषाणप्रासनवत् उपयुक्तसंस्कारस्य प्रतिपत्तिकर्मत्वेन हविरासादनादिप्रयुक्तप्रस्तरवदेव वत्सापाकरणादिप्रयुक्तशाखायामपि विनियुक्त-विनियोगप्रसङ्गेनाप्रयोजकत्वात् प्रस्तरवच्छाखाया अपि तत्र प्राधान्यमेव नाङ्गत्वमिति निर्णीतं चतुर्थषष्ठयोः तृतीयेऽङ्गत्वं चोक्तमिति चेन्नैष दोषः । तत्र हि सूक्तवाक्येन प्रस्तरं प्रहरतीत्यत्र तृतीया श्रुत्या सूक्तवाक्यस्य साधन-त्वावगमान्मान्त्रवर्णिकदेवतासम्बन्धेन निर्वापालम्बनादिवद्याजिकल्पनायां प्रह-

रणोपलक्षितेष्टदेवतानमस्कारार्थे होमे प्रस्तरस्याङ्गमुक्तम् । इह तु प्रहरणमात्रे प्रस्तरस्यापि प्राधान्यमेवेत्यविरोधः । यत्र न सहार्थनिर्देशः कालोपलक्षकस्तत्र वास्तवोऽपि गुणप्रधानभावोऽस्ति । यथा शतेन राजराजपुत्रैः सहाध्वर्युः, सहालङ्कारैर्गौर्देयेत्यादौ राजपुत्रगुणकत्वमध्वर्योरलङ्कारगुणकत्वं गोश्चेति । ततः शाखाप्रस्तरयोरिव शस्त्रशात्रवयोरपि शाब्द एव गुणप्रधानभाव इति सिद्धम् । द्वितीयामुदाहरति- रण इति । मदयोरिति । दानाहङ्कारयोः इत्यर्थः । अन्यत् सर्वं पूर्ववत् ॥

(इति) सहोक्तिः ॥

मू०—ब्रूमोऽधुना सहोक्तिप्रतिभटभूतं विनोक्त्यलङ्कारम् ।
एकेन विना किञ्चिद्यत्रान्यत् स्यात् सतोऽसतो यद्वा ॥२२॥

सतः शोभनादन्यदशोभनम् । असतोऽशोभनादन्यच्छोभनम् ।

क्रमेण यथा-

न त्वद्वैरिवधूवक्त्रं विना कान्त्या विराजते ।
चोत्स्नया न विना चन्द्रमण्डलं क्षितिमण्डन ॥

विना पद्माकरो ग्राहैश्चन्दनं भुजगैर्विना ।
विना भाति खलैर्वीर नृसिंह भवतः सभा ॥

व्या०— विनोक्तेः सङ्गतिमाह- ब्रूम इति । लक्षणमाह- एकेनेति । यत्र केनचिद्विना कस्यचिदशोभनत्वं शोभनत्वं सा विनोक्तिर्द्विधा इत्यर्थः । अत्र शोभनत्वाशोभनत्वनिवृत्त्योरन्यवृत्तिनिमित्तत्वस्यापनाय

तदन्यथाकथनम् । नेति । अत्र कान्तिज्योत्स्नयोर्विनाभावाद्वैरिवर्ग (वैरिवधूवक्त्र) चन्द्रमण्डलयोर्न विराजत इत्यशोभनत्वं शोभनत्वनिवृत्तिरुक्ता । विना इति । अत्र ग्राहादिविनाभावात् पद्माकरादीनां भातीति शोभनत्वमशोभनत्वनिवृत्तिः उक्ता ॥

(इति) विनोक्तिः ॥

मू०—साधारणधर्मवशाद्गम्येनाप्रस्तुतेन चारुत्वम् ।
प्रस्तुतमुपैति वाच्यं तस्यामेषा समासोक्तिः ॥२३॥

व्यङ्ग्येऽपि रूपके प्रस्तुतोपरञ्जकत्वमेवाप्रस्तुतस्य । यत्रारोप्यमाणपदार्थत्वेनारोपविषयस्य प्रतिभासमानादप्राधान्यं तत्र परिणामः । यत्र पुनरारोप्यमाणपदार्थधर्मविशिष्टत्वेन प्रतिभासनादारोपविषयस्य प्राधान्यं तत्रेयम् । अतस्तु(अतः) प्रस्तुताद्वाच्यादप्रस्तुतस्य प्रतीयमानत्वे संक्षेपणार्थयोः कथनमित्यन्वर्था समासोक्तिः । निमित्तमन्तरेण प्रस्तुतादप्रस्तुतस्य गम्यत्वेऽतिप्रसङ्गः स्यादित्यत्र निमित्तं साधारणो धर्मः । स द्वेधा गुणः क्रिया च ।

गुणो यथा

गुणप्रणयिनी मुष्टिग्राह्यमध्या सुवंशजा ।
नरसिंहधनुर्वल्ली करोति भवतो मुदम् ॥

अत्र श्लेषोपपादितस्य गुणप्रणयित्वादिगुणरूपस्य धर्मस्य साधारणत्ववशादपरित्यक्तस्वरूपायाया एव धनुर्वल्ल्याः स्त्रीत्वधर्मविशिष्टत्वप्रतीतिः ।

यथा वा

विशालवलभीभुजान् लघुविशीर्णवृत्तगुण-
प्रतानवसनश्रियः स्फुटसुधाविलासस्मितान् ।
नृसिंह वसुधाधिप त्वदरिवीरलीलागृहान्
विशङ्कमुपगूहते विपिनपावकज्वालिका ॥

अत्र वलभी भुजेव, वलभीम भुजेत्याद्युपमासमाससामर्थ्यो-पजातगुणसाधारणत्वमाहात्म्याद्गृहाणां पावकज्वालायाश्च नायकता-ख्यधर्मविशिष्टत्वप्रतीतिः ।

व्या०— अथ विशेषणविच्छित्त्याश्रयणेनालङ्कारद्वयमुच्यते । तत्र औपम्यगर्भत्वसाम्याद्विनोक्त्यनन्तरं समासोक्तिमाह— साधारणेति । यत्र प्रस्तुतविशेषणसाम्यादप्रस्तुतं गम्यते सा समासोक्तिरित्यर्थः । नन्वेतदेकदेश-विवर्तिरूपकेऽतिव्याप्तमाशङ्क्य(मित्याशङ्क्य) ततो भेदमाह— व्यङ्ग्येऽपि रूपक इति । व्यङ्ग्यरूपकेऽपीत्यपेरन्वयः । एकदेशविवर्तिरूपक इत्यर्थः । तस्य एकदेशविवर्तमानस्यैकदेशान्तरे व्यङ्ग्यत्वादित्युपरञ्जकत्वं रूपकत्वं स्वेन रूपेण पररूपाच्छादकत्वमिति यावत् । एकदेशे तूपरञ्जकत्वेन प्रक्रान्तत्वादेक-देशान्तरमप्युपरञ्जकं नैव व्यज्यते । समासोक्तौ तु विशेषणमात्रव्यङ्ग्यत्वात् अप्रस्तुतस्य प्रस्तुतावच्छेदकत्वमात्रं न तूपरञ्जकत्वमिति भेद इत्यर्थः । तर्हि रूपकपरिणामयोः को भेदस्तत्राह— यत्रेति । अप्रस्तुतस्य स्वतादात्म्येन प्रस्तुतोपयोगित्वं परिणामे, नोपरञ्जकत्वमित्यर्थः । तदुभयविविक्तं समासोक्तेः स्वरूपमाह— यत्र पुनरिति । विशेषणसाम्यमात्रगम्यत्वेन रूपसमारोपा-योगादप्रस्तुतस्य विषयावच्छेदकत्वमात्रं न तु तादात्म्येनावच्छेदकत्वमेवेति सर्वालङ्कारोत्तीर्णेयं समासोक्तिरित्यर्थः । संज्ञां व्युत्पादयति— अत इति ।

कथनं प्रतिपादनम् । तेनोभयोरवाच्यत्वेऽप्यदोषः । अत्र विशेषणं गमक-मित्युक्तम्; कीदृशस्य तस्य गमकत्वम् ? कस्य वा विशेषणत्वम् ? कतिविधं वेत्यपेक्षायामाह– **निमित्तमिति । गुणेति** । गुणो मौर्वी रूपलावण्यादिश्च । मध्यो लस्तकः, अवलग्नं च । वंशो वेणुरन्वयश्च । अत्र को गुणः कथं च तस्य साधारण्यं तद् दर्शयन् लक्ष्ये लक्षणं पातयति– **अत्रेति । साधारणत्व-वशादिति** । श्लेषमूलाभेदाध्यवसायवशादित्यर्थः । अत्र व्यवहारसमारोपो न रूपसमारोप इति यदुक्तं तद् व्यनक्ति– **अपरित्यक्तेति** । इह त्रयी विशेषण-गतिः– श्लिष्टमौपम्यगर्भं साधारणं चेति । तत्राद्यमुक्तम् । द्वितीयमाह– **विशालेति** । लूता तन्तुवायकीटः । तस्या गुणप्रतानः तन्तुवितानः । सुधा लेपद्रव्यविशेषः । अत्रापि विशेषणस्य साधारण्यमापादयन् लक्षणं योजयति– **अत्रेति** । वलभी भुजेवेत्युपमितसमासः । वलभीवत् भुजेति मयूरव्यंसकादिः । एवं लूता गुणप्रतानो वसनश्रीरिव, सुधा विलासस्मित-मिवेत्यादि योज्यते । उक्तसमासद्वयविवक्षयाह– **उपमासमासेति** । गुणो विशालभुजत्वादिः । तस्य साधारणत्वमभेदाध्यवसायादिति भावः । नायकयोर्भावो नायकता । तदाख्यधर्मविशिष्टप्रतीतिरित्यनेन व्यवहारसमारोप एवायं न रूपसमारोप इति सूचितम् ॥

मू०—क्रिया यथा–

विश्राणनैस्तैः परिभूयमानः
कल्पद्रुमो वीर कलिङ्गनाथ ।
लतोपगूढोऽपि न भृङ्गनादै-
राभापते न स्मयते च पुष्पैः ॥

अत्राभाषणादिक्रियारूपधर्मसाधारण्याल्लताकल्पद्रुमयोर्नायकत्व-प्रतीतिः ।

धात्रीं वीर नृसिंह देव भवतः श्रुत्वा वनान्तं भिया
यान्तीनां रभसादरातिसुदृशां शाखाभुजैः शाखिनः ।
आकर्षन्ति कचान् हरन्ति सिचयं मृद्नन्ति गण्डस्थलीः
श्लिष्यन्ति स्तनयोः स्पृशन्ति जघने गृह्णन्ति कण्ठे मुहुः ॥

अत्र शाखाभुजैरित्युपमारूपकसन्देहसङ्करसमासोत्थापिता समासोक्तिः ।

रूपकगर्भत्वे पुनः समासान्तराश्रयणात् साधारणधर्मत्वं सम्भवदपि न समासोक्तेर्गोचरः । एकदेशविवर्तिरूपकमुखेनैवार्थान्तरस्य व्यज्यमानत्वेनास्याः कैमर्थ्यप्रसङ्गात् ।

धावन्तीर्नरसिंह देव रभसाद्वीक्ष्य प्रसूनेक्षणै-
स्तासां बाहुलतासहोदरतया वात्सल्यनिघ्ना इव ।
आहारोऽस्तु फलैरिति प्रतिवनं पादे लगन्त्यो लता
याचन्ते त्वदरातिराजरमणीः पुष्पन्धयानां रुतैः ॥

अत्र विलोकनानुगुण्यात् पुष्पाणां नयनत्वेन रूपणसिद्धौ लतानां सखीत्वरूपणं प्रतीतिपथमवतरदुत्प्रेक्षाया निमित्ततामातनुते ।

विधुरीकुर्वन् कबरीं लुम्पन् मकरीं विस्रंसयन् हारम् ।
वीर विरोधिमृगीदृशि खेलति कामीव ते खड्गः ॥

अत्र विधुरीकरणादिसाधारणधर्मसामर्थ्यादेवाप्रस्तुतस्य कामिनः प्रतीयमानत्वादुपमायाः पौनरुक्त्यमिति समासोक्तिविषय उपमा न कार्या । तस्मात् 'हम्मीरमानमर्दन खेलति खड्गस्तवारिनारीषु' इति पाठः परिणमयितव्यः ॥

व्या० — क्रियेति । स्पष्टम् । औपम्यगर्भविशेषणे यत्रोपमासमासः तत्र समासोक्तिरित्युक्तम् । यत्रोपमारूपकसमाससङ्करस्तत्रापि समासोक्तिरस्तीत्याह- **धाटीमिति** । विनापि विनाभूयेत्यर्थः । सिचयं वस्त्रम् । सङ्करं दर्शयति- **अत्रेति** । उभयथाऽप्याकर्षणादिक्रियानिर्वाहात् सन्देहः । यत्र पुना रूपक-निश्चयः न तत्र समासोक्तेरवकाश इत्याह- **रूपकगर्भत्वेनेति** । कैमर्थ्यम् वैयर्थ्यम् । **धावन्तीरित्यादि** । सहोदरता सादृश्यमेकोदरता च । वात्सल्यनिघ्नाः प्रेमपरतन्त्रा इत्यर्थः । पुष्पाणि धयन्तीति पुष्पन्धयाः भृङ्गाः । 'नाडीमुष्ट्योश्च' इति चकाराद्धेटः खश्प्रत्यये मुमागमः । अत्र लता वात्सल्यनिघ्नाः सत्यो रमणीर्याचन्त इवेति चेतनधर्मः प्रार्थनम् उत्प्रेक्ष्यते । तत्सिद्ध्यर्थमचेतनासु लतासु सखीत्वबुद्धिर्न्याय्या । तत्र निमित्त-तयैकदेशविवर्तिरूपकसमासोक्त्योः प्रसक्तौ रूपकस्य प्राबल्यमाह- **अत्रेत्यादि** । प्रसूनेक्षणैरित्यत्रोक्तसाधकबलात् रूपकसिद्धौ प्रक्रान्तप्राबल्याद्देशान्तरेऽपि तदेव प्रवृत्तं सन्निमित्ततां भजतीति न समासोक्तेरवकाश इत्यर्थः । एवं समसोक्त्येकदेशविवर्तिरूपकयोः समावेशे रूपकं बलीय इत्युक्तम् । उपमासमासोक्तिसमवाये तु समासोक्तिरेव बलीयसीति दर्शयन् साधा-रणविशेषणाश्रितां समासोक्तिं चोदाहरति- **विधुरिति** । विधुरीकुर्वन् विरहितं कुर्वन्, कबरीं केशपाशम् । 'जानपद॰' इत्यादिना ङीष् । विसूत्रयन् विच्छिन्दन् । ननु कामीवेत्युपमैवेयं न समासोक्तिरित्याशङ्क्य सत्यं तां वराकीं बाध्यतयोपस्थापितां निष्कासयाम इत्याह- **अत्रेति** । तथापि कुतः समासोक्तिरत आह- **तस्मादिति** । अस्याः प्रपञ्चस्त्वलङ्कार-सर्वस्वे द्रष्टव्यः ॥

(इति) समासोक्तिः ॥

सू०—विलसति विशेषणानां प्रतीयमानार्थगर्भता यत्र ।
सहृदयहृदयाह्लादी परिकरनामा स निर्दिष्टः ॥२४॥

नरसिंहनरेन्द्रेण नन्दनद्रुमबाहुना ।
धनेशांशावतारेण धन्याः के नार्थिनः कृताः ॥

व्या—विशेषणविच्छित्तिसाम्यात् समासोक्त्यनन्तरं परिकरं लक्षयति—**विलसतीति** । प्रतीयमानार्थगर्भतार्थान्तरप्रत्यायकत्वमित्यर्थः । साभिप्रायविशेषणत्वं परिकर इत्यर्थः । समासोक्तौ प्रस्तुतविशेषणानां साधारण्यात् अप्रस्तुतविशेष्यगमकत्वं; परिकरे तु प्रस्तुतगतविशेषप्रत्यायनेन तदुपस्कारकत्वमिति भेदः । **नरसिंहेति** । अत्र कल्पद्रुमादप्युदारः कुबेरादप्याढ्य इति विशेषणाभिप्रायः ॥

(इति) परिकरः ॥

सू०—तादृक् किमपि विशेष्यं साभिप्रायत्वमश्नुते यत्र ।
स परिकरांकुरनामालङ्कारः कीर्तितः कविभिः ॥२५॥

परिकरवैपरीत्येनास्य प्रवृत्तेरिहाभिधानम् ।

नरसिंह महिपाल कीर्तिस्त्रिपथगा तव ।
न कस्य भविता श्लाघ्या पुनाना भुवनत्रयम् ॥

अत्र त्रिपथगेति त्रिभुवनपवित्रीकरणायोपपत्तिरूपमभिप्रायमभिव्यञ्जयन् वाच्योन्मुखीभवतीति नायं ध्वनेर्विषयः । क्वचित् पुनः प्रसिद्धत्वात् विशेष्यमतथाभूतं प्रयुक्तमपि तथाभूतमभिप्राय-

मभिप्रायमभिव्यनक्ति । यथा-

नाथः काकोदराणां कथयति लिखति क्ष्मापतिः कार्तवीर्यो
मेलानन्दो जलानां निधिरचलपतिर्लेखनी व्योम पत्रम् ।
संख्यादूरे परार्धाद्यदि भवति पुनः किं च वैरिञ्चमायुः
संख्येयत्वं तदानीं दधति तव गुणाः श्रीनृसिंह क्षितीन्द्र ।।

अत्र काकोदरनाथादीनि विशेष्याणि सहस्रमुखत्वादिरूपमभिप्राय-मभिव्यञ्जयन्ति ।।

व्या० —विशेषणविच्छित्याश्रयणादलङ्कारद्वयमभ्यधायि । अथ विशेष्यविच्छित्याश्रयणादेकमलङ्कारं परिकरांकुरनामानं लक्षयति- **तादृक्** तथाहृद्यमित्यर्थः । साभिप्रायविशेष्यत्वं परिकरांकुर इत्यर्थः । सङ्गतिमाह- **परिकरेति** । **नरसिंहेति** । विशेष्यस्य साभिप्रायत्वं विवृणोति- **अत्र त्रिपथगेति** । त्रिभिः पथिभिर्गच्छतीति व्युत्पत्त्या योगबलात् त्रिभुवनाभिव्यापकपावनत्वं गम्यते । गङ्गादिशब्दैस्तु नैवमिति भावः । वाच्योन्मुखत्वम् वाच्योपस्कारकत्वम् । अतो न ध्वनिशङ्केत्याह- **इति नायमिति** । क्वचिद्योगमनपेक्ष्य प्रसिद्धेरेव व्यञ्जकत्वमित्याह- **क्वचित्पुनरिति** । अत्र व्यङ्ग्यव्यञ्जने विवृणोति- **अत्रेति** । काकोदरनाथादीनां सहस्रमुखत्वादिरूपेणैव प्रसिद्धत्वादिति भावः ।।

(इति) परिकराङ्कुरः ।।

मू०—यत्र विशेष्यविशेषणसाम्यं स श्लेष एष तु द्वेधा ।
किं चास्मिन् वाच्यत्वं विशेष्ययोस्तुल्ययोरेव ।।२६।।

नायं समासोक्तिः विशेषणमात्रसाम्यस्य तां प्रति प्रयोजकत्वात् । विशेष्यविशेषणसाम्यमधिकृत्य चास्य प्रवृत्तत्वात् । नाप्ययं तुल्ययोगिता । विशेष्यगतश्लिष्टत्वस्य तस्यामभावात् । अयं तुल्ययोरेवेति वचनसामर्थ्यात् प्राकरणिकयोरेव वा, अप्राकरणिकयोरेव वा, अभिधेयत्वेन भवन् न द्वैविध्यमतिक्रामति । क्रमेण यथा–

कन्दर्पोदयमाश्रयद्भिरलसैः कान्तारसम्प्रापितैः
शश्वत्सानुचरैः प्रभूतकनकोत्तुङ्गक्षयैर्भूषितैः ।
राजन् वीर नृसिंह देव भवतोमित्रैः समस्तैरपि
प्राप्यन्ते ननु चित्रमत्र युगपत्तास्ताः पराभूतयः ॥

अत्र त्यागशौर्ययोर्वर्ण्यमानत्वान्मित्रामित्राणां प्राकरणिकत्वम् ।

निजकरकलितस्याहं काष्ठाश्लेषोपनीतमाहात्म्यम् ।
हम्मीरमानमर्दन भवतस्तेजो विभावसुं जयति ॥

अत्र विभावसुशब्दवाच्ययोर्दहनतपनयोरुपमानत्वादप्राकरणिकत्वम् ।

व्या०—विशेषणमात्रविच्छित्त्या समासोक्तिपरिकरावुक्तौ विशेष्यमात्रविच्छित्त्या परिकरांकुरालङ्कारः । अथोभयविच्छित्त्याश्रयणेन श्लेषमाह– **विशेषणेत्यादि** । विशेषणविशेष्यनिष्ठं शब्दमात्रसाधर्म्यं श्लेषः । स केवलप्रकृतगोचरः केवलाप्रकृतगोचरश्चेति द्विविध इत्यर्थः । उभयगोचरस्तृतीयोऽपि भेदोऽस्तीति केचित् । तन्निरासार्थमाह–**किं चेति** । यतस्तुल्ययोरेव विशेष्ययोर्वाच्यत्वं नातुल्ययोरतो द्विविध एवायमित्यर्थः । समासोक्तितुल्ययोगितयोः क्रमेणातिव्याप्तिं निरस्यति– **नायमिति** । द्वितीयार्धं तृतीयभेदनिरासपरत्वेन व्याचष्टे– **अयं तुल्ययोरेवेति** ।

केवलप्रकृतयोः केवलाप्रकृतयोर्वा विशेष्ययोः प्रकृतत्वाप्रकृतत्वयोरविशेषादभिधाया नियन्तुमशक्यत्वात् । वाच्यत्वं सम्भवति । प्रकृताप्रकृतयोस्तु प्रकृतनियन्त्रणादप्रकृतप्रतीतेर्ध्वनित्वेन त्रैविध्यासम्भणात् द्वैविध्यमेवेत्यर्थः । तयोः पृथक्शब्दनिर्देशे तूपमादीपकायलङ्कारान्तरैर्बाध इति भावः । कन्दर्पेति । कन्दर्पोदयं कामोद्रेकमन्यत्र कुत्सितदर्पोद्रेकमित्यर्थः । कान्तारसं कान्तारागमन्यत्र कान्तारं वर्त्मदुर्गमम् । सानुचरै रनुचरसहितैः प्रस्थचरैश्च । कनकैः सुवर्णैर्धुर्धूरैश्च । उत्तुङ्गक्षयैस्तुङ्गभवनैः प्रबलनाशैश्च । भूषितैरलंकृतैर्भुव्युषितैः शयानैश्च । भवतोमित्रैरित्यत्र मित्रैरमित्रैरिति च्छेदः । समस्तैर्मिलितैः समन्ततः क्षिप्तैश्च । परा उत्कृष्टाः भूतयः सम्पदः । अन्यत्र पराभूतयः पराभवाः । अत्र कनवर्जं सर्वत्र शब्दश्लेषः । निजेति । 'बलिहस्तांशवः कराः' इत्यमरः । करेण राजदेयेन बलिना कलिताः स्वाहाः स्वान्यहानि सम्पन्नानि यस्य तत् कलितस्वाहं करदानफलीकृत जीवितकालमन्यत्र हस्तगृहीतस्वाहादेवीकं; तथांशुकृतनिजवासरं च । स्वान्यहानि स्वाहाः । प्रतिमासं दिनकरभेदात् स्वशब्दः । काष्ठाश्लेषः प्रकर्षप्राप्तिरिन्धनसम्बन्धो दिग्व्याप्तिश्च तेनोपनीतमाहात्म्यं प्राप्तप्रभावम् । तेजः प्रतापः । विभावसुमग्निमर्कं च । अयं तु शब्दश्लेष एव ॥

मू०—विशेष्यविशेषणसाम्येन पुनर्यत्र प्रकरणादिना प्रकृतार्थ एव शृङ्खलितायामभिधायामप्रकृतार्थाभिधानाय सामर्थ्यविधुरत्वेऽपि शब्दस्याप्रकृतार्थोऽपि प्रतीतिसरणिमनुसरति तत्र शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यो ध्वनिः । यथा—

हिरण्यकशिपुक्षेत्रदानदर्शितविस्मयः ।
न कस्य श्लाघनीयोऽसि नरसिंह जगत्पते ।

अयं च प्रयत्नादिभेदात् प्रातीतिक एव शब्दान्यत्वे जतुकाष्ठन्यायेन स्वयमेव शब्दयोः श्लिष्टत्वाच्छब्दगतः । अत एवास्य सभङ्गपदत्वम् । यत्र पुनः प्रयत्नादिभेदाभावात् शब्दैक्ये सत्येकनालावलम्बितफलद्वयन्यायेनार्थयोः श्लिष्टत्वं तत्रार्थगतः । अत एवात्राभङ्गपदत्वम् । शब्दपरिवर्तनसहिष्णुत्वमर्थश्लेषस्य विषय इति पुनः काव्यप्रकाशस्य सिद्धान्तः ॥

व्या०— प्रकृताप्रकृतगोचरे तु उभयसाम्ये ध्वनिरेव न श्लेष इति आह– विशेष्येति । ननु विशेष्ययोः पृथङ्निर्देशे विशेषणमात्रसाम्ये प्रकृताप्रकृतश्लेष इत्यन्यैरुक्तं किं नेष्यते । तत्रोपमादीपकाद्यलङ्कारान्तरावरोधे श्लेषस्य प्रतिभासमात्रसारत्वात् । ननु गुणक्रियासाम्यवच्छब्दसाम्यमुपमायां प्रयोजकमपि तूपमाप्रतिभोत्पत्तिहेतुः श्लेष एवायम् अन्यथात्रापि विविक्तविषया-लाभात् सर्वत्रैवास्य बाधः स्यात् ततो निरवकाशत्वात् सर्वालङ्कारापवादोऽय-मित्यलङ्कारसर्वस्वकार इति चेन्न । पूर्वोक्तभेदद्वयेऽस्यावकाश(वत्त्वा)वत्वात् । न च तत्रापि तुल्ययोगिताशङ्कावकाशः । तत्र विशेष्यश्लेषाभावात् । तस्माद् द्विविध एव श्लेष इति सिद्धम् । द्विविधोऽप्ययं पुनः शब्दगतो-ऽर्थगतश्चेति द्विविध इति ब्रुवन्नाद्यं दर्शयति– अयं चेति । प्रातीतिके प्रतीतिसिद्धे न त्वौपपत्तिक इत्यर्थः । यत्र प्रयत्नस्वरादिभेदाद्वस्तुतो भिन्नयोरेव शब्दयोः मिथः संश्लेषभेदाज्जतुकाष्ठवदेकत्वेनावभासः शब्दश्लेष इत्यर्थः । अत एवेति । शब्दभेदादेवेत्यर्थः । सभङ्गपदत्वमर्थावभासवेलायामिति शेषः । द्वितीयं निरूपयति– यत्र पुनरिति । यद्यप्यर्थभेदाच्छब्दभेद इति दर्शने प्रत्यर्थं शब्दभेदस्तथापि तस्यो(स्यौ)त्पत्तिकत्वात् प्रत्यर्थं शब्दभेदो ज्ञाप्यत इत्युपपत्तिगम्यत्वादभेदस्य तु प्रतीतिसिद्धस्य दुरपह्नवत्वाच्छब्दैक्यमेव युक्तमित्यभिप्रेत्याह– शब्दैक्ये सतीति । अत एव शब्दैक्यादेवेत्यर्थः ।

यत्रैकवृन्तफलद्वयवदखण्डैकशब्दे अर्थद्वयसंश्लेषः सोऽर्थश्लेष इत्यर्थः ॥ इह अलङ्कार्यालङ्कारभावो लोकगम्यः । यथा लोके कण्ठगतः कण्ठालङ्कारः, कर्णगतः कर्णालङ्कारः, इत्यादिव्यपदेशस्तथा शब्दगतः शब्दालङ्कारोऽर्थगतोऽर्थालङ्कार इत्युभयश्लेषः । स उभयोऽप्यर्थश्लेषद्वारसङ्गत्यार्थालङ्कारप्रस्ताव एव अलङ्कारसर्वस्वकारमतेनात्र निरूपितः । काव्यप्रकाशकारेण त्वलङ्कार्यालङ्कारभावस्यान्वयव्यतिरेकावसेयत्वात् भास्वत्करेत्यादावभङ्गपदत्वेऽपि भास्वरहस्तसूर्यकिरणरूपार्थद्वयस्य भास्करशब्दान्वयव्यतिरेकानुविधानाच्छब्दाश्रयत्वात् शब्दश्लेष एवेति द्वितीयोऽपि शब्दालङ्कारप्रस्तावे निरूपितः । तर्हि तन्मते कोऽर्थश्लेषस्य विषयः ? अत आह— शब्दपरिवर्तनेति । यथाह । 'अर्थश्लेषस्य स विषयो यत्र शब्दपरिवर्तनेऽपि न श्लेषत्वखण्डना' इति । यत्र शब्दान्वयव्यतिरेकानुविधानं विनैवार्थयोः स्वमहिम्नैव श्लिष्टत्वं सोऽर्थश्लेष इत्यर्थः । यथोदाहृतं तत्रैव ।

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥

इत्यत्रोन्नमनावनमनयोरौद्धत्यानौद्धत्ययोश्चार्थयोस्तुलाखलवर्तिनोः शब्दपरिवर्तनेऽपि श्लिष्टताप्रतीतिः ॥

(इति) श्लेषः ॥

मू०—सामान्यविशेषत्वे सारूप्ये कार्यकारणत्वे च ।
अप्रस्तुतप्रशंसा निर्दिष्टा प्रस्तुतस्य गम्यत्वे॥२७॥

इहाप्रस्तुतस्याप्रस्तुतत्वादेव वर्णनमनुचितमपि प्रस्तुतपरत्वेनौचितीमालम्बत इति प्रस्तुतं व्यङ्ग्यमप्रस्तुतस्य वाच्यस्य सिद्धिमा-

दधातीति वाच्यसिध्यङ्गमिदं गुणीभूतव्यङ्ग्यम् । अत एवाप्रस्तुतस्य प्रशंसा कथनमित्यन्वर्थताश्रयणसामर्थ्यादप्रस्तुतस्य वाच्यत्वमत्र सूत्रेऽनुपात्तमपि लभ्यते । सम्बन्धेन विना पुनरप्रस्तुतात्प्रस्तुतावगतावतिव्याप्तिः स्यादित्यर्थान्तरप्रतिपत्तिनिमित्तेन भवितव्यं सम्बन्धेन । सम्बन्धे(न) तु भवन्ती सामान्यविशेषत्वकार्यकारणत्वसारूप्यरूपसम्बन्धत्रयोल्लङ्घनजङ्घालतां नावलम्बते । सामान्यविशेषत्वे सामान्याद्विशेषाद्वा सामान्यस्य प्रतीयमानत्वे द्वैतम् । कार्यकारणत्वेऽपि कार्यात् कारणस्य कारणाद्वा कार्यस्य व्यज्यमानत्वे द्वैविध्यम् । सारूप्ये त्वेक एव प्रकार इत्यस्याः पञ्च प्रकाराः । तत्र सामान्याद्विशेषस्य प्रतीतौ यथा—

> दयायै दृक् कर्णः सरसकविसूक्ताय वदनं
> सरस्वत्यै पृथ्व्यै भुजशिखरमीशाय हृदयम् ।
> इति प्रत्तास्तावत् स्वयमवयवा अप्यविरतं
> प्रदेयं किं कस्मै न तव नरसिंह क्षितिपते ॥

अत्र मनोरथपथातिशायि तव वितरणमिदं येन कृतार्थी कृतोऽहमिति विशेषे प्रस्तुते किं कस्मै न त्वया प्रदीयत इति सामान्यमुक्तम् । तेनात्र सामान्यात् अप्रस्तुताद्वाच्यात् प्रस्तुतो विशेषः प्रतीयते । विशेषात् समान्यप्रतीतौ यथा—

> नृसिंह वसुधाधिप त्वयि रणोन्मुखे धावतः
> प्रतीपपृथिवीपतेः पथि पथि प्रदीप्तक्षुधः ।
> चिरादगुरवन्ध्यतां दुरवगाहविन्ध्याटवी-
> पलाशविटपाञ्चलाहृतफलार्पणेन द्विपाः ॥

अत्र रणाय स्पृहयति नरसिंह क्षितिपतौ कति कति न दुरवस्थामन्वभवन्नरपतय इति सामान्ये प्रस्तुते प्रतीपपृथ्वीपतेरिति विशेषः कथितः ।

कार्यात् कारणप्रतीतौ यथा–

क्षीरोदो लवणोदवत् कुमुदिनी नीलोत्पलिन्याकृति-
ज्योत्स्ना ध्वान्तमलीमसा मलयजः कालागरुश्यामलः ।

हंसाः क्रौञ्चसहोदराः किमपरं मुक्ताश्च नीलोपमाः
श्रीमन् वीर नृसिंह देव भवतः कीर्तेः स्फुरन्त्यग्रतः ॥

इह क्षीरोदप्रभृतीनामुपमानत्वेनोपनिबद्धानामप्रस्तुतत्वं कीर्त्तेश्चोदमेयत्वेनोपात्तायाः प्रस्तुतत्वम् । ततः क्षीरसागरादिगतेन लवणार्णवत्वादिसम्भावनावशोन्मिषितेनाप्रस्तुतेन मालिन्यरूपेण कार्येण लोकोत्तरं किमपि कीर्तिगतमवदातत्वं प्रस्तुतमेव प्रतीयते । कारणात् कार्यप्रतीतौ यथा–

बाहुस्ते नरसिंह देव विजयश्रीकेलिसौधध्वज-
स्तत्रापि प्रलयाग्निधूमरुचिना खड्गेन सख्यं गतः ।

निर्मर्यादविशीर्यमाणविशिखप्राग्भारशात्कारिणि
प्राक्रीडत् समरे सपत्नहरिणाक्षीणां ह हा हा विधिम् ॥

अत्र सपत्नहरिणाक्षीणां कीदृशी दशावर्तत इति राज्ञा कार्ये पृष्टे केनापि कारणमुदीरितम् । सारूप्ये यथा–

एणश्रेणी शशकपरिषच्छल्यकानां कुटुम्बं
केकिव्यूहः श्रयति सुखितां यत्र कुत्रापि कुञ्जे ।
कोऽसौ धन्यः कथय सुकृती पादपोऽभ्रंलिहश्री-
र्यस्य च्छायामयमनुसरत्यातपार्तः करीन्द्रः ॥

अत्र सरूपादप्रस्तुताद्वाच्यात्तगेः सरूप एव प्रस्तुतो महान्तमपि रक्षितुं क्षमो नरसिंहमहीपतिः प्रतीयते । अभिनवगुप्ताचार्योः पुनरस्यां वाच्यव्यङ्ग्ययोः सममेव प्राधान्यमाहुः ॥

व्या०— प्रस्तुतादप्रस्तुतप्रतीतौ समासोक्तिरुक्ता । तद्वैपरीत्येन अप्रस्तुतात्प्रस्तुतप्रतीतावप्रस्तुतप्रशंसामाह— **सामान्येत्यादि** । परिकरादीनां तु त्रयाणां विशेषणविच्छित्तिप्रसङ्गान्मध्यप्रवेशः । यत्र सारूप्यादिसम्बन्धत्रयान्यतमवशेनाप्रस्तुतकथनात् प्रस्तुतं गम्यते साप्रस्तुतप्रशंसेत्यर्थः । ननु प्रस्तुतमुपेक्ष्याप्रस्तुतस्य कथने कोऽलङ्कारः । प्रत्युत वाजपेयशरद्वर्णनवत् परिहासहेतुरयं दोष एवेत्याशङ्कामनूद्य प्रस्तुतावगमकत्वान्न दोष इति परिहरति— **इहेति** । प्रस्तुतावगमे कोऽयमतिशय इत्यत आह— **प्रस्तुतमिति** । ननु न्यूनं लक्षणमप्रस्तुतस्य कथनमित्यनुक्तेरित्याशङ्क्य संज्ञानिर्वचनात्तल्लभ्यत इत्याह— **अत एवेति** । सम्बन्धापेक्षायाः प्रयोजनमाह— **सम्बन्धेनेति** । अन्यथा सर्वं सर्वेण गम्यत इत्यतिप्रसङ्गः स्यादित्याह— **अतिव्याप्तिः स्यादिति** । अतः परमासमाप्तेरस्याः स्पष्टोऽर्थः श्लोकाश्च गताः प्रायेण व्याख्याताश्च । इह व्यङ्ग्यस्य प्रस्तुतस्य स्वयं वाच्यसिद्ध्यङ्गत्वमुक्तमन्यैस्तुल्यप्राधान्यमुक्तं सोऽपि गुणीभूतव्यङ्ग्यभेद एवेत्याह— **अभिनवगुप्तेति** ।

(इति) अप्रस्तुतप्रशंसा ।

मू०—सामान्येन विशेषः सामान्यं वा यदा विशेषेण ।
कथितः समर्थ्यतेऽर्थो भवति तदाऽर्थान्तरन्यासः ॥२८॥

अर्थ्यत इत्यर्थः प्रस्तुत इति यावत् । इहाप्रस्तुतप्रशंसा प्रसङ्गसङ्गतत्वेनास्य निरूपणम् । अपूर्वत्वेन प्रतीतेरविद्यमानत्वादनुमानवैलक्षण्यम् ।

लक्ष्मीस्ते परिचारिका दश दिशो दास्यस्तवाज्ञापराः
पृथ्वी ते करदायिनी तव गिरां देवी विनोदास्पदम् ।
गाढं वीर नृसिंह देव निखिलप्रत्यर्थिलक्ष्मीर्मुदा
त्वामालिङ्गति मन्त्रशक्तिमहतां का वा न वश्याः स्त्रियः ॥

अत्र मन्त्रशक्तिमहतामिति सामान्येन लक्ष्मीस्त्वामालिङ्गतीति विशेषः समर्थितः ।

वीरः सर्वानपि नरपतीञ्छौर्यगाम्भीर्यभाजः
शक्तो जेतुं निशितविशिखैः कार्मुकाणां कदम्बैः ।
एतत्सत्यं भुवनभवनाभोगसाम्राज्यलक्ष्मी-
शिक्षादक्षो जयति नृपतीनुत्कलक्षोणिपालः ॥

अत्र सकलवीरवृत्तान्तः सामान्यरूपो विशेषरूपेण नरसिंहनरपतिवृत्तान्तेन समर्थितः । अयमत्र प्रतिफलितोऽर्थः । सामान्य विशेषयोर्वाच्यत्वेऽर्थान्तरन्यासः । सामान्ययोरेव विशेषयोरेव वा वाच्यत्वे दृष्टान्तः । अत्र वीप्सासमानफलं बहुवचनमवश्यं प्रयोक्तव्यं सर्वादिशब्दो वा यथा सर्वोपसंहाररूपा व्याप्तिर्व्यज्यते । इतरथा वाच्यावचनं स्यात् ॥

व्या०— सामान्यविशेषभावप्रसङ्गात् अर्थान्तरन्यासमाह— सामान्येनेति । यत्र प्रस्तुतस्य सामान्यस्य विशेषस्य वा पूर्वं पश्चाद्वा निर्दिष्टस्य तदितरेण समर्थनमर्थान्तरन्यास इत्यर्थः । संग्रहकारः समर्थशब्दं प्रस्तुतसामर्थ्यपरत्वेन व्याचष्टे— अर्थ्यत इति । सङ्गतिमाह— इहेति । अनुमानाद् भेदमाह— अपूर्वत्वेनेति । अप्रतीतप्रत्यायनमनुमाने, प्रतीतस्य समर्थनमत्रेति भेद इत्यर्थः । यद्यपि कार्यकारणभावमूलौ च द्वौ भेदावुक्तावलङ्कारसर्वस्वे तथापि तयोः काव्यलिङ्गेऽन्तर्भाव इति काव्यप्रकाशकारसिद्धान्तावलम्बनेन भेदद्वयमेव लक्षयित्वोदाहरति— लक्ष्मीरिति । स्पष्टोऽर्थः । अस्य दृष्टान्ताद्विषयं विविनक्ति— अयमत्रेति । अस्यैव विशेषान्तरमाह— अत्रेति । बहुवचनादिप्रयोगस्य फलमाह— यथेति । अन्यथा वाच्यावचनाख्यो दोषः स्यादित्याह— इतरथेति ॥

(इति) अर्थान्तरन्यासः ॥

मू०—यत्र व्यङ्ग्यस्य सतो हेतोः कार्याभिधानभङ्गीभिः ।
स्यादभिधानं सुधियः पर्यायोक्तं विदुस्तदिदम् ॥२९॥

अत्र प्रतीयमानप्रस्ताव एवास्य निरूपणकारणम् । ध्वन्यमानत्वमनुभवत एव कथं वाच्यत्वानुभव इत्यभिधानस्य व्याघातः स्यादित्याशयवानाह— कार्याभिधानभङ्गीभिरिति । कार्योपनिबन्धनद्वारेण यत्र कारणमभिधीयते तत्र पर्यायोक्तम् । नेयमप्रस्तुतप्रशंसा । अत्रोभयोः प्रस्तुतत्वात् । तस्याः पुनरप्रस्तुतकार्यात् प्रस्तुतस्य कारणस्य गम्यत्वमित्यनयोर्नैकविषयत्वम् । यत् पुनरिह कार्यस्यैव वर्णनं तत्कारणापेक्षयाऽस्य चमत्कारातिशयकारित्वात् । यथा—

अस्पृष्टाञ्जनसम्पदः स्मृतिपथावस्थायिलीलास्मिताः
प्रत्याख्यातवतंसदामरचनास्त्यक्ताङ्गरागश्रियः ।

दूरोद्धूतकुरङ्गनाभिमकरीभङ्गास्तरङ्गभ्रुवः
सञ्जाता नरसिंह पार्थिव भवत्प्रत्यर्थिपृथ्वीभुजाम् ॥

अत्रारिभूपालकलत्रगताञ्जनवर्जनादिरूपकार्यमुखेन विरोधिवधलक्षणं कारणं पर्यायेणोक्तम् । किं चात्र नृसिंहनृपप्रभावस्तावद्वर्ण्यते । स च रिपुकुलकदनलक्षणात् कारणादिव वैरिवधूवृत्तान्तरूपात् कार्यादपि वर्णितो भवतीत्युभयोरपि वर्ण्यमानराजप्रभावजन्यत्वेन प्रस्तुतत्वात् वर्णनमनुचितमेव । तथापि यदत्र कार्यस्यैव वर्णनं तत् कारणापेक्षयाऽस्य चमत्कारातिशयकारित्वात् । यदि पुनरिह प्राधान्येन प्रतिभाति व्यङ्ग्यं तदा भवतु ध्वनावस्यान्तर्भावः न तु ध्वनेरत्रान्तर्भावः । अङ्गित्वेन महाविषयत्वेन च ध्वनेः स्थितत्वात् ॥

व्या०— अथाप्रस्तुतप्रशंसानन्तरं सामान्यविशेषभावप्रसङ्गादर्थान्तरन्यासमुक्त्वा गम्यप्रस्तावात् पर्यायोक्तं लक्षयति– यत्रेत्यादि । हेतोः कारणस्येत्यर्थः । यत्र प्रस्तुतकार्यकथनात् प्रस्तुतमेव कारणं गम्यते तत्र कार्यद्वारा कारणस्यैव पर्यायेण भङ्ग्यन्तरेणोक्तत्वात् पर्यायोक्तमित्यर्थः । सङ्गतिमाह– अत्रेति । कार्याभिधानेत्यादिविशेषणवैयर्थ्यमाशङ्क्य शङ्कोत्तरम् आह– **ध्वन्यमानत्वमिति** । व्याघाताभावं व्यनक्ति– **कार्योपनिबन्धनेति** । व्यङ्ग्यस्य सतः साक्षादभिधानं व्याहतं न तु भङ्ग्यन्तरेणाभिधानमिति भावः । ननु कार्यात् कारणप्रतीतिरूपाप्रस्तुतप्रशंसाप्रभेदादस्य को भेदस्तत्राह– **नेदमिति** । प्रस्तुतादेव कार्यात् प्रस्तुतकारणप्रतीतौ पर्यायोक्तमप्रस्तुतादप्रस्तुतप्रशंसेत्यनयोर्भेद इत्यर्थः । नन्विह कारणं साक्षादेवाभिधीयतां किं

भङ्ग्यन्तरेणेत्यत आह– **यत् पुनरिति** । **अस्पृष्टेत्यादि** । स्पष्टम् । इह लक्षणार्थं योजयति– **अत्रेति** । नन्विह कार्यवत् कारणस्यापि प्रस्तुतत्वेन वर्णनार्हत्वात् तदेव किं न वर्ण्यते अत आह– **किं चेत्यादि** । **कारणापेक्षयेति** । कारणस्य साक्षाद्वर्णनात् कार्यमुखेन वर्णनेन चमत्कारातिशय इत्यर्थः । नन्वयं शान्तिकर्मणि वेतालोदयो यद् व्यङ्ग्यविशेषात्मकत्वाद्रसध्वनेरलङ्कारान्तर्भाव(आयात) इत्याशङ्क्याह यदि पुनरिति । सत्यं; व्यङ्ग्योपजीव्येवायमलङ्कारः । किं त्वालोचनायां व्यङ्ग्यस्य प्राधान्ये ध्वनिरेवायमलङ्कारो मा भूत्; अप्राधान्ये तु अयमलङ्कारः । प्राधान्याप्राधान्ये अगूढापराङ्गत्वादिगुणीभावहेतुसद्भावपर्यालोचनाचतुरचेतसां सुलभः संवाद एवेति भावः । अलङ्कारानन्तर्भावे हेतुमाह–**अङ्गित्वेनेति** । अलङ्कार्यत्वेनेत्यर्थः । तद्ध्यलङ्कारोऽलङ्कार्यस्य शेषो न तु विपरीतम् । तथा च प्रधानालङ्कार्यानुरोधादलङ्कारस्यैवान्यथाभावो युक्तः । यथैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र द्वितीयानिर्देशात् प्रधानगार्हपत्यानुरोधेनाप्राधान्यस्य ऐन्द्रीशब्दस्यान्यथानयनं तद्वदिति भावः । हेत्वन्तरमाह–**महाविषयत्वेन चेति** । बहुविषयत्वाच्चेत्यर्थः । सर्वत्र लब्धात्मकस्यैकत्र प्राधान्यसन्देहमात्रेण दुरपह्नवत्वादि भावः ॥

(इति) पर्यायोक्तम्

मू०— यत्र प्रक्रान्तायां स्तुतौ कथञ्चित् प्रतीयते निन्दा ।
निन्दायां स्तुतिरथवा सेयं व्याजस्तुतिर्द्विविधा ॥ ३० ॥

कथंचित् प्रमाणान्तरबाधितत्वेनेति यावत् । अत्र निन्दायां प्रस्तुतायामप्रस्तुता स्तुतिः प्रारभ्यमाणा प्रमाणान्तराद्बाधमनुभवन्ती

निन्दापर्यवसायिनी भवति । एवं स्तुतौ प्रस्तुतायामप्रस्तुतनिन्दा प्रक्रम्यमाणा प्रमाणान्तराद्बाधमश्नुवाना स्तुतौ पर्यवस्यति । इयं च स्तुतिनिन्दात्मकविच्छित्तिविशेषावलम्बेन प्रवृत्तेत्यप्रस्तुतप्रशंसायाः पार्थक्येन स्थिता । अलीकत्वाद् व्याजरूपा स्तुतिः व्याजेन निन्दामुखेन वा स्तुतिरित्यन्वर्थताद्वैविध्यमधितिष्ठन्ती न द्वैविध्यमतिवर्तते । क्रमेण यथा—

प्राणेश्वर स्वजनतुल्यसुखस्त्वमेवं
त्वय्यभ्युपेतबहुवल्लभताविलासे ।
यन्निर्विवेश रजनीरमणीः सहस्रं
पूर्वेद्युरेप भवदाननबन्धुरिन्दुः ॥

अत्र भवान् स्वजनतुल्यसुख इति स्तुतिः प्रक्रान्तान्यासक्तो भवानिति निन्दामभिव्यनक्ति ।

दिङ्मातङ्गाः कनकशिखरीसप्तयः सप्तसप्ते-
श्चिन्तारत्नं दिविचरतरुः श्रीनृसिंह क्षितीन्द्र ।
अद्याप्येतत् सकलमकृथा नार्थिसादित्यपार्थ-
स्तेनायं ते वितरणकलाकौशलेनावलेपः ॥

इह परिगणितपदार्थातिरिक्तमखिलमप्यर्थिसात् कृतवान् इति वस्तुना व्यज्यते । तेन च व्यज्यमानेन वाच्यमेवोपस्क्रियत इत्यस्य उपसर्जनत्वम् ॥

व्या०— गम्यत्वविच्छित्तिप्रस्तावात् व्याजस्तुतिमाह— **यत्रेति** । यत्र प्रक्रान्तया स्तुत्या प्रस्तुतत्वाद्बाधितया प्रस्तुता निन्दा निन्दया वा तादृश्या तादृशी स्तुतिः प्रतीयते सा व्याजस्तुतिरित्यर्थः । कथञ्चित् शब्द-विवक्षितमर्थमाह— **कथंचिदिति** । उभयत्र बाध्यत्वे हेतुमाह— **अत्र निन्दायामिति** । अन्यप्रस्तावे प्रक्रान्तत्वमेवोभयत्र बाधहेतुरित्यर्थः । ननु अप्रस्तुतात् प्रस्तुतावगतेरविशेषादप्रस्तुतप्रशंसातोऽस्याः को भेद इत्याशङ्क्य आह— **इयं चेति** । यत्र स्तुतिनिन्दयोरेकैकस्य गमकत्वं तदितरस्य गम्यत्वं तत्रेयं व्याजस्तुतिः । ततोऽन्यत्राप्रस्तुतप्रशंसेति भेद इत्यर्थः । संज्ञानिर्वचन-मुखेनास्या द्वैविध्यमाह— **अलीकत्वादिति** । व्याजरूपादित्यस्य व्याख्यान-मेतत् । व्याजत्वेन वा व्याजेन वा स्तुतिरस्यामिति व्याजस्तुतिरिति द्वेधा व्युत्पत्त्या स्तुतिनिन्दा निन्दास्तुतिश्चेति द्विविधेत्यर्थः । तत्राद्यमुदाहरति— **प्राणेश्वरेत्यादि** । सखिसमाचाराः कामुका इति स्थिते सत्याह— काचित्— हे प्राणेश्वर, त्वं स्वजने तुल्यमुखतुल्यवृत्तिरसीत्यर्थः । कुतः । यद्यस्मादेव त्वय्यभ्युपेतबहुवल्लभताभिलापेऽङ्गीकृतबहुवाल्लभ्यव्यपदेशे सति भवदाननबन्धु-स्त्वन्मुखसख इन्दुरपि पूर्वेद्युः रजन्य एव रमण्यस्तासां सहस्रं निर्विवेश । यद् दृष्ट्वा सोऽपि बहुवल्लभोऽभूदित्यर्थः । एकैव सा रजनी सहस्रकल्पाजनीति भावः । स्तुतिनिन्दां व्यनक्ति— **अत्रेति** । निन्दास्तुतिमुदाहरति— **दिङ्-मातङ्गा इत्यादि** । गतमेतम् । अत्रदिङ्मातङ्गादिवितरणनिषेधरूपया निन्दया विशेषनिषेधे शेषाभ्यनुज्ञानमिति न्यायादेतदतिरिक्तमखिलमर्थिसात् कृतमिति स्तुतिर्व्यज्यत इति एषा निन्दास्तुतिरित्याह— **इहेति** । न चात्र ध्वनिशङ्का कार्येत्याह— **तेन चेति** । अपराङ्गनामा गुणीभूतव्यङ्ग्यभेदोऽयं न ध्वनिरिति निरङ्कुशोऽयमलङ्कार इति भावः ॥

(इति) व्याजस्तुतिः ॥

मू०—कमपि विशेषं वक्तुं प्रकृतस्योक्तस्य वक्ष्यमाणस्य ।
यः प्रतिषेधाभासः कथितः सोऽयं द्विधाक्षेपः ॥ ३१ ॥

इह प्रकृतस्यार्थस्य प्रकृतत्वादेवाभिधातुमभिमतस्य क्रियमाणः प्रतिषेधो बाधितः सन् आभासे पर्यवस्यन् विधिमाक्षिपति । स च आभासमानो निषेध उक्तवक्ष्यमाणप्राकरणिकगतत्वेन द्वैविध्यमधितिष्ठन् आक्षेपमपि द्विविधमुत्थापयति । उक्तविषये च क्वचिद्वस्तु निषिध्यते क्वचन वस्तुनः कथनमित्ययमपि द्विधा भवति । वक्ष्यमाणविषये च कथनमेव निषिध्यते । तत्रापि क्वचन सामान्येन कथयितुमभ्युपगतस्य अभिमतस्य भणिति प्रतिषेधो भवति । क्वचन पुनः कियन्तमप्यंश-मभिधाय कियतोऽप्यंशस्य प्रतिषेधः स्यादित्ययमपि द्विधा भवति । ततश्चतुर्धायमाक्षेपः । तत्रोक्तविषयो वस्तुप्रतिषेधो भवति यथा—

नाहं दूती भवामि प्रथितपृथुगुण श्रीनृसिंह क्षितीन्द्र
ब्रूमः श्रेयस्करं ते शृणु हरिणदृशो जृम्भमाणेऽङ्गतापे ।
उद्बुद्धं पुण्डरीकैः कुमुदकुवलयैर्मीलितं चक्रवाकैः
सन्तुष्टं किं च जातं ज्वलदनलशिखा भासुरैः सूर्यकान्तैः ॥

अत्रोक्तस्य दूतीत्वरूपस्य वस्तुनो निषेधः कृतः सन् न मृषा-भाषितादिरूपं कमपि विशेषमभिव्यनक्ति । स च वाच्यस्यै-वोपस्कुरुते ।

वस्तुकथनप्रतिषेधो यथा—

किं त्वां ब्रूमः कृपालुं यदरिमृगदृशां दृष्टयो बाष्पदिग्धाः ।
किं सद्वृत्तं रमन्ते त्वदुरसि यदरिक्ष्माभुजां वीरलक्ष्म्यः ।

आज्ञा किं ते सुधांशोः श्रियमपहरति त्वद्यशः किं मनस्ते
हिंसा-शून्यं त्रयास्त्रिजगति कृपणतोन्मीलिता श्रीनृसिंह ॥

अत्र कृपालुमित्यादिवचनस्योक्तस्य निषेधः कृतो निरतिशयशौर्यादिरूपं विशेषमभिव्यनक्ति ।

वक्ष्यमाणविषयः सामान्याभ्युपगतस्य भणितिषेधो यथा–

क्षणं प्रतीक्षस्व वियोगकातरं
विधाय यावत् प्रिय सुस्थिरं मनः ।
अयं जनः किञ्चिदुदीरयिष्यति
व्रजाथवा तावदुदीरणेन किम् ॥

अत्र सामान्येनाभिधातुमभ्युपगतस्य भणितिनिषेधः कृतः सन् निजनिधननिश्चयात्मानं विशेषमभिव्यनक्ति । अंश-प्रतिषेधो यथा–

कान्त किं कैरविण्याः कलयति कमलोल्लासने नैष शक्तिं
नाथः किं वासराणामुदयति कुमुदे नैष लक्ष्मीं वितन्वन् ।
किं कृष्णो न द्विजानामधरयति पतिं भूयसोक्तेन किं वा
ज्ञातः पश्चान्नृसिंह क्षितितलतिलक त्वं चरित्रैर्विचित्रैः ॥

अन्यैरपि दुर्लभं भवतः साम्यमतः कियदभिदास्यामह इति चन्द्रादिरूपतया कियानप्यंश उक्तः कियानपि निषिद्धश्च । अशक्यवचनीयत्वरूपरूपस्तुतिविशेषो व्यङ्ग्यः । अयमत्र फलितोऽर्थः यत्र प्रतिषेधेन विधिराक्षिप्यते तत्राक्षेपः । यत्र तु विहितः प्रतिषेधस्तत्र नायमलङ्कारः । यथा–

19

जटाबन्धं वल्कावरणमपि तीव्रातपकृत-
स्थितिं कुर्वन् कल्पद्रुम सुचिरमुग्रं चर तपः ।
अथेदं मा चारीः कथमपि कदाचिन्न भविता
नृसिंह क्षोणीन्दोरिव वितरणं हन्त भवतः ॥

इह विहितस्य तपसः प्रतिषेध उक्तः ॥

अपरस्त्वनिष्टविध्याभासस्तस्याभिधीयते भेदः ।
यत्रानभिमतपिशुनो विधिर्निषेधं प्रकाशयति ॥३२॥

तत्रानिष्टस्यानिष्टत्वादेव विधिर्बाधितः प्रतिषेधमाक्षिपतीत्यन्वर्थाभिधानोऽयम् । अनिष्टविध्याभासो यथा—

त्वं चेद्गच्छसि गच्छ सिध्यतु तवाभीष्टं मृधे वल्लभ
प्रख्यातं तव को न वेद भुजयोरव्याजमोजायितम् ।
किं चैतत् कथनीयमस्ति भुवनोत्तुङ्गः कलिङ्गेश्वरः
संग्रामेऽभिमुखान् निहन्ति न पुनर्वैमुख्यमासेदुषः ॥

अत्रानभिमतमेव प्रियतमप्रस्थानं यदा प्रमुख एवानुमन्यते तदायमनिष्टविधिराभासे पर्यवस्यति । आयोधनोन्मुखविरोधिवधविधानं पुनर्गमननिषेधमेव पिशुनयति । अयं चाक्षेपसमानन्यायेनात्र निरूपितः ॥

व्या०— प्रस्तुतगम्यत्वे व्याजस्तुतिरुक्ता; तद्विशेषगम्यत्वेनाक्षेपमाह— कमपीत्यादि । प्रकृतनिषेधाभासस्तद्गतविशेषप्रतिपत्त्यर्थ आक्षेपः । स च उक्तविषयो वक्ष्यमाणविषयश्चेति द्विविध इत्यर्थः । अत्र लक्षणं विभागं च

विविञ्चन् व्याचष्टे– **इहेत्यादि** । तत्रोक्तनिषेधो वस्तुनिषेधस्तत्कथननिषेधश्च इति द्विविध इत्याह– **उक्तविषये चेति** । वक्ष्यमाणविषये तु वस्तुनोऽनुक्तत्वात् कथननिषेध एवेत्याह– **वक्ष्यमाणेति** । सोऽपि सामान्येन वक्तुमिष्टस्योक्तिमात्रनिषेधोंऽशोक्तावंशान्तरनिषेधश्च इति द्विविध इत्येवं चतुर्धायमाक्षेप इत्यर्थः । **नाहमित्यादि** । स्पष्टम् । **किमित्यादि** । स्त्रीशोककारिणः पराङ्गनारतस्य चोरनिवारणासमर्थस्य स्त्रीहन्तुः कुतः कृपासद्वृत्ताज्ञासिद्ध्यहिंसा इति तात्पर्यम् । अत्र किं ब्रूम इति कृपालुत्वादिकथननिषेधस्योक्तविषयस्य विशेषगमकत्वमुद्घाटयति– **अत्रेति** । **क्षणमित्यादि** । वियोगकातरं मनः सुस्थिरं विधायेत्यनेन महानुपद्रवो वर्तत इति सूचितम् । किञ्चिदुदीरयिष्यति इत्यभिधातुमुद्यतस्य वक्ष्यमाणस्य किमुदीरणेनेति कथननिषेधो जीवितसंशयरूपं विशेषं गमयतीत्याह– **अत्रेति** । **कान्त इत्यादि** । गतमेतत् । अत्र चन्द्रार्कादिरूपेण किञ्चिदुपमानांशमुक्त्वा किं भूयसोक्तेनेत्युपमानान्तरस्य निषेधादयमंशोक्तावंशान्तरनिषेध इति दर्शयन् तद्व्यङ्ग्यं विशेषं दर्शयति– **अन्यैरपि इति** । अथास्य विषयं विविनक्ति । यत्र विधिपर्यवसायी निषेध आभासो भवति स आक्षेपस्य विषयः । यत्र तु निषेधस्य स्वार्थ एव विश्रान्तिर्न तत्र आक्षेप इत्याह– **यत्र प्रतिषेधेनेति** । **जटेत्यादि** । अत्र पूर्वार्धे नृसिंहसमवितरणसिद्धये तपश्चरेति विहितस्य तपसः उत्तरार्धे तपसाऽपि तस्य दौर्लभ्यान्माचरीरिति निषेधस्य विधिपर्यवसानं विनैव राज्ञो लोकोत्तरवितरणव्यञ्जकतया निषेधात्मनैव चमत्करणान्नाक्षेपत्वमित्यभिप्रायवानाह– **इह विहितस्येति** ॥

यथेष्टनिषेधाभास आक्षेपालङ्कारस्तथानिष्टविध्याभ्यासश्चाक्षेपालङ्कार एव इति तमपि भेदं प्रतिज्ञापूर्वकं लक्षयति– **अपरस्त्वित्यादि** । यत्र प्रकृतस्य अनिष्टस्य विधिरनुपपद्यमानस्तन्निषेधे पर्यवस्यति सोऽनिष्टविध्याभासो नामाक्षेपभेद इति व्याचष्टे– **तत्रेति** । **त्वमित्यादि** । स्पष्टम् । सङ्गतिमाह– **अयं चेति** ॥

(इति) आक्षेपः ॥

मू०—विलसद्विरोधगर्भं ब्रूमोऽलङ्कारवर्गमधुना तु ।
स्फुरति विरोधाभासे भवति विरोधाभिधो दशधा ॥३३॥

इष्टनिषेधस्यानिष्टविधेश्च बाधितत्वादाक्षेपे विरुद्धत्वादनुप्रवेशेन विरोध गर्भालङ्कारनिरूपणस्य सम्प्रति प्रस्तावः । जात्यादीनां चतुर्णां पदार्थानां मध्ये सजातीयाभ्यां विजातीयाभ्यां वा परस्पर-सम्बन्धे विरोधः । स च यथा प्रमुख एवाभासते तथैव यदि विश्राम्यति तदा प्ररूढो विरोधो दोष एव । यदि तु समाधानमस्ति तदा प्रमुख एवावभासमानत्वात् विरोधाभासः । तत्र

जातेर्जात्यादिभिः सार्धं चतस्रः प्रथमं भिदाः ।
जायन्ते ताः पुनस्तिस्रो गुणस्य च गुणादिभिः ॥३४॥
क्रियायाः क्रियया सार्धं द्रव्येण च भिदा द्वयम् ।
द्रव्यस्य तु भिदेकैव द्रव्यणेति भिदा दश ॥३५॥

क्रमेण यथा—

यशोनिधे वीर नृसिंह देव
करोऽपि कर्णोऽजनि तावकीनः ।
किं चारि नारीजनतापकारी
धाराधरस्ते करवाल एषः ॥

अत्र पूर्वार्धे करकर्णजात्योर्विरोधः । उत्तरार्धे धाराधर-त्वतापकारित्वयोर्जातिगुणयोः ।

अश्रान्तविश्राणनकेलिकौतुकः
काम्यो ए कस्यैष नृसिंह भूपतिः ।
शौर्योद्धधैर्यस्य चिराय दन्तिभिः
दिग्दन्तिनोऽष्टावपि वामनीकृताः ॥

अत्र दिग्दन्तिवामनीकरणयोर्जातिक्रिययोः ।

शैलाः सर्वेऽपि कैलासाः सिन्धवः सुरसिन्धवः ।
नरसिंह महीपाल सञ्जातास्तव कीर्तिभिः ॥

अत्र जातिद्रव्ययोः ।

परदारपरोऽपि त्वं परदारपराङ्मुखः ।
नरसिंह महीपाल विचित्रचरितो भवान् ॥

अत्र परदारपरत्वपरदारपराङ्मुखत्वयोर्गुणयोः ।

चापस्थितगुणस्यापि गुणैस्तव जगत्त्रयम् ।
व्याप्यते स्म जगद्वीर नरसिंह नरेश्वर ॥

अत्र गुणक्रिययोः ।

विस्मयमसौ नृसिंहः करोति परिपन्थिगन्धगजसिंहः ।
यस्य प्रतापतपनः कुमुदमुदश्वयति सर्वतोदिक्कम् ॥

अत्र कुमुदोदञ्जनतपनयोः क्रियाद्रव्ययोः ।

आयोधनारम्भविजृम्भमाण-
क्षोणीरजोगत्वरशत्रुलोकः ।
उग्रोऽपि कृष्णस्तव खड्ग एष
विराजते वीर नृसिंह देव ॥

अत्रोग्रकृष्णयोर्द्रव्ययोः ।

एष च तत्र प्रगल्भते यत्र विषयस्याभिन्नत्वम् ; भिन्नविषयत्वे त्वसङ्गतिप्रमुखाणां जागरूकत्वात् ॥

व्या०— गतो गम्यप्रधानालङ्कारवर्गप्रस्ताव: । सम्प्रत्याक्षेपालङ्कारगतेष्टनिषेधानिष्टविधिषु विरोधप्रसङ्गाद्विरोधगर्भालङ्कारवर्गं वक्तुं प्रतिजानीते— विलसदिति । तत्र विरोधालङ्कारमादौ लक्षयति— स्फुरतीति । विरोधाभासो विरोधालङ्कार: । स दशविध इत्यर्थ: । सङ्गतिमाह— इष्टनिषेधस्येति । विरोधाश्रयं दर्शयति— जात्यादीनामिति । ननु विरोधोऽलङ्कारश्चेति व्याहतमित्याशङ्क्याह— स चेति । प्ररूढो विरोधो दोष: अप्ररूढस्त्वलङ्कार इति न किञ्चिद्व्याहतमित्यर्थ: । दशापि भेदान् श्लोकेन संगृह्याह— जातेरित्यादि । अथोदाहरणान्याह— यश इत्यादि । कर्ण: श्रोत्रं राधेयश्च । वामनो याम्यदिग्दन्ती ह्रस्वश्च परदारपर: परदाररत: शत्रुविदारणपरश्च । शेषं सुगमम् । अथास्य विषयं विविनक्ति— एष चेति । यत्र धर्मयो: सामानाधिकरण्यनिबन्धो विरोध: स्फुरति तत्र विरोधालङ्कार: । यत्र तु वैयधिकरण्यनिबन्धनो विरोधस्तत्रासङ्गत्यादिरित्यर्थ: ॥

(इति) विरोध: ॥

मू०—असति प्रसिद्धहेतौ कार्योत्पत्तिर्विभावना भवति ।

इह कारणान्वयव्यतिरेकानुविधायित्वात् कार्यस्य कारणाभावे कार्यस्याप्यभाव इति कारणमन्तरेणोपनिबध्यमानायां कार्योत्पत्तौ परिस्फुरतो विरोधस्य परिहाराय प्रसिद्धेतरकारणगतत्वेन वस्तुतोऽस्तित्वम् आपूरयन्ती प्रसिद्धकारणविरहोपनिबन्धनरूपा नियमेन भङ्गिरङ्गीकरणीया । अपरथा

विरोधस्य परिहर्तुमशक्यत्वात् । अत एव विशिष्टतयास्यां कार्यस्य विभावनादन्वर्थाभिधाना विभावना । किं चात्र कारणविरहेणोपक्रान्तत्वात् कार्यमेव बाध्यत्वेन प्रतीतिगोचरी भवति; न पुनरनेन कारणविरह इत्यस्याः परस्परबाधकत्वानुप्राणितो विरोधः कथमिव विषयापहारमाचरति । एवं बलवत्या कार्यानुत्पत्त्या कारणसत्तायामेव बाध्यमानायां भवन्ती विशेषोक्तिरपीतरेतरबाधकत्वलब्धस्वरूपाद्विरोधाद्विभक्तविषयत्वेन स्थितिमातनुते । उदाहरणम्—

अयज्ञः स्वर्लोकः सुकृतमतपःक्लेशसुभगं
सुधासारोऽनभ्रः फलमकुसुमश्रीसहचरम् ।
अशौर्यं साम्राज्यं निधिरखननायाससुलभो
नृसिंह क्षोणीन्द्रो नयनपथमस्माकमगमः ॥

अत्र स्वर्लोकादेः प्रसिद्धयज्ञादिकारणाभावो निरतिशयसुखजनकत्वेनोपनिबद्धः । यथा वा—

भूत्या भासय सर्वतोऽपि विदुषो मुञ्च द्विजिव्हान् वृषं
स्वात्मन्येव निवेशय प्रकटय ज्ञाने तृतीयां दृशम् ।
दुर्गाश्लेषरसं जहीहि जहिहि प्रीतिं च दोषाकरे
लोकोत्तुङ्ग कलिङ्गनाथ तदपि ज्ञातो भवानीश्वरः ॥

अत्र परगतत्वेनोपात्तं भूतिकरणकं भासनमीश्वरज्ञानं प्रति न भवति कारणं तथापि ईश्वरज्ञानमभूदिति विभावनेयम् । श्लेषप्रतिभोत्थापितातिशयोक्ति प्रभावितेति सङ्करः ॥

व्या०— विरोधानन्तरं तन्मूलेषु प्रसिद्धत्वात् कार्यकारणरूपां विभावनामाह– **असतीति** । प्रसिद्धकारणं विना कार्योत्पत्तिर्विभावनेत्यर्थः । प्रसिद्धविशेषणस्य प्रयोजनं दर्शयन् व्याचष्टे– **इहेति** । उक्तनियमानङ्गीकारे बाधकमाह– **अपरथेति** । संज्ञाप्येवमेवान्वर्थेत्याह– **अत एवेति** । प्रसिद्धकारणविरहोपनिबद्धनियमादेवेत्यर्थः । विशिष्टतया भावनादुत्पादनाद्विभावना इत्यर्थः । ननु प्रसिद्धकारणाभावनिबन्धनस्य विरोधस्याप्रसिद्धकारणभावेन आभासीकरणाद्विरोधालङ्कार एवायमित्याशङ्क्येह व्यवस्थितबाध्यबाधकभावानुप्राणितो विरोधो विरोधालङ्कारे तु परस्परबाधकत्वानुप्राणित इति भेदकमाह– **किं चात्रेति** । कारणविरहेणोपक्रान्तत्वादित्यस्यायमर्थः । इह कारणाभावकार्ययोर्हि विरोधः तत्र श्रुतेर्जाताधिकारः स्यादिति न्यायादश्वप्रतिग्रहेष्टिन्यायाद्वानुपसञ्जातविरोधितयोपक्रमगतबलीयस्त्वेन कारणाभाव एव बाधकः, कार्यमेव बाध्यं नान्यथा । तदेवमन्यतरबाधकत्वोपलक्षित इत्यनयोर्भिन्नविषयतेति । अथ विभावनोक्तमर्थं विशेषोक्तावप्यतिदिशति– **एवमिति** । अत्रापि परिदृश्यमानया कार्यानुत्पत्त्या कारणसामग्र्येव बाध्यते; कार्यभावाभावयोः सामग्रीभावाभावव्याप्तत्वात् । अतः प्रतिनियतबाध्यबाधकभावापन्नो विरोधो विशेषोक्तौ; विरोधालङ्कारे तु विशेषाभावादुभयोः परस्परबाधकभावापन्न इत्यनयोरपि भिन्नविषयत्वमेवेत्यर्थः । सा च विभावना मालया कैवल्येन च द्विधा । तत्राद्यामुदाहरति– **अयज्ञ इत्यादि** । अत्र कारणाभावं व्यनक्ति– **अत्रेति** । तदुपनिबन्धे निमित्तमाह– **निरतिशयेति** । एतच्च निमित्तमनुक्तमप्युन्नीयत इति भावः । एतेनोक्तनिमित्तानुक्तनिमित्ता चेति द्विविधा विभावना; तत्रेयमनुक्तनिमित्ता । उक्तनिमित्ता तु स्वयमुदाहार्येति अनुसन्धेयम् । द्वितीयामुदाहरति– **भूयेत्यादि** । 'भूतिर्भस्मनि सम्पदि' इत्यमरः । तयोरभेदाध्यवसायः भूत्या विदुषो भासय न त्वीश्वरवदात्मानमिति भावः । द्विजिह्वान् सर्पान् पिशुनांश्च । वृषो धर्मो वृषभश्च तं स्वात्मन्येव

निवेशय । ईश्वरस्तु वृषे स्वात्मानं निवेशयतीति भावः । ज्ञाने इति । न तु ललाटे इति भावः । दर्पं दृष्टिं शास्त्रं च । दुर्गाणामाश्लेषः प्राप्तिरन्यत्र दुर्गाया आश्लेषस्तत्र रसमनुरागम् । दोषाणामाकरो दोषाकरो दुष्टः । दोषा करोतीति दोषाकरो निशाकरश्च । तत्र प्रीतिं जहि हि त्यज । "आच हौ" इति चकारादन्यतरस्यामिकारविधानाद् द्वैरूप्यम् । तदपि तथापीत्यर्थः । अत्रापि कारणाभावं दर्शयति— अत्रेति । स्वाङ्गभूतिभासुरीकरणादिकारणाभावेऽपीश्वरत्वज्ञानोत्पत्तेर्विभावनेत्यर्थः । अत्राभ्युच्चयत्वेन विशेषमाह— श्लेषेति । एषा तूक्तनिमित्ता लोकोत्तुङ्गत्वस्यैव निमित्तस्योक्तत्वादिति ॥

(इति) विभावना ॥

मू०—यदि कारणसाकल्ये कार्यासिद्धिस्तदा विशेषोक्तिः ॥३६॥

इह यद्यपि विद्यमानापि सामग्री न कार्यमाविष्कुरुते तदा सामग्र्येव कथमपि न भवति । यथा कमपि विशेषं प्रकाशयितुं सत्यामप्येतस्यां कार्यानुत्पत्तिरुपनिबध्यते तदा विशेषप्रतिपादनायोक्तिरिति यौगिकत्वमप्यसावाश्रयति । इयं च निमित्तस्योक्तत्वानुक्तत्वाभ्यां भवन्ती न द्वैविध्यातिवर्तिनी । तत्रोक्तनिमित्ता यथा

अयं स ते वीर नृसिंह देव
प्रतापभानुः प्रथितोदयश्रीः ।
चित्रं न दत्ते रिपुसुन्दरीणां
विकासलक्ष्मीं नयनाम्बुजेभ्यः ॥

अत्र तपनोदये कारणे सत्यम्बुजविकासलक्ष्मीलक्षणं कार्यं नाभूदिति विशेषोक्तिः । रिपुसम्बन्धित्वं च निमित्तमुपात्तम् ।

किं त्वियं रूपकोपजीवनेन प्रवृत्तेत्यनयोरङ्गाङ्गीभावेन सङ्करः । आश्चर्यस्य रूपकं प्रति साधकत्वात् । अनुक्तनिमित्ता यथा—

उत्तिष्ठ, कन्दखननाय गृहाण चापं
गाहस्व काननमिति प्रहितोऽपि वध्वा ।
आकारितोऽपि सहकेलिसखैः किरातै-
र्द्रेर्न वीर विजहारि दरीमरिस्ते ॥

व्या०— विभावनाविपर्ययेण विशेषोक्तिं लक्षयति— **यदीत्यादि** । सामग्रीसद्भावेऽपि कार्यानुत्पत्तिः विशेषोक्तिरित्यर्थः । ननु सामग्रीसद्भावेऽपि कार्यं नोत्पादयतीति व्याहतार्थनिबन्धात्मनो विशेषोक्तेः कथमलङ्कारत्व-मित्याशङ्क्य यथैतत्तथा व्याचष्टे— **इहेत्यादि** । सत्यमयं व्याहतोप्यर्थो विशेषद्योतनार्थमुच्यतेऽस्यामिति विशेषोक्तिरन्वार्थाभिधानेयमित्यर्थः । एषा चोक्तनिमित्तानुक्तनिमित्ता चेति द्विविधेत्याह— **इयं चेति** । **अयमित्यादि** । स्पष्टम् । ननु नयनाम्बुजेभ्यः इत्यत्रोपमितसमासाश्रयणे कुतो रूपकसङ्कर इत्याशङ्क्य रूपकसाधकमाह— **अत्र प्रस्थापनेत्यादि** । **आश्चर्यस्येति** । भानोरम्बुजविकासाप्रदानमाश्चर्यं न तु नयनविकासाप्रदानम् । तच्च रूपका-श्रयणे उत्तरपदार्थप्राधान्यात् अम्बुजानामेव समासार्थत्वात् सम्भवतीति चित्रत्वमेव रूपकसाधकमित्यर्थः । क्वचित् सन्देहालङ्कारमाह— **उत्तिष्ठेत्यादि** । गतम् । अत्र अनुक्तनिमित्तमुद्घाटयति ॥

मू०—अत्र प्रस्थापनाह्वानयोर्वनगमनं प्रतिकारणत्वेऽपि तदनु-त्पत्तौ नरसिंहकार्मुकस्मरणविजृम्भमाणभयविह्वलितत्वमनुक्तमपि निमित्तं प्रतीयते । इह च कार्यासिद्धिः कार्यविरुद्धसिद्धिमुखेन क्वचिदुपनिबध्यते; विभावनायामिव कारणविरहः कारणविरुद्धमुखेन । तथा सति

ये पतन्ति तव हस्तसीकराः
पाणिशुक्तिविवरे द्विजन्मनाम् ।
उत्कलेन्द्रनवमौक्तिकावली-
स्तत्कलत्रहृदये सृजन्त्यमी ॥

इत्यत्र किं विभावना विशेषोक्तिर्वा । तथा हि–स्वात्यम्भःकणानां मौक्तिकोत्पत्तिं प्रति कारणत्वं प्रसिद्धम् । अभावेऽप्येषामेषात्रोपनिबद्धेति कारणाभावे कार्योत्पत्तौ विभावना तावत् कारणाभावश्च हस्तसीकरा इति कारणविरुद्धमुखेनोपन्यस्तः । हस्तसीकराणां मौक्तिकोत्पत्तिं प्रत्यकारणत्वात् । हस्तशब्दस्य द्वैविध्येऽप्यत्राभेदाध्यवसायोऽतिशयोक्त्या; सा चास्यामव्यभिचारिणी । किं चात्र हस्ताम्भःकणानां मौक्तिकानुत्पत्तिं प्रति कारणत्वे सत्यपि मौक्तिकानुत्पत्तिर्नाभूदिति कारणसद्भावे कार्यानुत्पत्तिरिति विशेषोक्तिरपि । कार्यानुत्पत्तिश्च मौक्तिकानि सृजन्तीति कार्यविरोधोत्पत्तिमुखेन द्योतिता । अत एवानयोरस्फुटत्वम् । उभयोरपि-साधकबाधकप्रामाण्यविरहिण्योः सन्देहेन सङ्करः । असङ्गत्या च सहाङ्गाङ्गिभावेन ॥

व्या०— अथ विभावनाविशेषोक्तिविशेषयोः क्वचित् सन्देहसङ्करम् आह– इह चेत्यादि । तत्र विशेषोक्तिविशेषस्य स्वरूपमाह– कार्येति । कार्यासिद्धिः कार्यानुत्पत्तिः । सिद्धिरुत्पत्तिः । कारणसद्भावे कार्यानुत्पत्तिर्हि विशेषोक्तिस्तत्रानुत्पत्तिर्यथा साक्षान्निबध्यते तथा क्वचित् कार्यविरुद्धोत्पत्तिमुखेन अपि निबध्यते । इयमप्येका विशेषोक्तिः । विभावनाविशेषं च दृष्टान्तवत् आचष्टे– विभावनायामिवेति । कारणाभावे कार्योत्पत्तिर्विभावना । तत्रापि कारणाभावो यथा साक्षान्निबध्यते तथा कारणविरुद्धमुखेनापि निबध्यते साऽपि

विभावनेत्यर्थः । अनयोः सङ्करं वक्तुमुदाहरति– **ये पतन्तीत्यादि** । हस्तसीकराः करसीकरादानोदबिन्दव इत्यर्थः । हस्तनक्षत्रभवा वर्षोदबिन्दवश्च । ते च द्विजपाणिशुक्तिषु पतिताः तत्कलत्रहृदयेषु मुक्तावलीः सृजन्तीति वाक्यार्थः । अत्र विभावनां तावदुद्भावयति– **स्वात्यम्भःकणानामिति** । स्वातिवर्षबिन्दूनामित्यर्थः । एषां स्वात्यम्भःकणानामित्यर्थः । एषा मौक्तिकोत्पत्तिरित्यर्थः । एवं विभावनास्वरूपं प्रदर्श्य तत्रोक्तकारणाभावस्य कारणविरुद्धमुखेनोपनिबन्धं व्यनक्ति– **कारणाभावश्चेत्यादि** । हस्तसीकराणां कारणविरुद्धत्वे हेतुमाह– **हस्तसीकराणामिति** । हस्तनक्षत्रोदबिन्दूनामित्यर्थः । ननु प्रकृते हस्तशब्दः करवाची न तु नक्षत्रवाच्यसम्भावादित्याशङ्क्य श्लेषमूलाभेदाध्यवसायातिशयोक्त्या सम्भवतीत्याह– **हस्तशब्दस्येति** । अवर्जनीया चेयमिहातिशयोक्तिरित्याह– **सा चेति** । अथ विशेषोक्तिं चोद्भावयति– **किं चेत्यादि** । हस्तसीकररूपकारणसद्भावेऽपि मौक्तिकानुत्पत्तिरूपकार्यस्य अनुत्पत्तेर्मौक्तिकोत्पत्तिमुखेनोक्तत्वाद्विशेषोक्तिविशेषश्चात्र प्रतिभातीत्यर्थः । न च इहान्यतरावधारणं शक्यमित्याह– **अत एवेति** । विरुद्धमुखत्वादेवेत्यर्थः । फलितमाह– **उभयोरिति** । सङ्करान्तरमाह– **असङ्गत्या चेति** । अनयोरेवं मिथः सन्देहसङ्करः । अनयोरसङ्गत्या सहाङ्गाङ्गिभावसङ्कर इत्यर्थः । द्विजपाणिशुक्तिषु हस्तसीकरपाते तत्कलत्रहृदयेषु मौक्तिकोत्पत्तिरिति कार्यकारणयोर्भिन्नदेशत्वात् असङ्गतिरिति ज्ञेयम् । हस्तसीकरान्मौक्तिकोत्पत्तिरिति विरोधश्च इति शेषः ॥

(इति) विशेषोक्तिः ॥

मू०—अनयोः समसमयत्वे पौर्वापर्यस्य वा विपर्यासे ।
कार्यांशुभावगमिका द्विविधातिशयोक्तिराख्याता ॥३७॥

इह कार्यकारणयोर्नियतोत्तरपूर्वकालभावित्वे सत्यप्येतद्रूपान्यथाकरणं कार्यस्याशुभावित्वलक्षणविशेषप्रकाशनैकप्रयोजनम् । यथा—

कोशगृहचिरनिषण्णा रिपुनृपलक्ष्मीर्निजासिलतिका च ।
उत्कलभूपाल कथं युगपद् भवता समाकृष्टा ॥

अत्र रिपुश्रीसमाकर्षणं प्रति असिलतासमाकर्षणं कारणमेककाल्पेनोपनिबद्धम् ।

कवीन्द्राणामासन् प्रथमतरमेवाङ्गणभुव-
श्चलभृङ्गासङ्गाकुलकरिमदामोदमधुराः ।
अमी पश्चात्तेषामुपरि पतिता वीर भवतः
कटाक्षाः क्षीरोदप्रसरदुरुवीचीसहचराः ॥

अत्र कविकुलैश्वर्यरूपकार्यानन्तरं नृसिंहनृपावलोकनलक्षणं कारणमुपात्तम् ॥

व्या०—अथ लक्षितायामतिशयोक्तौ कार्यकारणपौर्वापर्यविध्वंसरूपं तद्भेदमिह कार्यकारणभावमूलालङ्कारप्रस्तावे सङ्गतिवशेनाह— **अनयोरिति** । अनयोः कार्यकारणयोरित्यर्थः । यत्र कार्याशुभावप्रतीत्यर्थं कार्यकारण पौर्वापर्यनियमविध्वंसो निबध्यते साऽतिशयोक्तिः । सा च तद्यौगपद्यनिबन्धना चेति द्विविधेत्यर्थः । **कोशेत्यादि** । कोशोऽर्थागारमसिपिधानं च । **कवीत्यादि** । क्षीरमुदकं यस्य स क्षीरोदः । "उदकस्योदः संज्ञाम्" इत्युदादेशः । वीचीसहचरा वीचीसदृशा इत्यर्थः । स्फुटमन्यत् ॥

इति अतिशयोक्तिः ॥

मू०—एषासङ्गतिरुक्ता हेतोः कार्यस्य भिन्नदेशत्वे ।

इह न पर्वतनितम्बचुम्बिनं जनयति धूमं महानससङ्गतो हुतवह इति दृष्टान्तावष्टम्भादभ्युपेतेऽपि कार्यकारणयोर्भिन्नदेशगतत्वेन जन्यजनकत्वविरहे कारणाद् भिन्नाश्रयगतत्वेन कार्यस्योपनिबन्धेन समुचितायाः सङ्गतेरविद्यमानत्वादियमन्वर्थाभिधाना कार्यकारणविरोधावसरप्राप्तिनिर्देशा ।

यथा—

प्रतिभटमुकुटेषु खड्गधारा
परिपतिता भवतो नृसिंह भूप ।
सरभसमगलत्तदङ्गनानां
गुरुकुचभारतटीपटीरपङ्कः ॥

अत्र धारापरिपतनं चन्दनच्यवनस्य भिन्नदेशो हेतुः ।

अयोधने वीर नृसिंह देव
समुद्धृतेयं भवतासिवल्ली ।
म्लाना पुनः शत्रुविलासिनीनां
पयोधरे चन्दनपत्रवल्ली ॥

अत्र म्लानत्वस्य कार्यस्य समुद्धरणं कारणं व्यधिकरणतयोपात्तम् । राज्ञा त्वङ्गीकृतस्य चित्रहेतुनाम्नो हेतुभेदस्यात्रैवान्तर्भावो द्रष्टव्यः ॥

व्या०— अथातिशयोक्तिगतकार्यकारणकालनियमभङ्गप्रसङ्गाद्देश-नियमभङ्गमूलामसङ्गतिं लक्षयति– **एषेत्यादि** । यत्र कार्यकारणयोः भिन्नदेशत्वं निबध्यते सेयमसङ्गतिरित्यर्थः । इहलोके कार्यकारणभावापन्नानां धूमाग्न्यादीनां समानदेशत्वदर्शनात् तद्विरोधेनेह भिन्नदेशनिबन्धनान्नास्ति कार्यकारणयोः एकदेशतालक्षणसङ्गतिः अस्यामित्यन्वर्थाभिधानेयम् इत्याह– **इहेत्यादि** । सुगममन्यत् । चित्रहेतुर्नाम हेत्वलङ्कारभेदः कश्चिदिति भोजराजः । तदुक्तम् ।

'दूरकार्यस्तत्सहजः कार्यानन्तरजस्तथा ।
अयुक्तो युक्तकारी चेत्यसङ्ख्याश्चित्रहेतवः ॥' इति ।

अत्र दूरकार्याख्यो यः प्रथमोद्दिष्टो भेदस्तस्यासङ्गतावन्तर्भाव इत्याह– **राज्ञेति** । तस्येदमुदाहरणम् ।

'त्वदपाङ्गाह्वयं जैत्रमनङ्गास्त्रं यदङ्गने ।
मुक्तं तदन्यतस्तेन सोऽप्यहं मनसि क्षतः ॥'

इत्यत्रान्यत्रास्त्रपातोऽन्यत्र क्षतिरिति असङ्गतिरेवेयमित्यर्थः ॥

(इति) असङ्गतिः ॥

मू०—विषमं विरूपघटना विसदृशकार्यानभीष्टयोर्जननम् ॥३८॥

अस्याप्यत्र विरोधावसर एव निरूपणकारणम् । इदं तु त्रिविधम् । अत्र विरूपयोः सर्वथाननुरूपयोर्घटनादेकं विषमम् । यथा

क्व तव नृसिंह देव भुवनत्रयलङ्घि यशः
क्व च कविता मम स्वरसवल्गितफल्गुपदा ।
इह दिवमारुरुक्षुरहमस्मि तुषारमहः–
किरणपरम्परासु रचितैः पदचङ्क्रमणैः ॥

अत्र सर्वथाननुरूपयोर्यशःकवितयोः सङ्घटनं कृतम् । कारण-गुणप्रक्रमेण कार्ये गुणारम्भः कारणानुविधायित्वात् कार्यस्येति स्थितौ सत्यामपि यदि कयापि भङ्ग्यान्यथाभाव उपनिबध्यते तदा विसदृश-कार्योत्पत्तिर्द्वितीयं विषमम् ।

यथा—

राकागर्वितशर्वरीसहचरप्रस्तावसौवस्तिकैः
क्षीराम्भोधितरङ्गकान्तिलहरीवैवर्ण्यकर्णेजपैः ।
चित्रं वीर नृसिंह देव भवतः कीर्तेर्विलासैः कृतः ।
स्वैरं वैरिवधूमुखे कथमहो मालिन्यमुद्रादरः ॥

इह धवलतरयशःपूरकर्तृकतया मालिन्यस्य विसदृशस्यैव कार्यस्योत्पत्तिरभेदाध्यवसाय सामर्थ्यादुपनिबद्धा ।

कथमप्यभिमतमर्थं निष्पादयितुं यतमानस्य तदनवाप्तिस्तावदास्तां यावदनर्थान्तरमपि परापतति तृतीयं विषमम् ।

यथा—

उदितवति प्रतापतपने तव वैरिवधू-
वदनसरोरुहं भवति वीर कलिङ्गपते ।
अपि कलया कयापि न विकासविलासमुपै-
त्यपि तु विवर्णतां नयनतापकरीं भजते ॥

अत्र सत्यपि प्रतापतपनोदये वैरिवधूवदनसरोरुहस्य विकास-विलासलाभो नाभूदिति तावत्तिष्ठतु प्रत्युत नयनतापकरविवर्णतालक्षणो-अनर्थः प्रादुरासीत् ॥

व्या०—वि॰ो॰प्रस्तावाद्विषमं लक्षयति– **विषममिति** । विषमार्थनिबन्धनं विषमं; तच्च विरूपघटनं विरुद्धकार्यजननमनर्थोत्पादनं चेति त्रिविधमित्यर्थः । सङ्गतिमाह– **अस्यापीति** । विरूपशब्दार्थमाह– **अननुरूपयोरिति** । अशक्यसङ्घटनयोरित्यर्थः । **क्वेत्यादि** । स्वरसवल्गितानि स्वशक्तिप्रयुक्तानि फल्गुपदानि निःसारपदानि यस्याः सा । तुषारमहाश्चन्द्रः पदचङ्क्रमणैः पादन्यासैः । मत्कवितया त्वद्यशोविषयीकरणमिन्दुकिरणश्रेणीनिश्रेण्या गगनारोहणप्रायमधिकसाध्यासिद्धेरित्यर्थः । कार्यगुणानां कारणगुणपूर्वकत्वे प्रमाणमाह– **कारणानुविधायित्वादिति** । कार्ये शुक्लाच्छुक्लं नीलान्नीलमित्यादिकारणगुणानुवृत्तिदर्शनादित्यर्थः । **राकेत्यादि** । चन्द्रस्य प्रस्तावे प्रमुखे सौवस्तिकैः स्वस्तिप्रश्नकरैस्तत्समानैरिति यावत् । स्वस्ति पृच्छति सौवस्तिकः । सुस्नातादित्वात् ठञ् । द्वारादित्वाद् वृद्ध्यभाव एजागमश्च । वैवर्ण्यस्य कर्णेजपैः सूजकैस्ततोऽपि धवलैरिति यावत् । कर्णे जपतीति कर्णेजपः । 'स्तम्बकर्णयो रमिजपोः'' इत्यच् प्रत्ययः । ''हलदन्तात् सप्तम्याः-संज्ञायाम्'' इत्यलुक् । मालिन्यं वैवर्ण्यं नीलिमा च तयोरभेदाध्यवसायः । तृतीयभेदं व्युत्पादयति– **कथमपीति** । स्फुटमन्यत् ॥

इति विषमम् ॥

मू०—अस्य प्रथमभिदायाः सममिति कविभिर्विपर्यये कथितम् ।

विषमवैधर्म्यादिहास्याभिधानम् । अस्य विषमस्य विरूपसङ्घटनारूपायाः प्रथमभिदाया विपर्ययोऽनुरूपसङ्घटनारूपश्चारुत्वहेतुत्वादलङ्कारत्वेन गणितः । इतरभेदद्वयविपर्ययस्य तु तदभावान्नालङ्कारत्वम् । अनुरूपसमागमस्तु प्रस्तूयतेऽत्रेति समम् ।

यथा—

कौमुदीव तुहिनांशुमण्डलं
जाह्नवीव शशिखण्डमण्डनम् ।
पश्य कीर्तिरनुरूपमाश्रिता
त्वां विभाति नरसिंह भूपते ॥

व्य०—सङ्गतिसूचनापूर्वकं समं लक्षयति— अस्येत्यादि । सङ्गतिं व्यनक्ति— विषमेति । ननु संग्रहे विपर्ययग्रहणाद्विषम विपरीतं सममिति लक्षणं भवति । तथा च समविपरीतं विषममित्यपि सुवचत्वादन्योन्याश्रयता स्यात् । असम्भवि च लक्षणं द्वितीयतृतीय-भेदविपर्यासासम्भवादित्याशङ्क्य व्याचष्टे— अस्येत्यादि । प्रथमभेदमात्र-विपर्ययस्य विवक्षितत्वान्नासम्भवो नाप्यन्योन्याश्रयता । विपर्ययशब्दस्य सङ्गति-सूचनार्थस्यानुरूपसङ्घटनं सममित्येतल्लक्षणोपलक्षकत्वादित्यर्थः । ननु प्रथम-भेदविपर्ययवदितरभेदविपर्ययोऽपि किं नालङ्कार इत्याशङ्क्याह— इतरेति । संज्ञां व्युत्पादयति— अनुरूपेति । शेषं सुगमम् ॥

इति समम् ॥

मू०— कारणविपरीतफलोत्पत्तौ यत्नो विचित्रमित्युक्तम् ॥३९॥

यथा—

मलिनयितुं खलवदनं विमलयति जगन्ति देव कीर्तिस्ते ।
मित्राह्लादं कर्तुं मित्राय दुह्यति प्रतापोऽपि ॥

अत्र विमलीकरणलक्षणस्य कारणस्य मलिनीकरणरूपं कार्यं विपरीतमेव प्रयत्नविषयत्वेनोपात्तम् । यदि मलिनयितुमभिल-षति किमिति विमलयतीति कारणप्रतिषेधद्वारात्र कार्यवैपरीत्य-प्रतीतिः । यदि धवलं कारणं तर्हि कथं जनयति मालिन्यमिति । कार्यवैपरीत्यप्रतीत्या कारणप्रतिषेधस्तु विषयो विषमालङ्कारस्य ॥

व्या०— विरोधप्रस्तावादेव विचित्रं लक्षयति— **कारणेत्यादि** । कारणविपरीतकार्योद्योगो विचित्रमाश्चर्यहेतुत्वादित्यर्थः । उदाहरति— **विमलयितुमिति** । लक्ष्ये लक्षणं पातयति— **अत्रेति** । एवं मित्रसन्तापकारिणो मित्रद्रोहस्य तद्विपरीतकार्यमित्राह्लादः प्रयत्नगोचर इति योज्यम् । नन्वस्य विरुद्धकार्यजननरूपाद् द्वितीयविषमभेदात् को भेद इत्याशङ्क्येह कारणप्रतिषेधमुखेन कार्यवैपरीत्यप्रतीतिः; विषमप्रभेदे तु कार्यवैपरीत्यप्रतीत्या कारणप्रतिषेध इति भेद इत्याह— **यदीत्यादि** । इह हि विपरीतकार्यनिष्पादनप्रयत्नोपलक्षणम् ? तत्र मलिनीकर्तुं धवलीकरोतीत्युक्ते प्रवृत्त्यवस्थायामेव नेदं मालिन्यकारणमिति कारणनिषेधः प्रतीयते पश्चान्नेदं धावल्यकार्यमिति कार्यवैपरीत्यं प्रतीयते । विषमे तु विपरीतकार्यजननस्यैव सिद्धावस्थस्य लक्षणत्वात् धवलेन मलिनीकृतमित्युक्ते कथं कृतमिति कार्यवैपरीत्यं प्राक् प्रतीयते पश्चात् धवलस्य कारणत्वप्रतिषेध इति विषमाद्वैषम्यमित्यर्थः ॥

(इति) विचित्रम् ॥

मू०—अधिकमिदं गदितं तद्यत्राननुरूपताश्रयाश्रयिणोः ।

अत्र विरोधस्य प्रक्रान्तत्वमेवैतन्निरूपणकारणम् । अत्राना-नुरूप्ये हि विरोधस्य जागरूकत्वात् ।

यदिह न दिशां सीम्नि व्योम्नः स्थलेऽप्यमितं यश-
स्तव कथमपि ज्योत्स्नागौरं नृसिंह नरेश्वर ।
तदिदमखिलं चित्रं पञ्चाशता परमक्षरैः
कृतपरिकरे वाग्व्यापारे निवेशयते कविः ॥

अत्र यथा दिगन्ताद्याधारादाधेयस्य यशसो महत्वमुपनिबद्धं तथा वाग्व्यापारस्य पारिमित्येऽपि यशसो महत्वम् ॥

व्या०— अथ विरोधप्रस्तावादेवाधिकं लक्षयति- **अधिकमिति** । आधाराधेययोरनानुरूप्यमधिकमित्यर्थः । सङ्गतिमाह- **अनानुरूप्ये हीति** । तच्च द्विविधमाधेयाधिक्यादाधाराधिक्याच्चेति । तत्राद्यमुदाहरति- **यदि हेत्यादि** । यद्दिगन्तादिष्वप्यमितं तदतिमिते वचसि निवेश्यते तदङ्गुल्यग्रे करियूथशतं वसतीतिवच्चित्रमित्यर्थः । अत्राधेयाधिक्यं दर्शयति- **अत्रेति** । द्वितीयं तु स्वयमूह्यमिति भावः ॥

(इति) अधिकम् ॥

मू०—भवति क्रियोपजननं यद्यन्योन्यं तदान्योन्यम् ॥४०॥

परस्परस्य क्रियाजननस्य विरुद्धत्वादत्र निरूपणावसरोऽस्यालङ्कारस्य ।

पृथ्वी पूर्वापरगिरिघनोत्तुङ्गवक्षोजनम्रा
भूषा बाहोरजनि भवतः श्रीनृसिंह क्षितीन्द्र ।
बाहुश्चास्याः सुरगजकरस्थूलदीर्घः समग्रां
कान्तिं पुष्णात्यघटघटनाचातुरीयं विधातुः ॥

अत्र भुजस्य भूमिरभवद्भूषणं तस्याश्चायमित्यनयोर्भूषणक्रियां प्रत्यन्योन्यजनकत्वमुक्तम् अत एवोपमानोपमेयभावः प्रतीयते । भेदास्तु सरस्वतीकण्ठाभरणे द्रष्टव्याः ॥

व्या०— विरोधप्रस्तावादन्योन्यालङ्कारं लक्षयति- **भवतीत्यादि** । अन्योन्यक्रियाव्यतिहारोऽन्योन्यालङ्कार इत्यर्थः । सङ्गतिमाह- **परस्परेति** । **पृथ्वीत्यादि** । स्पष्टम् । साक्षादन्योन्यजननस्यासम्भवेऽपि क्रियाद्वारा न विरोधः । क्रिया चात्र भूषणरूपेत्याह- **अत्रेति** ।

(इति) अन्योन्यम् ॥

मू०—आधेयमनधिकरणं युगपद्यद्येकमप्यनेकत्र ।
यदसम्भावितवस्त्वन्तरकरणं च त्रिधा विशेषोऽसौ ॥४१॥

इह विरोधावसर एवास्य निरूपणमुचितम् । त्रिधा क्रमेण यथा—

निपीतोऽयं वीर क्षणमपि विलासस्तव गिरा-
महो यावज्जीवं मनसि विदुषां पल्लवयति ।
रसालानां स्वादं कुवलयदलानां परिमलं
प्रसादं ज्योत्स्नानामपि च शरदारम्भसुहृदाम् ॥

अत्र गिरां विलासस्याधारस्य श्रवणाञ्जलिपुटपानानन्तरक्षणेऽवस्थानासम्भवेऽप्याधेयानां माधुर्यादीनां गुणानामवस्थितिरुक्ता ।

रणद्गीर्वाणस्त्रीवलयतुमुलोन्नेयसुभट-
स्वयंग्राहोद्वाहाद्द्रुतमुपगतो वीरसमरात् ।
समस्तोऽप्येषत्वां भयविधुरधीरध्वसु वने
वने शैले शैले पुरि पुरि च पश्यत्यरिजनः ॥

अत्रैकस्याप्याधेयस्य वीरस्य यौगपद्येन मार्गादिष्वनेकेषु स्थितिरुपनिबद्धा ॥

मन्दारमालोकयितुं गृहीत-
व्रतं मदीयं नयनं यदासीत् ।
तत्साम्प्रतं वीर नृसिंह देव
त्वदीक्षणेनाजनि पूर्णकामम् ॥

अत्र त्वां पश्यता मम नयनेन सुरतरुर्दृष्ट इति प्रतीतेरसम्भावितमेव तद्दर्शनं कृतम् ॥

व्या०— पूर्विकयैव सङ्गत्या विशेषालङ्कारं लक्षयति— **आधेयमित्यादि** । आधारमन्तरेणाधेयस्थितिकथनं परिमितस्यैकस्य वस्तुनो युगपदनेकत्रावस्थानमशक्यवस्तुकरणं चेति त्रिविधो विशेष इत्यर्थः । **निपीत इत्यादि** । सुगमम् । **रणदित्यादि** । वलयतुमुलः कङ्कणरवस्तेनोन्नेयः सुभटानां स्वयंग्राह एवोद्वाहो यत्र तस्मात् समरात् । लक्षणार्थे योजयति— **अत्रैकस्येति** । **वीरस्येति** । श्लोके वीरेति सम्बुद्धिनिर्दिष्टस्य राज्ञो नरसिंहस्य इत्यर्थः । अनन्तरोदाहरणेऽत्यन्तासम्भावितमन्दारदर्शनं कृतमित्यशक्यवस्तुकरणमित्याह— **अत्र त्वामिति** ।

(इति) विशेषः ॥

मू०—किञ्चित् केनापि यथा विहितं तद्वस्तु तत्ततोऽन्येन ।
क्रियतेऽन्यथा तथैव व्याघातोऽयं समाख्यातः ॥४२॥

येनोपायेन यत् किमपि कार्यं कोऽप्येकः करोत्यपरः पुनस्तेनैवोपायेन तदन्यथा कुरुते तदा कृतस्य कार्यस्य व्याघातहेतुत्वात् व्याघातनामलङ्कारः ।

यथा:—

तेजसा जगतस्तापं कृतं किरणमालिना ।
नरसिंह महीपालस्तेजसैव निरस्यति ॥

अत्र तेजोरूपेण येनोपायेन किरणमालिना तापः कृतस्ते-नैव त्वयापहृत इति कृतस्य कार्यस्य व्याहतत्वादयं व्याघातः ॥

व्या०— तथैव सङ्गत्या व्याघातं लक्षयति– किञ्चिदित्यादि । यत्र केनचित् कर्त्रा येन साधनेन यद्वस्तु यथा कृतं ततोऽन्येन कर्त्रा तेनैव साधनेन तदेव वस्तु ततोऽन्यथा क्रियते स व्याहन्यते कृतं कार्यमनेनेति व्याघातो नामालङ्कार इति व्याचष्टे– येनेति उदाहरति– तेजसेत्यादि । स्पष्टम् ॥

(इति) व्याघातः ॥

भू०—सौकर्येण निबद्धा कार्यविरुद्धा क्रिया भवेद्यत्र ।
ख्यातोऽभिमतव्याहतिहेतुर्व्याघात एषोऽपि ॥४३॥

किमपि कार्यं कर्तुं यत् सम्भावितं भवति कारणं तद्यदि तत्कार्यविरुद्धकार्यकारित्वेन सौकर्यादुपपाद्यते तदा संभाव्यमानकार्य-व्याहतिहेतुत्वादयमपि व्याघात एव । कार्यविरुद्धक्रियायाश्चात्र सौकर्यं; कारणस्य सुतरां तदनुगुणत्वात् । अभिमतेतरस्य पुनरिह कारणस्य[1] सुकरतयोपपद्यमानत्वादभिमतकार्यानुत्पत्तावनभिमतप्रादुर्भावे च भवतो विषमालङ्काराद्भिन्नविषयत्वेन स्थितः ।

यथा—

जटाबन्धं वल्कलावरणमित्यादि

अत्र नरसिंहदेववितरणसदृशस्य लाभकरणं यत्तपः सम्भावितं तल्लाभविरुद्धमलाभं प्रति सौकर्यादुपपादितम् । यथा वा

---

१. 'कार्यस्य' इति व्याख्यानिर्दिष्टः पाठः

जयश्रियं प्राप्तुमकामयन्त
नृसिंह युद्धात्तव वैरिवीराः ।
त्वया तु चक्रीकृतकार्मुकेण
सुरश्रियं(स्त्रियः) सङ्गमितास्ततस्ते ॥

व्या० — व्याघातान्तरमाह— **सौकर्येणेत्यादि** । कस्यचित् कार्यस्य निष्पत्तये सम्भावितस्य कारणविशेषस्य सौकर्येण तद्विरुद्धकार्यनिष्पादनं यत् सोऽपि सम्भाव्यमानकार्यव्याहतिहेतुत्वाद् व्याघात इति व्याचष्टे— **किमपि इत्यादि** । ननु कार्यान्तरस्य कथं सुकरत्वमत आह— **कार्यविरुद्धेति** । नन्वस्य तृतीयाद्विषमप्रभेदात् को भेदस्तत्राह— **अभिमतेतरस्येति** । अनभिमतस्येत्यर्थः । कार्यस्येति पाठः । इह सम्भावितकार्यस्य कार्यत्वे हि सौकर्यादनर्थेतरकार्यकारित्वं; विषमे तु कार्यस्यानुत्पत्तिरनर्थोत्पत्तिश्चेति भेद इत्यर्थः । अनभिमतप्रादुर्भावोऽनर्थोत्पत्तिः । उदाहृत्य योजयति— **जटेत्यादि** । उदाहरणान्तरमाह— **जयेत्यादि** । अत्र जयश्रीप्राप्तिकार्यं प्रति सम्भावितकारणस्य युद्धस्य सौकर्यात् तद्विरुद्धसुरश्री(स्त्री)सङ्गमरूपानर्थेतरकार्यान्तरजनकत्वमुक्तम् ॥

(इति) व्याघातः ॥

मू०—इत्थं निरूप्य कतिचिद्विरोधगर्भानलङ्कारान् ।
कथयामो वयमधुनालङ्कारान्शृङ्खलाकारान् ॥ ४४ ॥

यद्यत्पूर्वं तत्तद्यथोत्तरं चेत् क्रमेण संश्रयति ।
हेतुत्वं भवति तदा कारणमालेत्यलङ्कारः ॥ ४५ ॥

वितरणे करुणा तत्र कारणं
वितरणं सुकृतस्य निबन्धनम् ।
सुकृतहेतु यशो यशसा न किं
भवति वीर नृसिंह महीपते ॥

व्या०— अथोत्तरालङ्कारसन्दर्भस्य सङ्गतिमाह- इत्थमित्यादि । तत्र प्रथमं कारणमालां निरूपयति- यदित्यादि । पूर्वपूर्वस्य क्रमादुत्तरोत्तरं प्रति कारणत्वेन कारणमालेत्यर्थः । वितरण इत्यादि । सुकृतस्य निबन्धनं सुकृतहेतुकमित्यर्थः । किं न भवति । सर्वं सिध्यतीत्यर्थः । अत्र करुणा-वितरणं प्रति कारणं तत् सुकृतं प्रतीत्यादि योज्यम् । कार्यकारणक्रम एवात्र चमत्कारहेतुः ॥

(इति) कारणमाला ॥

मू०—यत्र विशेषणभावं पूर्वं पूर्वं प्रति क्रमेणैव ।
भजति परं परमेषालंकृतिरेकावली कथिता ॥ ४६ ॥

राज्ञां सभाः सकवयः कवयो निसर्ग
सारस्वतप्रसरनिर्मितरम्यकाव्याः ।
काव्यानि वर्णितभवच्चरितान्यतीव
चित्राणि वीर भवतश्चरितानि भान्ति ॥

व्या०— कार्यकारणभावाश्रितां कारणमालामुक्त्वा सम्प्रति तद्वैधर्म्येण विशेषणविशेष्यभावाश्रितामेकावलीमाह- यत्रेत्यादि । यत्रोत्तरस्य पूर्वपूर्वो-

पस्कारकत्वं स एकावल्यलङ्कारः । राज्ञामित्यादि । भवतश्चरितान्यतीव चित्राणि भान्ति चित्रतया भान्तीत्यर्थः ॥

(इति) एकावली ॥

मू०—यत्रोत्तरोत्तरगुणावहत्वमुल्लसति पूर्वपूर्वस्य ।
तदिदं मालादीपकमित्याम्नातं विपश्चिद्भिः ॥ ४७ ॥

मालारूपविच्छित्तिविशेषावलम्बनेन दीपकप्रस्तावं त्याजयित्वा लक्षणमिह दर्शितम् ।

तव क्रियन्ते करुणाकटाक्षैः
श्रियः कवीनां नरसिंह भूप ।
ताभिर्विकासा मनसः पुनस्तैः
सूक्तानि तैस्त्वद्गुणवर्णनानि ॥

अत्र कटाक्षादिभिः क्रमेण श्रीप्रभृतीनामुत्कर्षः करणक्रिया-निबन्धनं च दीपकम् ॥

व्या०— उत्तरोत्तरोपस्कारकत्वेनैकावल्युक्ता; तद्वैधर्म्येण पूर्वपूर्वस्य उत्तरोत्तरोपस्कारकत्वेन मालादीपकमाह— यत्रोत्तरोत्तरमित्यादि । यत्र पूर्वस्योत्तरोत्तरोपस्कारकत्वं निबध्यते तन्मालादीपकमित्यर्थः । दीपकप्रस्तावाति-क्रमेणेह निरूपणे कारणमाह— मालारूपेति । तवेत्युदाहरणे लक्षणार्थं योजयति— अत्र कटाक्षेति । दीपकांशं दर्शयति— करणक्रियेति । तव क्रियन्त इत्याख्यातनिर्दिष्टकरणक्रियानिबन्धनं मालादीपकमित्यर्थः ॥

(इति) मालादीपकम् ॥

मू०—वस्तुस्पृहणीयत्वे विश्रान्ति चेद्यथोत्तरं तनुते ।
सारो नाम तदानीं कथितोऽलङ्कारसारज्ञैः ॥ ४८ ॥

एके चन्द्रकलावचूडमपरे मौलौ तदीये स्थितां
स्वर्गङ्गामितरे तदाश्रितपदाम्भोजं मधुध्वंसिनः ।
सर्वे तन्मनसि स्थितां श्रियमनुध्यायन्ति सैषापि यद्
भ्रूभङ्गैकवशंवदा स जयति श्रीमान् नृसिंहो नृपः ॥

इह भगवतः खण्डेन्दुचूडस्यापेक्षया सुरसिन्धोरुत्कृष्टत्वं तदपेक्षया परमपुरुषस्य तदपेक्षया लक्ष्म्यास्तदपेक्षया श्रीमतो नृसिंहदेवस्य ।

यथा वा

अन्तर्विष्णोस्त्रिलोकी निवसति फणिनामीश्वरे सोऽपि शेते
सिन्धोः सोऽप्येकदेशे तमपि चुलुकयां कुम्भयोनिश्चकार ।
धत्ते खद्योतलीलामयमपि गगने श्रीनृसिंह क्षितीन्द्र
त्वत्कीर्तेः कर्णनीलो त्पलमिदमपि च प्रेक्षणीयं विभाति ॥

व्या०— मालाविच्छित्तिप्रस्तावात् सारालङ्कारं निरूपयति—वस्त्वित्यादि । यत्र पूर्वपूर्वापेक्षयोत्तरोत्तरस्य सारत्वं निबध्यते स सारालङ्कार इत्यर्थः । एक इत्यादि । निगदव्याख्यातम् । अन्तरित्यादि । अत्र त्रैलोक्यादिपूर्वपूर्वापेक्षयोत्तरोत्तरस्य सारत्वकथनात् कीर्तेः सर्वोत्तरत्वसिद्धिः । 'कृञ्चानुप्रयुज्यते लिटि' इत्यत्रानुग्रहणस्य व्यवहितप्रयोगश्चिन्त्यः । कालिदासादिमहाकविप्रयोगप्राचुर्यादनुग्राह्यः ॥

(इति) सारालङ्कारः ॥

मू०— वाक्यार्थो यदि हेतुर्भवति पदार्थो विशेषणद्वारा ।
द्विविधं कथयन्ति तदालङ्कारं काव्यलिङ्गमिति ॥ ४९ ॥

नेदमनुमानम् । ज्ञाप्यज्ञापकभावाभावात् । समर्थ्यसमर्थकभावेऽप्यत्र नार्थान्तरन्यासाविर्भावः । समर्थ्यवाक्यार्थस्य समर्थकवाक्यार्थं प्रति सापेक्षत्वात् । यत्रेतरनिरपेक्षस्य वाक्यार्थस्य हेतुत्वं तत्रार्थान्तरन्यासः । ततश्च सामान्यविशेषरूपवाक्यार्थगत एवार्थान्तरन्यासो भवितुमर्हति यत्र सम्भवतीतरनिरपेक्षत्वम् ।

नापि दृष्टान्तः । सामान्यरूपयोरेव विशेषरूपयोरेव वाक्यार्थयोरेव परस्परनैरपेक्षेण हेतुत्वे तस्य सम्भवात् । यदि तु कार्यकारणरूपयोरेव तयोः परस्परसव्यपेक्षत्वेन हेतुत्वं तदा तावदेकं वाक्यार्थवृत्तिकाव्यलिङ्गम् । अत्र च वाक्यार्थ एव हेतुरतस्तद्वाचकस्य हिशब्दादेः उपादाने पौनरुक्त्यम् । यदा पुनः पदार्थस्य हेतुत्वं तदा यदि तृतीयान्तं पञ्चम्यन्तं वा पदमुपादीयते तदा हेतुत्वमात्रं नालङ्कारः । यदा तु विशेषणद्वारा कारणोपनिबन्धस्तदा पदार्थवृत्ति काव्यलिङ्गम् । एवमिदं द्विभेदम् ।

क्रमेण यथा

अलं भोः पौलोमीसहचरपुरीवाहमहिलाः
कुचाभोगे कालागरुभिरफलस्थासकविधिः ।
कलिङ्गेन्दोः कीर्तिस्त्रिदशपरिषद्गीतमहिमा
समन्ताद्गात्रं वः सरसमनुलिम्पत्यविरलम् ॥

अत्र कालागरुस्थासकविधेरफलत्वे साध्ये कलिङ्गेन्दोरित्यादिवाक्यार्थो हेतुत्वेनोपात्तः ।

त्वद्वैरिक्षितिपालसौधवलभीरिन्द्रोलिशालामधु-
च्छत्रोड्डीनसरोपघोरमरघ दंशव्यथाव्याकुलाः ।
मन्दाः स्यन्दनवाजिनः प्रतिपथप्रस्थानदौःस्थ्यं मुहुः
क्षोणीपाल नृसिंह देव नितरां कुर्वन्ति भासां प्रभोः ॥

इह रविरथतुरगगमनान्तराये साध्ये मन्दा इति विशेषणरूपः पदार्थो हेतुतया निर्दिष्टो मन्दतायाश्च त्वद्वैरीत्यादिविशेषणरूपः ॥

व्या०—एवं शृङ्खलाविच्छित्याश्रितान् अलङ्कारान् निरूप्य तर्कन्याय-मूलालङ्कारद्वये काव्यलिङ्गं तावदाह—वाक्यार्थ इत्यादि । यत्र हेतुः कारणं वाक्यार्थगत्या पदार्थगत्या वा विशेषणद्वाराङ्गत्वेन निबध्यते तद् द्विविधं काव्यलिङ्गं वाक्यार्थहेतुकं पदार्थहेतुकं चेत्यर्थः अस्यानुमाना-द्भेदमाह— नेदमिति । हेतुमाह— ज्ञाप्येति । व्याप्त्याद्यपेक्षया अप्रतितप्रत्यायनाभावादित्यर्थः तर्हि प्रतीतसमर्थकत्वादर्थान्तरन्यासादभेद इत्याशङ्क्याह— समर्थ्यसमर्थकभावेऽपीति । अत्रोपपत्तिमाह— समर्थ्यवाक्यार्थस्येति । समर्थ्यसमर्थकवाक्यार्थयोः सापेक्षत्वे काव्यलिङ्गं निरपेक्षत्वे त्वर्थान्तरन्यास इत्यर्थः । फलितमाह— तत-श्चेति । सामान्येन विशेषसमर्थनं विशेषेण सामान्यसमर्थनं चेति द्विविध एवार्थान्तरन्यस इत्यर्थः । कार्येण कारणसमर्थनं कारणेन कार्यसर्थनं चेति भेदावित्युद्भटः । तन्निरासायैवकारः । कुत इत्यत आह— यत्रेति । निरपेक्षत्वस्य तत्रैव सम्भवात् तद्गत एवार्थान्तरन्यासः कार्यकारणगतं तु काव्यलिङ्गमेवेति भावः । तर्हि दृष्टान्तेऽतिव्याप्तिरित्य आह— नापि दृष्टान्त इति । केवलसामान्यरूपयोः केवलविशेषरूपयोर्वा निरपेक्षयो-र्हेतुत्वेन दृष्टान्त इत्यर्थः । प्रकृते किमायातमत आह—यत्त्विति । कार्यकारणरूपयोर्वाक्यार्थयोः सापेक्षयोर्हेतुत्वे वाक्यार्थहेतुत्वे काव्यलिङ्ग-मित्यर्थः । अत्रायं विवेकः । प्रत्याय्यप्रत्यायकभावेऽनुमानम् ।

समर्थ्यसमर्थकभावे तु सामान्यविशेषरूपवाक्यार्थयोर्निरपेक्षयोस्ताटस्थ्येन हेतुत्वेऽर्थान्तरन्यासः । केवलसामान्ययोः केवलविशेषयोर्वा निरपेक्षयोरेव हेतुत्वे दृष्टान्तः । कार्यकारणरूपवाक्यार्थयोस्तु सापेक्षयोर्हेतुत्वे वाक्यार्थ-हेतुकं काव्यलिङ्गमिति । अत्रापरं विशेषमाह– अत्र चेति । आकाङ्क्षावशेन वाक्यार्थस्य हेतुत्वे सिद्धे हेत्वर्थशब्दप्रयोगः पौनरुक्त्या(व)ह इत्यर्थः । पदार्थहेतुकेऽपि काव्यलिङ्गे कञ्चिद्विशेषमाह– यदा पुन-रिति ॥ पदार्थस्य विशेषणगत्या हेतुत्वे चमत्कारकारिहेत्वर्थविभक्तिप्रयोगे तदभावान्नालङ्कारत्वमित्यर्थः । द्वितीयभेदस्य स्वरूपमाह– यदात्विति । पदार्थस्येति शेषः । यत्र पदार्थो विशेषणद्वारा हेतुत्वेन निवध्यते तत् पदार्थहेतुकं काव्यलिङ्गमित्यर्थः । अलमित्यादि । स्पष्टम् । त्वदित्यादि । रिञ्छोलिमधुच्छत्राणि क्षौद्रपटलानि तेभ्य उड्डीना उत्पतिता सरधा मधुमक्षिकाः । अत्र पदार्थहेतुत्वमुद्भावयति– इहेति ।

(इति) काव्यलिङ्गम् ॥

मू०—अनुमतमनुमानमिदं यत्र स्तः साध्यसाधने कथिते ।

अत्र साध्यसाधनकथनमात्राभिधानं व्याप्त्यादिप्रदर्शनं न कर्तव्य-मित्युपदेशे पर्यवसितम् । इतरथा कथमेतत् तर्कानुमानतो भेदं भजेत् । किं च पञ्चावयवत्वे सत्यप्यवयवान्तरानुपादानं पौनरुक्त्यपरिहाराय । तथाहि– केचिदवयवान्तराभिधानमधिकं मन्यमानास्तर्कानुमानेऽपि द्वित्रावयवत्वमेवाभ्युपगच्छन्ति । विशेषतश्चमत्काराय श्लेषरूपकाप-ह्नुत्याद्यनुप्राणितत्वेन विच्छित्यन्तरमादरणीयम् ।

यथा

नरसिंह महीपाल विद्मरत्वां मकरध्वजम् ।
मार्गणास्तव सञ्जाताः कथं सुमनसोऽन्यथा ॥

अत्र नरसिंहदेवविषयं मकरध्वजत्वं साध्यम् । तद्विशिष्टश्च धर्मी पक्षः । तत्र तावत् सुमनोमार्गणत्वं हेतुर्वर्तते सपक्षेऽन्यस्मिन्नपि मकरध्वजे वर्तते; मकरध्वजादिरत्र क्वापि न वर्तते । तेन त्रिरूपो हेतुः नरसिंहदेवनिष्ठं मकरध्वजत्वमनुमापयतीत्यत्र पक्षे व्याप्तिः सपक्षे सत्वं विपक्षाद्व्यावृत्तिश्चेति हेतोस्त्रिरूपत्वं दर्शितम् । अथ व्याप्यात् सुमनोमार्गणत्वात् व्यापकस्य मकरध्वजत्वस्य ज्ञानमिहेति श्लेषप्रतिभोत्थापितमिदमनुमानम् । रूपकादिच्छायानुगृहीतमप्यनयैव दिशा द्रष्टव्यम् । शुद्धमप्येतत् सम्भवति ।

यथा

कार्याणि कारणगुणान् न परित्यजन्ती-
त्यव्याप्तमाहुरिह वीर नृसिंह देव ।
न्यग्गत्वरेण तव दान जलेन स्नुता
मेरोः शिखामपि विलङ्घ्य विभाति कीर्तिः ॥

अत्र राजा त्वसम्भवमनुमानस्याभिधानमकरोत् ॥

व्या०—तर्कन्यायमूलप्रस्तावात् अनुमानं लक्षयति— अनुमतमित्यादि । साध्यं व्यापकं सिषाधयिषतो धर्म इति यावत् । साधनं व्याप्यं; व्याप्तिपक्षधर्मतावल्लिङ्गमिति यावत् । तेन तन्मात्रं यन्निर्दिश्यते सोऽनुमानाख्योऽलङ्कार इत्यर्थः । तर्कानुमानात् को

भेदस्तत्राह— **अत्रेति** । केवलसाध्यसाधननिर्देशस्येह लक्षणत्वात् व्याप्त्यादिनिर्देशसापेक्षात् तर्कानुमानाद् भेद इत्यर्थः । ननु तर्कानुमानवदत्रापि पञ्चावयवप्रयोगः किं न क्रियते तत्राह— **किं चेति** । तावतैव साध्यसिद्धेरिति भावः । किञ्च तर्कानुमानेऽपि पञ्चावयवत्वं न सर्वसम्मतमित्याह— **तथा हीति** ।

यथाहुः—

त्रीनुदाहरणान्तान् वा यद्वोदाहरणादिकान् ।
मीमांसकाः सौगता(तै)स्तु सोपनीतमुदाहृतम्' ॥

इति । अथेह कश्चिद्विशेषमाह— **विशेषत इति** । **नरसिंहेत्यादि** । मार्गणा अर्थिनः शराश्च । सुमनसो विद्वांसः कुसुमानि च । अत्र साध्यादिकं विविनक्ति— **अत्रेति** । अत्र हेतोस्त्रैरूप्यं दर्शयति— एवमलङ्कारानुप्राणितनुमानमुदाहृत्य शुद्धमुदाहरति— **कार्याणीत्यादि** । न्यग्गत्वरेण निम्नगामिनेत्यर्थः । मेरुशिखाविलङ्घनेन कीर्तेस्तूर्ध्वगामित्वमुक्तम् । अत्र नीचगामिनो जलादनीचगामिन्याः कीर्तेरुत्पत्तिरलङ्कारान्तरासङ्कीर्णैव । कार्यस्य कारणगुणानुविधानव्याप्तिभङ्गो लिङ्गमिति शुद्धमिति बोद्धव्यम् । अत्र राज्ञो विप्रपत्तिरित्याह । **अत्रेति** ।

(इति) अनुमानम् ॥

मू०—प्रथमं निर्दिष्टानां यस्मिन्नर्थान्तराश्रयोऽर्थानाम् ।
अनुनिर्देशो भवति क्रमेण तत् स्याद्यथासङ्ख्यम् ॥५०॥

आयामश्लाघनीयं किमभिमतफलप्रापकं किं प्रियं किं
विस्तीर्णं किं स्थिरं किं विमलमथ च किं श्रूयतां श्रीनृसिंह ।
दोस्तम्भस्त्यागलीला मितवचनगुरो राजलक्ष्मीर्यशस्ते
नाहीशो न द्युशाखी न मधु न गगनं नाद्रिनाथो न चन्द्रः ॥

व्या०—एवं तर्कन्यायमूलमलङ्कारद्वयमुक्त्वा सम्प्रति न्यायमूलालङ्कारेषु यथासंख्यालङ्कारं तावदाह— प्रथममित्यादि । यत्रोद्देशिनामनूद्देशिनां चार्थानां क्रमेण सम्बन्धो निबध्यते स क्रमापरनामा यथासंख्यालङ्कार इत्यर्थः । प्रथमनिर्दिष्टा उद्देशिनः । पश्चान्निर्दिष्टास्त्वनूद्देशिनः । तेषां प्रथमस्य प्रथमेन द्वितीयस्य द्वितीयेनेत्यादिकः क्रमसम्बन्धो न्याय्यः । 'यथाक्रमश्च देशसामान्याद्' इति न्यायादैन्द्राग्न्यादिकाम्येष्टीनां तद्याज्यापुरोनुवाक्यायुगलैः 'उभा वामिन्द्राग्नी' इत्येवमादिभिः यथा वा समिदादीना प्रयाजादीनां तदनुमन्त्रणमन्त्रैः 'वसन्तमृतूनाम्' इत्यादिभिरिति भावः । आयामेत्यादि । अत्र प्रश्नोत्तरत्वेनायामादिगुणविशिष्टतयोद्दिष्टानां दोस्तम्भादीनां निर्देश्यतयानूद्दिष्टैरहीश्वरादिभिः क्रमेण सम्बन्धः ॥

इति यथासंख्यम् ॥

मू०—एकस्मिन् यदनेकं क्रमादनेकत्र वा भवत्येकम् ।
तमलङ्कारनिरूपणनिपुणाः पर्यायमब्रुवत ॥५१॥

अत्र क्रमप्रक्रम एवास्य निरूपणकारणम् । यदा यौगपद्येनेकस्यानेकत्र स्थितिरुपनिबध्यते तदा विशेषविषयमप्याक्रामयत्ययमित्याशयेनात्र क्रमग्रहणम् । न चैष परिवृत्तिः । विनिमयेन विनैवास्य प्रवृत्तत्वात् । पर्यायक्रमत्वमाश्रित्य प्रगल्भमानत्वादन्वर्थमस्याभिधानम् ।

क्रमेण यथा

काश्मीरपांसुरुचिरांशुकचारुहारै-
र्या प्रागभौ कुचतटी रिपुसुन्दरीणाम् ।
सैवाद्य भाति कुपिते त्वयि वीर भूभृद्
धातुच्छटातरुपलाशकरक्तसूत्रैः ॥

अत्र कुंकुमरजः प्रभृतयो गैरिकप्रमुखाश्चैकस्मिन्नाश्रये कुचतटे क्रमवर्तिनः कथिताः ।

प्रागासी न्मकरन्दपिच्छिलतले पद्मस्य गर्भे ततः
शौरेः कौस्तुभकान्तिपूरसुभगाभोगे भुजाभ्यन्तरे ।
आवासस्तव लक्ष्मि सम्प्रति पुनर्निर्व्याजमूर्च्छत्कृपा
स्रोतः शीतलिते नृसिंह वसुधानाथस्य नेत्राञ्चले ॥

अत्रैकस्या एव लक्ष्म्या पद्मगर्भादावनेकस्मिन् नाश्रये स्थितिः क्रमवर्त्तिनी ॥

व्या०— क्रमप्रस्तावात् पर्यायं लक्षयति— एकस्मिन्निति । यत्र अनेकस्याधेयस्य क्रमादेकाधारसम्बन्धः एकस्यैवाधेयस्य क्रमादनेकाधारसम्बन्धो वा निबध्यते स द्विविधः पर्यायालङ्कार इत्यर्थः । सङ्गतिमाह— अत्रेति । नन्वेकस्यानेकाधारसम्बन्धाविशेषाद् द्वितीयपर्यायद्वितीयविशेषयोः को विशेष इत्याशङ्क्य क्रमयौगपद्याभ्यामनयोर्भेद इत्याह— यौगपद्येनेति । ननु क्रमादेकस्यानेकसम्बन्धाविशेषात् परिवृत्तेः को विशेष इत्याशङ्क्येह विनिमापितधर्मसम्बन्धाभावाद् भेद इत्याह— न चैष इति । मुख्यार्थकथनपूर्वकं संज्ञाप्रवृत्तिनिमित्तमाह— पर्याय इत्यादि । तद्वति तच्छब्दोपचारात् अर्शादित्वात् पर्यायवान् पर्याय इत्यर्थः । काश्मीरेत्यादि । स्पष्टम् । प्रागित्यादि । गतम् ॥

(इति) पर्यायः ॥

मू०—अधिकन्यूनसमानां न्यूनाधिकतुल्यवस्तुभिर्यत्र ।
विनिमय एषा कथिता परिवृत्तिः कोविदैस्त्रिविधा ॥५२॥

विनिमयः किञ्चिन्मुक्त्वा कस्यचित् स्वीकारः । त्रिविधा अधिकपरिवृत्तिर्न्यूनपरिवृत्तिः समपरिवृत्तिश्च । क्रमेण यथा

नरसिंह महीपाल मदान्धास्तव दन्तिनः ।
ददत्यरिनरेन्द्रेभ्यो दिवमाददते भुवम् ॥

अत्राधिकाया दिवो दानान्न्यूनाया भुवो ग्रहणम् ।

तनौ दत्वा पाकोन्मुखशरसवर्णीं कामपि रुचं
रिपुस्त्रीभ्यस्तासां कलयसि कलिङ्गक्षितिपते ।
प्रभां ताटङ्कानां श्रवणकुसुमानं विलसितं
स्मितानामालोकं स्तनमलयजानां श्रियमपि ॥

इह न्यूनाया शरपाण्डुराया रुचः समर्पणात् ताटङ्कप्रभाप्रभृतीनामधिकानामादानम् ।

प्रतिभटधरणिपतिभ्यो नाराचपरम्पराः शिता दत्वा ।
हरसि नृसिंह नरेश्वर तज्जयलक्ष्मीकटाक्षपरिपाटीः ॥

अत्र नाराचपरम्परापरित्यागात् तुल्यगुणानां कटाक्ष परिपाटीनां कलनम् ॥

व्या०— क्रमादेकस्मिन्ननेकधा सम्बन्धसाम्यात् पर्यायानन्तरं परिवृत्तिं लक्षयति— **अधिकेत्यादि** । न्यूनाधिकतुल्यैरधिकन्यूनसमानां विनिमयः परिवृत्तिरिति वाक्यार्थः । विनिमयशब्दार्थमाह— **विनिमय इति** । अधिकदानेन न्यूनोपादानमधिकपरिवृत्तिः; न्यूनदानेनाधिकग्रहणं न्यूनपरिवृत्तिः । समेन समस्वीकारः समपरिवृत्तिरित्यर्थः । सुगममन्यत् ॥

(इति) परिवृत्तिः ॥

मू०—एकस्यानेकत्र प्राप्तावेकत्र यो भवेन्नियमः ।
ख्याता सा परिसङ्ख्या सङ्ख्यावद्भिश्चतुर्भेदा ॥५३॥

एकानेकाभिधानस्य प्रक्रान्तत्वादिहास्याः कथनम् ।

प्रश्नपूर्वान्यथा चेति सा भवेत् प्रथमं द्विधा
वर्जनीयस्य शाब्दत्वादार्थत्वाच्च द्विधा पुनः ॥५४॥

क्रमेण यथा

आयामश्श्लाघनीयमित्यादि ।

इयं प्रश्नपूर्विका वर्जनीयस्य शाब्दत्वे ।

अङ्ग्ष्वाभरणं नृसिंह नृपते किं किं त्वयाङ्गीकृतं
मौलौ चन्द्रकलावचूडचरणद्वन्द्वं श्रुतं कर्णयोः ।
वक्त्रे वागधिदेवता मधुरिमा कण्ठे भुजे विक्रमः
कारुण्यं हृदये करे वितरणं पादे रिपुक्ष्माभुजः ॥

इयं प्रश्नपूर्विका वर्जनीयस्यार्थत्वे ।

लोकेऽस्मिन् नरसिंहदेवनृपतिर्दाता न कल्पद्रुम-
स्तेजस्वी स न पद्मिनीसहचरः कान्तः स नो चन्द्रमाः ।
गम्भीरः स न वाहिनीपरिवृढस्तुङ्गः स नो मन्दरः ॥
शिल्पज्ञः स न पद्मभूः किमपरं वाग्मी स नो वाक्पतिः ॥

इयमप्रश्नपूर्विका वर्जनीयस्य शाब्दत्वे ।

विद्यासु तृष्णा व्यसनं कलासु
दाने विनोदः समरे विहारः ।
कीर्तौ रतिः काव्यकथासु रागः
तवैव जागर्ति नृसिंह देव ॥

इयमप्रश्नपूर्विका वर्जनीयस्यार्थत्वे ॥

व्या०— एकानेकप्रस्तावात् परिसङ्ख्यामाह— **एकस्येत्यादि** । एकस्यानेकत्र युगपत् प्राप्तावेकतरपरिवर्जनेनैकत्र नियमनं यत्र क्रियते सा परिवर्जनेन सङ्ख्यानात् परिसङ्ख्येत्यर्थः । सङ्गतिमाह— **एकानेकेति** । तस्याश्चतस्रो विधाः श्लोकेन सङ्गृह्णाह— **प्रश्नेत्यादि** । **आयामेत्यादि** । यथा सङ्ख्ये गतमेतत् । अत्रायामश्लाघ्यत्वादिगुणानां दोस्तम्भादिष्वहीश्वरादिषु च प्राप्तेर्दोःस्तम्भादिष्वेव नियमनात् परिसङ्ख्या । अहीनादीनां नाहीन इत्यादिना शब्दादेव निषेध इति वर्जनीयस्य शाब्दत्वम् । **अङ्गेष्वित्यादि** । अत्राङ्गाभरणत्वस्य भगवच्चरणयुगलादिषु मुकुटादिषु च प्राप्तस्य चरणयुगलादिषु नियमनं मुकुटादिनिषेधस्यार्थसिद्धत्वाद्वर्जनीयस्यार्थत्वमित्यर्थः । **लोक इत्यादि** । अत्रापि दातृत्वादिगुणानामुभयत्र प्राप्तौ राज्ञि नियमः कल्पद्रुमादिनिषेधश्च शाब्द एव । **विद्यास्वित्यादि** । अत्रापि तृष्णाव्यसनादीनां विद्याकलादिषु नियमनादर्थाद्धनद्यूतादिनिषेधप्रतीतेर्वर्जनीयस्य अर्थत्वम् ॥

(इति) परिसङ्ख्या ॥

मू०—दण्डापूपिकया यत् स्यादेवार्थान्तरापतनम् ।
अर्थापत्तिरियं सा कथितालङ्कारपारगैर्द्वेधा ॥ ५५ ॥

दण्डापूपिकयोर्भावो दण्डापूपिका । यथा दण्डभक्षणादपूपभक्षणमर्थादापतति तथा कस्यचिदर्थस्य निष्पत्तौ समानन्यायलक्षणसामर्थ्याद्यदर्थान्तरमापतति सार्थापत्तिः । नेयमनुमानम् । समानन्यायस्य सम्बन्धरूपत्वाभावात् । असम्बन्धेन तु तस्यानुत्थानात् ।

इयं च द्वेधा । प्राकरणिकात् अप्राकरणिकस्यार्थादापतने तावदेका । अप्राकरणिकात् प्राकरणिकस्यार्थादापतने तु द्वितीया ।

क्रमेण यथा

अकलङ्कमपि द्विषद्वधू-
वदनेन्दुं मलिनं वितन्वते ।
तव वीर नृसिंह कीर्तयः
सकलङ्कं किमुतेन्दुमण्डलम् ॥

अत्र द्विषद्वधूवदनेन्दुवृत्तान्तः प्राकरणिक इन्दुमण्डलवृत्तान्तमप्राकरणिकमर्थादाक्षिपति ॥

आपातालं निबिडघटितान् कम्पयत्येतदुच्चै-
र्मूर्च्छल्लम्बापटहरहितं स्थावरानप्यशेषान् ।
एतांस्तूलीसमभुजबलान् जङ्गमान् भूभृतस्तान्
यात्रारम्भे तव किमु पुनः श्रीनृसिंह क्षितीन्द्र ॥

अत्र स्थावरभूभृद्वृत्तान्तोऽप्राकरणिको जङ्गमभूभृद्वृत्तान्तं प्राकरणिकमर्थादापूरयति ॥

व्या०— परिसङ्ख्यायां वर्जनीयसाधकत्वप्रसङ्गादर्थापत्तिं लक्षयति— **दण्डापूपिकयेत्यादि** । यत्र कस्यचिदर्थस्य निष्पत्तौ दण्डपूपिकया कैमुतिकन्यायेनार्थान्तरस्य सिद्धिर्निबध्यते सार्थादापादनादर्थापत्तिरित्यर्थः । दण्डापूपिकाशब्दं व्युत्पादयति— **दण्डापूपयोरिति** । मनोज्ञादित्वाद् वुञ्प्रत्ययः । पृषोदरादित्वात् वृद्ध्यभाव इति केचित् । अन्ये तु दण्डापूपौ यत्र न्याये सा दण्डापूपिका; मत्वर्थीयष्ठन्नित्याहुः । दण्डापूपाविव दण्डापूपिका । "इवे प्रतिकृतौ" कन् प्रत्यय इत्यपरे । वाक्यार्थमाह— **यथेति** । यथा दण्डो मूषिकभक्षित इत्युक्ते तत्सहभाव्यपूपभक्षणमर्थसिद्धं तथेत्यर्थः । अनुमाने अन्तर्भावं परिहरति— **नेयमिति** । सम्बन्धो व्याप्तिस्तदेकजीवि(त)भूतमनुमानम् ।

अर्थापत्तिस्तु न्यायरूपेति भावः । **अकलङ्कमित्यादि** । अकलङ्कं निष्कलङ्कम् । **आपातालमित्यादि** । लम्बापटहः । स्थावरभूभृतः पर्वताः । जङ्गमभूभृतो राजानः ॥

(इति) अर्थापत्तिः ॥

मू०— तुल्यप्रमाणशैष्टयात् प्राप्तावेकत्र यौगपद्येन ।
उभयोः समानबलयो स्फुरति विरोधे विकल्प इत्युक्तः ॥५६॥

त्वद्विप्रयोगे परितप्यमाना
मृणालमृद्वी मदनज्वरेण ।
इत्थं कथञ्चित् बत वेपमाना
ब्रूते सखीं वीर नृसिंह देव ॥

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
किमत्र गच्छामि करोमि किं वा
प्रवालशय्याशरणं शरीरम् ॥

व्या०— वाक्यन्यायमूलप्रस्तावात् विकल्पं लक्षयति— **तुल्येत्यादि** । तुल्यबलप्रमाणशिष्टत्वात् तुल्यबलयोर्द्वयोर्विरुद्धयोर्युगपदेकत्र प्राप्तयोः पाक्षिकत्वं विकल्प इत्यर्थः । सर्वत्र ह्यविरुद्धयोस्तुल्यबलयोः समुच्चयः । विरोधे विषमबलत्वे त्वौदुम्बरीसर्ववेष्टनस्पर्शनयोरिव बाध्यबाधकभावः । तुल्यबलत्वे व्रीहियववदगत्या विकल्पः । तत्र समुच्चयनिरासार्थमुक्तं— **विरोध इति** । बाधपरिहारार्थमुक्तं— **समानबलयोरिति** । समानबलत्वे हेतुस्तुल्यप्रमाण-

वैशिष्ट्यादिति । उदाहरणार्थस्य विषयं तावदाह– स्वदित्यादि । उदा-
हरति– अस्तीत्यादि । इह दुःसहविरहज्वरप्रतीकारत्वे हिमगिरिगमनप्रवाल-
शय्याशरणयोस्तुल्यबलत्वाद्विकल्पः । अत्र परकीयवाक्यगर्भीकारेऽपि चम-
त्कारकारित्वादलङ्कार एवेत्याहुः ॥

(इति) विकल्पः ॥

सू०—यद्भवति यौगपद्यं गुणक्रियाणां समुच्चयः स स्यात् ।
एषोऽदर्शि विकल्पप्रतिभटभूतो द्विधास्माभिः ॥५७॥

गुणानां धवलत्वदीनां क्रियाणां च यौगपद्येन भवन्नेष द्विधा भवति । क्रमेण यथा

अभूद्यशो वीर तवेन्दुसुन्दरं
द्विषां मषीवर्णमभूच्च दुर्यशः ।
विरुद्धकार्यद्वयकारि कौतुकं
रजः करोति स्म धुतं तुरङ्गमैः ॥

स्वःसिन्धौ विबुधेन्द्रविभ्रमवने खे हाटकाद्रौ दिशां
कण्ठे वीर नृसिंह देव भवतः कीर्तेः परिस्फूर्तयः ।
डिण्डीरप्रकरन्ति फुल्लकलिकाभारन्तितारावधू-
नाथांशुप्रसरन्ति निर्जरसरित् पूरन्ति हारन्ति च ॥

व्या०— विकल्पप्रतिभटतया समुच्चयं लक्षयति– यदित्यादि । धर्मयौगपद्ये समुच्चयः । स च गुणसमुच्चयः क्रियासमुच्चयश्चेति द्विविध इत्यर्थः । अभूदित्यादि । अत्र स्वपरयशोऽपयशसोर्धवलिमनीलिमगुणयोः

यौगपद्यात् गुणसमुच्चयः । खरित्यादि । अत्र कीर्तिपरिस्फूर्तिषु डिण्डीरप्रकरायिताद्यनेकक्रियायौगपद्यात् क्रियासमुच्चयः । गुणक्रियासामस्त्येन तृतीयमपि भेदं केचिदिच्छन्ति ॥

(इति) समुच्चयः ।

मू०—एकेन क्रियमाणं यत्रान्य स्पर्धयैव तत् कुरुते ।
सोऽपि समुच्चयभेदः कथितोन्यस्तत्करो द्वैधम् ॥५८॥

एकेन कर्तुमुपक्रान्तं यत् कार्यं तस्यैवाहमहमिकया भूयोभिः क्रियमाणत्वात् तत्कर इत्यन्वर्थेयं संज्ञा । यद्यपि समाधेरभिधास्यमानस्य विषयमयमास्कन्दति तथापि समुच्चय इत्यन्वर्थाभिधानबलादिहान्यस्य तुल्यकक्ष्यतयैवोपादानम् । अत एव यत्रेतरानपेक्षमेक एव कार्यकारणाय क्षमते इतरस्तु काकतालीयेन तदर्थं सङ्घटते तत्र समाधिरभिधास्यते । यत्र तु खले कपोतिकया परस्परं स्पर्धमाना इव साधयितुमेकमेव साध्यमवतरन्ति भूयांसस्तत्र तत्करः । भूयसां तु शोभनाशोभनत्वाभ्यां भवन्नेष द्विधा भवति ।

क्रमेण यथा

मूर्तिः कन्दर्पदर्पज्वरभरदमनी कीर्तिरुन्निद्रचन्द्र-
ज्योत्स्नाहङ्कारभङ्गव्यसनकुतुकिनी भूपते श्रीनृसिंह ।
लक्ष्मीर्जागर्तिलक्ष्मीपतिमददमनी तासु गर्वाय पुंसा-
मेकापि स्यात्त्वैताः किमिदमुपशमारम्भमृज्जृम्भयन्ते ॥

अत्रोक्तरूपा मूर्तिरेव गर्वहेतुस्तत्रापि कीर्तिस्ततोऽपि लक्ष्मीरिति बहूनामहंकारकारणत्वं स्पर्धया निबद्धम् । अपि च लावण्यादिभिः

शोभनैर्मूर्त्यादीनां योगः । किं च गर्वकारणसद्भावेऽपि गर्वो न जात इति विशेषोक्तिरप्यस्तीत्यनया सहास्य सङ्करः ।

कार्पण्यैकनिकेतनं नृपतयो दौर्जन्यभाजो बुधाः
सन्तः क्षीणधनाः कृपानभिमुखो लोकः कठोरः कलिः ।
शक्यन्ते विपदः किमत्र कविभिः सोढुं भवेयुर्यदि
स्वैरं वीर नृसिंह देव भवता नैताः समुन्मीलिताः ।

अत्राशोभनैः कार्पण्यादिभिर्नृपति प्रभृतीनां योगः ॥

व्या०—तत्कराख्यं समुच्चयस्य भेदान्तरं लक्षयति— **एकेनेत्यादि** । यत्रैकेन सिद्धकारणभावेनैव क्रियमाणमन्येऽपि तत्स्पर्धयैव खले कपोतिकया कुर्वन्ति सोऽपि तस्यैव कारणात् तत्करनामा कारणान्तरसमुच्चयनात् समुच्चयभेदः स च द्विधेत्यर्थः । संज्ञां व्युत्पादयति— **एकेनेति** । नन्वस्य समाधिसाधर्म्यात् तदानन्तर्यमुचितमित्याशङ्क्य ततो बलीयसा समुच्चयतादात्म्येन समुच्चये निरूपणमित्याह— **यद्यपीति** । तर्हि समाधेरस्य को भेदस्तत्राह— **अत एवेति** । समुच्चयात्मकत्वादेवेत्यर्थः । यत्र निरपेक्षप्रवृत्तकारणे कारणान्तरमपि काकतालीयतया सौकर्याय निबध्यते स समाधिः । यत्र तु समर्थकारणप्रवृत्तौ तत्स्पर्धयैव खलेकपोतिकया भूयसामुपनिबन्धः स तत्कर इति महान् भेद इत्यर्थः । यथा दैवात् पतता तालफलेन काकसमागमो यथा च तेन तस्य वधस्तथा देवदत्तस्य दस्युभिः समागमस्तैश्च तस्य वधः स देवदत्तवधः काकतालीयः । प्रकृते च कार्यस्य यदृच्छासमागतकारणान्तरोत्पादः काकतालीयः । एष एव काकतालीयन्यायः । "समासाच्च तद्विषयात्" इति छप्रत्ययः । खले कपोता इव खले कपोतिकाः । इवार्थे कन् प्रत्ययः । हलदन्तात् सप्तम्याः संज्ञायाम् इति सप्तम्या अलुक् । पृषोदरादिपाठाद्वा । द्वैविध्यं विवृणोति— **भूयसां त्विति** । आद्यमुदाहरति— **मूर्तिरित्यादि** ।

अत्र लक्षणार्थं योजयति– **अत्रेति** । शोभनांशं व्यनक्ति– **अपि चेति** । अभ्युच्चयमाह– **किं चेति** । द्वितीयमुदाहरति– **कार्पण्येत्यादि** । अत्रापि नृपतिकार्पण्यमेकमेव विपदां हेतुस्तथापि भूयसां स्पर्धया हेतुत्वेन निबन्धात् तत्करः सन् वाक्यार्थहेतुकेन काव्यलिङ्गेन सङ्कीर्यते । अशोभनांशमुद्घाटयति– **अत्राशोभनैरिति** ॥

(इति) तत्करः ॥

मू०—हेत्वन्तरसम्बन्धात् स्फूर्जतिकार्यस्य यत्र सौकर्यम् ।
स समुच्चयसादृश्यात् समाधिनामात्र निर्दिष्टः ॥५९॥

यत्र खलेकपोतिकन्यायेनैकमेव कार्यं कर्तुमनेकेषामवतारस्तत्र तत्करः कथितः । यत्र काकतालीयेनापतनमपरस्य तत्रायमलङ्कारः । अत एव केनचित् कर्तुमुपक्रान्तस्य कारणान्तरव्यतिकरतः सौकर्यं सम्यगाधीयते इति यथार्थाभिधानः समाधिनामायमलङ्कारः समुच्चयसादृश्यात् तदनन्तरं निर्दिष्टः । यथा—

लावण्यमेव सहजं तव मानिनीनां
चेतः प्रसादयति वीर नृसिंह देव ।
तन्वन्ति पञ्चमचमत्कृति कोमलानि
सहायकं किमपि कोकिलकूजितानि ॥

व्या०— तत्करसाधर्म्यात् समाधिं लक्षयति– **हेत्वन्तरेत्यादि** । यत्र केनचित् कारणेनारब्धं कार्यं काकतालीयन्यायेन सौकर्यात् कारणान्तरेण निष्पादितं निबध्यते स समाधिरित्यर्थः । तदेतत्तत्कराद्भेदं दर्शयन् व्याचष्टे– **यत्रेत्यादि** । समाधिं संज्ञां व्युत्पादयति– **अत एवेति** । श्लोके समुच्चय-

सादृश्यादिति सङ्गतिकथनपरं न लक्षणान्तः पातीति व्याचष्टे– समुच्चयेति । समुच्चयश्चात्रानन्तरोक्ततत्कराख्यः । लावण्यमित्यादि । सहायस्य कर्म साहायकम् । "यो पधाद्गुरूपोत्तमाद्वुञ्" । अत्र लावण्येन कारणेनारब्धस्य मानिनीमनःप्रसादनकार्यस्य काकतालीयैः कोकिलकूजितैः सौकर्येण निष्पादनं समाधिरित्यनुसन्धेयम् ॥

(इति) समाधिः ॥

मू०— निर्णीयालङ्कारान् कतिचिदिमांस्तर्कवाक्यनयमूलान् ।
लोकन्यायाश्रयिणः केचिदिदानीं निरूप्यन्ते ॥६०॥

बलिनं जेतुमनीशः कोऽपि तदीयं कृशं तिरस्कुरुते ।
अन्यं कमपि जघन्यो यत्राहुः प्रत्यनीकमिदम् ॥६१॥

अनीकं सैन्यं तस्य प्रतिनिधिः प्रत्यनीकम् । तत्सादृश्यादलङ्कारोऽपि प्रत्यनीकमिति व्यपदेशमलभत । यथानीकमभिभवितुमनीश्वरेण केनापि तत्प्रतिनिधिभूतमन्यद् व्यामोहादभिभूयते तथात्र बलवति परिपन्थिनि तदीयमल्पबलं कमपि कोऽपि परिपन्थयतीत्यर्थः ।

अत्र च प्रत्यर्थिप्रकर्षः प्रयोजनम् ।

यथा–

सुधाकरो वीर नृसिंह देव
यशो विलासैर्ग्लपितानुभावः ।
तवाननस्य प्रियबान्धवाना-
मपाकरोति श्रियमम्बुजानाम् ॥

अत्र नरसिंहदेवः सुधाकरेण दुर्जयस्ततस्तद्वदनबान्धवानां दुर्बलानां कमलानां श्रियो हरणात् सुधाकरप्रत्यर्थिनो नरसिंहदेवस्य प्रकर्षः प्रतीतः ।

व्या०— उत्तरालङ्कारकाण्डस्य सङ्गतिमाह– **निर्णीयेत्यादि** । लोकन्यायाश्रितेषु प्रथमं प्रत्यनीकालङ्कारं लक्षयति– **बलिनमित्यादि** । प्रबलप्रतिपक्षप्रतीकाराक्षमस्य तदीयदुर्बलपीडनं प्रत्यनीकमित्यर्थः । प्रत्यनीकशब्दं व्युत्पादयति– **अनीकमिति** । प्रत्यनीकं प्रतिपक्षं तत्सादृश्यादलङ्कारेऽपि लक्षणया प्रत्यनीकव्यपदेश इत्यर्थः । लक्षणायाः प्रयोजनमाह– **अत्र चेति** । **सुधेत्यादि** । स्पष्टम् ॥

(इति) प्रत्यनीकम् ।

मू०— उपमानस्याक्षेपः स्यादुपमेयत्वकल्पनं यद्वा ।
यत्र प्रतीपमेतद्विबुधैरभिधीयते द्विविधम् ॥ ६२ ॥

अत्रोपमेयमेव लोकोत्तरतयोपमानधौरेयमिति यदुपमानस्याक्षेपः कैमर्थक्यालोचनमाचर्यते तत्तावदेकं प्रतीपम् ।

यथा

कान्तिः स्वभावसुभगैव तवाङ्गरागः
प्रत्यग्रकुङ्कुमरसः खलु मङ्गलाय ।
आसीः कलिङ्गनृपते भुवनोत्सवाय
प्रीणातु कैरवकुलानि परं सुधांशुः ॥

अत्र स्वभावसुभगया कान्त्यैवाङ्गरागकार्यस्य भूषणस्य सिद्धत्वात् कुङ्कुमानुलेपनेन किं प्रयोजनमिति प्रतीतिः ।

यथा वा

दानैस्त्वयि प्रीणितजीवलोके
मुधायमासीन्नरसिंह देव ।
इत्यालवालस्य मिषेण वेधाः
कल्पद्रुमं कुण्डलनामनैषीत् ॥

अत्र मुधायं किमनेन कल्पद्रुमेणेत्युपमानविषयकैमर्थक्यालोचनरूपस्याक्षेपस्य विद्यमानत्वात् प्रतीपम् । किञ्च तदुपजीवनेन प्रवृत्तां प्रतीयमानामुत्प्रेक्षामपेक्ष्य प्रवृत्तापह्नुतिरित्येषामलङ्काराणामिहाङ्गाङ्गिभावेन सङ्करः । तेन प्रतीपप्रतिभाभावितोत्प्रेक्षानुप्राणितापह्नुतिरत्रास्ति इति मन्तव्यम् ।

उपमानस्य न्यक्करणायोपमेयत्वकल्पनायां द्वितीयं प्रतीपम् ।

यथा

त्वद्दोर्दण्डधुरन्धरः फणिपतिस्त्वन्नेत्रमित्रं श्रियः
क्रीडापङ्करुहं त्वदाननरुचिस्पर्धी सुधादीधितिः ।
त्वद्गाम्भीर्यनिधिः पयोनिधिरसौ त्वत्कीर्तितुल्या वियत्
सिन्धुर्वीर नृसिंह देव महिमा सर्वोपमानं तव ॥

अत्र फणिपतिप्रमुखाणामुपमानत्वेन प्रसिद्धानामुपमेयीकरणं दोर्दण्डाद्यपेक्षयापकर्षाभिव्यञ्जनाय । अस्य चालङ्कारस्योपमानं प्रति प्रतिकूलत्वात् प्रतीपमिति व्यपदेशः ॥

व्या०— प्रातिकूल्यसाम्यात् प्रत्यनीकानन्तरं प्रतीपं निरूपयति—उपमानस्येत्यादि । यत्रोपमेयस्य सर्वोत्तरतयोपमानस्याक्षेपः क्रियते उपमेयत्वं

वा कल्प्यते स प्रतीपालङ्कारो द्विविध इत्यर्थः । तत्राद्यभेदं विवृणोति– **यत्रेति** । आक्षेपशब्दार्थमाह– **कैमर्थक्येति** । किं प्रयोजनमिति विचारः क्रियत इत्यर्थः । उदाहरति– **कान्तिरित्यादि** । अत्रोपमानस्याक्षेपं योजयति– **अत्र स्वभावेति** । एवं द्वितीयार्धेऽपि कलिङ्गेन्द्रस्यैव भुवनानन्दकरत्वादिन्दोः कैमर्थक्यमालोच्यम् । आद्यस्यैवोदाहरणान्तरमाह– **दानैः इत्यादि** । कुण्डलानां कुण्डलीकरणम् । यथाधिकाक्षरस्य वर्ज्यत्वज्ञानाय कुण्डलाकारा रेखा क्रियते तद्वदिति भावः । अत्राप्याक्षेपं दर्शयति– **अत्र मुधेति** । अभ्युच्चयत्वेन कञ्चिद्विशेषमाह– **किं चेति** । द्वितीयभेदं विवृणोति– **उपमानस्येति** । उदाहरति– **त्वदित्यादि** । लक्षणार्थं योजयति– **अत्र फणिपतीत्यादि** । अत्रापि संज्ञां व्युत्पादयति– **अस्येति** ।

इति प्रतीपम् ॥

मू०— स्वाभाविकमागन्तुकमथवा वस्त्वस्तरं तिरोधत्ते ।
यस्मिन् किञ्चन वस्तु ज्ञेयं तन्मीलितं द्विविधम् ॥ ६३ ॥

यत्र साधारणगुणसम्भेदाद् भेदानुपलम्भः स विषयः सामान्यालङ्कारस्य । यत्र तु सहजमागन्तुकं वा किमपि निरतिशयं वस्तु वस्त्वन्तरं तिरयति तत्र सार्थकाभिधानं मीलितं द्विविधम् । क्रमेण यथा–

विश्राणनैः कालकलानभिज्ञै-
र्विनोद्यमानस्य निसर्गसिद्धैः ।

नृसिंह भूपाल न तेऽधिगन्तुं
पात्रेषु शक्याः परितोपलीलाः ॥

अत्रस्वाभाविकैरेव वितरणैः परितोषतरङ्गितानि वितरणानि तिरोधीयन्ते ।

आलिङ्ग्यमानस्य वधूजनस्य
प्रतीपभूपस्य नृसिंह देव ।
त्वत्सैन्यघोषश्रवणेन जाता
स वेपथोर्नैव विभाविता भीः ॥

अत्रागन्तुकेन कान्तापरिरम्भसम्भवेन वेपथुना वेपथुस्तिरोहितः ॥

व्या०— मीलितालङ्कारं लक्षयति— **स्वाभाविकमित्यादि** । यत्र वस्तुना वस्त्वन्तरनिगूहनं क्रियते स मीलनालङ्कारः । स च सहजेनागन्तुकतिरोधानमागन्तुकेन सहजतिरोधानं चेति द्विविध इत्यर्थः । सामान्यालङ्कारात् अस्य भेदमाह— **यत्र साधारणेति** । समानगुणयोरेकताप्रतिपत्तिः सामान्यम्; सहजागन्तुकयोर्वस्तुनोरेकेनेतरतिरोधानं मीलनमिति महाननयोर्भेद इत्यर्थः । सहजेनागन्तुकतिरोधानमुदाहरति— **विश्राणनैरिति** । कालकलानभिज्ञैः अविच्छिन्नैरित्यर्थः । इह सहजवितरणेनागन्तुकवितरणतिरोधानमित्याह— **अत्रेति** । वितरणान्यागन्तुकानीति शेषः । आगन्तुकेन सहजतिरोधानं च उदाहरति— **आलिङ्ग्यमानस्येत्यादि** । अत्रागन्तुना सहजतिरोधानमित्याह— **अत्रेति** । वेपथुः सहज इति शेषः ॥

इति मीलनम् ।

मू०—साधारणगुणयोगाद्यत्र प्रकृतस्य वस्तु संवलितम् ।
न विभावयितुं शक्यं तत् सामान्यं समाख्यातम् ॥ ६४ ॥

नेदमपह्नुतिः । किञ्चिदपह्नुत्य कस्याप्यनारोप्यमाणत्वात् । प्रकृतस्याप्रकृतेन समानत्वसम्बधादौपचारिकोऽस्य सामान्यमिति व्यपदेशः ।

धराधिप श्रीनरसिंह देव
यशोविलासे तव जृम्भमाणे ।
विधुन्तुदो वेत्ति न शीतभानुं
नागाधिनाथं च न वैनतेयः ॥

व्या०— किञ्चिन्मीलनसाम्यात् सामान्यमाह– साधारणेत्यादि । यत्र गुणसाम्यादप्रस्तुतस्य प्रस्तुततादात्म्यं निबध्यते– स सामान्यालङ्कार इत्यर्थः । अस्यापह्नुतेर्भेदमाह– नेदमिति । सामान्यसंज्ञाप्रवृत्तिनिमित्तमाह– प्रकृतस्येति । उदाहरति– धराधिपेत्यादि । अत्राप्रस्तुतयोश्चन्द्रशेषयोः प्रस्तुतेन यशसा धावल्यगुणसाम्यादेकताप्रतिपत्तिः ॥

(इति) सामान्यम् ॥

मू०—अधिकगुणाङ्गीकरणं स्वगुणत्यागेन तद्गुणः कथितः ।

सान्निध्यमध्यासीनस्य निरतिशयगुणस्य तस्याप्रकृतस्य गुणोऽस्त्यस्मिन्निति तद्गुणः । नायं मीलितम् इह वस्त्वन्तरगतास्तोकलोकोत्तरगुणान्तरव्यतिकरपरिणतस्वरूपस्य प्रस्तुतस्य वस्तुनः प्रतिभासमानत्वात् । मीलिते च प्रस्तुतस्य वस्तुनो वस्त्वन्तरतिरोहितत्वेन प्रतीयमानत्वात् इत्यनयोः स्फुटमेव भिन्नविषयत्वम् ।

यथा–

वीर त्वद्रिपुरमणी परिधातुं पल्लवानि संस्पृश्य ।
न हरति वनभुवि निजकररुहरुचिखचितानि पाण्डुपत्रधिया ॥

अत्रारुणानां पल्लवानां धवलिमस्वीकारः ।

यथा वा

नृत्यद्भर्गाट्टहासप्रसरसहचरैस्तावकीनैर्यशोभिः
धावल्यं नीयमाने त्रिजगति परितः श्रीनृसिंह क्षितीन्द्र ।
नेदृग्यद्येष नाभीकमलपरिमलः प्रौढीमासादयिष्य
देवानां नाभविष्यत् कथमपिकमलाकामुकस्यावबोधः ।

अत्र भगवता कृष्णेन यशः सम्बन्धात् धवलिमा स्वीकृत इति तद्गुणत्वम् । किञ्चात्रासम्बन्धे सम्बन्ध इत्येवं रूपातिशयोक्तिस्तद्गुणानुप्राणितेति सङ्करः ॥

व्या०— गुणसाम्यसाम्यात् सामान्यानन्तरं तद्गुणालङ्कारमाह– **अधिकेत्यादि** । स्वगुणत्यागेन सन्निहितोत्कृष्टान्यगुणस्वीकारस्तद्गुण इत्यर्थः । तद्गुणशब्दं निब्रूते– **सान्निध्यमिति** । मीलनादस्य भेदमाह– **नायमिति** । इह प्रस्तुतस्याप्रस्तुतगुणावच्छिन्नस्वरूपत्वं; मीलने त्वप्रस्तुतच्छन्नस्वरूपत्वमित्यनयोर्महान् भेद इत्यर्थः । उदाहरति– **वीरेत्यादि** । पाण्डुपत्रधिया जीर्णपर्णभ्रान्त्येत्यर्थः । अस्यैवोदाहरणान्तरमाह– **नृत्यदित्यादि** । ईदृगेवं धवलः, एष कमलाकरजः । नाभीकमलपरिमलाभिज्ञानात् कृष्णप्रत्यभिज्ञा देवानां न तु कार्ष्ण्यादिति भावः । अभ्युच्चयमाह– **किं चेति** ।

इति तद्गुणः ॥

मू०—सति हेतौ तद्रूपाननुहारोऽतद्गुणः कथितः ॥६५॥

अत्र सातिशयगुणं प्राकरणिकं वस्तु सान्निध्यलक्षणे कारणे सत्यपि यदि नाप्राकरणिकगुणस्यानुहरते तदा तस्याप्राकरणिकस्य गुणो नास्त्यस्मिन्नित्यतद्गुणः, तद्गुणवैधर्म्येणात्र प्राप्तनिरूपणावसरः ।

गण्डाभोगे विरहति मदैः पिच्छिले दिग्गजानां
वैरिस्त्रीणां नयनकमलेष्वञ्जनानिप्रमार्ष्टि ।
यद्यप्येषा हिमकरकराद्वैतसौवस्तुकी ते
कीर्तिर्दिक्षु स्फुरति तदपि क्ष्मापते श्रीनृसिंह ॥

इह मन्दाञ्जनसम्पर्केऽपि यशश्रियो मलिनिमा न जात इत्यतद्गुणः ॥

व्या०— तद्गुणवैपरीत्येनातद्गुणमाह— सतीत्यादि । उत्कृष्टगुण-सन्निधानेऽपि तद्रूपासंस्पर्शित्वमतद्गुण इत्यर्थः । तदेतदेतद्विवृण्वन्नतद्गुणशब्दं निर्ब्रूते— यत्रेत्यादि । सङ्गतिमाह— तद्गुणेति । गण्डेत्यादि । हिमकरा-द्वैतस्य सौवस्तिकी स्वस्तिवादिनी ज्योत्स्नासदृशीत्यर्थः । स्वस्तीत्याह सौव-स्तिकी । सुस्नातादित्वात् ठक् । द्वाराद्वित्वादैजागमः ॥

(इति) अतद्गुणः ॥

मू०—यत्र प्रश्नपुरःसरमेवासम्भाव्यमुत्तरं किमपि ।
असकृद्भवति निबद्धं तदुत्तरं तावदत्रैकम् ॥ ६६ ॥

अत्र प्रश्नपुरःसरस्य बाढं गूढत्वादसम्भावनीयस्यानेकधैवोप-निबध्यमानत्वं चमत्कारकारणम् । किं च व्यवच्छेद्यव्यवच्छेदकता-मन्तरेणैव प्रवृत्तमिदमिति न गोचरः परिसङ्ख्यायाः ।

'का विसमा देव्वगई किं दुल्लहं णं जणो गुणग्गाही ।
किं सोक्खं सुकलत्तं किं दुक्खं खलो लोओ ॥

यत्र त्वनुपनिबद्धः प्रश्नः स्यादुत्तरोन्नेयः ।
कमपि तदीयं भेदं द्वितीयमाचक्षते सुधियः ॥ ६७ ॥

यथा

तावत्कुतश्चन्द्रमयूखभूषाः
सौधाङ्गणे प्रेयसि नः प्रदोषाः ।
तस्योत्कलक्षोणिपतेः प्रतापो
जागर्ति यावत् ककुभां मुखेषु ॥

इह तुहिनकरकिरणभूषान् सौधाङ्गणे प्रदोषान् कदा निर्वेक्ष्याम इति प्रियायाः प्रश्नः कुतोऽस्माकमुक्तविशेषणाः प्रदोषा इति प्रतीपमहीपतेरुत्तरादुन्नीयते ॥

व्या०— अथोत्तरालङ्कारं लक्षयति— यत्र प्रश्नेत्यादि । यत्र प्रश्नपूर्वकमसम्भाव्यमुत्तरमसकृन्निबध्यते तदेतदुत्तरमित्यर्थः । सकृन्निबन्धे चमत्काराभावादसकृद्ग्रहणमित्याह— अत्रेति । परिसंख्यातो भेदमाह— किं चेति । परिसंख्यायामितरनिषेधपरत्वं यथा 'पञ्च पञ्चनखा भक्ष्याः' इत्यत्र गोधादिपञ्चकातिरिक्तपञ्चनखानां श्वमार्जारादीनां भक्षणनिषेधः । इह तु स्वार्थविधिपरत्वमेव नेतरनिषेधपरत्वमिति भावः । चकाराद्व्याप्त्याद्यनिर्देशादनुमानतोऽपि भेद इति सूचितम् । का विषमेति ।

का विषमा दैवगतिः किं लभ्यं यज्जनो गुणग्राही ।
किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः ॥

द्वितीयमुत्तरं लक्षयति– यत्र त्विंत्यादि । यत्रोत्तरोन्नेयः प्रश्नस्तदपरमुत्तरमित्यर्थः ॥

इति उत्तरम् ॥

मू०—यत्र प्रश्नः पुरःसरमुत्तरमुभयोर्मिथः समुल्लसति ।
प्रश्नोत्तरिकासंज्ञं तमलङ्कारं विविदुर्बुधाः ॥ ६८ ॥

यथा–

पीतः केनासि रत्नाकर कथय बलान्मूर्ध्नि कालिन्दि कृष्टा
केन त्वं मा च कोपीः कुतुकमभिदधे वर्ण एवं वदामि ।
धावन्त्येते नृसिंहक्षितिपतिपृतनादग्धविद्वेषिवेश्म-
ज्वालाहेवाकहेलाहतकनकगिरिस्यन्दवारां प्रवाहाः ॥

अत्र कनकगिरितरङ्गणीभिः सिन्धोरसम्बन्धेऽपि सम्बन्धः सिद्धत्वेनोक्तः । इदं तु वाको वाक्यमिति मतान्तरे प्रसिद्धम् ।

व्या०— प्रश्नोत्तरप्रसङ्गात् प्रश्नोत्तरिकालङ्कारं लक्षयति– यत्रेत्यादि । यत्र द्वयोर्मिथः प्रश्नोत्तरे निबध्येते सा प्रश्नोत्तरिकेत्यर्थः । पीत इत्यादि । कालिन्दीसागरयोः प्रश्नोत्तरिकेयम् । कालिन्दी सगरं पृच्छति– पीत इत्यादि । पीतः पीतवर्णः । हेवाकः स्वाच्छन्द्यमिति सञ्जीवनकारः ॥

इति प्रश्नोत्तरिका ।

मू०—अथ वल्गद्गूढार्थप्रतीत्यलङ्कारलक्षणं भावि ।
गदितमिदं संलक्षितसूक्ष्मार्थस्य प्रकाशनं सूक्ष्मम् ॥६९॥

नवेषु कान्तेषु कृताभिलाषाः
स्वर्गाङ्गनाः प्रेक्ष्य मरीचिमाली ।
नृसिंह भूपाल तवाहवेषु
कम्पाकुलं दर्शयति स्वबिम्बम् ॥

इह भाविभेदतया भयानुभावकम्पाकुलमात्ममण्डलं दर्शयता दिवाकरेण नवनवप्रियतमलाभाभिलाषिणीः स्वर्गाङ्गनाः प्रतिनरसिंह-नरपतिहनिष्यमाणसमरोद्भटप्रतिभटागमनं प्रकाशितम् ॥

व्या०— अथ सङ्गतिपूर्वकं सूक्ष्मं लक्षयति- **अथेत्यादि** । अत्र स्थूलबुद्धिभिरसंलक्ष्यस्य स्वयं विदग्धतया कथञ्चिदिङ्गितेनाकारेण वा संलक्षितस्य सूक्ष्मार्थस्य विदग्धं प्रति प्रकाशनं निबध्यते स सूक्ष्मालङ्कार इत्यर्थः । उदाहरति- **नवेष्वित्यादि** । अत्र स्वर्गाङ्गनाभिलाषः सूक्ष्मोऽपि तच्चेष्टा-सूचितो मरीचिमालिना स्वमण्डलकम्पनेन ताः प्रति प्रकाशित इति व्याचष्टे- **इहेत्यादि** ।

(इति) सूक्ष्मः ।

मू०—यत्रोद्भिन्नं किञ्चिद्वस्तु कुतश्चिन्निगूह्यते भूयः ।
वस्त्वन्तरनिक्षेपाद्व्याजोक्तिं तामुशन्त्येताम् ॥७०॥

अत्र निगूढं वस्तु कुतश्चित् कारणादुद्भिन्नं प्रकटतां प्राप्तं सद्व-स्त्वन्तरनिवेशनेन निगूह्यते गोप्यते । अत एव वस्त्वन्तरनिवेशरूपस्य व्याजस्योक्तिर्वचनमिह वर्तत इत्यस्याः सार्थकमभिधानम् । यत्र सादृश्याय प्रकृतमपह्नूयते तत्रापह्नुतिर्जागर्ति । यत्र पुनरपह्नवाय सादृश्य-मुपनिबध्यते तत्रेयम् ।

आकर्ण्योत्कलभूपते जलमुचां निर्घोषमाकस्मिकं
त्वत्सेनापटहभ्रमेण सहसा सञ्जातकम्पाकुलैः ।
अन्तर्भीतिपराहतोऽपि दयिताकण्ठग्रहक्रीडया
सान्द्रानन्दमयीं दशामभिनयत्यङ्गैः शकाधीश्वरः ॥

अत्र नरसिंहनरपतिवरूथिनीपटहभ्रमाविर्भूतेन कम्पेन प्रकाशिता भीतिः त्रियतमोपगूहनेनापलापिता ॥

व्या०— सूक्ष्मवैपरीत्येन व्याजोक्तिं लक्षयति— **यत्रेत्यादि** । निगूहितवस्तूद्भेदनं सूक्ष्म इत्युक्तम् । इहोद्भिन्नवस्तुनिगूहनं व्याजोक्तिरिति व्याचष्टे— **अत्रेति** । नामधेयं निब्रूते— **अत एवेति** । अपह्नुतिप्रभेद एव व्याजोक्तिर्न पृथगलङ्कार इत्युद्भटः । तन्निरासार्थं भेदमाह— **यत्र सादृश्याय इति** । यत्रापह्नवमुखेन सादृश्यं प्रतिपाद्यते तत्रापह्नवः । यत्र सादृश्योपजीवनेनापह्नवः क्रियते तत्र व्याजोक्तिरित्यनयोरस्त्युद्भटत्वादुद्भटैरप्यपह्नवगन्धमात्राद्दुरपह्नवो भेदोऽन्यथातिप्रसङ्गादित्यर्थः । उदाहरति— **आकर्णेत्यादि** । अत्र रतिभीत्योः कम्पजनकत्वसादृश्योपजीवनेनानन्दप्रकटनव्याजाद्भयापह्नवोक्तिः इयं व्याजोक्तिरित्याह— **अत्रेति** ।

(इति) व्याजोक्तिः ॥

मू०—वाक्यं यदन्यथोक्तं केनाप्यन्येन योज्यतेऽपरथा ।
तत् काकुश्लेषाभ्यां यदि वक्रोक्तिस्तदा स्फुरति ॥७१॥

उक्तिव्यपदेशसामर्थ्यात् व्याजोक्त्यनन्तरं निरूपणमुचितमेतस्याः ।

काकुप्रयोगेण यथा

सर्वार्थिनामर्थितपूरणार्थं
परिस्फुरद्यागमहोत्सवेषु ।
त्वयि स्थिते वीर नृसिंह देव
न लज्जते सम्प्रति पारिजातः ॥

श्लेषप्रयोगेण यथा

किं मे रोषं करोषि प्रियतम किमहं तोयराशेस्तनूजा
न क्रोधस्ते विधातुं भवति समुचितः प्राप्यते कुत्र नक्रः ।
इत्थं वक्रोक्तिभङ्ग्या हिमगिरिसुतया लम्भितो मूकभावं
देवश्चन्द्रार्धचूडस्तव दिशतु मुदं भूपते श्रीनृसिंह ॥

अत्र मे इति पदं सम्प्रदानाभिप्रायेण प्रयुक्तं देवेन । अर्थश्लेषभङ्ग्याया तु भगवती सम्बोधनपरतया समर्थितवती । क्रोधस्तव कर्तुं न समुचित इत्याशयेन प्रयुक्तं देवेन । अधस्तव कर्तुं नक्रः समुचित इति देव्या शब्दश्लेषभङ्ग्यान्यार्थघटनया योजितम् ॥

व्या०—उक्त्यन्यथात्वसाम्याद् व्याजोक्त्यनन्तरं वक्रोक्तिं लक्षयति—**वाक्यमित्यादि** । यत्राभिप्रायानन्तरेणोक्तवाक्यमन्येनान्यथा योज्यते सा वक्रोक्तिः । सा च काका श्लेषेण चेति द्विविधेत्यर्थः । सङ्गतिमाह—**उक्तीति** । काकुमुदाहरति— **सर्वेत्यादि** । अत्र न लज्जत इति निषेधोक्तौ काका लज्जत एवेत्यन्यथा योज्यते । शिष्टोक्तिमुदाहरति— **किमित्यादि** । मे ममेत्यर्थः । सम्बन्धसामान्ये षष्ठी न तु 'क्रुधद्रुह' इत्यादिना चतुर्थी । यं प्रतिकोप इति विशेषणात् । देव्याह— **प्रियतमेति** । देव आह— **न क्रोध इति** । पुर्देव्याह— **प्राप्यत इति** । इह श्लेषो द्विविधोऽभङ्गः

सभङ्गश्च । तत्र म प्रत्यङ्गश्लेषः न क्रोध इति सभङ्ग इत्यभिप्रेत्य व्याचष्टे– अत्रेत्यादि । सम्प्रदानाभिप्रायेणेति । षष्ठ्यर्थसम्बन्धसामान्याक्षिप्तविशेषाभिप्रायेणोक्तमन्यथा पूर्वोक्तानुशासनविरोधात् । सम्बोधनपरतयेति लक्ष्मीसम्बोधनपरतयेत्यर्थः ।

(इति) वक्रोक्तिः ॥

मू०—वस्तुस्वभाव उच्चैर्यः स्यात् सूक्ष्मो यथावदेतस्य ।
यद्वा वर्णनमेषा कथिता कविभिः स्वभावोक्तिः ॥७२॥

अस्या अप्यत्रोक्तिक्रम एव निर्देशकारणम् । वस्तुस्वभाववर्णनमात्रस्यालङ्कारत्वाङ्गीकारेऽतिप्रसङ्गः स्यात् । वस्तुस्वभाववर्णनमात्ररहितस्य काव्यस्यैवाभावात् । अत एवोक्तमुच्चैरतिशयेन सूक्ष्मः कविमात्रेण द्रष्टुमशक्यो योवस्तुस्वभावः क्रियावर्णसंस्थानात्मकस्तस्या न्यूनातिरिक्तत्वेन यद्वर्णनं सा स्वभावोक्तिः ।

ऊर्ध्वं भुजाभ्यां परिरभ्य जानु-
द्वयं तदन्तश्चिबुकं निवेश्य ।
नृसिंह झञ्झानिलवेपितः सन्
वने रिपुः सीदति तावकीनः ॥

व्या०—उक्तिसाम्यात् स्वभावोक्तिं लक्षयति– वस्तुस्वभाव इत्यादि जातिप्रयुक्तधर्मो वस्तुस्वभावस्तस्य सूक्ष्मस्य यथावद्वर्णनं यत् सा स्वभावोक्तिरित्यर्थः । सङ्गतिमाह– अस्या अपीति । सूक्ष्मपदव्यावर्त्यमाह– वस्तुस्वभावेति ।

'द्विहस्तं च द्विकर्णं च द्विनेत्रं चैकनासिकम्
गुरुर्देवं शिरः पायात् सशिश्नवृषणोदरम् ।'

इत्यादीनामप्यलङ्कारत्वप्रसङ्ग इति भावः । फलितमाह– **अत एवेति** । उच्चैः शब्दार्थमाह– **अतिशयेनेति** । सूक्ष्मपदार्थमाह– **कविमात्रेणेति** । वस्तुस्वभावशब्दार्थमाह– **क्रियेत्यादि** । क्रिया चेष्टा । वर्णः शुक्लादिः । संस्थानमवयवसंनिवेशः । उदाहरति– **उर्ध्वमित्यादि** ।

इति स्वभावोक्तिः ॥

मू०—भूतस्य भाविनो वा (या) प्रत्यक्षायमाणतार्थस्य ।
विलसति सुतरामेतन्निगद्यते भाविकं कविभिः ॥७३॥

भावः कवेराशयः श्रोतरि प्रतिबिम्बितत्वेनास्तीति भाविकम् । नेदं भ्रान्तिमान् । भूतभाविनां भूतभावितयैव प्रकाशनात् । नापि अतिशयोक्तिः । अन्यस्यान्यत्वेनाध्यवसायवैधुर्यात् । न हि भूतभाविनावभूतभावित्वेनाध्यवसीयेते ।

यथा–

वामं बाहुं विधाय द्विगुणमुरसि स्पष्टमाबद्धमुष्टिं
धृत्वा शंकुं करेण स्फुरदधरपुटस्ताम्रनेत्राञ्चलश्रीः ।
क्षिप्त्वा क्षिप्त्वा घरट्टे परुषकटकटत्कारशीर्यत्करोटीञ्
छत्रून् पक्षन्निवान्तः स्फुरसि भुजभृतां भूपते श्रीनृसिंह ॥

अत्र यैस्त्वं दृष्टो द्रष्टव्यश्च समरसीमनि तेषामेवंविध एव प्रतिभासस इति वर्तमानतयोपनिबन्धात् प्रकारद्वयेऽप्येतदेवोदाहरणम् ॥

व्या०—विदग्धजनवेद्यार्थत्वसाम्यात् स्वभावोक्त्यनन्तरं भाविकं लक्षयति— **भूतस्येत्यादि** । भूतस्य भाविनो वार्थस्य चात्यद्भुतत्वादनाकुलसन्दर्भसमर्थितत्वाच्च प्रत्यक्षायमाणता प्रत्यक्षवदुपलम्भनं निबध्यते तद् भावो भावना भाविकानां चेतसि निवेशनमस्मिन्नस्तीति व्युत्पत्त्या भाविकमित्यर्थः । व्युत्पत्त्यन्तरमाह— **भाव इति** । क्रमाद् भ्रान्ति मदतिशयोक्त्योरतिव्याप्तिं परिहरति— **नेदमित्यादि** । उदाहरति— **वाममित्यादि** । **करेणेति** । दक्षिणेनेत्यर्थः । वामस्य बद्धमुष्टेर्वक्षसि निक्षिप्तत्वात् । घरट्टो गोधूमघट्टनशिलायन्त्रभेदः । अत्रैकस्यैव नरसिंहस्यातिमानुषाद्भुत पौरुषविशेषभीषणतया यैर्दृष्टो यैश्च द्रक्ष्यते तेषामपि चेतसि भावित्वेन च भिया भाव्यमानस्य प्रत्यक्षायमाणतया निबन्धनादिदमेवोभयविधभाविकोदाहरणमित्याह । अत्रेत्यादि ॥

(इति) भाविकम् ॥

मू०—अभिमतमेतदुदात्तं समृद्धिमद्वस्तुवर्णनं यत्र ।

कविप्रतिभोत्थापितासम्भाव्यमानवैभवविभूषितवस्तुवर्णनात्मकमिदं यथास्थितवस्तुवर्णनात्मकाभ्यां स्वभावोक्तिभाविकाभ्यां भिन्नम् ।

यथा

दासीभिः प्रतिसारितानि परितस्त्वन्मार्गणप्राङ्गण-
क्षोणीस्वस्तिकमौक्तिकानि वणिजामादाय वृन्दैर्मुदा ।
विक्रीतानि नृसिंह देव तरसा देशेषु देशेषु ते
मूर्तानीव यशांसि राजरमणीकण्ठे लभन्ते स्थितिम् ॥

यच्च महापुरुषाणामङ्गतया चरितवर्णनं भवति ।। ७४ ।।

तदप्युदात्तं स्यादित्यर्थः ।

यथा—

वेलाकाननमग्रतः कलयत श्लाघ्यं कलिङ्गेशितुः
प्रौढैर्यत्र चमूभटैः प्रतिभटाहङ्कारकूलङ्कषैः ।
वीरश्रीपुलकैः शिलीमुखशतैराचान्तरोदस्तटैः
कीर्तेरर्णवलङ्घनाय घटितः सान्द्रक्रमः संक्रमः ।।

अत्र वेलावने वर्णनीये नरसिंहदेवचरितमङ्गत्वेन वर्णितम् ।।

व्या० — अद्भुतवस्तुवर्णनाप्रस्तावायुदात्तं लक्षयति— **अभिमत-मित्यादि** । समृद्धिमद्वस्तुवर्णनमुदात्तमित्यर्थः । उदात्तस्य भाविकस्वभावोक्तिभ्यां भेदमाह— **कवीति** । तयोर्यथावद्वस्तुवर्णनमिह तु तद्वैपरीत्येनारोपितं वस्तुवर्णनमिति भेदसङ्गतीत्यर्थः । **दासीभिरित्यादि** । मार्गणं मार्गः । स्वस्तिको रङ्गवल्लिरचनाविशेषः । अत्र राजरमणीकण्ठधारणयोग्यानि मौक्तिकानि एतत्सञ्चारपथरङ्गवल्लीविनियोगैः पुष्पोपहारवन्निर्माल्यभावं भजन्तीति समृद्धिमद्वस्तुवर्णनात्मकोऽयमुदात्त उन्नेयः । अथोदात्तान्तरं लक्षयति— **यच्चेत्यादि** । लक्षणमध्याहारेण पूरयति— **तदपीति** । यत्र प्रकृताङ्गतयोदात्तपुरुषचरितं निबध्यते सोऽप्युदात्तालङ्कार इत्यर्थः । एतेनोदात्तैश्वर्ययोगादुदात्तः प्रागुक्तः । अयं तूदात्तपुरुषचरितयोगादुदात्त इति पूर्वस्मादन्य एवायमलङ्कारोऽर्थभेदात् । परं तु शब्दसाम्यादस्यैव निरूपणमिति अलङ्कारसर्वस्वकारोक्तं तदपीत्यनेन सूचितमित्यनुसन्धेयम् । उदाहरति— **वेला इत्यादि** । कलयत पश्यत इत्यर्थः । कीदृक् काननमित्यपेक्षायामाह— **कलिङ्गेशितुरिति** । इह लक्षणं योजयति— **अत्रेति** । ननु वीररस एवायं

विजयतां किमुदात्तेनेति; अत आह– **अङ्गत्वेनेति** । सत्यमङ्गित्वे रस एव भवेत् । किं त्विह वीरस्याङ्गत्वादुदात्त एव विजयत इति भावः । ननु तथापि रसवदाद्यलङ्काराणामयं विषयो न द्वितीयोदात्तस्य । तथा हि रसनिबन्धे रसवदलङ्कारो भावनिबन्धे प्रेयोलङ्कारस्तदुभयाभासनिबन्धे तूर्जस्वी भावशमनिबन्धे तु समाहितालङ्कारो भावोदयभावसन्धिभावशबलतास्तु स्वतन्त्रालङ्कारा इत्यलङ्कारसर्वस्वकारः । अत्रोच्यते । इह भामहादीनां मते रसादीनां वाच्यतया वाक्यार्थीभूतानामङ्गित्वे रसवदादयोऽलङ्काराः, अङ्गत्वे द्वितीय उदात्तः । येषां दर्शने रसादयो व्यङ्ग्यस्तत्र तेषामङ्गित्वे ध्वनिरवाङ्गत्व (रेव; अङ्गत्वे) रसवदादिविषयत्वम् ; द्वितीयोदात्तस्य तु विषयो नावशिष्यत इति अलङ्कारसर्वस्वकारः । उदात्त एवात्र सविषयो रसवदादय एव निर्विषया इति त एव मा भूवन्निति काव्यप्रकाशकारः । तन्मतानुसारादिदं च रसवदाद्यनादरेणोदात्तमेवास्मिन् विषये वर्णयाञ्चकारेत्यशेषमनवद्यम् ॥

(इति) उदात्तम् ॥

व्या०—-अथ सर्वेषामेषामन्योन्याश्लेषपेशलावधुना ।
कथयामोऽलङ्कारौ सहृदयचेतश्चमत्कृतये ॥७५॥

एषां तिलतण्डुलवन्मिश्रयत्वेनाभ्यधायि संसृष्टिः ।

नन्वमीषामनुप्रासोपमादीनां शब्दार्थालङ्काराणां दैवगत्या यदि क्वचिदपि यौगपद्येनावस्थानं भवेत् तथापि पृथक् पर्यवसायितैव तेषाम् । किं तु कटककेयूरादीनामिव पृथक् कामनीयकहेतुत्वे सत्यपि सङ्घटनोपपादितं किमपि रामणीयकमुन्मिशति तिलतण्डुलन्यायस्तु संयोगन्यायः । स्फुटप्रतिभासनत्वमलङ्काराणामिति यावत् ।

तत्र सजातीयसंसृष्टिर्यथा

उत्तुङ्गा गिरिराजवत् सुवितताः क्ष्माचक्रवत् पावना
गङ्गावारिवदुज्ज्वलाः स्फटिकवत्तापच्छिदश्चन्द्रवत् ।
गम्भीराजलराशिवत् त्रिभुवनव्याप्तिक्षमाः शम्भुवत्
राजन्ते नरसिंह देव भवतः प्रोद्दामकीर्तिक्रमाः ॥

अत्र सजातीयानामुपमादीनां संसृष्टिः ।

विजातीयसंसृष्टिर्यथा—

मन्दारस्य मदच्युतिं दिनमणेरौद्धत्यनिर्मूलनं
मेरोर्मानविमर्दनं रतिपतेरुत्सेकनिष्कासनम् ।
अम्भोभर्तुरहंकृतिप्रशमनं शक्रस्य गर्वक्षतिं
सृष्ट्वा त्वां नरसिंह देव गुणिनं किं किं न धात्राकृतम् ॥

अत्र विजातीययोः वृत्यनुप्रासविशेषालङ्कारयोः संसृष्टिः ॥

व्या०— तदेवं केवलालङ्कारकाण्डं समाप्य सम्प्रति तदाश्रितौ मिश्रालङ्कारौ संसृष्टिसङ्करौ निर्णेतुं प्रतिजानीते— **अथेत्यादि** । तत्र लघुत्वात् संसृष्टिलक्षणं तावदाह— **एषामिति** । यत्रैषामनुप्रासोपमादीनां तिलतण्डुल-मिश्रणं निबध्यते सा संसृष्टिरित्यर्थः । ननु संसृष्टिसङ्करयोः कुतः पृथगल-ङ्कारत्वम् ? अनुप्रासोपमादिनां कटकमुकुटादीनामिव पृथक् शोभाकरत्वादिति आशङ्क्य तथापि तेषामिवैतेषामपि मेलनादन्यैव शोभेति संसृष्टिसङ्करयोरलङ्कार-त्वमवसेयम् । कार्यभेदेऽपि कारणभेदानङ्गीकारे अतिप्रसङ्गादिति परिहरति— **नन्वित्यादिनोन्मिषतीत्यन्तेन** । तिलतण्डुलन्यायं विवृणोति— **तिलतण्डु-लेति** । संसृष्टिरपि सजातीयविषया विजातीयविषया चेति द्विधा; तत्राद्या-

मुदाहरति- उत्तुङ्गा इत्यादि । सर्वत्र "तेन तुल्यम्" इत्यादिना तुल्यार्थे वतिप्रत्ययः । अत एवैताः सप्तापि तद्धिगा आर्थ्यः पूर्णोपमा एव संसृष्टा इति सजातीयसंसृष्टिरित्याह- अत्रेति मन्दारस्येत्यादि । अत्र मन्दारमद-च्यवनादिरूपणैः षड्भिरपि मन्दाराद्यतिशयितौदार्यप्रतापौन्नत्यसौन्दर्यगाम्भीर्यै-श्वर्याणि व्यज्यन्ते । अत्रानियतसंख्याकमकारादिवर्णावृत्त्या वृत्त्यनुप्रासः शब्दालङ्कारः । किं न कृतमिति सर्वकरणाभिधानादशक्यवस्तुकरणात्मा विशेषालङ्कारप्रभेदोऽर्थालङ्कारः । तयोस्तिलतण्डुलवन्मिश्रणाद्विजातीयसंसृष्टिः इति व्याचष्टे- अत्रेति । रूपकस्याप्युपलक्षणमेतत् ॥

(इति) संसृष्टिः ॥

मू०—कथितस्तुतस्तु सङ्करोऽयं त्रिविधो यः क्षीरनीरवद्भवति॥७६॥

क्षीरनीरवदिति क्षीरनीरन्यायेन । समवायन्यायेनेति यावत् । अनौत्कट्येन वर्तनात् । त्रिविधोऽङ्गाङ्गिभावेन संशयेनैकवाचकानु-प्रवेशेन च ।

क्रमेण यथा

एतावन्तमनेहसं सकुतुकं संवर्धिता यैर्वयं
क्वेते नः प्रभवो गता इति नभश्चूडास्पृशः शाखिनः ।
औत्सुक्यान्मकरन्दबाष्पभरितैः पुष्पेक्षणैस्त्वद्रिपु-
क्षोणीन्द्रान्नरसिंह देव नृपते पश्यन्ति सौधाद्बहिः ॥

अत्र दर्शनानुगुण्येन प्रसूनानामीक्षणत्वेन रूपणात् पादपानां दर्शनोचितपुरुषत्वेन रूपणं सिद्धं प्रतीयमानोत्प्रेक्षां प्रति हेतुत्वमवलम्बत इत्यनयोरङ्गाङ्गिभावेन सङ्करः ।

एष चिन्तामणिः किं नु किन्वयं कल्पपादपः ।
किन्वसौ कामधेनुर्वा न चेत्यागः किमीदृशः ॥

अत्र एष इति यदि विशेष्यं तदानीमशेन नरसिंहदेवं निर्दिश्य चिन्तामणित्वेन रूपणात् रूपकमिदम् । अथ विशेषणं तदा पुरोवर्ति चिन्तामणिरित्यनेन सह नरसिंहदेवस्यैकतयाध्यवसितत्वादतिशयोक्ति-रित्यनयोरन्यतरनिश्चयाभावात् सन्देहेन सङ्करः ।

प्रतिभटकान्ताकुचतटमकरीलुण्टाकचापटङ्कारः ।
वीर नृसिंह इवाजौ वीरनृसिंहश्चिरं जयति ॥

अत्र लाटानुप्रासेन सहानन्वयस्यैकवाचकानुप्रवेशेन सरङ्कः ॥

इति श्रीमतो महामाहेश्वरस्य कवेर्विद्याधरस्य
कृतावेकावलीनाम्न्यलङ्कारशास्त्रे
अर्थालङ्कारनिरूपणं नाम
अष्टमः उन्मेषः ॥

व्या०—अथ सङ्करं लक्षयति— कथित इत्यादि । यत्रैषामलङ्काराणां क्षीरनीरवन्मिश्रणं निबध्यते स सङ्करः । स च वक्ष्यमाणभङ्ग्या त्रिविध इत्यर्थः । क्षीरनीरवदित्येतद्विवृणोति— क्षीरनीरवदित्यादि । क्षीरनीरवद्भावे युक्तिमाह— अनौत्कट्येन वर्तनादिति । मिश्रणस्यानुत्कट-भेदत्वेन वर्तनात् क्षीरनीरवद्भाव इत्यर्थः । त्रैविध्यं विवृणोति— त्रिविध इत्यादि । एतावन्तमित्यादि । अनेहसं कालम् । अत्यन्तसंयोगे द्वितीया । नभश्चूडास्पृशोऽभ्रङ्कषा इत्यर्थः । बहिरिति । स्थितानीति शेषः । पश्यन्तीति । पश्यन्तीवेत्यर्थः । अत एव व्यञ्जकाप्रयोगात् प्रतीयमानोत्प्रेक्षा । अथास्याः

पुष्पेक्षणैः शाखिन इत्येकदेशविवर्तिरूपकेण सहाङ्गाङ्गिभावं विविनक्ति— अत्रेत्यादि । रूपकसाधकमाह— दर्शनेनेति । रूपकस्योत्प्रेक्षाङ्गत्वे निमित्तमाह— हेतुत्वमिति । तद्धेतुत्वेन तच्छेषत्वात्तदङ्गमित्यर्थः । हेतुत्वे योग्यतामाह— सिद्धमिति । सन्देहसङ्करमुदाहरति— एष इति । इह सन्देहमुद्घाटयति । अत्रेत्यादि । किं चात्र नुशब्देन चिन्तामणित्वादिसन्देहात् सन्देहालङ्कारः प्रधानम् । तस्योक्तसङ्करोत्थापितत्वात्तेन सहास्याङ्गाङ्गिभावेन सङ्कर इति विशेषश्च । तृतीयं भेदमुदाहरति— प्रतिभटेत्यादि । इह वीरनृसिंह इत्येकस्मिन् वाचकेऽनन्वयलाटानुप्रासयोरनुप्रवेशादेकवाचकानुप्रवेशलक्षणसङ्करोऽयमित्याह— अत्रेति ॥

इति सङ्करः ॥

जगति विविधविद्यासिन्धुमुष्टिन्धयानां
व(प)रभणितिपरीक्षा युज्यते सज्जनानाम् ।
तदिह मम निबन्धे दूषणं भूषणं वा
भवति यदि विदग्धैस्तद्व्यवश्यं विमृश्यम् ॥

पारीणाः पदसागरस्य कतिचित् तन्त्रे स्वतन्त्राः परे
केचित् कर्कशतर्क(तास)वक्रभणितिप्रौढप्रियम्भावुकाः ।
अन्ये सत्कवितामृताब्धिलहरीमुष्टांशमुष्टिन्धया
नैते केऽपि वयं तु किं तु त इमे सर्वे बहूकुर्वते ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीण
श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायाम्
एकावलीव्याख्यायां तरलाख्यायाम्
अर्थालङ्कारनिरूपणाख्यः
अष्टम उन्मेषः ॥

अथ अलङ्कारसूचकानि पद्यानि

एकामेकावलीमेव कण्ठे धत्त कवीश्वराः ।
आः किमन्यैरलङ्कारैरसारैर्भारदायिभिः ॥

उपमा सोपमेयोपमा स्यात्तद्वदनन्वयः ।
स्मरणं रूपकं चापि परिणामस्तथा मतः ॥ १ ॥

सन्देहो भ्रान्तिमांस्तद्वदुल्लेखोऽपह्नुतिस्तथा ।
उत्प्रेक्षातिशयोक्ती च तुल्ययोगित्वदीपके ॥ २ ॥

प्रतिवस्तूपमा चैव दृष्टान्तश्च निदर्शना ।
व्यतिरेकः सहोक्तिश्च विनोक्तिश्च तथा स्मृता ॥ ३ ॥

समासोक्तिः परिकरश्लेषौ परिकराङ्कुरः ।
अप्रस्तुतप्रशंसार्थान्तरन्यासस्तथा मतः ॥ ४ ॥

पर्यायोक्तं तथा चैव व्याजस्तुतिरपि स्मृता ।
आक्षेपश्च मतोऽनिष्टविध्याभासो विरोधकः ॥ ५ ॥

विभावना विशेषोक्त्यतिशयोक्ती तथा स्मृते ।
असङ्गतिश्च विषमं समं चैव विचित्रकम् ॥ ६ ॥

अधिकं तद्वदन्योन्यं विशेषोऽपि तथा मतः ।
आघातस्तावदपरस्तथा कारणमालिका ॥ ७ ॥

एकावली तथा चैव मालादीपकमेव च ।
सारश्च काव्यलिङ्गं चाप्यनुमानं तथैव च ॥ ८ ॥

यथासंख्यं च पर्यायः परिवृत्तिस्तथा स्मृता ।
परिसंख्या मता तद्वदर्थापत्तिविकल्पकः ॥ ९ ॥

समुच्चयस्तत्करश्च समाधिः प्रत्यनीककः ।
प्रतीपं मीलितं चैव सामान्यं च तथा स्मृतम् ॥१०॥

तद्गुणातद्गुणावुत्तरं प्रश्नोत्तरिका तथा ।
सूक्ष्मं व्याजोक्तिवक्रोक्ती स्वभावोक्तिस्तथा मता॥११॥

भाविकं तद्वदपग्मुदात्तं च तथा स्मृतम् ।
संसृष्टिः सङ्करश्चेति प्रोक्तालङ्कारसन्ततिः ॥१२॥

इत्यलङ्कारसूचकानि पद्यानि ॥

समाप्तोऽयं ग्रन्थः ॥

परिशिष्टम्— 'क'

एकावलीकारिकाणां वर्णानुक्रमः

परिशिष्टम् 'ख'

एकावलीश्लोकानां वर्णानुक्रमः

परिशिष्टम् 'ग'

एकावल्यामुद्धृतानां श्लोकानां वर्णानुक्रमः

परिशिष्ट — घ

1. अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्यं काक्वाक्षिप्तमसुन्दरम् ।
व्यङ्ग्यमेव गुणीभूतव्यङ्ग्यस्याष्टौ विधाः स्मृताः ॥
—काव्यप्रकाश V. 1. १३३

2. अग्नित्वलक्षितादर्थाद्यत् पैङ्गल्यादि गम्यते ।
तेन माणवके बुद्धिः सादृश्यादुपजायते ॥
—आचार्य, Lide Commentary on
—तन्त्रवार्तिक, I. 4. 22. ६३

3. अत्र चातिशयाख्यं यत्फलं प्रयोजकत्वान्निमित्तं
तत्राभेदाध्यवसायः ।
—अलङ्कारसर्वस्व (P. 69) २४५

4. अद्य क्रियाः कामदुघाः क्रतूनाम् ।
—रघुवंश १०२

5. अद्रावत्र प्रज्ज्वलत्यग्निरुच्चैः
प्राज्यः प्रोद्यन्नुज्ज्वलत्येष धूमः ।
—काव्यप्रकाश, VIII. १५६

6. अद्वैतं सुखदुःखयोरनुगतम्....
—भवभूति, उत्तररामचरित, I. 18. १०२

7. अध्यवसितप्राधान्ये त्वतिशयोक्तिः ।
—अलङ्कारसर्वस्व, ६६

8. अनपह्नुतरूपस्य विषयस्योपरञ्जनम् ।
भवेद्विषयिणा यत्र रूपकं तत्प्रकीर्त्यते ॥ २२४

9. अनिष्टाभ्यागमोत्प्रेक्षा शङ्का ।
—प्रतापरुद्रयशोभूषण, रसप्रकरण, १०८

10. अनुकरणे तु सर्वेषाम् (दोषाणामप्यदुष्टतैव)
—काव्यप्रकाश, VII. ५०

11. अघुवाद्यमधुक्त्वैव न विधेयमुदीरयेत् । १६६

12. अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्य स्थितिस्तु यः ।
शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः ॥
—काव्यप्रकाश, IV. १०९

13. अभावाद् भावोऽतिरिच्यते ।

14. अभिधेयाविनाभूते प्रतीतिर्लक्षणेष्यते ।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता
Comm. on तन्त्रवार्त्तिका I. 4. 22. ६५

15. अभिप्रेतपदावासः कदा नः सम्भविष्यति ।
नीचसाधनमेतेषां परोत्सर्गैकजीविनाम् ॥
—प्रतापरुद्रयशोभूषण, दोषप्रकरण, ४०

16. अभेदाध्यवसायो हि फलेऽतिशयनामनि ।
न पुनः फलितोऽस्त्यत्र भेदोऽभेदे न सिध्यति ॥
—अलङ्कारसर्वस्वसञ्जीविनी, २५२

17. अमुना सह निरर्थं गच्छ योऽस्मान् द्वेष्टि । १७४

18. अयं वाव यः पवते सोऽग्निर्नाचिकेतः ।

19. अर्थश्लेषस्य स विषयो यत्र शब्दपरिवर्तनेऽपि २७८
न श्लेषत्वखण्डना ।
—काव्यप्रकाश, IX.

20. अवयवविपर्यासवचनमप्राप्तकालम् ।

—न्यायसूत्रं, V. 11. १६६

21. अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु ।

—किरातार्जुनीय, IX. 7. २३७

22. आचाराच्च स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम् । ८

23. आभासत्वे विरोधस्य विरोधाभासता मता ।

—प्रतापरुद्रयशोभूषण, अलङ्कारप्रकरण ३

24. आलक्ष्यदन्तमुकुलान्

—अभिज्ञानशाकुन्तल, VII. १०२

25. उदारकीर्तेरुदयं दयावतः । ६१

26. उपमैव तिरोभूतभेदा रूपकमिष्यते ।

—काव्यादर्श, II. 66. २२३

27. उपादेयविधेयत्वगुणत्वानि यजेः फले ।

उद्देश्यत्वानुवाद्यत्वप्राधान्यानि गुणान्वये ॥ १५८

28. उभा वामिन्द्राग्नी... । ३२१

29. एकत्रैवानुरागश्चेत् तिर्यङ्म्लेच्छगतोऽपि वा ।

योषितो बहुसक्तिश्चेद्रसाभासस्त्रिधा मतः ॥

—प्रतापरुद्रयशोभूषण, रसप्रकरण १०५

30. एकद्वित्रिचतुष्पादयमकानां विकल्पनाः ।

—काव्यादर्श, III. १९८

31. एकस्यानेकत्र प्राप्तावेकत्र नियमनं परिसङ्ख्या ।

—अलङ्कारसर्वस्व. ११६

32. एतच्चाग्नेः प्रियं धाम यद् घृतम् । १७४

33. एष निष्कण्टकः पन्था यत्र संपूज्यते हरिः । १७४

34. कार्यं कारणसंयोगि समवायिविरोधि वा । ८८

35. कालाक्षमत्वमौत्सुक्यम् ।

—प्रतापरुद्रयशोभूषण, रसप्रकरण १०८

36 का विसमा देवगई....।

quoted in काव्यप्रकाश, X उत्तरालङ्कार. (P. 710) ३४०

37. काव्यं यशसे कृते....।

—काव्यप्रकाश, I. 2. १६

38. काव्यशोभायाः कर्तारो गुणाः'

—काव्यालङ्कारसूत्र. I ४८

39 काव्यालापाँश्च वर्जयेत् । १६

40. किमाद्यपेक्षितैः पूर्णः समर्थः प्रत्ययो विधौ ।
तेन प्रवर्तकं वाक्यं शास्त्रेऽस्मिन् चोदनोच्यते ॥

—आचार्याः । १२

41. क्षात्रधर्मो हि विजयः क्षत्रियस्य हि जीवितम् । १२०

42. क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति तु यातं ॥
(Quoted in काव्यप्रकाश, X. व्यतिरेक;
also qnoted in अलङ्कारसर्वस्व and
रुद्रटा काव्यालङ्कार) २६४

43. गीष्पतिर्धिषणो गुरुः ।

—अमरकोश, I. 24. १९३

44. गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी
शब्दानां प्रवृत्तिः ।

—महाभाष्य ५२

45. ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्त्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥

रघुवंश, IV. 66 १९१

46. ततः स्वफलेनोपादेयविधेयगुणभूतयागग्रहणाद्
गुणेन चोद्देश्यानुवाद्यप्रधानभूतापेक्षणात् तन्यत्वाभावः ।

—तन्त्रवार्तिकः । १५७

47. तत्त्वमार्गानुसन्धानाद् तत्त्वनिर्धारणं मतिः ।

—प्रतापरुद्रयशोभूषण, रसप्रकरण

(V. L· अर्थनिर्धारणम्) १०८

48. तत्सन्देहेऽपि तदुपादानस्य न्याय्यत्वादन्यथा-
नुपस्थितपरिपन्थिभिः पार्थिवैर्द्विरदयूथपतयो
नाद्रियेरन् ।

—आचार्याः । ८

49. तथागतायां परिहासपूर्वं सख्यां सखी वेत्रवती बभाषे ।
आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ॥

—रघुवंश, VI. 82. ७३

50. तददश्चन्द्रमसि कृष्णम् । १७४

51. तदन्योन्यं मिथो यत्रोत्पाद्योत्पादकता भवेत् ।

—प्रतापरुद्रयशोभूषण, रसप्रकरण १२६

52. तया स पूतश्च विभूषितश्च ।

कुमारसम्भव, I. 28. २१७

53. तर्को विचारः सन्देहात् भ्रूलताङ्गुलिनर्तकः ।

—प्रतापरुद्रयशोभूषण, रसप्रकरण १०८

(सन्देहात् कल्पनान्यत्वं विकल्पः परिकल्पितः)

54. तस्मात्पदैरभिहितैः पदार्थैर्लक्षणया वाक्यार्थः
प्रतिपाद्यते । २५

55. तात्पर्यार्थोऽपि व्यङ्ग्यार्थ एव ।
—प्रतापरुद्रयशोभूषण, काव्यप्रकरण

56. तामिमामप्रदाहाय....। १७४

57. त्रीनुदाहरणान्तान् वा यद्वोदाहरणादिकान् ।
मीमांसकाः सौगतास्तु सोपनीतमुदाहृतम् ॥ ३२०

58. त्वदपाङ्गाह्वयं जैत्रमनङ्गास्त्रं यदङ्गने ।
मुक्तं तदन्यतस्तेन सोऽप्यहं मनसि क्षतः ॥ २०३

59. दूरकार्यस्तत्सहजः कार्यानन्तरजस्तथा ।
अयुक्तो युक्तकारी चेत्यसङ्ख्याश्चित्रहेतवः ।
—सरस्वतीकण्ठाभरण, III ३०३

60. दृशेर्बुद्ध्यर्थत्वान्नित्यप्राप्तौ पक्षे निवर्त्यते ।
—कैयटः । १८४

61. देवतापादसंस्पर्शस्तल्लिङ्गस्पर्शनं तथा । १८५

62. द्विहस्तं च द्विकर्णं च द्विनेत्रं चैकनासिकम् ।
गुरुर्देवं शिरः पायात् सशिश्नवृषणोदरम् ॥ ३४६

63. धारास्याम्राम्बुसन्तत्योर्विषं गरलतोययोः । १४२

64. धृतिश्चित्तस्य नैःस्पृह्यं ज्ञानाभीष्टागमादिभिः ।
—प्रतापरुद्रयशोभूषण, रसप्रकरण १०८

65. ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत् ।
—प्रतापरुद्रयशोभूषण, रसप्रकरण १०८
(with the reading इष्टानभिगमाद् ध्यानं
चिन्ताशून्यत्वतापकृत् ।)

66. ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ।
—शिवमहिम्नस्तोत्र, ११

67. न भीतं न पलायितम् । १२८

68. नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।
रघुवंश, IV. 10 १६५

69. नाक्षतैः पूजयेद्विष्णुं न केतक्या महेश्वरम् । १८९

70. निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः ।
काव्यालङ्कारसूत्र, V. 2. 22. १८२

71. निभालयत ईक्षते ।
—भट्टमल १२४

72. निमित्तान्तरं नैमित्तिकम् । ६

73. निरकासयद्रविमपेतवसुं
वियदालयादपरदिग्गणिका ।
—शिशुपालवध, IX. 10. २२६

74. निशाकरकरस्पर्शान्निशया निर्वृतात्मना ।
अमी स्तम्भादयो भावा व्यज्यन्ते रज्यमानया ॥
—मल्लिनाथ २१

75. पदार्थावगमनसमनन्तरभाविनी समन्वयशक्तिस्तात्पर्यम् ।
—अलङ्कारसर्वस्वसञ्जीवनी ५२

76. पदार्थैरनुक्तोऽसौ वाक्यार्थः संप्रतीयते ।
—तन्त्रवार्तिक, on II. 1. 46. ३५

(V. L. पदार्थैः पदविज्ञातैः वाक्यार्थः
प्रतिपाद्यते ।)

77. परिवड्ढइ विण्णाणं संभाविज्जइ जसो
विसप्पंति गुणा ।
सुव्वइ सुपुरुसचरिअं किं ते जेण ण हरंति कव्वाला वा ॥
—सेतुबन्ध, I. १६

78. परोत्कर्षाक्षमेर्ष्या स्याद्दौर्जन्यान्युतोऽपि वा ।
—दशरूपक, IV 16 १०३
(V.L. परोत्कर्षाक्षमाऽसूया गर्वदौर्जन्यमन्युजा ।

79. पर्यायेण द्वयोस्तस्मिन्नुपमेयोपमा मता ।
—प्रतापरुद्रयशोभूषण, अलङ्कारप्रकरण १२६

80. पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा ।
—रघुवंश, VIII. 4.

81. पाणिपल्लवविधूननमन्तः ।
—किरातार्जुनीय, IX. 50 २३२

82. पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ॥
—कुमारसम्भव, I. 44 २५१

83. प्रधानवाक्यमङ्गोक्त्याकाङ्क्षं प्रकरणं मतम् । ५

84. प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥ १३

85. भिन्नत्वेन प्रतीयमानयोरैक्यारोपणमुपचारः
यथा गौर्वाहीकः । ४५

86. भूतं भव्यायोपदिश्यते । ८६

87. माधुर्य सौकुमार्योपपन्ना पाञ्चाली
मुकुलित नयनै मुखारविन्दै घन महापतिव पक्षणा भरेण
—काव्यालङ्कारसूत्र I. 2. 13 २३१

88. मृगीपरिभवो व्याघ्र्यामित्यवेहि त्वया कृतम् ।
रघुवंश; XII. 37. १८५

89. मृदु तीक्ष्णतरं यदुच्यते तदिदं मन्मथ दृश्यते त्वयि । १७४

90. मौर्वी द्वितीयमिव कार्मुकस्य ।
—कुमारसम्भव, III. 55. १५८

91. य एषोऽन्तर्हृदय आकाशः ।
तैत्तिरीयोपनिषद्, शिक्षा. V. १०३

92. यत्तु दन्दह्यते लोकमदो दुःखाकरोति माम् ।
—शिशुपालवध; II. 11. १७४

93. यत्र किञ्चित्सामान्यं कश्चिद्य विशेषः स
विषयः सदृशतायाः । २०६

94. यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं
प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं
शरीरमाकाशमौषधीर्लोमानि वनस्पतीन् केशा
अप्सु लोहितं च रेतश्च निधीयते ।
—श्रुतिः १०३

95. यदा तु विषयो रूपात् स्वस्मादप्रच्युतो भवेत्
उपयुक्त्ये पराकारः परिणामस्तदा मतः ॥
—अलङ्कारसर्वस्वसंजीवनी २२४

96. यदि पुनः सोऽयमिषोरिव....। ४८

97. यदेतदस्यानुतटं विभाति । १७२

98. यभृत्यं मण्डलाकारं तद्धल्लीसक मुच्यते । २३९

99. यावज्जीवमग्निहोत्रं जुहोति । ५–६

100. योऽयमश्वः पताकेयम्....।
—उत्तररामचरित, VI. १७२

101. योऽसौ तपन्नुदेति । १७३

102. रसभावतदाभासभावप्रशमानां निबन्धे रसवत्प्रेयऊर्जस्वि-
समाहितानि भावोदयभावसन्धिभावशबलताश्च पृथगलङ्काराः ।
—अलङ्कारसर्वस्व. १४०

103. रसवदलङ्कारो....स्वतन्त्रालङ्काराः ।
—अलङ्कारसर्वस्व ३४५

104. रसादेरलङ्कारत्वं सनातनत्वं न भवति,
प्राधान्यदशायामलङ्कार्यत्वात् ।
अलङ्कारसर्वस्वसंजीवनी. २९

105. राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः ।
तस्याः मुखं तदा साम्यपराभवमवाप्नुयात् ॥
—also quoted in काव्यप्रकाश, X,
as third variety of अतिशयोक्ति. २५२

106. रीतिरात्मा काव्यस्य ।
—काव्यालङ्कारसूत्र, I. 2. 6. ४८

107. रौद्रादौ रसे व्यङ्ग्ये कटुत्वं गुणः ।
—काव्यप्रकाश, VII ४०

108. लक्षणा तेन षड्विधा ।
—काव्यप्रकाश, II ६७

109. वपुर्विरूपाक्षमलक्ष्यजन्मता ।
—कुमार. V. 72. २५

110. वसन्तमृतूनाम् । ३२१

111. वाक्येनैव हि वाक्यार्थः साक्षादेवाभिधीयते ।
उपलक्षणतश्चास्य सम्बन्धग्रहसम्भवः ॥
वाक्यं गोपदयुक्तं यत् तत् सास्नादिसमन्वितम् ।
वाक्यार्थं वदतीत्येवं व्युत्पत्तिः सुकरैव हि ३७

112. वाजपेयस्तिष्ठतु शरद्वर्ण्यताम् । ३

113. विगलन्मधुव्रतकुलाश्रुजलं न्यमिमीलदब्जनयनं नलिनी ।
—शिशुपालवध, IX. 11. २२६

114. विरोधे गुणवादः स्यात् । २१९

115. विशुद्धज्ञाननेत्राय त्रिवेदीदिव्यचक्षुषे ।
श्रेयः प्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥ ८

116. विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः ।
—अलङ्कारसर्वस्व, २४४

117. विषय्याकारमारोप्य विषयस्थगनं यदा ।
रूपकत्वं तदा तत्र रञ्जनेन समन्वयः ॥
—अलङ्कारसर्वस्वसंजीवनी २३४

118. व्रज विटपममुं ददस्व तस्यै ।
—शिशुपालवध, XV. 87. १७३

119. व्रजतः क्व तात व्रजसि ।
—शिशुपालवध, VII. 53. ४०

120. शक्तिरेव सम्बन्धो भेदश्चास्या न विद्यते ।
—आचार्याः ५०

121. शब्दवृद्धाभिधेयाँश्च प्रत्यक्षेणात्र पश्यति ।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥ ३७
अन्यथानुपपत्त्या च बुद्ध्वा शक्ति द्वयाश्रिता-
मर्थापत्त्यैव बुध्येत सम्बन्धं त्रिप्रमाणकम् ॥ ३७

122. शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम् । ५०

123. शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः ।
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहिता स्थितिः ॥
quoted in काव्यप्रकाश, VIII १५३

124. शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥
—किरातार्जुनीय II. 32. १९१

125. श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः ॥
इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः ॥
—काव्यादर्श, I. 41, 42. १५३

126. सगुणीभूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः ।
सङ्करसंसृष्टिभ्यां पुनरप्युद्योतते बहुधा ॥
—ध्वन्यालोक, III. 88. १४८

127. सत्त्वत्यागादनौद्धत्यं दैन्यं कार्पण्यसम्भवम् ।
—प्रतापरुद्रयशोभूषण, रसप्रकरण. १०८

128. स निर्विश्य यथाकामं तटेष्वालीढचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥
—रघुवंश, IV, 51. १६४

129. समग्रगुणा वैदर्भी ।
—काव्यालङ्कारसूत्र, I. 2. 11. १५१

130. सर्वमभ्यर्हितद्रव्यं प्रच्छादनमपेक्षते ।
—तन्त्रवार्तिक (P. 920) १३३

131. सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ।

—काव्यप्रकाश, II. ५३

132. ससैन्यश्चान्वगाद्रामम्.. । १०२

133. साक्षात् प्रत्यक्षतुल्ययोः । ५१

134. सा नूनमाः किमथवा हतजीवितेन । १२२

135. सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता ।

—प्रतापरुद्रयशोभूषण, अलङ्कारप्रकरण ११८

136. सिद्धं धार्मिगमुद्दिश्य साध्यधर्मो विधीयते । १६६

137. सिद्धे सत्यारम्भो नियमार्थः । २०५

138. सुप्ता किं नु मृता नु किं मनसि मे लीना

विलीना नु किम् ।

—अमरुशतक, २३७

139. सैषा भार्गवी वारुणी विद्या.. ।

—तैत्तिरीयोपनिषद्, भृगुवल्ली, १७४

140. सैषा स्थली यत्र विचिन्वतां त्वां.. ।

—रघुवंश, XIII. 23. १७४

141. सोऽनेकस्य सकृत्पूर्वः ।

—काव्यप्रकाश, IX. १९५

142. स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।

अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥ २७८

143. स्मरामि वानीरगृहेषु सुप्तम्.. ।

—रघुवंश, XIII. 35. १८५

144. स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते ।

—प्रतापरुद्रयशोभूषण, रसप्रकरण. १०८

(V.L. पूर्वानुभूतविषयज्ञानं स्मृतिरुदाहृता ।)

145. स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥
—काव्यप्रकाश, II. ६१

146. स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ।
—वेणीसंहार, I. ४०

147. स्वार्थत्यागे समानेऽपि सह तेनान्यलक्षणा ।
यत्रेयमजहत्स्वार्था जहत्स्वार्था तु तं विना ॥
स्वार्थैकांशत्यागादंशान्तरमेव लक्ष्यते यत्र ।
सा जहदजहत्स्वार्था तत्त्वमसीत्यादिविषयदृश्येयम् ॥ ६२

148. स्वार्थबाधेन वचनस्य परार्थत्वात् ।

149. हस्ताग्रा अग्रहस्ता अग्रद्वयोर्गुणगुणिनोर्भेदात् ।
—काव्यालङ्कारसूत्र, V. 2, 2. ६५

150. हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।
—प्रतापरुद्रयशोभूषण, अलङ्कारप्रकरण १२२